BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 761.

पराशर-स्मृतिः ।

PARÁS'ARA SMṚITI

BY

MAHA'MAHOPA'DHYA'YA CHANDRAKA'NTA

TARKA'LANKA'RA,

VOL III.

VYAVAHA'RA-KA'ṆDA

FASCICULUS I.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1890.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS. TRUBNER & CO.
57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

Title		Rs.	As.
Advaita Brahma Siddhi, Fasc. I—IV @ /6/ each	Rs.	1	8
Agni Puráṇa, (Sans.) Fasc. II—XIV @ /6/ each		4	14
Aṇu Bháshyam, Fasc. I		0	6
Aitareya Áraṇyaka of the Rig Veda, (Sans.) Fasc. I—V @ /6/ each		1	14
Aphorisms of Sáṇḍilya, (English) Fasc. I		0	6
Aphorisms of the Vedánta, (Sans.) Fasc. VII—XIII @ /6/ each		2	4
Ashṭasáhasriká Prajnápáramitá, Fasc. I—VI @ /6/ each		2	4
Aśvavaidyaka, Fasc. I—V @ /6/ each		1	14
Avadána Kalpalatá by Kshemendra (Sans. & Tibetan) Vol. I Fasc. 1—2 @ 1/		2	0
Bhámatí, (Sans.) Fasc. I—VIII @ /6/ each		3	0
Brahma Sútra, (English) Fasc. I		0	12
Brihaddevatá, (Sans.) Fasc. I—II @ /6/ each		0	12
Bṛihaddharma Puráṇam, Fasc. I—II @ /6/ each		0	12
Bṛihat Áraṇyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each		1	2
Ditto (English) Fasc. II—III @ /6/ each		0	12
Bṛihat Saṃhitá, (Sans.) Fasc. II—III, V—VII @ /6/ each		1	14
Chaitanya-Chandrodaya Náṭaka, (Sans.) Fasc. II—III @ /6/ each		0	12
Chaturvarga Chintámaṇi, (Sans.) Vols. I, Fasc. 1—11; II, 1—25; III, Part I Fasc. 1—18, Part II, Fasc. 1—5 @ /6/ each		22	2
Chhándogya Upanishad, (English) Fasc. II		0	6
Daśarupa, Fasc. II and III @ /6/		0	12
Gobhilíya Gṛihya Sútra, (Sans.) Fasc. I—XII @ /6/ each		4	8
Hindu Astronomy, (English) Fasc. I—III @ /6/ each		1	2
Kála Mádhava, (Sans.) Fasc. I—IV @ /6/		1	8
Kátantra, (Sans.) Fasc. I—VI @ /12/ each		4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each		10	8
Kaushitakí Brahman Upanishads, Fasc. II		0	6
Kúrma Puráṇa, (Sans.) Fasc. I—IX @ /6/ each		3	6
Lalita-Vistara (Sans.) Fasc. II—VI. @ /6/		1	14
Lalita-Vistara, (English) Fasc. I—III @ /12/ each		2	4
Madana Párijáta, (Sans.) Fasc. I—VII @ /6/ each		2	10
Manuṭíká Sangraha, (Sans.) Fasc. I—III @ /6/ each		1	2
Márkaṇḍeya Puráṇa, (Sans.) Fasc. IV—VII @ /6/ each		1	8
Márkaṇḍeya Puráṇa (Eng.) Fasc. I—II @ /12/ each		1	8
Mímáṃsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each		6	12
Nárada Pancharátra, (Sans.) Fasc. IV		0	6
Nárada Smṛiti, (Sans.) Fasc. I—III @ /6/		1	2
Nayavártikam, (Sans.) Fasc. I		0	6
Nirukta, (Sans.) Vol. I, Fasc. IV—VI; Vol. II, Fasc. I—VI; Vol. III, Fasc. I—VI; Vol. IV, Fasc. I—VII @ /6/ each Fasc.		8	4
Nítisára, or The Elements of Polity, By Kámandaki, (Sans.) Fasc. II—V @ /6/ each		1	8
Nyayabindutika (Sans.)		0	10
Nyáya Darśana, (Sans.) Fasc. III		0	6
Nyáya Kusumánjali Prakaraṇam (Sans.) Vol. I, Fasc. 1—5 @ /6/ each		1	14
Pariśishṭa Parvan (Sans.) Fasc. I—IV @ /6/ each		1	8

(*Continued on third page of Cover.*

Parâśara

PARÁŚARA SMRITI (PARÁŚARA MÁDHAVA)

WITH THE GLOSS

OF

MÁDHAVÁCHÁRYYA

EDITED WITH NOTES

BY

MAHÁMAHOPÁDHYÁYA CHANDRAKÁNTA TARKÁLANKÁRA

PROFESSOR, SANSKRIT COLLEGE

VOLUME III

CALCUTTA
PRINTED AT THE BAPTIST MISSION PRESS
1899

श्रीगणेशाय नमः ।

पराशरमाधवः ।

व्यवहारकाण्डम् ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥

सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् सज्जनसङ्गतीर्थनिपुणः सद्वृत्ततीर्थं श्रयन् ।
लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो-
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम्(१) ॥

---

(१) सोऽहं माधवाचार्य्यनामा विवेकरूपस्य तीर्थस्य पदवीं मार्गं प्राप्य हृदि अव्याहतं श्रीकण्ठं महादेवं भजे ध्यायामीत्यर्थः। कीदृशो-ऽहं? आम्नायो वेदस्तद्रूपे तीर्थे परं केवलं मज्जन् स्नानं कुर्व्वन्। तदेकपरायण इत्यर्थः। तथा, सज्जनसङ्गरूपेण तीर्थेन निपुणः, निर्णीतशास्त्रतत्त्वः। तथा, सद्वृत्तं साधूनामाचरणं, तदेव तीर्थं श्रयन् आश्रयन्। तथा, श्रीभारतीतीर्थतः तन्नामकाद्गुरोः सका-

सत्यैकव्रतपालको द्विगुणधीः श्रर्थी चतुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढः सप्ताङ्गसर्वंसहः ।
अष्टव्यक्तिकलाधरो नवनिधिः पुण्यद्व्यप्रत्ययः
मार्त्तोद्धायधुरन्धरो विजयते श्रीबुक्कणः क्ष्मापतिः(१) ॥

श्चात् लब्धां प्रभावलहरीमिष्टदेवताप्रसादरूपां लहरीमाकलयन्
प्राप्नुवन्नित्येकोऽर्थः । भारतीरूपात्तीर्थात् लब्धां प्रभावलहरीं पाण्डि-
त्यरूपामाकलयन्नित्यपरः । तथा, विद्या ब्रह्मविद्या, तद्रूपं तीर्थं-
मुपाश्रयन् सेवमान इत्यर्थः । एतस्यैव विद्यारण्यइति नाम प्रसिद्धम् ।
इति काशीपुस्तके टीका ।

(१) धर्म्मवर्त्तकं स्वदेशाधिपतिं वर्णयति सत्येति । श्रीमान् बुक्कणनामा
क्ष्मापतिः राजा विजयते । कीदृशः ? सत्यरूपं यदेकं मुख्यं व्रतं,
तत्पालकः । तथा द्विगुणधीरिति परापेक्षया द्विगुणबुद्धिमानि-
त्यर्थः । अथवा, द्वौ गुणौ सत्वरजोरूपौ यस्यां, तादृशी धीर्यस्य,
न तु तमोगुणशालिनीत्यर्थः । तथा, त्रीन् धर्म्मार्थकामानर्थयते
प्रार्थयते, तच्छीलः । तथा, चतुर्णां वेदानां सामाद्युपायानां वा
वेदिता ज्ञाता । तथा, पञ्चसु स्कन्धेषु तन्नामकेषु सहायादिपदार्थेषु
कृती कुशलः । यदुक्तं नीतिशास्त्रे ।

"सहायाः साधनोपाया विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते"—इति ।

अस्यार्थः । सहायाः राजकार्य्ये मन्त्रिसैनिकाद्याः । तथा, कार्य्यस्य
साधने उपायाः सामादयः । तथा, देशकालयोर्विभागो व्यवस्था,
अस्मिन् काले अस्मिन् देशे अयमुपाय इत्येवंरूपा । तथा, विनि-
पातस्य दुष्ट (?) रोगोत्पातादिरूपस्य प्रतीकारो निराकरणम् ।
तथा, सिद्धिः इष्टलाभः । एते पञ्चस्कन्धा राज्याङ्गमित्यर्थः । कीदृशो-

इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैव्यस्य मेधातिथि-
र्धौम्यो धर्मसुतस्य वैण्यनृपतेः स्वौजा निमेर्गौतमिः।
प्रत्यग्दृष्टिररुन्धतीसहचरो[१] रामस्य पुण्यात्मनो-
यद्वत्तस्य विभोरभूत् कुलगुरुर्मन्त्री तथा माधवः॥
प्रज्ञामूलमही विवेकसलिलैः सिक्ता बलोपघ्निता[२]
मन्त्रैः* पल्लविता विशालविटपा सन्ध्यादिभिः षड्गुणैः।

* बलोपघ्निकामन्त्रैः,—इति पाठान्तरम्।

राजा? षड्न्वयदृढ़ः, षसां गुणानामन्वयेन संबन्धेन दृढोऽजेय इत्यर्थः। षसां शास्त्राणामित्यर्थान्तरम्। पुनः कीदृशः? सप्तभिरङ्गैः सर्वसहनशीलः। तानि च,—

"स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च"—इति

नीतिशास्त्रोक्तानि ज्ञेयानि। तथा, अष्टौ(?) व्यक्तयो भूतयो यस्य, तादृशस्य शिवस्य कलाया अंशस्य धारकः। ताश्च भूतयो जलाग्नि-यजमानचन्द्रसूर्य्याकाशवायुपुरुषा आगमोक्ताः। पुनः कीदृशः? नव-निधिः, नवसङ्ख्याका निधयो यस्य, ते च महापद्मादयः प्रसिद्धाः। नवानां रसानां निधिरित्यर्थान्तरम्। नवो नूतनो निधिरिति वा। पुनः कीदृशः? पुष्यद्दशप्रत्ययः, पुष्यन्ती वर्द्धमाना दशा यस्य, तादृशः प्रत्ययो ज्ञानं यस्य, तादृशः। तथा, स्मार्त्तानां पाषण्डिभिन्नशिष्टानामुच्छ्रायस्य वृद्धेर्धुरन्धरः तत्प्रवर्त्तक इत्यर्थः। इति काशीपुस्तके टीका।

(१) अन्तजडप्रातिकूल्येन सच्चिदानन्दरूपेणास्यति प्रकाशते इति प्रत्यक् तथा दृष्टिर्यस्येति विग्रहः। इति काशीपुस्तके टीका।

(२) प्रज्ञैव मूलं च मही च यस्याः, सा तथा। बलैरुपघ्निता जातोपघ्ना। उपघ्नः पुनराश्रयतरुः। स्पष्टमन्यत्।

शस्ता कोरकिता यशःसुरभिता सिक्ता समुद्यत्फला
सम्प्राप्ता भुवि भाति नीतिलतिका सर्वोत्तरं माधवम् ॥
श्रीमती जननी यस्य सुकीर्त्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ॥
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः ॥

स माधवः सकलपुराणसंहिता-
प्रवर्त्तकः स्मृतिसुषमापराशरः ।
पराशरस्मृतिजगदीहिताप्तये
पराशरस्मृतिविवृतौ प्रवर्त्तते ॥

व्याख्याते आचारप्रायश्चित्ते ।

अथ व्यवहारः प्रस्तूयते।

यद्यप्यृणादानादीनामष्टादशपदानां व्यवहाराणां मध्ये कमपि व्यवहारं पराशरो न व्युत्पादितवान्, तथाप्याचारकाण्डे चतुर्णां वर्णानां क्रमेणाचारान् ब्रुवन्,—

"क्षत्त्रियस्तु प्रजास्वेव क्षितिं धर्म्मेण पालयेत्"—

इत्यस्मिन् वचने क्षत्त्रियविशेषस्य राज्ञ आचारविशेषमेवमवोचत्*, "क्षितिं धर्म्मेण पालयेत्"—इति। तत्र क्षितिपालनं नाम, क्षित्याश्रितासु प्रजासु दुष्टानां निग्रहः शिष्टोपद्रवपरिहारश्च। एतदर्थमेव हि

---

* राजाचारविशेषमेवमवोचत्,—इति पाठान्तरम् ।

जगदीश्वरस्य रामकृष्णादिरूपेणावतारः। तच्च गीतासु भगवता विस्पष्टमभिहितम्,—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे"—इति।

यथा महतां रावणादीनां शिक्षायै रामाद्यवतारः, तथा क्षुद्राणां चौरादीनां शिक्षायै राजावतारः,—इति द्रष्टव्यम्। अतएव मनुः,—

"अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥
चन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।
इन्द्रवित्तेशयोश्चैव मात्रा आहृत्य शाश्वतीः(१)॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।
तस्मादभिभवत्येष सर्वभूतानि तेजसा॥
तपत्यादित्यवच्चैव चक्षूंषि च मनांसि च।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम्॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट्।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥

(१) चन्द्रादीनां शाश्वतीर्नित्यामात्रा अंशान् आहृत्य राजानमसृजदिति पूर्व्वेण सम्बन्धः।

एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥
कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः"—इति ।

एतच्च सर्वमस्माभिराचारकाण्डएव राजधर्मान् व्याचक्षाणैः प्रपञ्चितम् । वृहस्पतिस्तु विशेषतः ऋणादानादिव्यवहारविचारमेव राजोत्पत्तिप्रयोजनमभिप्रेत्य तद्विचारक्षमत्वमुपपादयितुं इन्द्राद्यात्मकत्वं राज्ञ उदाजहार,—

"गुणधर्मवतो राज्ञः कथयाम्यनुपूर्वशः ।
धनिकर्णिकसन्दिग्धौ प्रतिभूलेख्यसाक्षिणः ॥
विचारयति यः सम्यक् तस्योत्पत्तिं निबोधत ।
सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ॥
तेजोमात्रं समुद्धृत्य राज्ञोमूर्त्तिर्विनिर्मिता ।
तस्य सर्वाणि भूतानि स्थावराणि चराणि च ॥
भूयोभोगाय कल्पन्ते स्वधर्माच्च चलन्ति च ।
नाराजके कृषिवणिक्कुसीदपशुपालनम् ।
तस्माद्वर्णाश्रमाणान्तु नेताऽसौ निर्मितः सुरैः"—इति ।

लोके हि, राजा भूपो नृप इत्येते शब्दा एकार्थवाचित्वेन प्रयुज्यन्ते। तत्र राजशब्दो रूढः, भूपनृपशब्दौ यौगिकौ। भुवं पातीति भूपः, नॄन् पातीति नृपः। तथाच राज्ञो भूपालकत्वं मनुष्यपालकत्वं च गुणः। तत्प्रयुक्तधर्मो व्यवहारविचारः। स च पूर्वं नाभिहितः, किन्तु वर्णाश्रमधर्मान् व्याचक्षाणेन वृहस्पतिना राजन्यपि क्षत्रियत्ववर्णप्र-

पुत्रोत्पत्त्याश्रमप्रयुक्तस्य धर्मोऽभिहितः। अतः परं भूपत्वगुणप्रयुक्त-व्यवहारविचारात्मको राजधर्मोऽभिधीयते। धनिको धनप्रदाता, ऋणिकस्तदीयस्यार्थस्य गृहीता, तयोः सन्दिग्धिर्विवादः(१)। प्रतिभूस्तस्य प्रत्यर्पणं कारयिष्यामीति प्रतिश्रुत्य तदीयस्य भारस्य वोढा। लेख्यं धनसङ्ख्यावृद्धिविशेषादियुक्तं पत्रम्। साक्षिण उत्तमाधमर्णयोः सम्प्रतिपन्नाः मध्यस्थाः। एतेषां प्रतिभ्वादीनां त्रयाणां सन्दिग्धिर्न्यायान्यायवर्त्तित्वाभ्यां सन्देहः। तस्मिन् सन्देहे सति योराजा विचारयितुं प्रभवति, तस्योत्पत्तिरभिधीयते इत्यर्थः। यस्माद्राजा सोमेन्द्रादिदेवतांशसम्भूतत्वादृणादानादीन् व्यवहारान् विचारयितुं प्रभवति, तस्मात्तानसौ विचारयेत्। तदाह याज्ञवल्क्यः,—

"व्यवहारान् नृपः पश्येद् विद्वद्भिर्ब्राह्मणैः सह।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः"—इति।

अत्र व्यवहारशब्दो रूढियोगाभ्यां निर्णयफलकमर्थिप्रत्यर्थि-विवादमाचष्टे। तत्र रूढिः कात्यायनेन निरूपिता,—

"प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे।
साध्यमूलस्तु यो वादो व्यवहारः स उच्यते"—इति।

न्यायः शिष्टसम्प्रतिपन्नं लौकिकमाचरणं, तस्य विस्तर इदं मदीयं धनमन्येनापहृतम्; तत् चेत्थं धनादिकमेतस्य युक्तं नान्यस्येति उपपत्तिपुरःसरो निर्णयः। तस्मिन् न्यायविस्तरे विषयीभूते सति तत्प्रवर्त्तकोऽर्थिप्रत्यर्थिनोर्यो विवादः स व्यवहार उच्यते। मदीयं धनं अन्येनापहृतं तत् पुनर्मया साधनीयमिति अर्थी यदुद्दिश्य प्रवर्त्तते,

(१) सन्दिग्धौ इति पदं सन्दिग्धिशब्दात् सप्तम्येकवचने विष्पन्नम्।

तद्धनं साध्यम् । तच्च मूलं यस्य विवादस्य, सोऽयं साध्यमूलः । स च कदा सम्पद्यते,—इत्यपेक्षायामुक्तम्,—"प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये"—इति ।

"सत्यं ब्रूयात् प्रियं ब्रूयात् न स्तेनः स्यात् न वार्द्धुषिः"—

इत्यादिविधिनिषेधावुपलभ्य विहितानुष्ठाने प्रतिषिद्धवर्जने चोत्पन्न उत्साहः प्रयत्नः । तेन साध्यो धर्मनामकः पदार्थो यदा विच्छिन्नो भवति, तदानीमयं विवाद उत्पद्यते । असति तु धर्मविच्छेदे नास्ति व्यवहारस्यावकाशः ।अतएव नारदः,—

"मनुः प्रजापतिर्यस्मिन् काले राज्यमबूभुजत् ।
धर्मैकतानाः पुरुषास्तदाऽऽसन् सत्यवादिनः ॥
तदा न व्यवहारोऽभूत् न द्वेषो नापि मत्सरः ।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्त्तते"—इति ।

वृहस्पतिस्तु द्वेषलोभादिदुष्टस्यैव व्यवहर्त्तृत्वमाह,—

"धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः ।
लोभद्वेषाभिभूतानां व्यवहारः प्रवर्त्तते" ॥

तस्माद्धर्मे विच्छिन्ने सति साध्यमूलो न्यायनिर्णयफलो विवादो-व्यवहारशब्देन रूढ्याऽभिधीयते। हारीतोऽपि निरूढिमभिप्रेत्याह,—

"स्वधर्मस्य यथा प्राप्तिः परधर्मस्य वर्जनम् ।
न्यायेन क्रियते यत्तु व्यवहारः स उच्यते"—इति।

व्यवहारशब्दस्य यौगिकमर्थं कात्यायन आह,—

"वि नानार्थेऽव सन्देहे हरणं हार उच्यते।
नानासन्देहहरणाद्व्यवहार इति स्मृतः"—इति।

व्यवहार इत्यत्र विशब्दो नानेत्येतस्मिन्नर्थे वर्त्तते । अवशब्दश्च सन्देहे वर्त्तते । ताँनेतानेवंविधानेकसन्देहहारिणोव्यवहारानर्था-दिगतरागद्वेषवशात् प्राप्तान् राजा सम्यग्विचारयेत्[१] । तद्वि-चारश्च राज्ञो गुणधर्मरूप आचारः । अतएव आचारकाण्डे व्यवहाराणामन्तर्भावमभिप्रेत्य पराशरः पृथग्व्यवहारकाण्डमकृत्वा, "चितिं धर्म्मेण पालयेत्"—इति सूचनमात्रं व्यवहाराणां कृतवान् । तानेवात्र सूचितान् व्यवहारान् वयं स्मृत्यन्तराणि तन्निबन्धनानि चानुसृत्य यथाशक्ति निरूपयामः ।

तत्र पूर्वोदाहृताभ्यां रूढियोगस्मृतिभ्यां व्यवहारस्वरूपं निरू-पितम् ।

अथ तद्भेदाः निरूप्यन्ते ।

तत्र सपणापणाभ्यां द्वैविध्यमाह नारदः,—

"सोत्तरोऽनुत्तरश्चेति स विज्ञेयो द्विलक्षणः ।

सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पणः"—इति ।

अहं यदि पराजयेयं, तदा शास्त्रप्रापिताद्दण्डद्रव्यात् अधिक-मेव द्रव्यं राज्ञे तुभ्यञ्च दास्यामीति पत्रं लिखित्वा यदभिभाषणं, तदुत्तरम् । तेन सह वर्त्तते इति सोत्तरः । तद्रहितोऽनुत्तरः । पुनरपि

(१) अर्थो धनम् । अर्थादिविषयरागद्वेषवशात् प्राप्तान् व्यवहारान् राजा विचारयेदित्यर्थः । व्यवहारानर्थान् विगतरागद्वेषवशात् प्राप्तानित्यादिपाठे, प्राप्तान् व्यवहारान् राजा विगतरागद्वेषवशात् विचारयेदिति सम्बन्धः ।

चतुष्पादादिभिस्त्रयोदशभिः प्रकारैः व्यवहारस्य अवान्तरभेदान्
तदेव निर्दिश्य विवृणोति,—

"चतुष्पाच्च चतुःस्थानः चतुःसाधन एव च ।
चतुर्हितः चतुर्व्यापी चतुःकारी च कीर्त्तितः ॥
त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा ।
अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च ॥
धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः ।
तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु ॥
चरित्रं तु स्वीकरणे राजाज्ञायां तु शासनम् ।
सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते ॥
चतुर्णामपि वर्णानां रक्षणाच्च चतुर्हितः ।
कर्त्तारं तत्साक्षिणश्च सभ्यान्राजानमेव च ॥
व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः ।
धर्मस्यार्थस्य यशसो लोकहेतोस्तथैव च ।
चतुर्णां करणादेष चतुष्कारी प्रकीर्त्तितः ॥
कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात् प्रवर्त्तते ।
त्रियोनिः कीर्त्त्यते तेन त्रयमेतद्विवादकृत् ॥
द्व्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ।
शङ्काऽसतान्तु संयोगात् तत्त्वं होढादिदर्शनात् ॥
पक्षद्वयाभिसम्बन्धात् द्विद्वारः स उदाहृतः ।
पूर्ववादस्तयोः पक्षः प्रतिवादस्तदुत्तरः ॥

भूतच्छलानुसारित्वात् द्विगतिः स उदाहृतः ।
भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् ॥
राजा सपुरुषः सभ्याः शास्त्रं गणकलेखकौ ।
हिरण्यमग्निरुदकमष्टाङ्गः स उदाहृतः ॥
ऋणादानं ह्युपनिधिः सम्भूयोत्थानमेव च ।
दत्तस्य पुनरादानमशुश्रूषाऽभ्युपेत्य च ॥
वेतनस्यानपाकर्म तथैवास्वामिविक्रयः ।
विक्रीयासम्प्रदानञ्च क्रीत्वाऽनुशय एव च ॥
समयस्यानपाकर्म विवादः क्षेत्रजस्तथा ।
स्त्रीपुंसयोश्च सम्बन्धो दायभागोऽथ साहसम् ॥
वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च ।
द्यूतं प्रकीर्णकञ्चैवेत्यष्टादशपदः स्मृतः ॥
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते"—इति ।

ननु धर्मादीनां पादत्वमयुक्तं, प्रतिज्ञोत्तरप्रमाणनिर्णयानां व्यवहारपादत्वात् । यतो याज्ञवल्क्यः प्रतिज्ञादीनि प्रकृत्याह,—

"चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः"—इति ।

बृहस्पतिरपि,—

"पूर्वपक्षः स्मृतः पादः द्वितीयश्चोत्तरः स्मृतः ।
क्रियापादस्तृतीयस्तु चतुर्थो निर्णयः स्मृतः"—इति ।

नायं दोषः । धर्मादीनां प्रकारान्तरेण पादत्वोपपत्तेः । योऽयं निर्णयाख्यश्चतुर्थपादोऽभिहितः, स धर्मादिभिश्चतुर्भिः निष्पद्यते । तदाह बृहस्पतिः,—

"धर्म्मेण व्यवहारेण चरित्रेण नृपाज्ञया।
चतुःप्रकारोऽभिहितः सन्दिग्धेऽर्थे विनिर्णयः"—इति।

तस्मान्निर्णयहेतुतया धर्मादीनां व्यवहारपादत्वं भविष्यति। तेषां च निर्णयहेतुत्वं कात्यायनेन प्रपञ्चितम्,—

"दोषकारी तु कर्त्तृत्वं धनस्वामी स्वकन्धनम्।
विवादे प्राप्नुयाद्यत्र स धर्म्मेणैव निर्णयः"—इति।

दोषकारी वाक्पारुष्यादिकारी च* यस्मिन् विवादे व्यवहारे चरित्र-राजशासननैरपेक्ष्येण धर्माभिमुखः सन्नद्धोधर्माद्भीतः† स्वकीयं दोष-कर्त्तृत्वं स्वयमेव अङ्गीकरोति; यत्तु धनस्वामी‡ व्यवहारादिशासनम-न्तरेण धर्माभिमुखाद्धनापहारिणः स्वकीयं धनं प्राप्नोति, तत्र दोषका-रिणो धर्माधिमुख्यमेव निर्णयहेतुः। व्यवहारस्य निर्णयहेतुत्वं सएवाह,—

"स्मृतिशास्त्रन्तु यत्किञ्चित् प्रथितं§ धर्मसाधकैः।
कार्य्याणां निर्णयाद्धेतोर्व्यवहारः स्मृतो हि सः॥"—इति।

यच्च धर्मशास्त्रकुशलैर्विद्वद्भिरर्थिप्रत्यर्थिनोरग्रे निर्णयाय धर्म्मशास्त्रं

---

* अत्र चकारोऽधिकः प्रतिभाति। दोषकारी इत्यस्य विवरणरूप-त्वात् वाक्पारुष्यादिकारीत्यस्य। परन्तु, सर्व्वेष्वादर्शपुस्तकेषु स्थित-त्वाद्रक्षितः।

† इत्यमेव पाठः सर्व्वेष्वादर्शपुस्तकेषु। मम तु, सन् अथवा अधर्म्माद्-भीतः,—इति पाठः प्रतिभाति।

‡ यत्तद्धनस्वामी,—इति का०। मम तु, यत्र धनस्वामी,—इति पाठः प्रतिभाति।

§ प्रापितम्,—इति का०।

|| कार्य्याणां निर्णयार्थे तु व्यवहारस्मृतौ हि सः,—इति का०। मम तु, व्यवहारः स्मृतौ हि सः,—इति पाठः प्रतिभाति।

प्रख्यापितं भवति, स निर्णयो व्यवहारजन्यः। चरित्रजन्यं निर्णय-
माह स एव.—

"यद्यदाचरते येन धर्म्यं वाऽधर्म्यमेव वा।

देशस्याचरणं नित्यं चरित्रं तद्धि कीर्त्तितम्"—इति।

शास्त्रोक्तधर्म्मादनपेतं* धर्म्यं, तद्विपरीतं अधर्म्यं, तदुभयं देशाचा-
रानुसारेण यत्र स्वीक्रियते,तत्र चरित्रं निर्णयहेतुः। राजशासनस्य
निर्णयहेतुतामाह स एव,—

"न्यायशास्त्राविरोधेन† देशदृष्टेस्तथैव च।

यद्धर्म्मं स्थापयेद्राजाऽन्याय्यं तद्राजशासनम्"—इति।

न्यायशास्त्रं व्यवहारप्रतिपादकं स्मृतिशास्त्रं, तस्य देशाचारस्य वा
विरोधेन राजा यमनुशास्ति, स निर्णयो राजशासनजन्यः। यथो-
क्तानां धर्म्मादीनां चतुर्णां मध्ये पूर्वस्य पूर्वस्य च बाध्यत्वं उत्तरो-
त्तरस्य बाधकत्वञ्च वृहस्पतिना प्रपञ्चितम्,—

"शास्त्रमेव समाश्रित्य क्रियते यत्र निर्णयः।

व्यवहारः स विज्ञेयो धर्म्मस्तेनापि हीयते॥

देशस्थित्याऽनुमानेन नैगमानुमतेन च।

क्रियते निर्णयस्तत्र व्यवहारस्तु कथ्यते॥

---

* शास्त्रोक्तधर्म्माद्युपेतम्,—इति शा० स०।

† सर्व्वेष्वादर्शपुस्तकेष्वेवमेव पाठः। मम तु, न्यायशास्त्रविरोधेन,—इति
पाठः प्रतिभाति। अतएव, उत्तरः पूर्व्वबाधक इत्यादिना राजशासनस्य
सर्व्वबाधकत्वमुक्तं सङ्गच्छते। न्यायशास्त्राविरोधेन,—इति पाठे तु,
'ऽन्याय्यम्'—इत्यत्र न्याय्यं, 'देशाचारस्य वा विरोधेन'—इत्यत्र,
देशाचारस्य वाऽविरोधेन,—इति पठितुमुचितम्।

विहाय चरिताचारं यत्र कुर्य्यात् पुनर्नृपः ।

निर्णयं, सा तु राजाज्ञा चरित्रं बाध्यते तया"—इति ।

(१)चतुर्षु वर्णेषु यः कश्चिद्राजद्रोहं कृत्वा राज्ञो भीतः सन् अतिभीतस्तथा स्वापराधमङ्गीचकार । तत्र समीपवर्त्तिनः साक्षिणो वर्णिवर्यं निवारयितुमिच्छन्तः सत्यमुल्लङ्घ्य, तत्र साक्ष्यनृतं वदेदित्येतादृशं शास्त्रमेवाश्रित्य तदीयमपराधं पर्य्यहार्षुः । तत्र व्यवहारेण धर्म्मो बाध्यते। केरलदेशादौ वेश्यागमने साक्षिभिराख्यापितेऽपि देशाचारवशान्नायं राज्ञा दण्ड्यते। तत्र चरित्रेण व्यवहारस्य बाधः। सत्यपि तादृशे देशाचारे 'त्वयैवं न व्यवहर्त्तव्यम्'—इति राजा यदाऽनुशास्ति, तदा राजाज्ञया चरित्रस्य बाधः । (२)ये एते प्रोक्ताः धर्म्मादयश्चत्वारः पादास्ते सत्यादिषु चतुर्षु प्रतिष्ठिताः। दोषकारी स्वयमनृताद्भीतोऽयमपि* अपराधोऽस्तीति सत्यं ब्रूते। अतो धर्म्मस्य सत्ये अवस्थानम्। प्रतिज्ञोत्तरयोः कृतयोः साक्षिणा यस्य पक्षोऽभ्युपगम्यते, तस्य जयः, तेन व्यवहारस्तस्य साक्षिष्ववस्थानम्। कार्णाटकदेशे बलान्मातुलसुताविवाहो न दोषाय, केरलदेशे कन्यायाः ऋतुमतीत्वं न दोषायेत्येवमादिकस्तत्तद्देशसमयः। तत्र तत्र पत्रादिशासनस्थ तिष्ठति। शिष्यते इति शासनं, राजाज्ञानुसारेण प्रजानां वर्त्तनम् । तच्च राजाज्ञायां प्रतिष्ठितम्। सामदानभेददण्डैश्चतुर्भिः दोषकारिणो दोष-

* मन्दताद्भीतोऽपि,—इति का० ।

(१) उक्तः पूर्व्वबाधक इति नारदवचनांशं व्याचष्टे चतुर्ष्वित्यादिना ।

(२) तत्र सत्ये स्थितो धर्म्म इत्यादिवचनानि व्याख्यातुमुपक्रमते, ये एते इत्यादिना ।

करणाय* चतुःसाधनत्वम्। चतुर्हितत्वं विस्पष्टम्। कर्त्रादिचतुष्टय-
व्यापित्वं मनुना स्पष्टीकृतम्,—

"पादोऽधर्मस्य कर्त्तारं पादो गच्छति साक्षिणः ।
पादः सभासदः सर्वान् पादो राजानमृच्छति"—इति ।

जेतुर्नृपस्य वा धर्म्मार्थयशसो लोकानुराग†सम्पादनाच्चतुष्कारित्वम्।
त्रियोनित्वं स्पष्टम्। अघतां कितवस्तेनादीनां संसर्गं यः करोति, तस्मि-
न्नपि चौर्य्यादिशङ्का जायते। होढ़ोऽपहृतद्रव्यादिदर्शनम्, तल्लिङ्गं वा।
तस्मादभियोगो भवति। अर्थिप्रत्यर्थिनोः यौ पूर्वोत्तरपक्षौ तौ व्यव-
हारस्य प्रवर्त्तकौ। तस्मात् द्विद्वारत्वम्। द्रव्यसङ्ख्यादिकं याथातथ्ये-
नान्यथा वा राजादीनां अग्रे यदा ब्रूते, तदा तयोरुभयस्य उपरि
व्यवहारः प्रवर्त्तते। ततो द्विगतित्वम्। अष्टाङ्गेषु सपुरुषो राजेत्ये-
तदेकमङ्गम्। अतो नास्ति नवत्वसङ्ख्याप्रसक्तिः। ऋणादानादीनां
अष्टादशपदानां स्वरूपमुपरिष्टात् तत्र तत्र विचारयिष्यते‡। एतेषां
अष्टादशपदानां मध्ये एकैकस्य पदस्य अवान्तरक्रियाभेदादनन्तभेद-
भिन्नत्वं शतशाखत्वम्। एतान् अष्टादशपदानवान्तरानन्तभेदभिन्नान्
व्यवहारान् प्रकारान्तरेण द्वेधा संस्तौति कात्यायनः,—

"द्वे पदे साध्यभेदात्तु पदाष्टादशता मते ।
अष्टादशक्रियाभेदाद्भिन्नान्यथ सहस्रधा"—इति ।

---

* दोषकारणाय,—इति का०। मम तु, दोषकारणादिति पाठः प्रतिभावि।

† धर्म्मार्थास्त्रयोलोकानुराग,—इति का०। मम तु, धर्म्मार्थयशोलोका-
नुराग,—इति पाठः प्रतिभाति।

‡ विवदिष्यते,—इति शा० स०।

द्विपदत्वं विशदयति बृहस्पतिः,—

"द्विपदो व्यवहारः स्याद्धनहिंसासमुद्भवः ।

द्विसप्तकोऽर्थमूलस्तु(१) हिंसामूलः चतुर्विधः"—इति ।

तदेतदुभयविधं सएव विवृणोति,—

"कुसीदनिध्यदेयाद्यं* सम्भूयोत्थानमेवच ।

भृत्यदानमशुश्रूषा†(२) भूवादोऽस्वामिविक्रयः ॥

क्रयविक्रयानुशयः समयातिक्रमस्तथा ।

स्त्रीपुंसयोगः स्तेयञ्च दायभागोऽक्षदेवनम् ॥

एवमर्थसमुत्थानं पदानि‡ तु चतुर्दश ।

पुनरेव प्रभिन्नानि क्रियाभेदैरनेकधा ॥

पारुष्ये द्वे साहसञ्च परस्त्रीसंग्रहस्तथा ।

हिंसोद्भवपदान्येवं चत्वार्य्याह बृहस्पतिः"—इति ।

जगति सम्भावितानशेषान् विवादानुक्तेष्वष्टादशसु सएव अन्त-र्भावयति,—

"पदान्यष्टादशैतानि धर्म्मशास्त्रोदितानि तु ।

मूलं सर्वविवादानां ये विदुस्ते परीक्षकाः"—इति ।

इति व्यवहारपरिच्छेदः ।

---

* कुसीदनिध्याधेयाद्यं,—इति शा० ।

† भृत्यदारमशुश्रूषा,—इति का० ।

‡ एवमर्थसमुत्थानपदानि,—इति पाठो मम प्रतिभाति ।

(१) द्विसप्तकइति चतुर्दशइत्यर्थः ।

(२) भृतिः कर्म्ममूल्यं, तस्याभृतेरदानं भृत्यदानम् ।

अथ सभा निरूप्यते।

तत्र बृहस्पतिः,—

"दुर्गमध्ये गृहं कुर्य्याज्जलवृक्षान्वितं पृथक्।
प्राग्दिशि प्राङ्मुखीन्तस्य लक्षण्यां कल्पयेत् सभाम्॥
माल्यधूपासनोपेतां बीजरत्नसमन्विताम्।
प्रतिमाऽऽलेख्यदेवैश्च युक्तामग्न्यम्बुना तथा"—इति।

गृहं राजगृहम्। तस्य प्राग्दिशि धर्म्माधिकरणभूता सभा। सा च वास्तुशास्त्रलक्षणोपेता कर्त्तव्या। तस्याः सभायाः धर्म्माधिकरणत्वं कात्यायनो दर्शयति,—

"धर्म्मशास्त्रविचारेण मूलसारविवेचनम्।
यत्राधिक्रियते स्थाने धर्म्माधिकरणं हि तत्"—इति।

मूलस्यावेदितार्थस्य सारासारविवेचनं* तत्र निष्कर्षः†। तत्र प्रवेशकालं स एवाह,—

"प्रातरुत्थाय च नृपः कृत्वा नित्यं समाहितः।
गुरुं ज्योतिर्विदो वैद्यान् देवान् विप्रान् पुरोहितान्॥
यथार्हमेतान् सम्पूज्य सुपुष्पाभरणैर्नृपः।
अभिवन्द्य च गुर्वादीन् सम्मुखान् प्रविशेत्सभाम्"—इति।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, सारविवेचनं,—इति पाठः प्रतिभाति।

† तत्तन्निष्कर्षः,—इति शा०। मम तु, तत्त्वनिष्कर्षः,—इति पाठः प्रतिभाति।

प्रविश्य तत्र विद्वद्भिर्मन्त्रिभिश्च सह कार्य्याण्यनुसन्दध्यात् । तदाह मनुः,—

"व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥
तत्रासीनः स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत् कार्य्याणि कार्य्यिणाम् ॥
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ।
अष्टादशसु मार्गेषु व्यवहारान्* पृथक् पृथक्"—इति ।

विचारकालमाह कात्यायनः,—

"दिवसस्याष्टमभागं मुक्त्वा कालत्रयञ्च† यत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः"—इति ।

दिवसमष्टधा कृत्वा प्रथमभागमग्निहोत्राद्यर्थं मुक्त्वा अनन्तरभागत्रयं व्यवहारकालः । अत्र वर्ज्यास्तिथीराह संवर्त्तः,—

"चतुर्दशी ह्यमावास्या पौर्णमासी तथाऽष्टमी ।
तिथिष्वासु न पश्येत्तु‡ व्यवहारांस्तु नित्यशः"—इति ।

येयमुक्ता सभा, तस्याः चातुर्विध्यमाह वृहस्पतिः,—

"प्रतिष्ठिताऽप्रतिष्ठिता मुद्रिता शासिता तथा ।
चतुर्विधा सभा प्रोक्ता सभ्याश्चैव तथाविधाः ॥

---

* निबन्धानि,—इति का० ।

† भागत्रयन्तु,—इत्यन्यत्र पाठः ।

‡ तिथिष्वेतासु नो पश्येत्,—इति का० ।

प्रतिष्ठिता पुरे ग्रामे चला नामाप्रतिष्ठिता।
मुद्रिताऽध्यक्षसंयुक्ता राजयुक्ता च शासिता"—इति

राजगृहसमीपवर्त्तिनः सभास्थानान्मुख्यादन्यान्यमुख्यानि स्था-नान्याह भृगुः,—

"दश स्थानानि वादानां पञ्च चैवाब्रवीद्भृगुः।
निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः॥
आरण्यास्तु स्वकैः कुर्य्युः सार्थिकाः* सार्थिकैस्तथा।
सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः॥
उभयानुमतश्चैव स्मृतो स्थानमीप्सितम्† ।
कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः॥
ग्रामपौरगणश्रेण्यश्चातुर्विद्यश्च वर्गिणः।
कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा"—इति।

स्वकैरारण्यकैः। ग्रामेऽपीत्यादि शब्दात् ये‡ ग्रामे अरण्यादौ च निवसन्ति, तेऽप्युभयवासिभिः ग्रामवासिभिररण्यवासिभिश्च निर्णयं कुर्य्युः, उभयव्यवहाराभिज्ञत्वात्तेषाम्। कुलिकाः कुलश्रेष्ठिनः। सार्थः ग्रामयात्रादौ मिलितो जनसङ्घः। मुख्याः ग्रामण्यादयः। पुरं मुख्यं नगरं, तस्मादर्वाचीनो ग्रामः। §पुरग्रामनिवासिनां भेदः। कुलिकादीनि पञ्च स्थानानि। तानि चारण्यकादिजनविशेषाणामेव। समाकारेणावस्थितजनविवादे समीपग्रामनिवासिभिः निर्णयः।

* 'सार्थ' स्थाने 'सार्द्ध'—इति पाठः ग्रा० पुस्तके सर्व्वत्र।

† स्थानमीप्सितम्,—इति ग्रा०।

‡ ये तु,—इत्येतावन्मात्रं ग्रा० पुस्तके।

§ अत्र, 'इति'—इति भवितुं युक्तम्।

तद्धनं साध्यम् । तच्च मूलं यस्य विवादस्य, सोऽयं साध्यमूलः । स च कदा सम्पद्यते,—इत्यपेक्षायामुक्तम्,—"प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये"—इति ।

"सत्यं ब्रूयात् प्रियं ब्रूयात् न स्तेनः स्यात् न वार्द्धुषिः"—

इत्यादिविधिनिषेधावुपलभ्य विहितानुष्ठाने प्रतिषिद्धवर्जने चोत्पन्न उत्साहः प्रयत्नः । तेन साध्यो धर्म्मनामकः पदार्थो यदा विच्छिन्नो भवति, तदानीमयं विवाद उत्पद्यते । असति तु धर्म-विच्छेदे नास्ति व्यवहारस्यावकाशः । अतएव नारदः,—

"मनुः प्रजापतिर्यस्मिन् काले राज्यमबूभुजत् ।
धर्म्मैकतानाः पुरुषास्तदाऽऽसन् सत्यवादिनः ॥
तदा न व्यवहारोऽभूत् न द्वेषो नापि मत्सरः ।
नष्टे धर्म्मे मनुष्येषु व्यवहारः प्रवर्त्तते"—इति ।

बृहस्पतिस्तु द्वेषलोभादिदुष्टस्यैव व्यवहर्तृत्वमाह,—

"धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः ।
लोभद्वेषाभिभूतानां व्यवहारः प्रवर्त्तते" ॥

तस्माद्धर्मे विच्छिन्ने सति साध्यमूलो न्यायनिर्णयफलो विवादो-व्यवहारशब्देन रूढ्याऽभिधीयते । हारीतोऽपि निरूढिमभिप्रेत्याह,—

"स्वधर्मस्य यथा प्राप्तिः परधर्मस्य वर्जनम् ।
न्यायेन क्रियते यत्तु व्यवहारः स उच्यते"—इति ।

व्यवहारशब्दस्य यौगिकमर्थं कात्यायन आह,—

"वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद्व्यवहार इति स्मृतः"—इति ।

व्यवहार इत्यत्र विशब्दो नानेत्येतस्मिन्नर्थे वर्त्तते। अवशब्दश्च सन्देहे वर्त्तते। तानेतानेवंविधानेकसन्देहहारिणोव्यवहारानर्थादिगतरागद्वेषवशात् प्राप्तान् राजा सम्यग्विचारयेत्[१]। तद्विचारश्च राज्ञो गुणधर्मरूप आचारः। अतएव आचारकाण्डे व्यवहाराणामन्तर्भावमभिप्रेत्य पराशरः पृथग्व्यवहारकाण्डमकृत्वा, "क्षितिं धर्मेण पालयेत्"—इति सूचनमात्रं व्यवहाराणां कृतवान्। तानेवात्र सूचितान् व्यवहारान् वयं स्मृत्यन्तराणि तन्निबन्धनानि चानुसृत्य यथाशक्ति निरूपयामः।

तत्र पूर्वोदाहृताभ्यां रूढियोगस्मृतिभ्यां व्यवहारस्वरूपं निरूपितम्।

अथ तद्भेदाः निरूप्यन्ते।

तत्र सपणापणाभ्यां द्वैविध्यमाह नारदः,—

"सोत्तरोऽनुत्तरश्चेति स विज्ञेयो द्विलक्षणः।
सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पणः"—इति।

अहं यदि पराजयेयं, तदा शास्त्रप्रापिताद्दण्डद्रव्यात् अधिकमेव द्रव्यं राज्ञे तुभ्यञ्च दास्यामीति पत्रं लिखित्वा यदभिभाषणं, तदुत्तरम्। तेन सह वर्त्तते इति सोत्तरः। तद्रहितोऽनुत्तरः। पुनरपि

---

(१) अर्थो धनम्। अर्थादिविषयरागद्वेषवशात् प्राप्तान् व्यवहारान् राजा विचारयेदित्यर्थः। व्यवहारानर्थान् विगतरागद्वेषवशात् प्राप्तानित्यादिपाठे, प्राप्तान् व्यवहारान् राजा विगतरागद्वेषवशात् विचारयेदिति सम्बन्धः।

चतुष्पादादिभिस्त्रयोदशभिः प्रकारैः व्यवहारस्य अवान्तरभेदान् स एव निर्दिश्य विवृणोति,—

"चतुष्पाच्च चतुःस्थानः चतुःसाधन एव च।
चतुर्हितः चतुर्व्यापी चतुःकारी च कीर्त्तितः॥
त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा।
अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च॥
धर्मश्च व्यवहारश्च चरित्रं राजशासनम्।
चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः।
तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु॥
चरित्रं तु स्वीकरणे राजाज्ञायां तु शासनम्।
सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते॥
चतुर्णामपि वर्णानां रक्षणाच्च चतुर्हितः।
कर्त्तारं तत्साक्षिणश्च सभ्यान् राजानमेव च॥
व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः।
धर्मस्यार्थस्य यशसो लोकहेतोस्तथैव च।
चतुर्णां करणादेष चतुष्कारी प्रकीर्त्तितः॥
कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात् प्रवर्त्तते।
त्रियोनिः कीर्त्त्यते तत्र त्रयमेतद्विवादकृत्॥
अभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः।
शङ्काऽसतान्तु संयोगात् तत्त्वं होढादिदर्शनात्॥
पक्षद्वयाभिसम्बन्धात् द्विद्वारः स उदाहृतः।
पूर्ववादस्तयोः पक्षः प्रतिवादस्तदुत्तरः॥

भूतच्छलानुसारित्वात् द्विगतिः स उदाहृतः ।

भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् ॥

राजा सपुरुषः सभ्याः शास्त्रं गणकलेखकौ ।

हिरण्यमग्निरुदकमष्टाङ्गः स उदाहृतः ॥

ऋणादानं ह्युपनिधिः सम्भूयोत्थानमेव च ।

दत्तस्य पुनरादानमशुश्रूषाऽभ्युपेत्य च ॥

वेतनस्यानपाकर्म तथैवास्वामिविक्रयः ।

विक्रीयासम्प्रदानञ्च क्रीत्वाऽनुशय एव च ॥

समयस्यानपाकर्म विवादः क्षेत्रजस्तथा ।

स्त्रीपुंसयोश्च सम्बन्धो दायभागोऽथ साहसम् ॥

वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च ।

द्यूतं प्रकीर्णकञ्चैवेत्यष्टादशपदः स्मृतः ॥

क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते”—इति ।

ननु धर्मादीनां पादत्वमयुक्तं, प्रतिज्ञोत्तरप्रमाणनिर्णयानां व्यवहारपादत्वात् । यतो याज्ञवल्क्यः प्रतिज्ञादीनि प्रकृत्याह,—

“चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः”—इति ।

बृहस्पतिरपि,—

“पूर्वपक्षः स्मृतः पादः द्वितीयश्चोत्तरः स्मृतः ।

क्रियापादस्तृतीयस्तु चतुर्थो निर्णयः स्मृतः”—इति ।

नायं दोषः । धर्मादीनां प्रकारान्तरेण पादत्वोपपत्तेः । योऽयं निर्णयाख्यश्चतुर्थपादोऽभिहितः, स धर्मादिभिश्चतुर्भिः निष्पद्यते । तदाह बृहस्पतिः,—

"धर्मेण व्यवहारेण चरित्रेण नृपाज्ञया।

चतुःप्रकारोऽभिहितः सन्दिग्धेऽर्थे विनिर्णयः"—इति।

तस्मान्निर्णयहेतुतया धर्मादीनां व्यवहारपादत्वं भविष्यति। तेषां च निर्णयहेतुत्वं कात्यायनेन प्रपञ्चितम्,—

"दोषकारी तु कर्तृत्वं धनस्वामी स्वकन्धनम्।

विवादे प्राप्नुयाद्यत्र स धर्मेणैव निर्णयः"—इति।

दोषकारी वाक्पारुष्यादिकारी च* यस्मिन् विवादे व्यवहारे चरित्र-राजशासननैरपेक्ष्येण धर्माभिमुखः सन्नद्धोधर्माद्भीतः† स्वकीयं दोष-कर्तृत्वं स्वयमेव अङ्गीकरोति; यत्तु धनस्वामी‡ व्यवहारादिप्रायासम-न्तरेण धर्माभिमुखाद्धनापहारिणः स्वकीयं धनं प्राप्नोति, तत्र दोषका-रिणो धर्माधिमुख्यमेव निर्णयहेतुः। व्यवहारस्य निर्णयहेतुत्वं सएवाह,—

"स्मृतिशास्त्रन्तु यत्किञ्चित् प्रथितं§ धर्मसाधकैः।

कार्य्याणां निर्णयाद्धेतोर्व्यवहारः स्मृतो हि सः||"—इति।

यत्र धर्मशास्त्रकुशलैर्विद्वद्भिरर्थिप्रत्यर्थिनोरग्रे निर्णयाय धर्मशास्त्रं

---

* अत्र चकारोऽधिकः प्रतिभाति। दोषकारी इत्यस्य विवरणरूप-त्वात् वाक्पारुष्यादिकारीत्यस्य। परन्तु, सर्व्वेष्वादर्शपुस्तकेषु स्थित-त्वाद्रक्षितः।

† इत्थमेव पाठः सर्व्वेष्वादर्शपुस्तकेषु। मम तु, सन् अथवा अधर्म्माद् भीतः,—इति पाठः प्रतिभाति।

‡ यत्तद्धनस्वामी,—इति का०। मम तु, यत्र धनस्वामी,—इति पाठः प्रतिभाति।

§ प्रापितम्,—इति का०।

|| कार्य्याणां निर्णयार्थे तु व्यवहारस्मृतौ हि सः,—इति का०। मम तु, व्यवहारः स्मृतो हि सः,—इति पाठः प्रतिभाति।

प्रख्यापितं भवति, स निर्णयो व्यवहारजन्यः। चरित्रजन्यं निर्णय-माह सएव,—

"यद्यदाचरते येन धर्म्यं वाऽधर्म्यमेव वा।
देशस्याचरणं नित्यं चरित्रं तद्धि कीर्त्तितम्"—इति।

शास्त्रोक्तधर्म्मादनपेतं* धर्म्यं, तद्विपरीतं अधर्म्यं, तदुभयं देशाचारानुसारेण यत्र स्वीक्रियते,तत्र चरित्रं निर्णयहेतुः। राजशासनस्य निर्णयहेतुतामाह सएव,—

"न्यायशास्त्राविरोधेन† देशदृष्टेस्तथैवच।
यद्धर्म्मं स्थापयेद्राजाऽन्याय्यं तद्राजशासनम्"—इति।

न्यायशास्त्रं व्यवहारप्रतिपादकं स्मृतिशास्त्रं, तस्य देशाचारस्य वा विरोधेन राजा यमनुशास्ति, स निर्णयो राजशासनजन्यः। यथोक्तानां धर्म्मादीनां चतुर्णां मध्ये पूर्वस्य पूर्वस्य च बाध्यत्वं उत्तरोत्तरस्य बाधकत्वञ्च बृहस्पतिना प्रपञ्चितम्,—

"शास्त्रमेव समाश्रित्य क्रियते यत्र निर्णयः।
व्यवहारः स विज्ञेयो धर्म्मस्तेनापि हीयते॥
देशस्थित्याऽनुमानेन नैगमानुमतेन च।
क्रियते निर्णयस्तत्र व्यवहारस्तु कथ्यते॥

---

* शास्त्रोक्तधर्म्माद्युपेतम्,—इति शा० स०।

† सर्व्वेष्वादर्शपुस्तकेष्वेवमेव पाठः। मम तु, न्यायशास्त्रविरोधेन,—इति पाठः प्रतिभाति। अतएव, उत्तरः पूर्व्वबाधक इत्यादिना राजशासनस्य सर्व्वबाधकत्वमुक्तं सङ्गच्छते। न्यायशास्त्राविरोधेन,—इति पाठे तु, 'ऽन्याय्यम्'—इत्यत्र न्याय्यं, 'देशाचारस्य वा विरोधेन'—इत्यत्र, देशाचारस्य वाऽविरोधेन,—इति पठितुमुचितम्।

विहाय चरिताचारं यत्र कुर्य्यात् पुनर्नृपः ।
निर्णयं, सा तु राजाज्ञा चरित्रं बाध्यते तया"—इति ।

(१)चतुर्षु वर्णेषु यः कश्चिद्राजद्रोहं कृत्वा राज्ञो भीतः सन् प्रतिभीतस्तथा स्वापराधमङ्गीचकार । तत्र समीपवर्त्तिनः साक्षिणो वर्णिवधं विचारयितुमिच्छन्तः सत्यमुल्लङ्घ्य, तत्र साक्ष्यनृतं वदेदित्येतादृशं शास्त्रमेवाश्रित्य तदीयमपराधं पर्य्यहार्षुः । तत्र व्यवहारेण धर्म्मो बाध्यते। केरलदेशादौ वेश्यागमने साक्षिभिरख्यापिते ऽपि देशाचारवशाज्ञायं राज्ञा दण्ड्यते। तत्र चरित्रेण व्यवहारस्य बाधः। सत्यपि तादृशे देशाचारे 'त्वेवं न व्यवहर्त्तव्यम्'—इति राजा यदाऽनुशास्ति, तदा राजाज्ञया चरित्रस्य बाधः । (२)ये एते प्रोक्ताः धर्म्मादयश्चत्वारः पादास्ते सत्यादिषु चतुर्षु प्रतिष्ठिताः। दोषकारी स्वयमनृताद्भीतोऽयमपि* अपराधोऽस्तीति सत्यं ब्रूते। अतो धर्मस्य सत्ये अवस्थानम्। प्रतिज्ञोत्तरयोः कृतयोः साक्षिणा यस्य पक्षोऽभ्युपगम्यते, तस्य जयः, तेन व्यवहारस्तस्य साक्षिण्यवस्थानम्। कार्णाटकदेशे बलात्मातुलसुताविवाहो न दोषाय, केरलदेशे कन्याया ऋतुमतीत्वं न दोषायेत्येवमादिकस्तत्तद्देशसमयः।तत्र तत्र पत्रादिशासनस्थ तिष्ठति। शिष्यते इति शासनं, राजाज्ञानुसारेण प्रजानां वर्त्तनम् । तच्च राजाज्ञायां प्रतिष्ठितम्। सामदानभेददण्डैश्चतुर्भिः दोषकारिणो दोष-

* मन्दताद्भीतोऽपि,—इति का० ।

(१) उत्तरः पूर्व्वसाधक इति नारदवचनांशं व्याचष्टे चतुर्ष्वित्यादिना ।

(२) तत्र सत्ये स्थितोधर्म्म इत्यादिवचनानि व्याख्यातुमुपक्रमते, ये एते इत्यादिना ।

करणाय* चतुःसाधनत्वम्। चतुर्हितत्वं विस्पष्टम्। कर्त्रादिचतुष्टय-
व्यापित्वं मनुना स्पष्टीकृतम्,—

"पादोऽधर्मस्य कर्त्तारं पादो गच्छति साक्षिणः ।
पादः सभासदः सर्वान् पादो राजानमृच्छति"—इति ।

जेतुर्नृपस्य वा धर्म्मार्थयशसो लोकानुराग†स्यादनाच्चतुष्कारित्वम्। त्रियोनित्वं स्पष्टम्। अघतां कितवस्तेनादीनां संघर्षं यः करोति, तस्मिन्नपि चौर्य्यादिशङ्का जायते। होढ़ोऽपहृतद्रव्यादिदर्शनम्, तल्लिङ्गं वा। तस्मादभियोगो भवति। अर्थिप्रत्यर्थिनोः यौ पूर्वोत्तरपक्षौ तौ व्यवहारस्य प्रवर्त्तकौ। तस्मात् द्विद्वारत्वम्। द्रव्यसङ्ख्यादिकं याथातथ्येनान्यथा वा राजादीनां अग्रे यदा ब्रूते, तदा तयोरुभयस्य उपरि व्यवहारः प्रवर्त्तते। ततो द्विगतित्वम्। अष्टाङ्गेषु सपुरुषो राजेत्येतदेकमङ्गम्। अतो नास्ति नवत्वसङ्ख्याप्रसक्तिः। ऋणादानादीनां अष्टादशपदानां स्वरूपमुपरिष्टात् तत्र तत्र विचारयिष्यते‡। एतेषां अष्टादशपदानां मध्ये एकैकस्य पदस्य अवान्तरक्रियाभेदाद्वान्तरभेदभिन्नत्वं शतशाखत्वम्। एतान् अष्टादशपदानवान्तरानन्तभेदभिन्नान् व्यवहारान् प्रकारान्तरेण द्वेधा संगृह्णाति कात्यायनः,—

"द्वे पदे साध्यभेदात्तु पदाष्टादशतां गते ।
अष्टादशक्रियाभेदाद्भिन्नान्यथ सहस्रधा"—इति ।

---

* दोषकारणाय,—इति का० । मम तु, दोषकरणादिति पाठः प्रतिभाति ।

† धर्म्मार्थास्त्रयोर्लोकानुराग,—इति का० । मम तु, धर्म्मार्थयशोलोकानुराग,—इति पाठः प्रतिभाति ।

‡ विवदिष्यते,—इति ग्रा० स० ।

द्विपदत्वं विशदयति वृहस्पतिः,—

"द्विपदो व्यवहारः स्याद्धनहिंसासमुद्भवः।

द्विसप्तकोऽर्थमूलस्तु(१) हिंसामूलः चतुर्विधः"—इति।

तदेतदुभयविधं सएव विवृणोति,—

"कुसीदनिध्यदेयाद्यं* सम्भूयोत्थानमेवच।

भृत्यदानमशुश्रूषा†(२) भूवादोऽस्वामिविक्रयः॥

क्रयविक्रयानुशयः समयातिक्रमस्तथा।

स्त्रीपुंसयोगः स्तेयञ्च दायभागोऽचदेवनम्॥

एवमर्थसमुत्थानं पदानि‡ तु चतुर्दश।

पुनरेव प्रभिन्नानि क्रियाभेदैरनेकधा॥

पारुष्ये द्वे साहसञ्च परस्त्रीसंग्रहस्तथा।

हिंसोद्भवपदान्येवं चत्वार्य्याह वृहस्पतिः"—इति।

जगति सम्भावितानशेषान् विवादानुक्तेष्वष्टादशसु सएव अन्तर्भावयति,—

"पदान्यष्टादशैतानि धर्म्मशास्त्रोदितानि तु।

मूलं सर्वविवादानां ये विदुस्ते परीक्षकाः"—इति।

इति व्यवहारपरिच्छेदः।

---

* कुसीदनिध्याधेयाद्यं,—इति शा०।

† भृत्यदारमशुश्रूषा,—इति का०।

‡ एवमर्थसमुत्थानपदानि,—इति पाठो मम प्रतिभाति।

---

(१) द्विसप्तकइति चतुर्दशइत्यर्थः।

(२) भृतिः कर्म्ममूल्यं, तस्याभृतेरदानं भृत्यदानम्।

अथ सभा निरूप्यते।

तत्र बृहस्पतिः,—

"दुर्गमध्ये गृहं कुर्य्याज्जलवृक्षान्वितं पृथक्।
प्राग्दिशि प्राङ्मुखीन्तस्य लक्षण्यां कल्पयेत् सभाम्॥
माल्यधूपासनोपेतां बीजरत्नसमन्विताम्।
प्रतिमाऽऽलेख्यदेवैश्च युक्तामग्न्यम्बुना तथा"—इति।

गृहं राजगृहम्। तस्य प्राग्दिशि धर्म्माधिकरणभूता सभा। सा च वास्तुशास्त्रलक्षणोपेता कर्त्तव्या। तस्याः सभायाः धर्म्माधिकरणत्वं कात्यायनो दर्शयति,—

"धर्म्मशास्त्रविचारेण मूलसारविवेचनम्।
यत्राधिक्रियते स्थाने धर्म्माधिकरणं हि तत्"—इति।

मूलस्यावेदितार्थस्य सारासारविवेचनं* तत्र निष्कर्षः† । तत्र प्रवेशकालं सएवाह,—

"प्रातरुत्थाय च नृपः कृत्वा नित्यं समाहितः।
गुरूं ज्योतिर्विदो वैद्यान् देवान् विप्रान् पुरोहितान्॥
यथार्हमेतान् सम्पूज्य सुपुष्पाभरणैर्नृपः।
अभिवन्द्य च गुर्वादीन् सम्मुखान् प्रविशेत्सभाम्"—इति।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, सारविवेचनं,—इति पाठः प्रतिभाति।

† तत्तन्निष्कर्षः,—इति शा०। मम तु, तत्त्वनिष्कर्षः,—इति पाठः प्रतिभाति।

प्रविश्य तत्र विद्वद्भिर्मन्त्रिभिश्च सह कार्य्याण्यनुसन्दध्यात् ।
तदाह मनुः,—

"व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥
तत्रासीनः स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत् कार्य्याणि कार्य्यिणाम् ॥
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ।
अष्टादशसु मार्गेषु व्यवहारान्* पृथक् पृथक्"—इति ।

विचारकालमाह कात्यायनः,—

"दिवसस्याष्टमभागं मुक्त्वा कालत्रयन्तु† यत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः"—इति ।

दिवसमष्टधा कृत्वा प्रथमभागमग्निहोत्राद्यर्थं मुक्त्वा अनन्तरभाग-त्रयं व्यवहारकालः । अत्र वर्ज्यास्तिथीराह संवर्त्तः,—

"चतुर्दशी ह्यमावास्या पौर्णमासी तथाऽष्टमी ।
तिथिष्वासु न पश्येत्तु‡ व्यवहारांस्तु नित्यशः"—इति ।

धेयमुक्ता सभा, तस्याः चातुर्विध्यमाह बृहस्पतिः,—

"प्रतिष्ठिताऽप्रतिष्ठिता मुद्रिता शासिता तथा ।
चतुर्विधा सभा प्रोक्ता सभ्याश्चैव तथाविधाः ॥

---

* निबन्धानि,—इति का० ।

† भागत्रयन्तु,—इत्यन्यत्र पाठः ।

‡ तिथिष्वेतासु नो पश्येत्,—इति का० ।

प्रतिष्ठिता पुरे ग्रामे चला नामाप्रतिष्ठिता।

मुद्रिताऽध्यक्षसंयुक्ता राजयुक्ता च शासिता"—इति

राजगृहसमीपवर्त्तिनः सभास्थानान्मुख्यादन्यान्यमुख्यानि स्थानान्याह भृगुः,—

"दश स्थानानि वादानां पञ्च चैवाब्रवीद्भृगुः।

निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः॥

आरण्यास्तु स्वकैः कुर्य्युः सार्थिकाः* सार्थिकैस्तथा।

सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः॥

उभयानुमतश्चैव स्मृते स्थानमीप्सितम्† ।

कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः॥

ग्रामपौरगणश्रेण्यश्चातुर्विद्यश्च वर्गिणः।

कुलानि कुलिकाश्चैव नियुक्ताः नृपतिस्तथा"—इति।

स्वकैरारण्यकैः। ग्रामेऽपीत्यादि शब्दात् ये‡ ग्रामे अरण्यादौ च निवसन्ति, तेऽप्युभयवासिभिः ग्रामवासिभिररण्यवासिभिश्च निर्णयं कुर्य्युः, उभयव्यवहाराभिज्ञत्वात्तेषाम्। कुलिकाः कुलश्रेष्ठिनः। सार्थः ग्रामयाचादौ मिलितो जनसङ्घः। मुख्याः ग्रामण्यादयः। पुरं मुख्यं नगरं, तस्मादर्वाचीनो ग्रामः। §पुरग्रामनिवासिनां भेदः। कुलिकादीनि पञ्च स्थानानि। तानि चारण्यकादिजनविशेषाणामेव। ग्रामाकारेणावस्थितजनविवादे समीपग्रामनिवासिभिः निर्णयः।

---

* 'सार्थ' स्थाने 'सार्द्ध'—इति पाठः आ॰ पुस्तके सर्व्वत्र।

† स्थानमीप्सितम्,—इति आ॰।

‡ ये तु,—इत्येतावन्मात्रं आ॰ पुस्तके।

§ अत्र, 'इति'—इति भवितुं युक्तम्।

अर्थिप्रत्यर्थिनोरननुमयानुमतं स्थानं कुलिकसार्थमुख्यपुरग्रामनिवासिनो गृह्यन्ते। ग्रामादीनि दश स्थानानि साधारणानि। ग्रामो-ग्रामाकारेणावस्थितो जनः। पौरः पुरवासिनां समूहः। गणः कुलानां समूहः। श्रेणी रजकाद्यष्टादशहीनजातयः। चातुर्विद्यः आन्वीचिक्यादिविद्याचतुष्टयोपेतः[1]। वर्गिणो गणप्रभृतयः। तथाच कात्यायनः,—

"गणः पाषण्डपूगश्च* ब्राह्मणश्रेणयस्तथा।
समूहस्थाश्च ये चान्ये वर्ग्याख्यास्ते बृहस्पतिः"—इति।

आयुधधराणां समूहो जातम्†। कुलानि अर्थिप्रत्यर्थिनोः सगोत्राणि। कुलिकास्तत्र वृद्धाः। नियुक्ताः प्राड्विवाकसहितास्त्रयः सभ्याः। नृपतिः ब्राह्मणादिसहितः। सभ्यानाह याज्ञवल्क्यः,—

"श्रुताध्ययनसम्पन्नाः धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः रिपौ मित्रे च ये समाः"—इति।

तेषां सङ्ख्यामाह बृहस्पतिः,—

"लोकधर्म्माङ्गतत्त्वज्ञाः[2] सप्त पञ्च त्रयोऽपि वा।

---

* पौगण्डपूगश्च,—इति स० पा०।

† इत्थमेव पाठः सर्व्वत्र।

---

(१) "आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती"—इत्यान्वीक्षिक्यादिविद्याचतुष्टयं ज्ञेयम्।

(२) लोकोलोकाचारः देशाचार इति यावत्। धर्म्मोधर्म्मशास्त्रमिति फलितार्थः। अङ्गानि, "शिक्षा कल्पोव्याकरणं निरुक्तं ज्योतिषां चितिः। छन्दसां विचितिश्चैव षडङ्गोवेद इष्यते"—इत्युक्तानि षडङ्गानि वेदाङ्गानि।

यत्रोपविष्टाः विप्राग्र्याः सा यज्ञसदृशी सभा"—इति।

तत्र वर्ज्यान् सएवाह,—

"देशाचारानभिज्ञा ये नास्तिकाः शास्त्रवर्ज्जिताः।

उन्मत्तकुहका लुब्धाः* न प्रष्टव्याः विनिर्णये"—इति।

राज्ञः प्रतिनिधिमाह याज्ञवल्क्यः,—

"अपश्यता कार्य्यवशात् व्यवहारान् नृपेण तु।

सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्व्वधर्म्मवित्"—इति।

सोऽपि राजवत् सर्व्वकार्य्याणि विचारयेत्। यदाह मनुः,—

"यदा स्वयं न कुर्य्यात्तु नृपतिः कार्य्यदर्शनम्।

तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्य्यदर्शने॥

सोऽस्य कार्य्याणि सम्पश्येत् सभ्यैरेव त्रिभिर्वृतः।

सभामेव प्रविश्याग्र्यामासीनः स्थितएववा"—इति।

स च विचारको ब्राह्मणः प्राड्विवाक इति उच्यते। तदाह बृहस्पतिः,—

"राजा कार्य्याणि सम्पश्येत् प्राड्विवाकोऽपि वा द्विजः।

न्यायाङ्गान्यग्रतः कृत्वा सभ्यशास्त्रमते स्थितः॥

बलेन चतुरङ्गेन यतो रञ्जयते प्रजाः।

दीप्यमानः स्ववपुषा तेन राजाऽभिधीयते॥

विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैवच।

प्रियपूर्वं प्राग्वदति प्राड्विवाकोऽभिधीयते"—इति।

नारदोऽपि,—

* उन्मत्तक्रुद्धलुब्धाश्च,—इति का०।

"अष्टादशपदाभिज्ञः षड्भेदाष्टसहस्रवित् ।
आन्वीक्षिक्यादिकुशलः श्रुतिस्मृतिपरायणः ॥
विवादसंश्रितं धर्मं पृच्छति प्रकृतं मतम् ।
विवेचयति यस्तस्मात् प्राड्विवाकस्तु स स्मृतः ॥
यथा शल्यं भिषक् कायादुद्धरेद्यन्त्रयुक्तितः ।
प्राड्विवाकस्तथा शल्यमुद्धरेद्व्यवहारतः"—इति ।

प्राड्विवाकस्य गुणाः स्मृत्यन्तरे दर्शिताः—

"अक्रूरो मधुरः स्निग्धः क्रमायातो विचक्षणः ।
उत्साहवानलुब्धश्च वादे योज्यो नृपेण तु"—इति ।

प्राड्विवाकस्य अनुकल्पमाह कात्यायनः,—

"ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥
*यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्ज्जयेत्*"—इति ।

तद्वर्जने बाधमाह मनुः,—

"जातिमात्रोपजीवी वा कामं स्याद् ब्राह्मणब्रुवः[१] ।

---

* नास्त्ययं श्लोकः स० शा० पुस्तकयोः ।

---

(१) ब्राह्मणमात्मानं ब्रवीति न स्वयं ब्रह्मणवृत्तो यः, सोऽयं ब्राह्मणब्रुवः ।
स च,—
"धर्म्मकर्म्मविहीनस्तु ब्राह्मैर्लिङ्गैर्विवर्ज्जितः ।
ब्रवीति ब्राह्मणोऽस्मीति तमाहुर्ब्राह्मणब्रुवम्"—इत्युक्तलक्षणः ।

धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन ॥
यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम्।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ॥
द्विजान् विहाय सम्पश्येत् कार्य्याणि वृषलैः सह।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोषश्च नश्यति"—इति।

गणक-लेखकावपि कार्य्याविद्याह बृहस्पतिः,—
"शब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची।
नानालिपिज्ञौ कर्त्तव्यौ राज्ञा गणकलेखकौ"—इति।

व्यासोऽपि,—
"त्रिस्कन्धज्योतिषाभिज्ञं(१) स्फुटं प्रत्ययकारणम्।
श्रुताध्ययनसम्पन्नं गणकं योजयेन्नृपः ॥
स्फुटलेखं नियुञ्जीत शाब्दं* लाक्षणिकं शुचिम्।

---

* स्फुटलेख्यं नियुञ्जीत शब्दं,—इति शा॰।

---

(१) ज्योतिःशास्त्रं हि गणितस्कन्ध-जातकस्कन्ध-सिद्धान्तस्कन्धरूपस्कन्ध-त्रयोपेतमिति गणिततत्त्वचिन्तामणिप्रभृतिषूक्तम्। गणितस्कन्धे व्यक्ताव्यक्तभेदाद् द्विविधं गणितं निर्णीतम्। जातकस्कन्धे तु जातस्य शुभाशुभचिन्ता। सिद्धान्तस्तु, "त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमाच्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः। भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः॥"—इति सिद्धान्तशिरोमणयुक्तलक्षणः। द्विधा गणितमिति प्रतिलोमानुलोमभेदादिति गणिततत्त्वचिन्तामणौ व्याख्यातम्।

स्पष्टाचरं जितक्रोधमलुब्धं सत्यवादिनम्”—इति ।

साध्यपालोऽपि कर्त्तव्य इति तेनैवोक्तम्,—

“साध्यपालस्तु कर्त्तव्योराज्ञा साध्यस्य साधकः ।
क्रमायातो दृढः शूद्रः सभ्यानाञ्च मते स्थितः”—इति ।

बृहस्पतिरपि,—

“आकारणे रक्षणे च साक्ष्यर्थिप्रतिवादिनाम् ।
सभ्याधीनः सत्यवादी कर्त्तव्यस्तु स पूरुषः”—इति ।

राज्ञा कतिपयैर्वणिग्भिरधिष्ठितं सदः कर्त्तव्यम् । तदाह कात्यायनः,—

“कुलशीलवयोवृद्धैर्वित्तवद्भिरमत्सरैः ।
वणिग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितम्”—इति ।

कुलभूतैर्वृन्दभूतैरित्यर्थः । तेषामुपयोगमाह सएव,—

“श्रोतारो वणिजस्तत्र कर्त्तव्या न्यायदर्शने”—इति ।

यथोक्तराजादियुक्तायाः सभायाः दशाङ्गानि सप्रयोजनान्याह बृहस्पतिः,—

“नृपोऽधिकृतसभ्याश्च स्मृतिर्गणकलेखकौ ।
सद्धेमाम्ब्यम्बुपुरुषाः* साधनाङ्गानि वै दश ॥
एतद्दशाङ्गकरणं यस्यामध्यास्य पार्थिवः ।
न्यायान् पश्येत् कृतमतिः सा सभाऽध्वरसम्मिता ॥
दशानामपि चैतेषां कर्म प्रोक्तं पृथक् पृथक् ।

* हेमाग्न्यम्ब्वन्नपुरुषाः,—इति का० ।

सभाध्यक्षो नृपः शास्ता सभ्याः कार्य्यपरीक्षकाः ॥
स्मृतिर्विनिर्णयं ब्रूते जयदानधनन्तथा।
शपथार्थे हिरण्याग्नी जलं तृषितक्षुब्धयोः ॥
गणको गणयेद्दृष्टं* लिखेन्न्यायञ्च लेखकः।
प्रत्यर्थिसभ्यानयनं साक्षिणाञ्च स पूरुषः ॥
वाग्दण्डश्चैव धिग्दण्डो विप्राधीनौ तु तावुभौ।
अर्थदण्डवधावुक्तौ राजायत्तावुभावपि ॥
राज्ञा ये विदिताः सम्यक् कुलश्रेणीगणादयः।
साहसन्यायवर्ज्यानि कुर्य्युः कार्य्याणि ते नृणाम्"—इति।

यथाविधि विचारे राज्ञः फलमाह कात्यायनः,—
"सप्राड्विवाकः† सामात्यः सब्राह्मणपुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः"—इति।

वैपरीत्ये दोषमाह मनुः,—
"अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकञ्चैव गच्छति"—इति।

सभ्यानां फलमाह बृहस्पतिः,—
"अज्ञानतिमिरोपेतान् सन्देहपटलान्वितान्।
निरामयान् यः कुरुते शास्त्राञ्जनशलाकया ॥
इह कीर्त्तिं राजपूजां लभते स्वर्गतिञ्च सः।
लोभद्वेषादिकं त्यक्त्वा यः कुर्य्यात्कार्य्यनिर्णयम् ॥

* गणयेदिष्टं,—इति का०।

† प्राड्विवाकस्य,—इति का०।

शास्त्रोदितेन विधिना तस्य यज्ञफलं भवेत्"—इति ।

विपक्षे दोषमाह कात्यायनः,—

"न्यायशास्त्रमतिक्रम्य सभ्यैर्यत्र विनिश्चितम् ।
तत्र धर्मो ह्यधर्मेण हतो हन्ति* न संशयः ॥
अपन्यायप्रवृत्तन्तु नोपेक्ष्यं तत् सभासदः† ।
उपेक्षमाणाः सनृपाः नरकं यान्त्यधोमुखाः ॥
अन्यायेनापि तं यान्तं ये तु यान्ति‡ सभासदः ।
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः ॥
न्यायमार्गादपेतन्तु ज्ञात्वा चित्तं महीपतेः ।
वक्तव्यं तत्प्रियं तत्र न सभ्यः किल्बिषी भवेत्§"—इति ।

कार्य्यानिष्पत्तावपि यथाशास्त्रवादिनो नास्ति प्रत्यवायः,—इति स एवाह,—

"सभ्येनावश्यकर्त्तव्यं धर्म्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु सभ्यस्ततोऽनघः"—इति ।

यदा तु राजा यथाशास्त्रं धर्मं श्रुत्वा दोषकारिणि पक्षपातं न करोति, तदा निष्पापो भवति । तदाह मनुः,—

"राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो‖ गच्छति कर्त्तारं निन्दार्हो यत्र निन्द्यते"—इति ।

---

* हतोऽहन्तीति,—इति का० ।
† नोपेक्षन्ते सभासदः,—इति का० ।
‡ येऽनुयान्ति,—इति ग्रन्थान्तरीयः पाठः समीचीनः ।
§ "तत्प्रियं न वक्तव्यं तद्वचने किल्बिषी भवेत्"—इति पाठान्तरं का० ।
‖ यतो,—इति का० । विना,—इति शा० ।

अन्यथावादिनः सभ्यस्य दण्डमाह नारदः,—

"रागादज्ञानतो वाऽपि यो लोभादन्यथा वदेत्।

सभ्योऽसभ्यः स विज्ञेयस्तं पापं विनयेद्भृशम्"—इति।

कात्यायनोऽपि,—

"स्नेहादज्ञानतो वाऽपि मोहादज्ञानतोऽपि वा।

तत्र सभ्योऽन्यथावादी दण्ड्योऽसभ्यः स्मृतो हि सः"—इति।

याज्ञवल्क्योऽपि,—

"रागाद् द्वेषाद् भयाद्वाऽपि स्मृत्यपेतादिकारिणः।

सभ्याः पृथक् पृथक् दण्ड्याः विवादात् द्विगुणं दमम्"—इति।

बृहस्पतिरपि,—

"अन्यायवादिनः सभ्याः तथैवोत्कोचजीविनः।

विश्वस्तवञ्चकाश्चैव निर्वास्याः सर्वएव ते"—इति।

कात्यायनः,—

"अनिर्णीते तु यद्यर्थे सम्भाषेत रहोऽर्थिना।

प्राड्विवाकोऽपि दण्ड्यः स्यात् सभ्यश्चैव* विशेषतः"—इति।

राजादीनां सभायामुपवेशनप्रकारमाह बृहस्पतिः,—

"पूर्वामुखस्तूपविशेद्राजा सभ्याः उदङ्मुखाः।

गणकः पश्चिमास्यस्तु लेखको दक्षिणामुखः"—इति।

सभोपविष्टाः नृपादयो यस्याङ्गानि, तमङ्गिनं व्यवहारं पुरुषरूपेण परिकल्पयति सएव,—

---

* सभ्याश्चैव,—इति स० प्रा०।

"एषां मूर्द्धा नृपोऽङ्गानां मुखञ्चाधिकृतः स्मृतः।
बाहू सभ्याः स्मृतिर्हस्तौ जङ्घे गणकलेखकौ॥
हेमाग्न्यम्ब्वस्वपुरुषाः पादौ च पुरुषस्य च"—इति।

या वृद्धराहित्यादिदोषरहिता, सा मुख्या सभा। तदुक्तं महाभारते,—

"न सा सभा यत्र न सन्ति वृद्धाः
न ते वृद्धाः ये न वदन्ति धर्मम्।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम्"—इति।

इति सभानिरूपणम्।

अथ व्यवहारदर्शनविधिर्निरूप्यते।

तत्र प्रजापतिः,—

"राजाऽभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः।
धर्म्मासनगतः पश्येत् व्यवहारानन्नुल्बणान्"—इति।

नारदः,—

"तस्माद्धर्म्मासनं प्राप्य राजा विगतमत्सरः।
समः स्यात् सर्वभूतेषु बिभ्रद्वैवस्वतं व्रतम्"—इति।

(१)यथा यमः,

"प्रियद्वेष्यौ समौ ज्ञात्वा प्राप्तकाले नियच्छति।
तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम्"—इति।

---

(१) यमोयथा प्राप्तकाले प्रियद्वेष्यावुभावपि नियच्छति, तथा राज्ञा सर्व्वाः प्रजा नियन्तव्याइति सम्बन्धः।

यद्व्यवहारप्रतिपादकं धर्मशास्त्रं यच्च तदन्तर्गतं द्रव्यदण्डादिरूपमर्थशास्त्रं, तदुभयमपि व्यवहारदर्शिना राज्ञा अनुसरणीयम्। तदाह सएव,—

"धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन पार्थिवः।
समीक्षमाणो निपुणो व्यवहारगतिं नयेत्"—इति।

धर्मशास्त्राणि पितामहेन दर्शितानि,—

"वेदाः साङ्गास्तु चत्वारो मीमांसा स्मृतयस्तथा।
एतानि धर्मशास्त्राणि पुराणं न्यायदर्शनम्*"—इति।

ननु न धर्मशास्त्रान्तर्गतमर्थशास्त्रं, किन्त्वन्यदेव नीत्यात्मकम्। यत्तु† भविष्यपुराणे दर्शितम्,—

"षाड्गुण्यस्य प्रयोगस्य प्रयोगः कार्य्यगौरवात्।
सामादीनामुपायानां योगो व्याससमासतः।
अध्यक्षाणाञ्च निक्षेपः कण्टकानां निरूपणम्॥
दृष्टार्थेयं स्मृतिः प्रोक्ता ऋषिभिर्गरुडाग्रज"—इति।

वाढम्। अस्मिन्नप्यर्थशास्त्रे धर्मशास्त्राविरुद्धो योऽंशः स उपादेयः, इतरस्तु परित्याज्यः। तदाह नारदः,—

"यत्र विप्रतिपत्तिः स्याद्धर्मशास्त्रार्थशास्त्रयोः।
अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत्"—इति।

धर्मशास्त्रार्थशास्त्रयोर्विरोधे(१) न्यायेन निर्णेतव्यम्। तदाह

---

* पुराणन्यायदर्शिनाम्,—इति का०।

† इत्यमेव पाठः सर्व्वत्र। मम तु, तत्तु,—इति पाठः प्रतिभाति।

---

(१) धर्म्मशास्त्रयोरर्थशास्त्रयोश्च विरोधे इत्यर्थः।

याज्ञवल्क्यः,—

"स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः"—इति ।

व्यवहारतो वृद्धव्यवहारप्रसिद्धो* न्यायोबलवान् । न्यायानाश्रयणे बाधमाह बृहस्पतिः,—

"केवलं शास्त्रमाश्रित्य न कर्त्तव्यो हि निर्णयः ।

युक्तिहीने विचारे तु धर्महानिः प्रजायते ॥

चोरोऽचोरोऽसाधुः साधुर्जायते† व्यवहारतः ।

युक्तिं विना विचारेण माण्डव्यश्चोरताङ्गतः ॥

असत्याः सत्यसदृशाः सत्याश्चासत्यसन्निभाः ।

दृश्यन्ते भ्रान्तिजनकाः तस्माद्युक्त्या विचारयेत्"—इति ।

न्यायस्य निर्णायकत्वमुपपादयति मनुः,—

"यथा नयत्यसृक्पातैः मृगस्य मृगयुः पदम् ।

नयेत्तथाऽनुमानेन धर्मस्य नृपतिः पदम् ॥

वाक्यै‡र्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ।

स्वरवर्णेङ्गिताकारैश्चक्षुषोश्चेष्टितेन वा"—इति ।

याज्ञवल्क्योऽपि,—

"असाक्षिके हते चिह्नै युक्तिभिश्चागमेन च ।

द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृताद्भयात्"—इति ।

यत्तु पूर्वमुक्तं, भूतच्छलानुसारित्वात् द्विगतिरिति ; तत्र छलं हेयम् । तदाह याज्ञवल्क्यः,—

---

* वृद्धव्यवहारात् प्रसिद्धो,—इति शा० स० ।

† चौरोऽचौरः साध्वसाधुर्जायते,—इति का० ।

‡ वाह्यै,—इत्यन्यत्र समीचीनः पाठः ।

"छलं निरस्य भूतेन व्यवहाराद्मयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः"—इति॥

निर्णये प्रमाणं साक्ष्यादिकम्। तदाह गौतमः। "विप्रतिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था"—इति। मनुरपि,—

"प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्"—इति।

देशाचारैः शास्त्रोक्तदिव्यादिभिश्चाष्टादशपदसम्बन्धीनि कार्य्याणि निर्णयेत्। तत्र देशाचारोऽनुकल्पः। तदाह कात्यायनः,—

"तस्मात् शास्त्रानुसारेण राजा कार्य्याणि साधयेत्।
वाक्याभावे तु सर्वेषां देशदृष्टेन तन्नयेत्*"—इति।

देशदृष्टस्य लक्षणमाह सएव,—

"यस्य देशस्य यो धर्मः प्रवृत्तः सार्वकालिकः।
श्रुतिस्मृत्यविरोधेन देशदृष्टः स उच्यते"—इति।

तत्तद्देशीयानां मिथोविवादे देशदृष्टेन निर्णयः। तदाह सएव,—

"देशपत्तनगोष्ठेषु पुरग्रामेषु वादिनाम्।
तेषां स्वसमयैर्द्धर्मशास्त्रतोऽन्येषु तैः सह"॥

यत्र तत्तद्देशीयानां इतरैः सह विवादः, तत्र शास्त्रतो निर्णयो न तु देशदृष्टतः। लेख्यादिप्रमाणाभावे राजा स्वेच्छया निर्णयेत्। तदाह सएव,—

"लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः।
न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः"—इति।

---

* देशदृष्टं मतं नयेत्,—इति का०।

वणिगादिसमयेषु समयिभिरेव निर्णेतव्यम् । तदाह व्यासः,—

"वणिक्शिल्पिप्रभृतिषु कृषिरङ्गोपजीविषु ।
अशक्यो निर्णयोह्यन्यैस्तज्ज्ञैरेव तु* कारयेत् ॥
गुरुः स्वामी कुटुम्बश्च पिता ज्येष्ठः पितामहः ।
विवादानथ पश्येयुः स्वाधीने विषये नृणाम्"—इति ।

निर्णयकारिणां उत्तमाधमभावमाह नारदः,—

"कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः ।
प्रतिष्ठा व्यवहाराणां सर्वेषामुत्तरोत्तरम्"—इति ।

पितामहोऽपि,—

"ग्रामे दृष्टः पुरं यायात् पुरे दृष्टस्तु राजनि ।
राज्ञा दृष्टः कुदृष्टो वा नास्ति तस्य पुनर्भवः"—इति ।

राज्ञो नियममाह पितामहः,—

"न रागेण न लोभेन न कोपेन नयेन्नृपः ।
परैरप्रार्थितानर्थान् न चापि स्वमनीषया"—इति ।

अस्यापवादमाह सएव,—

"छलानि चापराधांश्च पदानि नृपतिस्तथा ।
स्वयमेव निगृह्णीयात् नृपस्त्वावेदकैर्विना"—इति ।

तत्र छलान्याह सएव,—

"पथिभङ्गी कराक्षेपी† प्राकारोपरिलङ्घकः ।

---

* तज्ज्ञैरेव तु,—इति का० ।

† पथिभङ्गकराक्षेपः,—इति ग्रा० स० ।

निपानस्य विनाशी च तथा चायतनस्य च ॥
परिखापूरकश्चैव राजच्छिद्रप्रकाशकः।
अन्तःपुरं वासगृहं भाण्डागारं महानसम् ॥
प्रविशत्यनियुक्तो यो भोजनञ्च निरीक्ष्यते।
विण्मूत्रश्लेष्मवातानां क्षेप्तुकामो नृपात्मजः ॥
पर्य्यङ्कासनबन्धी* चाग्र्यस्थाननिरोधकः।
राज्ञोऽतिरिक्तवेषश्च विधृतस्य† विशेत्तु यः ॥
यश्चापद्वारेण विशेद्वेलायां तथैव च।
शय्यासने पादुके च शयनासनरोहणे ॥
राजन्यासन्नशयने यस्तिष्ठति समीपतः।
राज्ञो विद्विष्टसेवी वा ऽप्यदत्तविहितासनः ॥
वस्त्राभरणयोश्चैव सुवर्णपरिधायकः।
स्वयं ग्राहेण ताम्बूलं गृहीत्वा भक्षयेत्तु यः ॥
अनियुक्तप्रभाषी च नृपाक्रोशक एव च।
एकवासास्तथाऽभ्यक्तो मुक्तकेशोऽवगुण्ठितः ॥
विचित्रिताङ्गः स्रग्वी च परिधानविधूनकः।
छलान्येतानि पञ्चाशत् भवन्ति नृपसन्निधौ"—इति ॥

अपराधानाह नारदः,—

"आज्ञालङ्घनकर्त्तारः स्त्रीवधो वर्णसङ्करः।
परस्त्रीगमनञ्चौर्य्यं गर्भश्चैव पतिं विना ॥

---

* कार्य्यं काम्यानुबन्धं,—इति स० शा०।

† राज्ञोऽतिरिक्तवसंश्च द्विवसंश्च,—इति शा० स०।

5

वाक्पारुष्यमवाच्यन्तु* दण्डपारुष्यमेव च।
गर्भस्य पातनञ्चैवेत्यपराधाः दशैव च"—इति॥

विवादमन्तरेणापि दण्ड्यत्वं† हेतुलादेतेषामपराधत्वम्। अतएव समन्तः,—

"आसेवं पथिभङ्गश्च यस्य गर्भः पतिं विना।
स्वयमन्वेषयेद्राजा विना चैव विवादिना॥
कन्याऽपहारकं पापं विप्रञ्च पतितं तथा।
परापवादसंयुक्तं स्वयं राजा विचारयेत्॥
षड्भागकालं शुल्कार्थं मार्गच्छेदकमेव च।
स्वराष्ट्रचौर्यभीतिश्च परदाराभिमर्शनम्॥
गोब्राह्मणनिहन्तारं स्त्रीणामाश्चैव घातकम्।
दशैतानपराधांश्च स्वयं राजा विचारयेत्"—इति।

तदप्याह पितामहः,—

"उत्क्रान्ती‡ स्त्रव्याती च अग्निदश्च तथैव च।
पटहाघोषणाच्छादी(१) द्रव्यमस्वामिकञ्च यत्॥
राजावलीढद्रव्यं यत् यच्चैवाङ्गविनाशनम्।
द्वाविंशतिः§पदान्याहुः नृपज्ञेयानि पण्डिताः"—इति।

* मवाच्यया,—इति का०।

† दण्डन,—इति का०।

‡ उत्क्रान्तिः,—इति शा०।

§ द्वात्रिंशति,—इति का०।

(१) पटहेन यदाघुष्यते, तस्याच्छादनकर्त्ता इत्यर्थः।

यत्र छलादीनि राजा स्वयं द्रष्टुमशक्तः, तत्र स्तोभकात् सूचकाच्च बोद्धव्यम्। तयोः स्वरूपमाह कात्यायनः,—

"शास्त्रेण निन्दितं त्वर्थमुख्योराज्ञ* प्रचोदितः।
आवेदयति यः पूर्वं स्तोभकः स उदाहृतः॥
नृपेणैव नियुक्तः स्यात् परदोषमवेक्षितुम्।
नृपस्य समयं ज्ञात्वा सूचकः स उदाहृतः"—इति।

शास्त्रनिन्दितं छलादिकम्। अर्थमुख्यो धनलाभप्रधानः। राज्ञा शास्त्रादिपर्य्यालोचनपुरःसरमेव कार्य्यं कर्त्तव्यम्। तदाह हारीतः,—

"शास्त्राणि वर्णधर्मांस्तु प्रकृतीनाञ्च भूपतिः।
व्यवहारस्वरूपञ्च ज्ञात्वा कार्य्यं समाचरेत्"—इति।

प्रकृतयः पितामहेन दर्शिताः,—

"रजकश्चर्मकारश्च नटो वरुटो† एव च।
कैवर्त्तकश्च विज्ञेयो म्लेच्छभिल्लौ तथैव च॥
मेधिकस्थिरवव्यालहस्तौ लघट्टिघट्टिकौ‡।
कोसेदिकाः§ भाण्डपदामानगोपडोपगोपमाः॥
एताः प्रकृतयः प्रोक्ता अष्टादश मनीषिभिः।
वर्णानामाश्रमाणान्तु सर्वदैव बहिः स्थिताः"—इति।

---

* त्वर्थं मुख्यस्यार्थः,—इति का०।

† बुरुड़,—इति का०।

‡ लघट्टघट्टिकाः,—इति पाठः।

§ कोसेदिकाः,—इति का०।

मनुश्च जात्यादि समीचणीयमित्याह,—

"जातिजानपदान् धर्मान् श्रेणीधर्मांश्च शाश्वतान् ।
समीक्ष्य कुलधर्मांश्च स्वे वर्णे प्रतिपादयेत्"—इति ।

उन्मार्गवर्त्तिनः कुलादीन् स्वमार्गे स्थापयेदित्याह याज्ञवल्क्यः,—

"कुलानि जातीः श्रेणीश्च गणाञ्जानपदानपि ।
स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि"—इति ।

कार्य्यदर्शनप्रकारमाह नारदः,—

"धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः ।
समाहितमतिः पश्येत् व्यवहारमनुक्रमात् ॥
आगमः प्रथमः कार्य्यो* व्यवहारपदन्ततः ।
विचारो निर्णयश्चेति दर्शनं स्याच्चतुर्विधम्"—इति ।

आगमोऽर्थिवचनश्रवणं, तदादौ कर्त्तव्यम् । ततस्तद्वचनं ऋणादानाद्यन्यतममस्मिन् पदे अन्तर्भाव्यम् । ततः प्रतिज्ञोत्तरप्रमाणानां विचारः । ततः प्रमाणतोजयावधारणम् ।

इति व्यवहारदर्शनविधिः ।

---

* कार्य्य,—इति का० ।

अथासेधादिविधिः।

तत्र नारदः,—

"वक्तव्येऽर्थे न तिष्ठन्तमुत्क्रामन्तञ्च तद्वचः।
आसेधयेत् विवादार्थं यावदाह्वानदर्शनम्"—इति।

प्रथमन्तावदर्थी प्रत्यर्थिनं प्रति त्वयैतावन्मम देयमित्यादिकं कार्य्यं ब्रूयात्। तत्र यदि तदुक्त*मनभ्युपगम्योत्क्रान्तुमिच्छेत्, तदा स्वकार्य्यपर्य्यन्तं राजाज्ञया तं निरुन्ध्यात्। आसेधभेदानाह सएव,—

"स्थानासेधः कालकृतः प्रवासात् कर्मणस्तथा।
चतुर्विधः स्यादासेधस्तमासेधं न लङ्घयेत्"—इति।

अस्मात् स्थानात् त्वया न चलितव्यमिति स्थानासेधः। मदीयद्रव्यप्रदाने दिनमेतन्नोल्लङ्घनीयमिति कालासेधः। अदत्त्वा ग्रामान्तरं न गन्तव्यमिति प्रवासासेधः। अदत्त्वा न सन्ध्यावन्दनं कर्त्तव्यमिति कर्म्मासेधः। सन्ध्यावन्दनादिवदिन्द्रियनिरोधो न आसेधार्हः। तदाह कात्यायनः,—

"यस्त्विन्द्रियनिरोधेन व्याहरेत् कुशलादिभिः।
आसेधयेदनासेधैः स दण्ड्यो न त्वतिक्रमात्"—इति।

इन्द्रियनिरोधवत् विषमदेशोऽपि नासेधार्हः इत्याह नारदः,—

"नदीसन्तारकान्तारदुर्देशोपप्लवादिषु†।
आसिद्धस्तु परासेधमुत्क्रामन्नापराध्नुयात्"—इति।

आसेध्यासेधकयोः तत्कालोल्लङ्घने दण्डमाह सएव,—

---

* तदुत्तर,—इति का०।

† दुर्गमोपप्लवादिषु,—इति का०।

"आसेधकाल आसिद्ध आसेधं योऽतिवर्त्तते ।

स विनेयोऽन्यथा कुर्वन् आसेद्धा दण्डभाग्भवेत्"—इति ।

अन्यथा कुर्वन् अयोग्ये निशीथादिकाले तमासेधयन्। अनासे-ध्यानाह कात्यायनः,—

"वृक्षपर्वतमारूढा हयेभरथनौगताः ।

विषमस्थाश्च ते सर्वे नासेध्याः कार्य्यसाधकैः ॥

व्याध्यार्त्तव्यसनस्थाश्च यजमानस्तथैव च ।

अनुत्तीर्णाश्च नासेध्याः मत्तोन्मत्तजड़ास्तथा ॥

न कर्षको बीजकाले सेनाकालेऽथ सैनिकाः ।

प्रतिज्ञाय प्रयातश्च हृतकालश्च नान्तरा ॥

उद्युक्तः कर्षकः सस्ये तोयस्यागमने यदा ।

आरम्भसङ्कटं* यावत् तत्कालं न विवादयेत्"—इति ।

वृहस्पतिरपि,—

"सचोद्वाहोद्यतो रोगी शोकार्त्तो मृतबालकः ।

मत्तो वृद्धोऽभियुक्तश्च नृपकार्य्योद्यतो व्रती ॥

आसन्ने सैनिकः सङ्ख्ये(१) कर्षकश्चायसङ्कटे ।

विषमस्थाश्च नासेध्याः स्त्रीधनाद्यास्तथैव च"—इति ।

नारदोऽपि,—

"निवेष्टुकामो रोगार्त्तो यियक्षुर्व्यसने स्थितः ।

---

* आरम्भाः सङ्कटं,—इति का० ।

---

(१) सङ्ख्ये युद्धे आसन्ने सति सैनिको नासेध्यः ।

अभियुक्तस्तथाऽन्येन(१) राजकार्य्योद्यतस्तथा ॥
गवां प्रचारे गोपालाः सस्यारम्भे कृषीवलाः ।
शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रहे ॥
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः"—इति ।

कदा तर्हि द्रव्यं दापनीयमित्याकाङ्क्षायां बृहस्पतिराह,—

"वणिग्विक्रीतपण्यस्तु सस्ये जाते कृषीवलः ।
यज्ञोद्यतास्तैव तथा दापनीयाः कृतक्रियाः"—इति ।

यद्यासिद्धो नागच्छेत्, तदा राजा तमानयेत् । तदाह बृहस्पतिः,-

"यत्राभियोगं कुरुते सत्येनाशङ्कया तथा ।
तमेवानाययेद्राजा मुद्रया पुरुषेण वा"—इति ।

नारदोऽपि,—

"देशं कालञ्च विज्ञाय कार्य्याणाञ्च बलाबलम् ।
अकल्यादीनपि(२) तथा शनैराह्वानयेन्नृपः*"—इति ।

आह्वानानर्हानाह हारीतः,—

"अकल्यबालस्थविरविषमस्थक्रियाऽऽकुलान् ।

---

* अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः,—इति का० ।

---

(१) अन्येन वादान्तरेणाभियुक्तो वादान्तरार्थं नासेध्यः ।
(२) अकल्योऽसमर्थः ।

कार्य्यातिपातिव्यसनिनृपकार्य्योत्सवाकुलान्[१] ॥
मत्तोन्मत्तप्रमत्तांश्च[२] स्वजातिप्रभुक्तां स्त्रियम्।
धर्म्मोत्सुकान् जडानार्त्तभृत्यान्नाह्वानयेन्नृपः"—इति।

कात्यायनोऽपि,—

"धर्म्मोत्सुकानभ्युदये रोगिणोऽथ जडानपि।
अस्वस्थमत्तोन्मत्तार्त्तस्त्रियो नाह्वानयेन्नृपः॥
न हीनपक्षां युवतीं कुले जातां प्रसूतिकाम्।
स्वजातिप्रभुक्ताश्चैव तथा नाह्वानयेन्नृपः"—इति।

स्वजातिप्रभुक्ता तु मरीचिना निरुक्ता,—

"सर्ववर्णोत्तमा कन्या स्वजातिप्रभुका स्मृता।
तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः॥
निष्कुला याश्च पतिताः तासामाह्वानमिष्यते"—इति।

हृतस्य दण्डमाह वृहस्पतिः,—

"आहूतो यस्तु नागच्छेत् दर्पाद्बन्धुबलान्वितः।
अभियोगानुरूपेण तस्य दण्डं प्रकल्पयेत्"—इति।

---

(१) व्यसनं विपद्, कामजक्रोधजदोषविशेषोवा। स चाष्टादशप्रकारः मनुनोक्तः। यथा,—

"मृगयाऽक्षोदिवास्वप्नः परिवादः स्त्रियोमदः।
तौर्य्यत्रिकं वृथाऽटाद्या कामजो दशकोगणः॥
पैशून्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः"—इति।

(२) मत्तोमद्यादिना, उन्मत्तोवातादिना, प्रमत्तोऽनवहितः।

कात्यायनोऽपि,—

"आहूतस्त्ववमन्येत यः शक्तो राजशासनम् ।

तस्य कुर्य्यान्नृपो दण्डं विधिदृष्टेन कर्मणा ॥

हीने कर्मणि पञ्चाशन्मध्यमे तु शतावरः ।

गुरुकार्य्येषु दण्डः स्यात् नित्यं पञ्चशतावरः"—इति ।

आपन्नस्यानागमनेऽपि दण्डो नेत्याह व्यासः,—

"परानीकहते देशे दुर्भिक्षे व्याधिपीडिते ।

कुर्वीत पुनराह्वानं दण्डं न परिकल्पयेत्"—इति ।

इत्यासेधादिविधिः ।

अथ दर्शनोपक्रमः ।

अथ मनुः,—

"धर्मासनमधिष्ठाय संवीताङ्गः समाहितः ।

प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत्"—इति ।

आरभ्य कर्त्तव्यमाह कात्यायनः,—

"काले कार्य्यार्थिनं पृच्छेत् प्रणतं पुरतः स्थितम् ।

किं कार्य्यं का च ते पीडा मा भैषीर्ब्रूहि मानव ।

केन कस्मिन् कथं कस्मात् पृच्छेदेवं सभागतम्"—इति ।

बृहस्पतिरपि,—

"आगतानां विवदतामसकृद्वादिनां नृपः ।

वादान् पश्येन्नात्मकृतान् न चाध्यक्षनिवेदितान् ॥

पीडितः स्वयमायातः शास्त्रेणार्थी यदा भवेत् ।

प्राड्विवाकस्तु तं पृच्छेत् पुरुषो वा शनैः शनैः"—इति ।

पृष्टश्च कार्यं यथावदावेदयेदित्याह याज्ञवल्क्यः,—

"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।

आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्"—इति ।

यदि केनचिन्निमित्तेन स नावेदयेत्, तदा स व्यवहारो न बलात् कारयितव्य इत्यभिप्रेत्य चेदित्युक्तम् । आवेदनकाले सशस्त्रादयो-वर्जनीया इत्याह उशना,—

"सशस्त्रोऽनुत्तरीयो वा मुक्तकच्छः सहासनः ।

वामहस्तेन वा स्रग्वी वदन् दण्डमवाप्नुयात्"—इति ।

अर्थिनः प्रतिनिधिमभ्युपगच्छति कात्यायनः,—

"अर्थिना सन्नियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा ।

यो यस्यार्थे विवदते तयोर्जयपराजयौ"—इति ॥

अन्तरेणापि नियोगं पित्रादयो विवादं कुर्युरित्याह पितामहः,—

"पिता माता सुहृद्वाऽपि बन्धुः सम्बन्धिनोऽपि वा* ।

यदि कुर्युरुपस्थानं वादं तत्र प्रवर्त्तयेत्† ॥

यः कश्चित् कारयेत्किञ्चिन् नियोगाद्येन केनचित् ।

तत्तेनैव कृतं ज्ञेयमनिवर्त्यं हि तत् स्मृतम्"—इति ।

उक्तेभ्यो व्यतिरिक्तस्य विवादञ्च निषेधति नारदः,—

---

* सम्बन्धिकोऽपि वा,—इति शा० ।

† प्रवर्त्तते,—इति का० ।

"यो न भ्राता न च पिता न पुत्रो न नियोगकृत्* ।
परार्थवादी दण्ड्यः स्याद् व्यवहारेषु विब्रुवन्"—इति ।

कात्यायनोऽपि,—

"दासाः कर्म्मकराः शिष्याः नियुक्ता बान्धवास्तथा ।
वादिनो न च दण्ड्याः स्युर्यस्ततोऽन्यः स दण्डभाक्"—इति ।

आवेदितार्थो लेखनीय इत्याह नारदः,—

"रागादिना यदेकेन कोपितः† करणे वदेत् ।
तद्दोषमपि लिखेत्सर्व्वं वादिनः फलकादिषु"—इति ।

करणे धर्म्माधिकरणे । लिखितस्य अर्थस्य सभाभिमतत्वे सति प्रभुस्तत्र प्रवर्त्तेत इत्याह कात्यायनः,—

"एवं पृष्टः स यद्ब्रूयात् तत्सभ्यैर्ब्राह्मणैः सह ।
विमृश्य कार्य्यं न्याय्यं चेदाह्वानार्थमतः परम् ॥
मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत्"—इति ।

आहूतं प्रत्यर्थिनं सुरक्षितस्थाने स्थापयेदित्याह पितामहः,—

"सभायाः पुरतः स्थाप्योऽभियोगी वादिना तथा ।
संमितेऽन्यत्र वा स्थाने‡ प्रमाणं सोऽन्यथा न तु"—इति ॥

स्थापितस्य स्खलनादिनापि बाह्यलिङ्गैर्निश्चेयम् । अतएव मनुः,—

"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।

---

* नियोजितः,—इति पुस्तकान्तरीयः पाठः ।

† रोगादिना यदैकेन कोऽपि वा,—इति पा० स० ।

‡ तद्स्थाने,—इति पा० ।

नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः[१]"—इति ।

लिङ्गान्तराणि याज्ञवल्क्य आह,—

"देशाद्देशान्तरं याति सृक्कणी परिलेढि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक् चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि[२] ॥
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ।
अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्त्तितः"—इति ॥

छलवादपक्षे सएवाह,—

"उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये"—इति ।

तत्र वर्ज्यानाह कात्यायनः,—

"न स्वामी न च वै शत्रुः* स्वामिनाऽधिकृतस्तथा ।
विरुद्धोदण्डितश्चैव संशयस्थो न च क्वचित् ॥
नैव रिक्थी न रिक्थस्य न चैवात्यन्तवासितः ।
राजकार्यनियुक्ताश्च ये च प्रव्रजिता नराः ॥
नाशक्ता धनिने दातुं दण्डं राज्ञे च तत्समम् ।
नाविज्ञातो ग्रहीतव्यः प्रतिभूस्तत्क्रियाम्प्रति"—इति ।

---

* कर्त्ता,—इति शा० ।

---

(१) आकारो विकृतः । इङ्गितं स्वेदवेपथुरोमाञ्चादि ।

(२) न परकीयां वाचं प्रतिवचनदानेन पूजयति, चक्षुश्च परकीयवीक्षणेन । निर्भुजति कुटिलीकरोति ।

यदि वादी विवादप्रतिभुवं दातुमसमर्थः, तदाऽपि तेनैवोक्तम्,—

"अथ चेत् प्रतिभूर्नास्ति दद्योग्यस्य च* वादिनः।

स रक्षितो दिनस्यान्ते दद्याद् भृत्याय वेतनम्॥

द्विजातिः प्रतिभूहीनो रक्ष्यः स्यात् वाह्यचारिभिः।

शूद्रादीन् प्रतिभूहीनान् बन्धयेन्निगडेन तु॥

अतिक्रमेऽपयाते† वा दण्डयेत् तं दिनाष्टकम्।

नित्यकर्म्मोपरोधस्तु न कार्य्यः सर्व्ववर्णिनाम्"—इति।

अभियोक्त्रादीनां उक्तिक्रमोऽपि तेनैवोक्तः,—

"तत्राभियोक्ता प्राग् ब्रूयादभियुक्तस्त्वनन्तरम्।

तयोरन्ते सदस्यास्तु प्राड्विवाकस्ततः परम्"—इति।

प्राग् ब्रूयात् प्रतिज्ञां कुर्य्यादित्यर्थः। तथाच नारदः,—

"आज्ञालेख्ये पट्टिके शासने वा

आधौ परे विक्रये वा क्रये वा।

राज्ञे कुर्य्यात् पूर्व्वमावेदनं यः

तस्य ज्ञेयं पूर्व्ववादो विधिज्ञैः"—इति।

विवादे पूर्व्वाभियोक्तुरेव प्रतिज्ञावादित्वमित्यर्थः। अत्रापवाद-माह स एव,—

"यस्य चाभ्यधिका पीडा कार्य्यं वाऽभ्यधिकं भवेत्।

तस्यार्थवादो‡ दातव्यो न यः पूर्व्वं निवेदयेत्"—इति।

---

* वादयोग्यस्य,—इति ग्रा०। वादयोग्यस्तु,—इति ग्रन्थान्तरे।

† अतिक्रमे च याते च,—इति का०।

‡ तस्यार्थिभावो,—इति ग्रन्थान्तरीयः पाठः।

कात्यायनः,—

"यस्य स्यादधिका पीडा कार्यं वाऽभ्यधिकं भवेत्।

पूर्वमर्थी भवेत्तस्य न यः पूर्वं निवेदयेत्"—इति।

यत्रोभयोरपि परस्परमर्थित्वं प्रत्यर्थित्वञ्च साम्यभेदाद्युगपद्भवति, तत्रोत्कृष्टजातेर्बहुपीडस्य वाऽर्थिनो वादः पूर्वं द्रष्टव्यः। तथाच बृहस्पतिः,—

"अहंपूर्विकया ऽऽयातावर्थिप्रत्यर्थिनौ यदा।

वादो वर्णानुपूर्व्येण ग्राह्यः पीडामवेक्ष्य च"—इति।

समानवर्णत्वे पीडापेक्षया ग्राह्यः। अनेकवादिसमुदायानां युगपदुपस्थाने दर्शनक्रममाह मनुः,—

"अर्थानर्थावुभौ बुध्वा धर्माधर्मौ च केवलौ।

वर्णक्रमेण सर्वाणि पश्येत्कार्य्याणि कार्य्यिणाम्"—इति।

इति दर्शनोपक्रमो निरूपितः।

अथ चतुष्पाद्व्यवहारः प्रस्तूयते॥

प्रतिज्ञोत्तरं प्रमाणं निर्णयश्चेति चत्वारः पादाः। तत्र प्रतिज्ञां संग्रहाति याज्ञवल्क्यः,—

"प्रत्यर्थिनोऽग्रतो लेख्यं यथाऽऽवेदितमर्थिना।

समामासतदर्द्धाहर्नामजात्यादिचिह्नितम्"—इति।

एतच्च बृहस्पतिना स्पष्टीकृतम्,—

"उपस्थिते ततस्तस्मिन् वादी पक्षं प्रकल्पयेत्।

निवेश्य सप्रतिज्ञञ्च* प्रमाणागमसंयुतम् ॥

देशकालसमामासपक्षाहर्नामजाति च ।

द्रव्यसङ्ख्योदयं पीडां क्षमालिङ्गञ्च लेखयेत् ॥

प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम् ।

निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥

अल्पाक्षरस्त्वसन्दिग्धो बह्वर्थः साध्यनाकुलः ।

युक्तोविरोधकरणे विरोधिप्रतिषेधकः”—इति ।

ततः प्रत्यर्थ्याकारणानन्तरम् । तस्मिन्नुपस्थिते प्रत्यर्थिन्यागते सति । निरवद्यं पक्षदोषरहितम् । पक्षदोषाश्च कात्यायनेन दर्शिताः,—

“देशकालविहीनश्च द्रव्यसङ्ख्याविवर्जितः ।

साध्यप्रमाणहीनश्च पक्षोऽनादेय इष्यते”—इति ।

स्मृत्यन्तरेऽपि,—

“अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् ।

असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्”—इति ।

अप्रसिद्धं, मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि । निराबाधं, अस्मद्गृहप्रदीपप्रकाशेनायं स्वगृहे व्यवहारं करोतीत्यादि । निरर्थकमभिधेयरहितं कचटतप इत्यादि । निष्प्रयोजनं, यथा, अयं देवदत्तोऽस्मद्गृहसन्निधौ सुस्वरमधीते, इत्यादि । असाध्यं यथा, अहं देवदत्तेन सभ्रूभङ्गं प्रहसित इत्यादि । विरुद्धं यथा, अहं मूकेन शप्त इत्यादि ।

पुरराष्ट्रादिविरुद्धं भामञ्च विषयपक्षदोषनिहितम् । निरवद्यं,

---

* इत्थमेव पाठः सर्व्वत्र । मम तु, निरवद्यप्रतिज्ञञ्च,—इति पाठः प्रतिभाति । निरवद्यं पक्षदोषरहितमिति व्याख्यानदर्शनात् ।

मदीयं द्रव्यमनेन गृहीतं तत्प्रत्यर्पणीयमिति प्रतिज्ञा, तया युक्तं सप्रतिज्ञम् । प्रमाणं लिखितभुक्त्यादि । आगमो द्रव्यप्राप्तिप्रकारः कात्यायनोऽपि स्पष्टमुदाजहार,—

"निर्दिश्य कालं वर्षञ्च मासं पक्षं तिथिन्तथा ।
वेलां प्रदेशं विषयं स्थानं जात्याकृती वयः ॥
साध्यं प्रमाणं द्रव्यञ्च सङ्ख्या नाम तथाऽऽत्मनः ।
राज्ञाञ्च क्रमशो नाम निवासं साध्यनाम च ॥
क्रमात् पितॄणां नामानि पीडामाहर्तृदायकौ ।
क्षमालिङ्गानि वाक्यानि पक्षं सङ्कीर्त्य कल्पयेत् ॥
देशं कालं तथोन्मानं सन्निवेशं तथैवच ॥
जातिः संज्ञाऽधिवासश्च प्रमाणं क्षेत्रनाम च ।
पितृपैतामहञ्चैव पूर्वराजानुकीर्त्तनम् ॥
स्थावरेषु विवादेषु दशैतानि निवेशयेत्"—इति ।

देशादीनां स्थावरविवादेषु पुनरभिधानं, यत्र यावदुपयुज्यते तत्र तावदेवोपादेयं न तु सर्वं सर्वत्रेति प्रदर्शनार्थम् । संग्रहकारोऽपि,—

"अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम् ।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च ॥
प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम् ।
सङ्क्षिप्तं निखिलार्थञ्च देशकालाविरोधि च ॥
वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत् ।
स्थानावसथसाध्याख्यं* जात्याकारवयोयुतम्

---

* समावसतिसाध्याख्या,—इति का० ।

साध्यप्रमाणसङ्ख्यावदात्मप्रत्यर्थिनामवत् ।
परात्मपूर्वजानेकराजनामभिरङ्कितम् ॥
क्षमालिङ्गात्मपीडावत् कथिताहर्तृदायकम् ।
यदावेद्यते राज्ञे तद्भाषेत्यभिधीयते"—इति ।

परात्मपूर्वजानेकराजनामभिः; परः प्रतिवादी, आत्मा वादी, तयोः पूर्वजाः पित्रादयः, अनेके राजानो भुक्तिकालीनाः, तेषां नामभिः । भाषादोषास्तु नारदेन दर्शिताः,—

"अन्यार्थमर्थहीनञ्च प्रमाणागमवर्जितम् ।
लेख्यस्थानादिभिर्भ्रष्टं भाषादोषा उदाहृताः"—इति ।

तांश्च स्वयमेव व्याचष्टे,—

"दृष्टे साधारणेऽप्येको यद्यथैवाभियुक्तकः ।
लेखयेद्यस्तु भाषायामन्यार्थञ्च विदुर्बुधाः ॥
गणिते तुलिते मेये तथा क्षेत्रगृहादिके ।
यत्र सङ्ख्या न निर्दिष्टा सा प्रमाणविवर्जिता ॥
विद्यया प्राप्तमायातं बलं क्रीतं क्रमागतम् ।
न लेवं लिख्यते यत्र सा भाषा स्यादनागमा ॥
समा मासस्तथा पक्षस्तिथिर्वारस्तथैव च ।
यत्रैतानि न लिख्यन्ते लेख्यहीनान्तु तां विदुः ।
लेखयित्वा तु यो भाषां निर्दिष्टेन तथोत्तरे ।
उद्दिशेत् साक्षिणः पूर्वम् अधिकान्तां विनिर्दिशेत् ।
यत्र स्यादुभयं सर्वं निर्दिष्टं पूर्ववादिना ।
सन्दिग्धमिव लिख्येत भ्रष्टां भाषां तु तां विदुः"—इति ।

अर्थे साधारणे बहूनां समभिलिखि कार्यं। पुनरपि स एव हेयपक्षं संग्रह्य विवृणोति,—

"भिन्नक्रमो व्युत्क्रमार्थः प्रकीर्णार्थो निरर्थकः ।
अतीतकालोऽहितश्च पक्षोऽनादेय इष्यते ॥
यथास्थानविवेशेन नैव पक्षार्थकल्पना ।
क्रियते न स पक्षस्तु भिन्नक्रम उदाहृतः ॥
मूलमर्थं परित्यज्य तद्गुणो यत्र लिख्यते ।
निरर्थकः स वै पक्षोऽद्भुतसाधनवर्जितः ॥
भूतकालमतिक्रान्तं द्रव्यं यत्र हि लिख्यते ।
अतीतकालः पक्षोऽसौ प्रमाणे सत्यपि स्मृतः ॥
यस्मिन् पक्षे द्विधा साध्यं भिन्नकालविमर्शनात् ।
विमृश्यते क्रियाभेदात् स पक्षोऽहित उच्यते"—इति ।

एकेन अर्थिना बहुसाध्यनिर्देशो युगपन्न कर्त्तव्यः, कालभेदेन तु कर्त्तव्यः। तदुभयं कात्यायन आह,—

"पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः ।
अनेकपदसङ्कीर्णः पूर्वपक्षो न सिध्यति ॥
बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितम् ।
कामं तदपि गृह्णीयात् राजा तत्त्वबुभुत्सया"—इति ।

पूर्ववादिनो नियममाह बृहस्पतिः,—

"श्रुतानुक्तं क्रियाहीनमसारान्यार्थमाकुलम् ।
पूर्वपक्षं लेखयतो वादहानिः प्रजायते ॥
उपदिश्याभियोगं यत् समतीत्यापरं वदेत् ।

क्रियामुक्ताऽन्यथा ब्रूयात् स वादी दानमाप्नुयात् ॥
न्यूनाधिकं* पूर्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ"—इति ।

कात्यायनोऽपि,—

"अधिकान् छेदयेदर्थान् हीनांश्च प्रतिपूरयेत् ।
भूमौ निवेशयेत्तावद् यावदर्थोऽभिवर्णितः"—इति ।

नारदोऽपि,—

"भाषायामुत्तरं यावत् प्रत्यर्थी नाभिलेखयेत् ।
यस्यान्तु लेखयेत्तावद् यावद्वस्तु विवक्षितम्"—इति ।

अप्रगल्भं वादिनं प्रति वृहस्पतिराह,—

"अभियोक्ताऽप्रगल्भत्वात् वक्तुं नोत्सहते यदा ।
तस्य कालः प्रदातव्यः कार्य्यशक्त्यनुरूपतः"—इति ।

कालेयत्तामाह कात्यायनः,—

"सलेखनं वा लभते त्र्यहं सप्ताहमेव वा ।
मतिरुत्पद्यते यावद्विवादे वक्तुमिच्छतः"—इति ।

पूर्वपक्षस्य चातुर्विध्यं प्रतिपादयति वृहस्पतिः,—

"चतुर्विधः पूर्वपक्षः प्रतिपक्षस्तथैव च ।
चतुर्धा निर्णयः प्रोक्तः केचिदष्टविधः स्मृतः ॥
शङ्काऽभियोगस्तथ्यश्च सभ्येऽर्थेऽभ्यर्थनं तथा ।
वृत्ते वादे पुनर्न्यायः पक्षो ज्ञेयश्चतुर्विधः ॥
भ्रान्तिः शङ्का समुद्दिष्टा तथ्यं नष्टार्थदर्शनम् ।

---

* उनाधिकं,—इति का० ।

तस्येऽर्थेऽभ्यर्थनं मोक्षः तथा द्वत्ते पुनः क्रिया" ॥

एतत् पाण्डुलेख्येन लिखिलाऽऽवापोद्धारेण[१] शोधितं पत्रे निवेशयेदित्याह कात्यायनः,—

"पूर्वपक्षस्य भावोक्तं प्राड्विवाकोऽभिलेखयेत् ।

पाण्डुलेख्येन फलके ततः पत्रे च शोधितम्*"—इति ।

शोधनं यावदुत्तरदर्शनं, नातः परम् । अतएव नारदः,—

"शोधयेत्पूर्ववादन्तु यावन्नोत्तरदर्शनम् ।

अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत्"—इति ।

हेयोपादेयौ पूर्वपक्षौ विविनक्ति बृहस्पतिः,—

"राज्ञा विवर्जितो यस्तु यस्तु पौरविरोधकृत् ।

राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च ॥

अन्ये वा ये पुरग्राममहाजनविरोधकाः ।

अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्त्तिताः ॥

न्यायं वा नेच्छते कर्तुं नान्यायं वा† करोति यः ।

स लेखयति यस्त्वेवं तस्य पक्षो न सिद्ध्यति ॥

विरुद्धं वाऽविरुद्धं वा द्वावप्यर्थौ निवेशितौ ।

एकस्मिन् यत्र दृश्येतां तं पक्षं दूरतस्त्यजेत् ॥

---

* विशोधितम्,—इति का० ।

† कुर्व्वन्नन्यायं वा,—इति का० ।

---

(१) आवापः पूर्व्वमलिखितस्य निवेशनम् । उद्धारः पूर्व्वं निवेशितस्यापनयः ।

उन्मत्तमत्ताभिभूता महापातकदूषिताः।
जडातिवृद्धबालाश्च विज्ञेयाः पुर्निरुत्तराः॥
पक्षः प्रोक्तस्तु नादेयो वादी चानुत्तरस्तथा।
यादृग्वादी न यः पक्षो ग्राह्यस्तत्कथयाम्यहम्॥
पीडातिशयमाश्रित्य यद्ब्रवीति विवक्षितम्।
स्वार्थसिद्धिपरो वादी पूर्वपक्षः स उच्यते"—इति॥

इति प्रतिज्ञापादो निरूपितः।

अथ उत्तरपादो निरूप्यते।

तत्र याज्ञवल्क्यः संग्टह्णाति,—

"श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ"—इति।

तदेतद् बृहस्पतिर्विवृणोति,—

"यदा चैवंविधः पक्षः कल्पितः पूर्ववादिना।
दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्॥
विनिश्चिते पूर्वपक्षे ग्राह्याग्राह्यविशेषिते।
प्रतिज्ञार्थे स्थिरीभूते लेखयेदुत्तरं ततः"—इति।

उत्तरे स्वतः प्रवृत्त्यभावे च तद्दापनीयमित्याह[१] सएव,—

"पूर्वपक्षे यथार्थे तु न दद्यादुत्तरं तु यः।
प्रत्यर्थी दापनीयः स्यात् सामादिभिरुपक्रमैः॥

---

(१) तथाच प्रत्यर्थी यदि स्वयमुत्तरं दातुं न प्रवर्त्तते, तथा राज्ञाच उत्तरं दापनीय इत्यर्थः।

प्रियपूर्वं अवेलाम* भेदस्तु नयदर्शिनः ।

यथापकर्षणं दण्डः ताड़नं बन्धनं तथा”—इति ॥

उत्तरलक्षणमाह प्रजापतिः,—

“पक्षस्य व्यापकं साध्यमसन्दिग्धमनाकुलम् ।

अव्याख्यागम्यमित्येतदुत्तरन्तद्विदो विदुः”—इति ॥

हारीतोऽपि,—

“पूर्वपक्षस्य सम्बन्धमनेकार्थमनाकुलम् ।

अनल्पमव्यस्तपदं व्यापकं नातिभूरि च ॥

सारभूतमसन्दिग्धं स्वपक्षैकांशसम्भवम् ।

अर्थिश्रवसमूढार्थं देयमुत्तरमीदृशम्”—इति ॥

स्वपक्षैकांशसम्भवं अनवशेषितस्वपक्षैकदेशं, सम्पूर्णस्वपक्षमिति यावत् । सद्योत्तरन्दातुमसक्तं प्रति कात्यायन आह,—

“श्रुत्वा लेख्यमसत्यार्थं प्रत्यर्थी कारणाद्यदि ।

कालं विवादे याचेत तस्य देयो न संशयः”—इति ॥

कालभेदं कारणार्थं शेषश्चाह नारदः,—

“शालीनत्वाद् भयार्त्तत्वात् प्रत्यर्थी स्मृतिविभ्रमात् ।

कालं प्रार्थयते यत्र तत्र तल्लब्धुमर्हति ॥

एकाहं त्र्यहपञ्चाहं सप्ताहं पक्षमेववा ।

मासं मासत्रयं वर्षं लभते शक्त्यपेक्षया”—इति ॥

तत्र व्यवस्थामाह सएव,—

---

* प्रियः कामः,—इति का० ।

"ऋणः क्षती सकृद्वादः* मासेऽतीते क्षिप्रं क्षिपेत् ।
षडब्दिके त्रिरात्रन्तु सप्ताहं द्वादशाब्दिके ॥
विंशत्यब्दे दशाहन्तु मासार्द्धं वा लभेत सः ।
मासं त्रिंशत्समातीते त्रिपक्षं परतो भवेत् ॥
अस्वतन्त्रजडोन्मत्तबालदीक्षितरोगिणाम् ।
कालः संवत्सरादर्वाक् स्वयमेव यथेप्सितम्"—इति ॥

कात्यायनोऽपि,—

"संवत्सरं जडोन्मत्तेऽमनस्के व्याधिपीडिते ।
छिन्नतरप्रपञ्चेन अज्ञातार्थे च वस्तुनि ॥
मूलं वा साक्षिणो वाऽथ परदेशे स्थितो यदा ।
तत्र कालो भवेत् पुंसामा स्वदेशसमागमात् ॥
दत्तेऽपि काले देयं स्यात्पुनः कार्य्यस्य गौरवात्"—इति ॥

कालदानस्य विषयमाह नारदः,—

"गहनत्वाद्विवादानामसामर्थ्यात् स्मृतेरपि ।
ऋणादिषु हरेत् कालं कामन्तत्त्वबुभुत्सया"—इति ॥

ऋणादीन् दर्शयति पितामहः,—

"ऋणोपनिधिनिक्षेपे‡ दाने सम्भूयकर्मणि ।
समये दायभागे च कालः कार्य्यः प्रयत्नतः"—इति ॥

बृहस्पतिरपि,—

"साहसस्तेयपारुष्यगोऽभिशापे तथात्यये ।

---

* तदा वादः,—इति का० ।

† अवसे,—इति ग्रा० स० ।

‡ ऋणेऽपि च निक्षेपे,—इति का० ।

भूमौ विवादयेत् चिप्रमकालेऽपि वृहस्पतिः"—इति।

कात्यायनोऽपि,—

"धेनावनडुहि चैचे स्त्रीषु प्रजनने तथा।

न्यासे याचितके दत्ते तथैव क्रयविक्रये॥

कन्याया दूषणे स्तेये कलहे साहसे विधौ।

उपधौ कूटसाक्ष्ये च सद्यएव विवादयेत्"—इति॥

उपधिर्भयादिवशात् प्राप्तं कार्य्यम्। उत्तरस्य भेदानाह नारदः,—

"मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा।

प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः"—इति॥

मिथ्यादीनां स्वरूपमाह वृहस्पतिः,—

"अभियुक्तोऽभियोगस्य यदि कुर्य्यात्तु निह्नवम्।

मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः॥

श्रुत्वाऽभियोगं प्रत्यर्थी यदि तत् प्रतिपद्यते।

सा तु सम्प्रतिपत्तिस्तु शास्त्रविद्भिरुदाहृता॥

अर्थिनाऽभिहितो योऽर्थः प्रत्यर्थी यदि तन्तथा।

प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत्॥

आचारेणावसन्नोऽपि पुनर्लेखयते यदि।

स विनेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते"—इति॥

प्रजापतिरपि,—

"यावदावेदितं किञ्चित् मत्सम्बन्धमिहार्थिना।

तावत्सर्वमसम्भूत*मिति मिथ्योत्तरं स्मृतम्॥

* इत्थमेव पाठः सर्व्वत्र। मम तु, तावत् सर्व्वमसद्भूत,—इति पाठः प्रतिभाति।

यस्यैव देयमेवैतं* नासम्भावितमर्थिना ।
इति सम्प्रतिपत्त्याख्यं द्वितीयमिदमुत्तरम् ॥
दत्तमेव ममानेन किन्त्वस्यापि मया पुनः ।
प्रतिदत्तमितीदृक् च प्रत्यवस्कन्दनं स्मृतम् ॥
अस्मिन्नर्थान्तरे पूर्वं प्रारब्धोऽप्ययमर्थिना ।
जितस्यायं मया तत्र प्राङ्न्यायविधिरुच्यते"—इति ॥

मिथ्योत्तरस्यावान्तरभेदमाह सएव,—

"मिथ्यैतत् नाभिजानामि तदा तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्विधम्"—इति ॥

उत्तराभासानाह कात्यायनः,—

"अप्रसिद्धं विरुद्धं यदत्यल्पमतिभूरि च ।
सन्दिग्धासम्भवाव्यक्तमन्यार्थञ्चातिदोषवत् ॥
यद्व्यस्तपदमव्यापि निगूढार्थं तथाऽऽकुलम् ।
व्याख्यागम्यमसारञ्च नोत्तरं स्वार्थसिद्धये"—इति ॥

अप्रसिद्धादीन् सएव व्याचष्टे,—

"चिह्नाकारसहस्रन्तु समयं वाऽविजानता ।
भाषान्तरेण वा प्रोक्तमप्रसिद्धन्तदुत्तरम् ॥
प्रतिदत्तं मया बाल्ये प्रतिदत्तं मया न हि ।
यदेवमाह विज्ञेयं विरुद्धं तदिहोत्तरम् ॥
जितः पुरा मया त्वन्तु अर्थेऽस्मिन्निति भाषितम् ।

---

* इत्थमेव पाठः सर्व्वत्र । ममतु, तस्यैव देयमेवैतत्,—इति पाठः प्रतिभाति ।

पुरा मया च प्रमितमङ्गीकारोत्तरं स्मृतम्* ॥
गृहीतमिति यच्चार्थे कार्य्यन्तेन कृतं मया ।
पुरा गृहीतं मद्द्रव्यमिति चेत् वसुभूरि तत् ॥
देयं ममेति वक्तव्यो मया देयमितीदृशम् ।
सन्दिग्धमुत्तरं ज्ञेयं व्यवहारे बुधैस्तदा ॥
बलाबलेन चैतेन साध्यं स्थापितं पुरा ।
अनुक्तमेतन्मन्यन्ते तदव्यर्थमितीरितम् ।
अस्मै दत्तं मया साद्धं सहस्रमिति भाषिते‡ ॥
प्रतिदत्तं तदर्द्धं§ सत्तद्दिशाव्यापकं स्मृतम् ॥
पूर्ववादक्रियां यावत् सम्यङ्नैव विवेचयेत् ।
मया गृहीतं पूर्वं न तद्भूतपदमुच्यते ॥
तत्किंनामकरं किञ्चिद् गृहीतं न प्रदास्यति‖ ।
निगूढार्थन्तु तज्ज्ञेयमुत्तरं व्यवहारतः ॥
भिन्नेनैव यदा देयं मया देयं ममेदिति ।

---

* जितः पुरा मया सन्तुरर्थेऽस्मिन्निति भाषितम् ।
पुरा मया पत्रमिति पश्चात् चोत्तरं स्मृतम्,—इति का० ।
उभयमप्यसङ्गतमिव प्रतिभाति । क्रमप्राप्तस्यात्यस्योत्तरस्यैवात्र व्याख्यातुमुचितत्वात् ।

† देयं ममेति वक्तव्यं,—इति का० ।

‡ भाषितम्,—इति का० ।

§ इत्थमेव पाठः सर्व्वत्र । ममतु, तदर्द्धं,—इति पाठः प्रतिभाति ।

‖ किञ्चिदगृहीतं प्रदास्यति,—इति का० ।

एतद्व्यासमित्युक्तमुत्तरं तद्विदो विदुः ॥
काकस्य सन्ति वा दन्ता* सन्तीत्यादि तदुत्तरम् ।
असारमिति तत्तेन सम्यङ् नोत्तरमिष्यते”—इति ।

अथ भिन्नोत्तरादेरयमर्थः । विवादविषयस्य गोहिरण्यादिद्रव्यस्य वर्णविशेषादिकं चिह्नं, दीर्घह्रस्वत्वादिराकारः, सहस्रादि संख्या, समयः कालविशेषः संकेतविशेषो वा, तदुभयमजानता यत्कीर्त्तितं, असक्ता वा सभ्यानामपरिचितया भाषया यदुक्तं, तदुभयमप्रसिद्धम् । कालत एव मया सर्वं द्रव्यं प्रतिदत्तमित्युक्त्वा, स पुनरपि विस्मृत्य वा प्रतिवादिबुद्धिमपच्छादयितुकामो वा† न दत्तमिति यद्ब्रूयात्, तद्विरुद्धम् । पुरा मयाऽयं जित इति वक्तव्ये सति जितशब्दं परित्यज्य तदुभयम् । गृहीतमित्येतावत्येव वक्तव्ये सति प्रथमतः तदनुक्त्वा तेन कर्त्तव्यं तत्कार्य्यं मया कृतमित्येतादृशं प्रकृतानुपयोगि किञ्चिदुक्त्वा पश्चाद्गृहीतमिति यद्ब्रूयात्, तदुत्तरमतिभूरि । देयं मयेत्युक्ते सति सन्देहमन्तरेण दातव्यनिश्चयो भवति, तदनुक्त्वा मया देयमिति यदि ब्रूयात्, तदासीनस्य देयं इति वा अदेयमिति वा पदं छेत्तुं शक्यत्वादुत्तरं सन्दिग्धम् । यदि षोड़शवर्षः प्रतिवादी मत्पौत्रेण दत्तमिति ब्रूयात्, तदसम्भवि । एकादशवर्षस्यापि मया दत्तानीति वक्तव्ये सति, छाकाशमासकानि स्वप्रतियोगिशब्दवाच्यत्वेन विभाषितानीत्येवमप्रसिद्धैः पदैरभिहितमुत्तरमुक्तम् । प्रकृतस्य प्रतिज्ञार्थस्य उचितमुत्तरमनुक्त्वा चानुपयुक्तमेव किञ्चिद्ब्रूते; एतेन वादिना प्राक्तन

* काकस्य दन्तानीसन्ति,—इति का० ।

† सभ्यादिबुद्धिप्रमोदयितुकामो वा,—इति का० ।

दौर्बल्येन वा किञ्चिन्माहसं कृतमित्यादि । तच प्रकृतस्य अनुक्तत्वात् उत्तरमन्यार्थं भवति। शतं देयमिति प्रतिज्ञातस्य अर्थस्य शतदय-मित्युत्तरं दोषवत्। माङ्कं सहस्रं मह्यं देयमिति प्रतिज्ञातस्य तदर्द्धं प्रमितमिति वक्तव्ये सति विस्पष्टं न वदति, किन्तु लोके यः को-ऽपि किमगृहीतनामरथं दास्यतीत्येवमप्रसिद्धशब्देन व्यतिरेकमुखेन काकस्वरेणाभिहितमुत्तरं निगूढम्। किमनेनैव सदा देयं मया देयमित्यत्रोभयोर्वाक्ययोरादेयमिति वा पदच्छेदसम्भवादर्थस्य अनि-श्चयात् किमिति काका वक्ष्यमाणस्याप्यनिश्चयादिदमुत्तरं व्या-कुलम्। तत्पित्रा सुवर्णशतं गृहीतमित्यभियोगे नाहं पितुर्वाक्यं जानामीति वक्तव्ये सति व्यत्यस्तान्वयेन दुर्बोधं वचो ब्रूते, गृहीतं शतं वचनात् सुवर्णानां पितुर्न जानामीति। तदिदमुत्तरं व्याख्या-गम्यम्। काकदन्तादिविषयं निष्प्रयोजनं असारमिति । संकरा-ख्यमुत्तराभासमाह कात्यायनः,—

"एकैकदेशे सत्यत्यमेकदेशे च कारणम् ।
मिथ्या चैकैकदेशे* यत् संकरं तदनुत्तरम्"—इति॥

तत्र सएव विशदयति,—

"न चैकस्मिन् विवादे तु क्रिया स्याद्वादिनोर्द्वयोः।
न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयम्"—इति ॥

मिथ्याकारणोत्तरयोः सङ्करे अर्थिप्रत्यर्थिनोर्द्वयोरपि क्रिया प्राप्नोति।

* मिथ्या चैवैकदेशे,—इति का० ।

"मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि"—इति स्मरणात्। तदुभयमेकस्मिन् व्यवहारे विरुद्धम्। यथा सुवर्णं रूपकशतं च अनेन गृहीतमित्यभियोगे सुवर्णञ्च गृहीतं रूपकशतं गृहीतं प्रतिदत्तमिति। कारणप्राङ्न्यायसङ्करे प्रत्यर्थिनएव क्रियाद्वयम्।

"प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम्"—इति स्मरणात्। यथा सुवर्णं गृहीतं प्रतिदत्तं रूपके व्यवहारमार्गेण पराजित इति। अत्र प्राङ्न्यायेन* जयपत्रेण वा न्यायदर्शिभिर्वा भवितव्यं† कारणोत्तरे तु साचिलेख्यादिभिः भावयितव्यमित्यविरोधः। एवमुत्तरत्र‡ सङ्करेऽपि द्रष्टव्यम्। यथाऽनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे; सत्यं सुवर्णं गृहीतं प्रतिदास्यामि, रूपकशतं न गृहीतं, वस्त्रविषये पूर्वं न्यायेन पराजितइति। एवं चतुःसङ्करेऽपि। एतेषां चानुत्तरत्वं यौगपद्येन, तस्य तस्यांशस्य तेन तेन विवादप्रसिद्धेः। क्रमेणोत्तरत्वमेव। क्रमश्चार्थिनः प्रत्यर्थिनः सभ्यानामिच्छया भवति। यत्र पुनरुभयोः सङ्करः,§ तत्र यस्य प्रभूतार्थविषयत्वं तत्र क्रियोपादानेन व्यवहारः प्रवर्त्तयितव्यः। पश्चादन्यविषयोत्तरोपादानेन॥। यत्र च सम्प्रतिपत्तेरुत्तरान्तरस्य

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, प्राङ्न्याये,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः सर्व्वत्र। मम तु, भावयितव्यम्,—इति पाठः प्रतिभाति।

‡ इत्थमेव पाठः सर्व्वत्र। मम तु, एवमुत्तरत्रय,—इति पाठः प्रतिभाति।

§ पुनरुभयोरसङ्करः,—इति पा॰ स॰।

॥ पश्चादन्यविषयान्तरोपादानेन,—इति का॰।

च सङ्करः, तत्रोत्तरोपादानेन* व्यवहारोद्गृष्टव्यः । सम्प्रतिपत्तेः प्रयोगाभावात् । यथा हारीतेनोक्तम्,—

"मिथ्योत्तरं कारणञ्च स्यातामेकत्र चेदुभे ।
सत्यञ्चापि सहान्येन तत्र ग्राह्यं किमुत्तरम्"—इत्युक्त्वा,
"यत् प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलम् ।
उत्तरं तत्र विज्ञेयमसंकीर्णमतोऽन्यथा—इति ।

संकीर्णं भवतीति शेषः । ऐच्छिकत्वमं भवतीत्यर्थः । तत्र प्रभूतार्थविषयं यथा, अनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानी प्रत्यभियोगे, सुवर्णं रूपकशतं वस्त्राणि गृहीतानि प्रतिदत्तानि चेति†। अत्र मिथ्योत्तर‡ प्रभूतविषयत्वादर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्त्तयितव्यः, पश्चाद्वस्त्रविषये व्यवहारः । एवं मिथ्याप्राङ्न्यायसङ्करे कारणप्राङ्न्यायसङ्करे च योजनीयम् । यथा तस्मिन्नेवाभियोगे, सत्यं सुवर्णं रूपकशतं च गृहीतं दास्यामि, वस्त्राणि तु न गृहीतानि प्रतिदत्तानि वा वस्त्रविषये पूर्वं पराजित इति चोत्तरे, सम्प्रतिपत्तेर्भूरिविषयत्वेऽपि तत्र क्रियाऽभावात् मिथ्योत्तरक्रियामादाय व्यवहारः प्रवर्त्तयितव्यः ।

---

* इत्यमेव पाठः सर्व्वत्र । ममतु, तत्रोत्तरान्तरोपादानेन,—इति पाठः प्रतिभाति ।

† इत्यमेव पाठः सर्व्वत्र । ममतु सुवर्णं रूपकशतं च न गृहीतं, वस्त्राणि गृहीतानि प्रतिदत्तानि चेति,—इति पाठः प्रतिभाति ।

‡ इत्यमेव पाठः सर्व्वत्र । ममतु, मिथ्योत्तरस्य,—इति पाठः प्रतिभाति ।

यत्र तु मिथ्याकारणोत्तरयोः कृत्स्नपक्षव्यापित्वं; यथा शृङ्गग्राहिकया कश्चिद्वदति, इयं गौर्मदीया अमुकस्मिन् काले नष्टा अद्य त्वद्गृहे दृष्टेति, अन्यस्तु मिथ्यैतत् प्रदर्शितकालात् पूर्वमेव अस्मद्गृहे जाता चेति वदति। इदं तावत् पक्षनिराकरणसमर्थत्वात् नानुत्तरम्। नापि मिथ्यैव, कारणोपन्यासात्। नापि कारणम्, एकदेशाभ्युपगमाभावात्। तस्मात् सकारणं मिथ्योत्तरमिदम्। अत्र च प्रतिवादिनः क्रिया "कारणे प्रतिवादिनि"—इति वचनात्।

ननु "मिथ्याक्रिया पूर्ववादे"—इति पूर्ववादिनः कस्मात् क्रिया न भवति? * तस्य शुद्धमिथ्याविषयत्वात्। कारणे प्रतिवादिनीत्येतदपि तस्माच्छुद्धकारणविषयं† न भवति? नैतत्। सर्वस्यापि कारणोत्तरस्य मिथ्यासहचरितरूपत्वात् शुद्धकारणोत्तरस्याभावात्। अशुद्धकारणोत्तरे प्रतिज्ञातार्थैकदेशस्याभ्युपगमेनैकदेशस्य मिथ्यात्वम्। यथा सत्यं रूपकशतं गृहीतं न धारयामि‡ दत्तत्वादिति। प्रकृतोदाहरणे तु प्रतिज्ञातार्थैकदेशस्याप्यभ्युपगमो नास्तीति विशेषः। एतच्च हारीतेन स्पष्टमुक्तम्,—

"मिथ्याकारणयोर्वाऽपि ग्राह्यं कारणमुत्तरम्"—इति।

यत्र मिथ्याप्राङ्न्याययोः पक्षव्यापित्वं; यथा रूपकशतं धारयतीत्यभियोगे मिथ्यैतत्तस्मिन्नर्थे पूर्वमयं पराजित इति, अत्रापि वादिन एव क्रिया।

---

* अत्र, न,—इति भवितुमुचितम्।

† इत्थमेव पाठः सर्व्वत्र। ममतु, कस्माच्छुद्धकारणविषयं,—इति पाठः प्रतिभाति।

‡ न दास्यामि,—इति का०।

"प्राड्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम्—"इति वचनात्। शुद्धप्राड्न्यायस्याभावादनुत्तरत्वप्रसङ्गात्। सम्प्रतिपत्ते-रपि साध्यत्वेनोपदिष्टस्य पचस्य सिद्धत्वोपन्यासेन साध्यत्वनिराक-रणाद्भूतोत्तरत्वम्। यत्र तु कारणप्राड्न्यायसङ्करः; यथा शतमनेन गृहीतमित्यभियुक्तः प्रतिवदति सत्यं गृहीतं प्रतिदत्तं चेत्यस्मिन्ने-वार्थे प्राड्न्यायेनायं पराजित इति। तत्र प्रतिवादिनो यथा-रुचीति न कश्चिद्वादिप्रतिवादिनोरेकस्मिन् व्यवहारे क्रियाप्रसङ्ग इति निर्णयः। निरुत्तरं प्रत्यर्थिनं प्रति कात्यायन आह,—

"उपायैश्चोद्यमानस्तु न दद्यादुत्तरन्तु यः ।
मुक्तस्त्रान्ते सप्तरात्रे जितोऽसौ दातुमर्हति"—इति ।

हीनवादिनं दर्शयति नारदः,—

"पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ॥
समयाभिहितं* कार्य्यमभियुक्तं परं वदेत् ।
विब्रुवंश्च भवेदेवं हीनस्तमपि निर्दिशेत् ॥
अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतोऽप्यपलापी चा† हीनः पञ्चविधः स्मृतः"—इति ॥

तान् वादिनो विवृणोति स एव,—

* न मयाऽभिहितं,—इति का० ।

† इत्थमेव पाठः सर्व्वत्र। आहूतः प्रपलायी च,—इति पाठस्तु भवितु-मुचितः। वक्ष्यमाणकात्यायनवचने तथा दर्शनात्। एवं परत्र।

"लेखयित्वा तु यो वाक्यं मूलवाधाधिसंयुतः* ॥
वदेद्वादी स हीयेत नाभियोगन्तु सोऽर्हति ।
सभ्यास्य† साक्षिणश्चैव क्रिया ज्ञेया मनीषिणाम् ॥
तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते ।
आह्वानादनुपस्थानात्तथा एव प्रहीयते ॥
ब्रूहीत्युक्तोऽपि न ब्रूयात् सद्यो बन्धनमर्हति ।
द्वितीयेऽहनि दुर्बुद्धेर्विद्यात्तस्य पराजयम्"—इति ॥

बृहस्पतिरपि,—

"आहूतोऽप्यपलापी च मौनी साक्षिपराजितः ।
स्ववाक्यप्रतिपन्नश्च हीनवादी चतुर्विधः,,—इति ।

हीनत्वकालावधिमाह स एव,—

"अपलापी तु पक्षेण मौनकृत् सप्तभिर्दिनैः ।
साक्षिभिः तत्क्षणेनैव प्रतिपन्नश्च हीयते"—इति ।

दैविकादिविघ्नेन यथोक्तकालातिक्रमेऽपि नापराध इत्याह स एव,—

"दैवराजकृतो दोषः तत्काले तु यदा भवेत् ।
अवधित्यागमात्रेण न भवेत् स पराजितः"—इति ॥

हीनवादिनो दण्डेन पुनर्वादाधिकारमाह कात्यायनः,—

"अन्यवादी पणान् पञ्च क्रियाद्वेषी पणान् दश ।
नोपस्थाता दश द्वौ च षोडशैव निरुत्तरः ।
आहूतः प्रपलायी च पणान् दाप्यस्तु विंशतिम् ॥
चिराहूतमनायातमाहूतव्यपलायिनम्‡ ।

---

* मूलवाक्याधिसंयुतः,—इति का० ।

† सभ्यानां,—इति का० ।

‡ इत्थमेव पाठः सर्व्वत्र । प्रपलायिनम्,—इति पाठस्तु भवितुमुचितः ।

पञ्चरात्रमतिक्रान्तं विनयेत्तं महीपतिः”—इति ।

यत्तु तेनैव पुनर्वादनिषेधः कथितः,—

“दोषानुरूपं संग्राह्यः* पुनर्वादो न विद्यते”—इति ।

तदेतदभ्युपगतविवादविषयम्। इतरत्र तु प्रज्ञस्याभिर्नास्तीत्याह नारदः,—

“सर्वेष्वर्थविवादेषु वाक्छले नावसीदति ।

पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थाच्च हीयते”—इति ॥

नावसीदतीति प्रतिज्ञातार्थस्य न हीयत इत्युपपादनम्।

अत्रापवादमाह कात्यायनः,—

“उभयोर्लिखिते वाक्ये प्रारब्धे कार्य्यनिर्णये ।

अयुक्तं तत्र यो ब्रूयात् तस्मादर्थात्स हीयते”—इति ।

याज्ञवल्क्योऽपि,—

“सन्दिग्धार्थं स्वतन्त्रो† यः साधयेद्यश्च निष्पतेत् ।

न चाहूतो वदेत् किञ्चिद्धीनो दण्ड्यश्च स स्मृतः”—इति ॥

अत्र दण्ड्यग्रहणेनैव हीनत्वसिद्धेः पुनर्हीनग्रहणं प्रकृतार्थात् हीयते इति ज्ञापनार्थम्।वादमुपक्रमतोर्मित्रत्वयो‡र्द्वयोरपि दण्डमाह बृहस्पतिः,—

“पूर्वरूपे सन्निविष्टे विचारे सम्प्रवर्त्तिते ।

प्रणयं ये मिथो यान्ति दाप्यास्ते द्विगुणन्दमम्”—इति ॥

तदेतदपवञ्चनविषयमित्याह कात्यायनः,—

“आसेध्य प्रगटहीतार्थं प्रणयं यान्ति ये मिथः ।

---

* इत्थमेव पाठः सर्व्वत्र । ममतु, स ग्राह्यः,—इति पाठः प्रतिभाति । स हीनवादी दोषानुरूपं दण्डं ग्राह्य इति तदर्थः ।

† स्वतन्त्रं,—इति का० ।

‡ वादं प्रक्रमतोरप्रकृतयो,—इति का० ।

सर्वे द्विगुणदण्ड्यास्युर्विप्रलम्भान्नृपस्य ते"—इति ॥

एवञ्चावस्थनया प्रमाणानां न दण्डः । अतएव बृहस्पतिः,—

"पूर्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्य्यनिर्णये ।
द्वयोः समानयोः सन्धिः स्यादयःखण्डयोरिव ॥
साक्षिसभ्यविकल्पस्तु भवेत्तत्रोभयोरपि ।
दोलायमानयोः सन्धिं प्रकुर्य्यातां विचक्षणैः* ॥
प्रमाणसमता यत्र भेदः शास्त्रपरीक्षयोः ।
तत्र राजाज्ञया सन्धिरुभयोरपि शस्यते"—इति ॥

अर्थिप्रत्यर्थिनोरभियोगे कञ्चिन्नियममाह याज्ञवल्क्यः,—

"अभियोगमनिस्तीर्य्य नैनम्प्रत्यभियोजयेत् ।
अभियुक्तं न चान्येन नोक्तं विप्रकृतिन्नयेत्"—इति ॥

प्रत्यर्थिनि यस्मिन् वादिना सम्पादितमभियोगमपरिहृत्य प्रत्युतैनं प्रत्यभियोगं न कुर्य्यात्। अर्थी† च अन्येनार्थिना अभियुक्ते प्रत्यर्थिनि तदभियोगपरिहारात् पुरा स्वयं नाभियुञ्ज्यात् । उभाभ्यामपि प्रतिज्ञारूपमुत्तररूपं वा वचोयत् यथाऽभिहितं, तत्तथैव समाप्तिपर्य्यन्तं निर्वाह्यम् । प्रत्यभियोगनिषेधस्य अपवादमाह सएव,—

"कुर्य्यात् प्रत्यभियोगन्तु कलहे साहसेषु च"—इति ।

कलहे वाग्दण्डपारुष्यात्मके, साहसेषु विषशस्त्रादिनिमित्तप्राणव्यापादनादिषु, प्रत्यभियोगसम्भवेनाभियोगमनिस्तीर्य्यापि स्वाभियोक्तारं प्रत्यभियोजयेत् । नन्वत्रापि पूर्वपक्षानुपमर्द्दनरूपत्वे चानुक्त-

---

* भवेद्यत्रोभयोरपि । दोलायमानौ यौ सन्धिं कुर्य्यातां तौ विचक्षणौ,—इति ग्रन्थान्तरीयः पाठः समीचीनः ।

† अर्थिनि,—इति ग्रा० स० ।

रत्वात्* प्रत्यभियोगस्य प्रतिज्ञान्तरत्वे युगपद्व्यवहारासम्भवः समानः। सत्यम्। नाच युगपद्व्यवहाराय प्रत्यभियोगोपदेशः, अपि तु न्यूनदण्डप्राप्तये अधिकदण्डनिवृत्तये च। तथाहि। अनेनाहं ताडितः शप्तो वेत्यभियोगे पूर्वमहमनेन ताडितः शप्तो वेति प्रत्यभियोगे दण्डाल्पत्वम्। यथाह कात्यायनः,—

"पूर्वमाचारयेद्यस्तु नियतं स्यात् स दण्डभाक्।

पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः"—इति॥

पश्चाद्यः चारयेत्, सोऽप्यसत्कारी दण्डभाक्। तयोर्मध्ये पूर्वस्य दण्डाधिक्यम्।

इत्युत्तरपादः।

अथ क्रियापादः।

तत्र याज्ञवल्क्यः,—

"ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्"—इति।

वृहस्पतिस्तु तं विवृणोति,—

"पूर्ववादे विलिखितं यदक्षरमशेषतः।

अर्थी तृतीयपादे तु क्रियया प्रतिपादयेत्"—इति॥

क्रियाया उपयोगमाह कात्यायनः,—

"कारणात् पूर्वपक्षोऽपि उत्तरत्वं प्रपद्यते।

अतः क्रिया सदा प्रोक्ता पूर्वपक्षस्य साधनी"—इति॥

क्रियाभेदानाह वृहस्पतिः,—

"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा।

एकैकाऽनेकधा भिन्ना ऋषिभिस्तत्त्ववेदिभिः॥

---

* रूपत्वेनानुत्तरत्वात्,—इति का०।

साक्षिलेख्यानुमानञ्च* मानुषी त्रिविधा क्रिया ।
साक्षी द्वादशभेदस्तु लिखितं त्वष्टधा स्मृतम् ॥
अनुमानं त्रिधाप्रोक्तं* मानुषी दैविकी क्रिया"—इति ।

दैवमानुषक्रिययोः मानुष्याः प्राबल्यमाह कात्यायनः,—
"यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम् ।
मानुषीं तत्र गृह्णीयात् न तु दैवीं क्रियां नृपः"—इति ॥

मानुषयोः साक्षिलेख्ययोः सन्निपाते लेख्यस्य प्राबल्यमाह सएव,—
"क्रिया तु दैविकी प्राप्ता† विद्यमानेषु साक्षिषु ।
लेख्ये च प्रतिवादेषु न दिव्यं न च साक्षिणः"—इति ॥

लेख्यप्राबल्यस्य विषयमाह सएव,—
"पूगश्रेणिगणादीनां या स्थितिः परिकीर्त्तिता ।
तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः"—इति ॥

साक्षिप्राबल्यस्य विषयमाह सएव,—
"दत्तादत्तेषु भृत्यानां स्वामिनां निर्णये सति ।
विक्रियादानसम्बन्धे क्रीत्वा धनमनिच्छति‡ ॥
द्यूते समाह्वये चैव विवादे समुपस्थिते ।
साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकम्"—इति ॥

क्वचिदनुमानं प्रबलम् । अनुमानं नाम भुक्तिः । याज्ञवल्क्येना-नुमानस्थाने भुक्तिशब्दप्रयोगात्,—
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्"—इति ॥

भुक्तिप्राबल्यस्य विषयमाह व्यासः,—

---

* नास्त्ययमंशः स० ग्रा० पुस्तकयोः ।
† क्रिया न दैविकी प्रोक्ता,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः ।
‡ क्रियादानस्य सम्बन्धे क्रीत्वा धनमयच्छति,—इति स० ग्रा० ।

"रहःकृतं प्रकाशञ्च द्विविधं कार्य्यमुच्यते ।
प्रकाशं साक्षिभिर्भाव्यं दैविकेन रहःकृतम्"—इति ॥
प्रकाशं साक्षिभिर्भाव्यमित्यस्यापवादमाह बृहस्पतिः,—
"महापापाभिशापेषु निक्षेपे हरणे* तथा ।
दिव्यैः कार्य्यं परीक्षेत राजा सत्स्वपि साक्षिषु ॥
अदुष्टेष्वनुमानेषु दिव्यैः कार्य्यं विशोधयेत्"—इति ॥
कात्यायनोऽपि,—
"समत्वं साक्षिणां यत्र दिव्यैस्तत्रापि शोधयेत् ।
प्राणान्तिकविवादेषु विद्यमानेषु साक्षिषु ॥
दिव्यमालम्बते वादी न पृच्छेत् तत्र साक्षिणः ।
उत्तमेषु च सर्वेषु साहसेषु विचारयेत् ॥
सर्वन्तु दिव्यदृष्टेन सत्सु साक्षिषु वै भृगुः"—इति ।
व्यासोऽपि,—
"न मयैतत्कृतं पत्रं कूटमेतेन कारितम् ।
अधरीकृत्य तत्पत्रं अर्थे दिव्येन निर्णयः ॥
यन्नामलेख्यं तल्लेख्यं तुल्यं लेख्यं क्वचित् भवेत् ।
अगृहीते धने तत्र कार्य्यो दैवेन निर्णयः"—इति ॥
कात्यायनः,—
"यत्र स्यात् सोपधं लेख्यं सम्प्रत्ययसाक्षितं यदि ।
दिव्येन शोधयेत्तत्र राजा धर्म्मासनस्थितः"—इति ॥
दिव्यसाक्षिविकल्पविषयमाह स एव,—
"प्रक्रान्ते साहसे वादे पारुष्ये दण्डवाचिके ।
बलोद्भूतेषु कार्य्येषु साक्षिणो दिव्यमेववा ॥

* निक्षेपहरणे,—इति का० ।

छन्दे लेख्यं साक्षिणो वा युक्तिलेश्यादथोऽपि च।

दैविकी वा क्रिया प्रोक्ता प्रजानां हितकाम्यया"—इति॥

युक्तिस्तेनैव दर्शिता,—

"साक्षिणो लिखितं भुक्तिः प्रमाणं त्रिविधं विदुः।

लिङ्गोद्देशस्तु युक्तिः स्यादिव्यानाह विवादयः"—इति॥

चोदनादीनान्तु मुख्यानुकल्पभावमाह स एव,—

"चोदना प्रतिकालन्तु युक्तिलेशस्तथैव च*।

तृतीयः शपथः प्रोक्तः तत्त्वणं† साधयेत् क्रमात्"—इति॥

अस्यार्थस्तेनैव विवृतः,—

"अभीक्ष्णं चोद्यमानोऽपि प्रतिहन्यान्न तद्वचः।

त्रिचतुःपञ्चकृत्वो वा परतोऽर्थं समाचरेत्॥

चोदनाप्रतिघाते तु युक्तिलेशैस्तमन्वियात्।

देशकालार्थसम्बन्धपरिणामक्रियादिभिः॥

युक्तिष्वप्यसमर्थासु शपथैरेनमर्दयेत्।

अर्थकाले बलापेक्षमन्यमनुसृतादिभिः‡"—इति॥

शपथयुक्तिप्रमाणव्यवस्थयाऽवश्यं परिपालनीयम्§। तदाह नारदः,—

"प्रमाणानि प्रमाणज्ञैः पालनीयानि यत्नतः।

सीदन्ति हि प्रमाणानि पुरुषस्यापराधतः"—इति॥

प्रमाणज्ञैः प्रमाणं प्रत्याकलयितव्यमित्यर्थः। यत्र प्रमाणैर्निर्णयं कर्तुं न शक्यते, तदा राजेच्छया निर्णयः कार्य्यः। तदाह पितामहः,—

---

* युक्तिर्देशस्तथैव च,—इति शा०।

† मरणं,—इति का०।

‡ बलापेक्षमन्वियुः सुकृतादिति,—इति का०। अर्थकालबलापेक्षमन्यमनुसृतादिति,—इत्यन्यत्र पाठः।

§ शपथयुक्तिप्रमाणव्यवस्था, सा चावश्यं परिपालनीया,—इति का०।

"लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः।
न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः॥
निश्चेतुं ये न शक्याः स्युर्वादाः सन्दिग्धरूपिणः।
तेषां नृपः प्रमाणं स्यात् सर्वं तस्य प्रभावतः"—इति॥
इति क्रियाभेदा निरूपिताः।

अथ साक्षिनिरूपणम्।

तत्र साक्षिशब्दार्थं निर्वक्ति मनुः,—

"समक्षदर्शनात् साक्षी श्रवणाच्चैव* सिध्यति"—इति।

विष्णुरपि। "समक्षदर्शनात् साक्षी श्रवणाद्वा"—इति। चक्षुषा सह मनोव्यापारो यस्य, स साक्षी। "साक्षात् द्रष्टरि संज्ञायाम्"—इति पाणिनिस्मरणात्। साक्षिणः प्रयोजनं मनुरेवाह,—

"सन्दिग्धेषु तु कार्य्येषु द्वयोर्विवदमानयोः।
दृष्टश्रुतानुभूतत्वात् साक्षिभ्यो व्यक्तदर्शनम्"—इति॥

साक्षिलक्षणं सएवाह,—

"यादृशा अर्थिभिः† कार्य्या व्यवहारेषु साक्षिणः।
तादृशान्‡ सम्प्रवक्ष्यामि यथा वाच्यमृतञ्च तैः॥
गृहिणः पुत्त्रिणो मौलाः क्षत्त्रविट्शूद्रयोनयः॥
प्रवक्तुं साक्ष्यमर्हन्ति न ये केचिदनापदि।
आप्ताः सर्वेषु वर्णेषु कार्य्याः कार्य्येषु साक्षिणः॥
सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत्"—इति।

---

* सत्य तथैव,—इति ग्रा०।
† धनिभिः,—इति का०।
‡ तादृशं,—इति ग्रा०।

व्यासोऽपि,—

"धर्म्मज्ञाः पुत्त्रिणो मौलाः कुलीनाः सत्यवादिनः ।
श्रौतस्मार्त्तक्रियायुक्ताः विगतद्वेषमत्सराः ॥
श्रोत्रिया न पराधीनाः सूरयश्चाप्रवासिनः ।
युवानः साक्षिणः कार्य्या ऋणादिषु विजानता"—इति ॥

याज्ञवल्क्योऽपि,—

"तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ।
धर्म्मप्रधाना ऋजवः पुत्त्रवन्तो धनान्विताः ।
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः ॥
ब्राह्मणाः क्षत्त्रियाः वैश्याः शूद्रा ये चाप्यनिन्दिताः ।
प्रतिवर्णं भवेयुस्ते सर्व्वे सर्व्वेषु वादिनः ॥
श्रेणिषु श्रेणिपुरुषाः स्वेषु वर्गेषु वर्गिणः ।
बहिर्व्वासिषु बाह्याश्च स्त्रियः स्त्रीषु च साक्षिणः"—इति ॥

संख्यामाह बृहस्पतिः,—

"नव सप्त पञ्च वा स्युश्चत्वारस्त्रयएववा ।
उभौ वा श्रोत्रियौ ख्यातौ नैकं पृच्छेत् कदाचन"—इति ॥

यत्पुनस्तेनैवोक्तम्,—

"दूतकः खटिकाग्राही कार्य्यमध्यगतस्तथा ।
एकएव प्रमाणं स्यात् नृपोऽध्यक्षस्तथैवच"—इति ॥

व्यासोऽपि,—

"शुचिक्रियश्च धर्म्मज्ञः साक्षी यो ह्यनुभूतवाक् ।

प्रमाणमेकोऽपि भवेत् साहसेषु* विशेषतः"—इति ॥

कात्यायनोऽपि†,—

"अभ्यन्तरस्तु निक्षेपे साक्षिष्वेकोऽपि वा भवेत्‡"—इति ॥

तदेतत् सर्वमुभयानुमतसाक्षिविषयम्। तथाच नारदः,—

"उभयानुमतो यस्तु द्वयोर्विवदमानयोः।

स साक्ष्येकोऽपि§ साक्षित्वे प्रष्टव्यः स्यात्तु संसदि"—इति ॥

साक्षिषु वर्ज्यानाह मनुः,—

"नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः।

न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः ॥

न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ।

न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ॥

नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत्।

न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ॥

नार्त्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः।

न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः"—इति ॥

नारदोऽपि,—

---

* सहस्रेषु,—इति का० शा०।

† यदपि कात्यायनः,—इति का०।

‡ साक्ष्यमेकोऽपि वाचयेत्,—इति का०।

§ स साक्ष्यपि च,—इति शा०।

"दासनैकृतिक*कुद्धवृद्धस्त्रीबालचाक्रिकाः ।
मत्तोन्मत्तप्रमत्तार्त्तकितवग्रामयाजकाः ॥
महापथिकसामुद्रवणिक्प्रव्रजितातुराः ।
युग्मैकश्रोत्रियाचारहीनक्लीबकुशीलवाः ॥
नास्तिकव्रात्यदाराग्नित्यागिनोऽयाज्ययाजकाः ।
एकस्थाली त्वरिचरः अरिज्ञातिसनाभयः ॥
वाग्दुष्टदोषिशैलूषविषजीव्यहितुण्डिकाः ।
गरदश्चाग्निदश्चैव शूद्रापत्योपपातकाः ॥
क्लान्तसाहसिकश्रान्तनिर्धूतान्यावसायिनः ।
भिन्नवृत्ताः समावृत्ता जड़तैलिकपौलिकाः† ॥
भूताविष्टनृपद्विष्टवर्षानक्षत्रसूचकाः ।
अघशंस्यात्मविष्कम्भविहीनाग्रभगवृत्तयः ॥
कुनखी श्यावदन्तश्च श्वित्रिमित्रध्रुक्शौण्डिकाः‡ ।
ऐन्द्रजालिकलुब्धोग्रश्रेणीगणविरोधिनः ॥
वधकश्चित्रकृन्मूर्खः पतितः कूटकारकः§ ।
कुहकः प्रत्यवसितः तस्करो राजपूरुषः ॥

---

* नैकृतिक-स्थाने, नैष्कृतिक,—इति पाठः का॰ पुस्तके । एवं परत्र ।

† भिन्नव्रताः समावृत्तजनतैलिकमौलिकाः,—इति का॰ । भिन्नवृत्ता-समावृत्ताः,—इत्यादि ग्रा॰ ।

‡ कुनखी श्यावदन् श्वित्री मित्रध्रुक् शवशौण्डिकाः,—इति का॰ ।

§ वन्धकश्चित्रकृत् श्वित्री पतितः कूटकारकः,—इति का॰ ।

मनुष्यविषमांसास्थिमधुचीराम्बुसर्पिषाम् ।
विक्रेता ब्राह्मणश्चैव द्विजो वार्धुषिकश्च यः ॥
च्युतः स्वधर्म्मात्कुलिकः सूचको हीनसेवकः ।
पित्रा विवदमानश्च भेदकृच्चेत्यपाङ्क्तेयाः"—इति ॥

नैकृतिकः परद्रव्यान्वेषणशीलः। चाक्रिको वैतालिकः। समुद्रवणिक् स्वाहितयायी*। युग्मो द्विजविशिष्टः। एकस्थालीत्यत्र द्वेधा-विग्रहः; एका पाकसाधनस्थाली यस्य सः, यद्वा पाकस्थाली भोजनस्थाली वा एकं भोजनपात्रं स्थालं† यस्य। अरिषु चरतीत्यरिचरः, शत्रुसम्बन्धीति यावत्। सनाभयस्तु कात्यायनेन दर्शिताः,—

"मातृष्वसृसुताश्चैव सोदर्य्यसुतमातुलाः।
एते सनाभयस्तुक्ताः साध्यन्तेषु न योजयेत्"—इति ॥

शैलूषो नटः। विषस्य सङ्ग्रहणरचणादिव्यापारे नियुक्तः विषजीवी। अहितुण्डिकः सर्पग्राही। गरदो विषदः। अग्निदो गृहदाहादिकर्त्ता। श्रान्तः श्येनः। निर्धूतो वहिष्कृतः। अन्त्यावसायी प्रतिलोमजः। भिन्नवृत्तो दुराचारः। समावृत्तोऽनैष्ठिकब्रह्मचारी। जड़ो मन्दबुद्धिः। तैलिकः तिलघाती। वर्षसूचकः वृष्टिसूचकः। नक्षत्रसूचको ज्यौतिषः। अघशंसी परदोषप्रकाशकः। शौण्डिको मद्यविक्रयी। देवताव्याजेन द्रव्योपजीविक आत्मविष्कम्भः। कुहको-दाम्भिकः। प्रत्यवसितः प्रव्रज्यातो निवृत्तः। सूचकः परदोषसूचनार्थं राज्ञाऽभियुक्तः। भेदकृत्पिशुनः। अन्ये प्रसिद्धाः। कात्यायनोऽपि,—

* स्वाराज्यिकपाती,—इति का० ।

† भोजनस्थालं,—इति का० ।

"पिता बन्धुः पितृव्यश्च श्वशुरो गुरवस्तथा।
नगरग्रामदेशेषु नियुक्ता ये परेषु च*।
वल्लभाश्च न पृच्छेयुः भक्तास्ते राजपूरुषाः"—इति॥

न पृच्छेयुर्भवदीयो विवादः स कीदृश इति तैर्न प्रष्टव्यं, साक्षिणो न भवन्तीति यावत्। एतेषामसाक्षित्वे हेतुमाह नारदः,—

"असाक्षिणो ये निर्दिष्टा दासनैकृतिकादयः।
तेषामपि न बालः स्यान्नैव स्त्री न च कूटकृत्।
न बान्धवो न चारातिः ब्रूयुस्ते साक्ष्यमन्यथा॥
बालोऽज्ञानादसत्यात् स्त्री पापान्यासाच्च† कूटकृत्।
विब्रूयुर्बान्धवाः स्नेहाद्वैरनिर्यातनादरिः॥
एकोऽप्यलुब्धः‡ साक्षी स्यात् बह्वः शुच्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वाच्च दोषैश्चान्यैश्च ये वृताः"—इति॥

बृहस्पतिरपि,—

"स्तेनास्साहसिकाः षण्डाः कितवा वञ्चकास्तथा।
न साक्षिणस्ते दुष्टत्वात् तेषु सत्यं न विद्यते"—इति॥

याज्ञवल्क्योऽपि,—

"श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजिता नराः।
असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः"—इति॥

---

* परेषु च,—इति का०।

† इत्यमेव पाठः सर्व्वत्र। पापाभ्यासाच्च,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः प्रतिभाति।

‡ एकोऽलुब्धस्तु,—इति का०।

उक्तानां साक्षिणामसम्भवे कार्य्यगौरवे च प्रतिप्रसवमाह नारदः,—

"साक्षिणो ये च निर्द्दिष्टाः* दासनैकृतिकादयः ।

कार्य्यगौरवमासाद्य भवेयुस्तेऽपि साक्षिणः"—इति ॥

मनुरपि,—

"स्त्रियाऽप्यसम्भवे कार्य्यं बालेन स्थविरेण वा ।

शिष्येण वाऽपि दासेन बन्धुना भृतकेन वा"—इति ॥

नारदोऽपि,—

"स्तेये चौ† साहसे चैव पारुष्ये सङ्गमे स्त्रियाः ।

स्तृणादीनां प्रयोगे च न दोषः‡ साक्षिषु स्मृतः"—इति ॥

व्याघ्रोऽपि,—

"साहसेषु च सर्व्वेषु स्तेये सङ्ग्रहणेषु च ।

वाग्दण्डयोश्च पारुष्ये परीक्षेत न साक्षिणः"—इति ॥

यत्पूर्वमुक्तं साक्षी द्वादशभेदस्त्विति, तान् भेदानाह बृहस्पतिः,—

"लिखितो लेखितो गूढ़ः स्मारितः कुल्यदूतकौ ।

यदृच्छोत्तरसाक्षी च कार्य्यमध्यगतोऽपरः ॥

नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः ॥

प्रभेदमेषां वक्ष्यामि यथावदनुपूर्वशः ।

जातिनामाभिलिखितं येन स्वं पितृनाम च ।

निवासं च समुद्दिष्टं स साक्षी लिखितः स्मृतः ॥

---

* इत्यमेव पाठः सर्व्वत्र । असाक्षिणो ये निर्द्दिष्टाः—इति तु ग्रन्थान्तरीयः पाठः समीचीनः ।

† स्त्रीवधे,—इति पा० ।

‡ स दोषः,—इति पा० ।

सन्धिक्रियादिभेदैर्यन्नत्वा च* ऋणादिकम्।
प्रत्यक्षं लेख्यते यस्य लेखितः स उदाहृतः॥
कुड्यव्यवहितो यस्तु श्राव्यते ऋणभाषितम्।
विनिह्नुते यथाभूतं गूढसाक्षी स कीर्त्तितः॥
आहूय यः कृतः साक्षी ऋणन्याशक्रियादिके।
स्मार्य्यते च मुहुस्तच स्मारितः सोऽभिधीयते॥
विभागे दानमाधाने ज्ञातिर्यत्रोपदिश्यते।
द्वयोः समानधर्म्मश्च कुल्यस्स परिकीर्त्तितः॥
अर्थिप्रत्यर्थिवचने शृणुयात् प्रेषितस्तु यः।
उभयोः सम्मतः साधुः दूतकः स उदाहृतः॥
क्रियमाणे तु कर्त्तव्ये यः कश्चित् स्वयमागतः।
अत्र साक्षी त्वमस्माकमुक्तोयादृच्छिको मतः॥
यत्र साक्षी दिगन्तच्छन् मुमूर्षुर्वा यथास्मृतम्।
अन्यं संश्रावयेत्तन्तु विद्यादुत्तरसाक्षिणम्॥
उभाभ्यां यस्य विश्वस्तं कार्य्यञ्चापि निवेदितम्।
कूटसाक्षी स विज्ञेयः कार्य्यमध्यगतस्तथा॥
अर्थिप्रत्यर्थिनोर्वाऽपि यदृष्टं भूभृता स्वयम्।
सएव तत्र साक्षी स्यात् विसंवादे द्वयोस्तथा॥
निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत्।
अध्यक्षः सभ्यसहितः साक्षी स्यात् तत्र नान्यथा॥
उषितं छादितं यत्र सीमायाञ्च समन्ततः।

* सन्धिक्रियाक्रियाभेदैस्तस्य कृत्वा,—इति का०।

स हृतोऽपि* भवेत् साक्षी ग्रामस्तत्र न संशयः"—इति ॥

तेष्वेव द्वादशसु विशेषान्तरमाह सएव,—

"लिखितौ द्वौ तथा गूढौ चिचतुःपञ्च लेखिताः।
यदृच्छास्मारिताः कुल्याः तथा चोत्तरसाक्षिणः ॥
दूतकः पृच्छकाग्राही† कार्य्यमध्यगतस्तथा।
एकएव प्रमाणं स्यात् नृपोऽध्यक्षस्तथैवच"—इति ॥

लिखितादावपरं विशेषमाह नारदः,—

"सुदीर्घेणापि कालेन लिखितः सिद्धिमाप्नुयात्।
आत्मनैव लिखेज्ज्ञातमज्ञस्त्वन्येन लेखयेत्"—इति ॥

यत्पुनस्तेनैवोक्तम्—

"अष्टमाद्वत्सरात् सिद्धिः स्मारितस्येह साक्षिणः।
आ पञ्चमात्तथा सिद्धिः यदृच्छोपगतस्य तु ॥
आ तृतीयात्तथा वर्षात् सिद्धिर्गूढस्य साक्षिणः।
आ च संवत्सरात्§ सिद्धिर्वदन्त्युत्तरसाक्षिणः"—इति ॥

तदेतत् परमताभिप्रायेणोक्तम्। यतः स्वमतमुपरिष्टादाह सएव,—

"न कालनियमो दृष्टो निर्णये साक्षिणं प्रति।
स्मृत्यपेक्षं हि साक्षित्वमाहुः शास्त्रविदो जनाः ॥

---

* अहृतोपि,—इति ग्रन्थान्तरीयः पाठः समीचीनः।

† खटिकाग्राही,—इति का०।

§ आ पञ्चवत्सरात्,—इति शा० स०।

यस्य नोपहता बुद्धिः स्मृतिः श्रोत्रे च नित्यशः।
सुदीर्घेणापि कालेन स साक्षी साक्ष्यमर्हति"—इति ॥

साक्षिदोषोद्भावनं विदधाति बृहस्पतिः,—

"साक्षिणोऽर्थसमुद्दिष्टान् यस्तु दोषेण दूषयेत् *।
अदुष्टं दूषयेद्वादी तत्समं दण्डमर्हति ॥
साक्षिणो दूषणं कार्य्यं पूर्वं साक्षिपरीक्षणात्।
अशुद्धेषु साक्षिषु ततः पश्चात् कार्य्यं विशोधयेत्"—इति ॥

कात्यायनोऽपि,—

"सभासदा प्रसिद्धं यल्लोकसिद्धं तदापि वा†।
साक्षिणां दूषणं ग्राह्यमसाध्यं नान्यदिष्यते"—इति।

यद्वदि प्रतिवादिना साक्षिदूषणे कृते साक्षिणः प्रष्टव्याः, युष्माकमभिहितो दोषः सत्यस्त्र वेति। ते च यदि दूषणमभ्युपगच्छन्ति, तदा न साक्षिणः। अथ नाङ्गीकुर्वन्ति, तदा दूषणवादिना दूषणक्रिया भाव्या। अथ सम्भावयितुं न शक्नोति, तदा दूषणवादी तदनुसारेण दण्ड्यः। यदि विभावयति, तदा ते न साक्षिणः‡ सर्वएव दुष्टाभवन्ति। तदाऽर्थिनः पराजयः, विपर्य्ययस्य निश्चितत्वात्। अथ साक्षिणां दोषैः सभ्यानां साध्यार्थसन्देहः, तदा वादविशेषः साधना-

* इत्यमेव पाठः सर्व्वत्र। साक्षिणोऽर्थिसमुद्दिष्टान् यस्तु दोषेषु दूषयेत्,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः।

† इत्यमेव पाठः सर्व्वत्र। सभासदां प्रसिद्धं यत् लोकसिद्धमथापि वा,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः।

‡ इत्यमेव पाठः सर्व्वत्र। मम तु, तदा ते साक्षिणः,—इति पाठः प्रतिभाति।

न्तरं प्रवर्त्तयितव्यः*। यदि साधनान्तरं पूर्वं न निर्दिष्टं, तदा वादसमाप्तिः। पूर्वमावेदितं न चेदिति वचनात्। न चैतत् प्रस्तुतव्यवहाराद्व्यवहारान्तरं, तस्मिन्नेव व्यवहारे प्रमाणसाधनदूषणव्यवहारादिति। तत् सर्वं कात्यायन आह,—

"साक्षिदोषाः प्रयोक्तव्याः संसदि प्रतिवादिना।
अभावयन् धनं दाप्यः प्रत्यर्थी साक्षिणं स्फुटम्॥
भाविताः साक्षिणः सर्वे साक्षिधर्मनिराकृताः।
प्रत्यर्थिनोऽर्थिनो वाऽपि साक्षिदूषणसाधने॥
प्रस्तुतार्थोपयोगेन व्यवहारान्तरं न च।
जितः स विनयं प्राप्तः शास्त्रदृष्टेन कर्मणा।
यदि वादी निराकाङ्क्षः साक्षी सत्ये व्यवस्थितः"—इति॥

दोषोद्भावनकालमाह सएव,—

"लेख्यदोषास्तु ये केचित् साक्षिणां चैव ये स्मृताः।
वादकालेषु वक्तव्याः पश्चादुक्तान्न दूषयेत्"—इति॥

उक्तान् पश्चाद्दूषयतो दण्डमाह सएव,—

"उक्तेऽर्थे साक्षिणो यस्तु दूषयेत् प्रागदूषितान्।
स च तत्कारणं ब्रूयात्† प्राप्नुयात् पूर्वसाहसम्॥

---

* इत्थमेव पाठः सर्व्वत्र। ममतु, वादविषयं साधनान्तरं प्रवर्त्तयितव्यम्,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः सर्व्वत्र। मम तु, न च तत्कारणं ब्रूयात्,—इति पाठः प्रतिभाति। पूर्व्वपाठे तु, यस्तदानीं दूषयेत्, सएव तदानीं दूषणस्य कारणं ब्रूयात्। यदि तत्कारणं न ब्रवीति, तदा पूर्व्वसाहसं प्राप्नुयादिति कथञ्चित् तत्सङ्गतिः कर्त्तव्या।

नालस्येन प्रमाणं तु दोषेणैव तु दूषयेत्।

मिथ्याऽभियोगे दण्ड्यः स्यात् साध्यार्थाच्चापि हीयते"—इति॥

साक्षिपरीक्षामाह कात्यायनः,—

"राजा क्रियां समीक्ष्यैव यत्नात् न्यायं विचारयेत्।

लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः"—इति॥

बृहस्पतिरपि,—

"उपस्थिताः परीक्ष्याः स्युः स्वरवर्णेङ्गितादिभिः"—इति।

इङ्गितादीन् विशदयति नारदः,—

"यस्त्वात्मदोषदुष्टत्वादस्वस्थ इव लक्ष्यते।

स्थानात् स्थानान्तरं गच्छेदेकैकञ्चानुधावति॥

कासत्यकस्माच्च भृशमभीक्ष्णं निःश्वसित्यपि।

विलिखत्यवनीं पद्भ्यां बाहुं वासाञ्च धूनयेत्॥

भिद्यते मुखवर्णोऽस्य ललाटं स्विद्यते तथा।

सोऽयमागच्छते चेष्टां* पूर्वं निर्णीय वीक्षते॥

त्वरमाण इवात्यर्थमपृष्टो बहु भाषते।

कूटसाक्षी स विज्ञेयस्तं पापं विनयेद्भृशम्"—इति॥

साक्ष्यनुयोजनमाह मनुः,—

"सभाऽन्तः साक्षिणः सर्वानर्थिप्रत्यर्थिसन्निधौ।

प्राड्विवाकः प्रयुञ्जीत विधिनाऽनेन सान्त्वयन्॥

यद्द्वयोरनयोर्वेत्थ कार्य्येऽस्मिन् चेष्टितं मिथः।

तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता॥

---

* इत्थमेव पाठः सर्वत्र।

सत्यं सत्यं ब्रुवन् साक्षी लोकान् प्राप्नोति पुष्कलान् ।
इह चानुत्तमां कीर्त्तिं वागेषा ब्रह्मपूजिता ॥
ब्राह्मणो वा मनुष्याणामादित्यस्तेजसामिव ।
शिरो वा सर्वगात्राणां धर्म्माणां सत्यमुत्तमम् ॥
सत्येन पूयते साक्षी धर्म्मः सत्येन वर्धते ।
तस्मात् सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ॥
सत्यमेव परं दानं सत्यमेव परं तपः ।
सत्यमेव परो धर्म्मो लोकोत्तरमिति स्मृतिः ॥
सत्ये देवाः समुद्दिष्टा मनुष्यास्त्वनृतं स्मृतम् ।
इहैव तस्य देवत्वं यस्य सत्ये स्थिता मतिः ॥
नास्ति सत्यात् परो धर्म्मो नानृतात् पातकं परम् ।
साक्षिधर्म्मे विशेषेण सत्यमेव वदेत्ततः"—इति ॥

व्यासोऽपि,—

"साक्षिणा धर्मसंस्थेन सत्यमेव वदेत्ततः ।
साक्षिभावे नियुक्तानां देवता विंशतिः स्थिताः ॥
पितरश्चावलम्बन्तेऽवितथाख्यानतो न तु ।
सत्यवाक्याद् व्रजन्त्यूर्द्ध्वमधो यान्ति तथाऽनृतात् ॥
तस्मात् सत्यं हि वक्तव्यं भवद्भिः सभ्यसन्निधौ"—इति ।

नारदोऽपि,—

"कुवेरादित्यवरुणशक्रवैवस्वतादयः ।
पश्यन्ति लोकपालाश्च नित्यं दिव्येन चक्षुषा"—इति ॥

मनुरपि,—

"आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथाऽऽत्मनः।
माऽवमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम्॥
मन्यन्ते वै पापकृतो न कश्चित् पश्यतीति नः।
तांस्तु देवाः प्रपश्यन्ति यश्चैवान्तरपूरुषः* ॥
द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः।
रात्रिः सन्ध्या च धर्मश्च तनुगाः सर्वदेहिनाम्"—इति॥

वशिष्ठोऽपि,—

"अथ चेदनृतं ब्रूयात् सर्वतोऽसाध्यलक्षणम्†।
मृतो नरकमायाति तिर्य्यक्त्वं यात्यनन्तरम्"—इति॥

व्यासोऽपि,—

"बध्यन्ते वारुणैः पाशैः साक्षिणोऽनृतवादिनः।
षष्टिवर्षसहस्राणि तिष्ठन्ते नरके ध्रुवम्॥
तेषां वर्षशते पूर्णे पाश एकः प्रमुच्यते।
कालेऽतीते मुक्तपाशः तिर्य्यग्योनिषु जायते"—इति॥

वशिष्ठोऽपि,—

"शूकरो दशवर्षाणि शतवर्षाणि गर्द्दभः।
श्वा चैव दशवर्षाणि भासो वर्षाणि विंशतिम्॥
क्रिमिकीटपतङ्गेषु चत्वारिंशत् तथैव च।
मृगस्तु दशवर्षाणि जायते मानवस्ततः॥

---

* तथैवान्तरपूरुषः,—इति का०। मम तु, यश्चैवान्तरपूरुषः,—इति पाठः प्रतिभाति।

† सर्वतः साध्यलक्षणम्,—इति का०।

> मानुषं तु यदाऽऽप्नोति मूकोऽन्धश्च भवेत्तु सः ।
> दारिद्र्यं तु भवेत्तस्य पुनर्जन्मनि जन्मनि ॥
> स नरो जायते पश्चात् परित्यक्तस्तु बान्धवैः ।
> पङ्गन्धबधिरो मूकः कुष्ठी नग्नः पिपासितः ॥
> बुभुक्षितः प्रभुष्टश्चे भिक्षते भार्य्यया सह ।
> ज्ञात्वा त्वनृतदोषांश्च ज्ञात्वा सत्ये च सद्गुणान्* ॥
> श्रेयस्करमिहामुत्र सत्यं साक्ष्यं वदेत्ततः"—इति ।

साक्षिप्रश्नप्रकारं दर्शयति मनुः,—

> "देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेत्ततो द्विजान् ।
> उदङ्मुखान् प्राङ्मुखान् वा सर्व्वानेवोपवेशयेत् ॥
> सत्येन शापयेद् विप्रं क्षत्रियं वाहनायुधैः ।
> गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः ॥
> ब्रह्मघ्नोये स्मृता लोका ये च स्त्रीबालघातिनः ।
> मित्रद्रोहिकृतघ्नस्य ते ते स्युर्ब्रुवतस्तवा† ॥
> जन्मप्रभृति यत् किञ्चित् पुण्यं भद्र‡ त्वया कृतम् ।
> तत्ते सर्वं शुनो गच्छेद् यदि ब्रूयाः त्वमन्यथा ॥
> यावन्तो बान्धवास्तेऽस्मिन् हन्ति साक्ष्येऽनृतं वदन् ।

---

* ज्ञात्वा त्वन्ततोदोषान् ज्ञात्वा सत्ये महद्गुणान्—इति का० ।

† इत्थमेव पाठः सर्व्वत्र । ते ते स्युर्ब्रुवतोमृषा,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः ।

‡ इत्थमेव पाठः सर्व्वत्र । भद्र,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः ।

तावन्तत्संख्यया तस्मिन् शृणु सौम्यानुपूर्वशः ॥

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।

शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥

हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।

सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदः ॥

अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने ।

अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च ॥

एवं दोषानवेक्ष्य त्वं सर्वाननृतभाषणे ।

यथाश्रुतं यथादृष्टं सत्यमेवाञ्जसा वद"—इति ॥

बृहस्पतिरपि,—

"विहायोपानदुष्णीषौ दक्षिणं पाणिमुद्धरन् ।

हिरण्यं गोशकृद्दर्भान् समादाय ऋतं वदेत्"—इति ॥

कात्यायनोऽपि,—

"सभाऽन्तःस्थैस्तु वक्तव्यं साक्ष्यं नान्यत्र साक्षिभिः ।

सर्वसाक्षिष्वयं धर्मो नित्यः स्यात् स्थावरेषु च ॥

अर्थस्योपरि वक्तव्यं तयोरपि विना क्वचित् ।

चतुष्पदेष्वयं धर्मो द्विपदस्थावरेषु च"—इति ॥

तयोः पूर्वोक्तयोः स्थानयोः । क्वचित् वधरूपविवादे, ताभ्यां स्थानाभ्यां विनाऽपि साक्ष्यं वदेत् । तथाच सएव,—

"वधे चेत् प्राणिनां साक्ष्यं वादयेत् शवसन्निधौ ।

तदभावे तु चिह्नस्य नान्यथैव प्रवादयेत्"—इति ॥

ऋतं वदेदित्यस्य क्वचिद्विषये अपवादमाह मनुः,—

"शूद्रविट्क्षत्रविप्राणां यथोक्तौ तु भवेद्वधः* ।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते†"—इति ॥

साक्ष्युक्तौ कश्चित् विशेषमाह वशिष्ठः,—

"समवेतैस्तु यद्दृष्टं वक्तव्यं तु तथैव तत् ।
विभिन्नेनैव यत्कार्य्यं वक्तव्यं तत् पृथक् पृथक् ॥
भिन्नकाले तु यत्कार्य्यं ज्ञातं वा यत्र साक्षिभिः ।
एकैकं वादयेत्तत्र विधिरेष प्रकीर्त्तितः"—इति ॥

साक्ष्यमुपादेयं हेयञ्च विभजते मनुः,—

"स्वभावेनैव यद्ब्रूयुस्तद् ग्राह्यं व्यावहारिकम् ।
अतो यदन्यत् ब्रूयुस्ते धर्म्मार्थं तदपार्थकम्"—इति ॥

बृहस्पतिरपि,—

"देशकालवयोद्रव्यसंज्ञाजातिप्रमाणतः ।
अन्यूनं चेन्निगदितं सिद्धं साध्यं विनिर्द्दिशेत् ॥
निर्द्दिष्टेष्वर्थजातेषु साक्षी चेत् साक्ष्य आगतः ।
न ब्रूयादक्षरसमं न तन्निगदितम्भवेत् ॥
यस्य शेषः प्रतिज्ञाऽर्थः साक्षिभिः प्रतिवर्णितः ।
सोऽजयी स्यादन्यनीतं साध्यार्थं न समाप्नुयात्‡ ॥

---

* इत्थमेव पाठः सर्व्वत्र । यत्रर्त्तोक्तौ भवेद्वधः,—इति ग्रन्थान्तरीय-पाठस्तु समीचीनः ।

† इत्थमेव पाठः सर्व्वत्र । तद्धि सत्याद्विशिष्यते,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः ।

‡ इत्थमेव पाठः सर्व्वत्र । यस्याशेषं प्रतिज्ञातं साक्षिभिः प्रतिपादितम् । स जयी स्यादन्यथा तु साध्यार्थं न समाप्नुयात्,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः ।

ऊनमभ्यधिकञ्चार्थं विब्रूयुर्यत्र साक्षिणः ।
तदर्थानुक्त*विज्ञेयमेव साक्षिविधिः स्मृतः"—इति ॥

कात्यायनोऽपि,—

"ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् ।
ऊने वाभ्यधिके वार्थे प्रोक्ते साध्यं न सिध्यति ॥
देशं कालं धनं संख्यां मासं जात्याकृती वयः ।
विसंवदेद् यत्र साक्ष्ये तदनुक्तं विदुर्बुधाः"—इति ॥

कूटसाक्षिणमाह नारदः,—

"श्रावयित्वा ततोऽन्येभ्यः साक्षित्वं यो विनिह्नुते ।
स विनेयो भृशतरं कूटसाक्षी भवेद्धि सः"—इति ॥

याज्ञवल्क्यः,—

"न ददातीह यः साक्ष्यं जानन्नपि नराधमः ।
स कूटसाक्षिणां पापैस्तुल्यो दण्ड्यो न चैव हि‡"—इति ॥

कूटसाक्षिणो दण्डमाह मनुः,—

"लोभान्मोहात् भयान्मैत्र्यात् कामात्क्रोधात्तथैव च ।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥

---

* इत्थमेव पाठः सर्व्वत्र । तदप्यनुक्तं,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः ।

† स्मृतं,—इति का० ।

‡ इत्थमेव पाठः सर्व्वत्र । दण्डेन चैव हि,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः ।

एषामन्यतमस्त्वेन यः साक्ष्यमनृतं वदेत्।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्वं तु साहसम्।
भयाद्वे मध्यमं दण्ड्यो मैत्र्यात्पूर्वं चतुर्गुणम्॥
कामाद्दशगुणं पूर्वं क्रोधात्तु द्विगुणं परम्।
अज्ञानाद् द्वे शते पूर्णे बालिश्याच्छतमेव तु॥
एतानाहुः कूटसाक्ष्ये प्रोक्तान् दण्डान् मनीषिभिः।
धर्मस्याव्यभिचारार्थमधर्मनियमाय च॥
कूटसाक्ष्यन्तु कुर्वाणान् त्रीन् वर्णान् धार्मिको नृपः।
प्रवासयेद् दण्डयित्वा ब्राह्मणन्तु विवासयेत्॥
यस्य पश्येत्तु सप्ताहादुक्तवाक्यस्य साक्षिणः।
रोगाग्निर्ज्ञातिमरणमृणं* दाप्यं दमश्च सः"—इति॥

कात्यायनः,—

"साक्षी साक्ष्यं न चेद्ब्रूयात् समन्दण्डं वहेदृणाम्†।
अतोऽन्येषु विवादेषु त्रिशतं दण्डमर्हति"—इति॥

बृहस्पतिः,—

"आहूतो यस्तु नागच्छेत् साक्षी रोगविवर्जितः।
ऋणं दमञ्च दाप्यः स्यात् त्रिपक्षात् परतस्तु सः॥
अपृष्टसत्यवचने पृष्टस्याकथने तथा।
साक्षिणश्च निरोद्धव्या गर्ह्या दण्ड्याश्च धर्मतः"—इति॥

---

* रोगोऽग्निर्ज्ञातिमरणमृणं—इति ग्रा० स०।
† इत्थमेव पाठः सर्व्वत्र। मम तु, वहेद्दमम्,—इति पाठः प्रतिभाति।

साक्षिणामनेकविधावयवाश्राम् विभजते बृहस्पतिः,—

"साक्षिद्वैधे प्रभूतास्तु ग्राह्याः साम्ये गुणान्विताः।

गुणिद्वैधे क्रियायुक्ताः साम्ये तु शुचिमत्तराः"—इति॥

मनुरपि,—

"न हि तं प्रतिगृह्णीयात् साक्षिद्वैधे नराधिपः।

समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान्"—इति॥

यत्तु कात्यायनेनोक्तम्,—

"साक्षिणां लिखितानाञ्च निर्द्दिष्टानाञ्च वादिनाम्।

तेषामेकोऽन्यथावादी भेदात् सर्वे न साक्षिणः"—इति॥

तत्र सर्वशब्देनान्यथावादिसहितानामेव बहूनामसाक्षित्वमुक्तं, न पुनः केवलानामिति मन्तव्यम्। अन्यथा, द्वैधे बहूनामिति वचन-विरोधात्। साक्षित्वे विशेषान्तरमाह नारदः,—

"द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु।

पूर्वपक्षो भवेद् यस्य भावयेत् तस्य साक्षिणः॥

आधर्य्यं पूर्वपक्षस्य यस्मिन्नर्थवशाद्भवेत्।

विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः"—इति॥

अत्रोदाहरणम्। यत्रैकः क्षेत्रं प्रतिग्रहेण प्राप्य भुक्त्वा त्यक्त्वा सकुटुम्बो देशान्तरं प्राप्तः। पुनरन्येन लब्धं भुक्तञ्च। सोऽपि देशविप्लवादिना देशान्तरं सकुटुम्बो गतः। पुनस्तौ द्वावपि चिरन्तनकालापगमे स्वप्रवृत्तिलोभेन स्वकीयमागत्य क्षेत्रम्*। अन्योऽपि प्रतिजानीते;

* एतावन्मात्रमेव पठ्यते सर्व्वेषु पुस्तकेषु। मम तु, स्वकीयमागत्य क्षेत्रमेकः प्रतिजानीते नयवर्म्माख्येन मह्यं दत्तं मदीयमेवैतत् क्षेत्रम्,—इति पाठः प्रतिभाति।

धर्म्मपालेन राज्ञा मह्यं दत्तं मदीयमेवैतत् क्षेत्रम्। अत्र चैकस्यैवं प्रतिज्ञा,—सत्यं नयवर्म्मणैव दत्तम्, इतश्च पश्चाद्धर्म्मपालेनैतत् क्षेत्रं क्रयेण गृहीत्वा मह्यं दत्तम्,—इति। सन्ति च द्वयोरपि वादिनोः साक्षिणः। तत्रेदमुक्तम्,—द्वयोर्विवदतोरर्थे—इति। अयमर्थः। यस्य विवदमानस्य पूर्वपक्षो भवेत्; पूर्वकालिकस्य दानस्य स्वत्वहेतुतयोपन्यासेन यः पक्षो भवेत्, तस्य साक्षिणः सभ्यैः प्रष्टव्या भवेयुः। अन्यतरस्य साक्षिणश्च*। तेषामुत्तरकालदानसाक्षित्वमसाक्षित्वाय-त्वात्। यदा पुनरितरप्रतिज्ञा, तद्दाऽर्थवशेन एतस्य हस्तात् क्रीत्वा मह्यं दत्तमित्यादि तु पूर्वदानोपन्यासपक्षस्याधर्म्मकिञ्चित्करत्वं भवेत्, तदा पश्चात्प्रतिजानानस्य साक्षिणः। पूर्ववादिनः पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः,—इति। साक्ष्यमन्तरेण ज्ञानोपायानाह नारदः,—

"असाक्षिप्रत्यया स्वन्ये षड्वादाः परिकीर्त्तिताः।
उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः॥
केशाकेशि गृहीतश्च युगपत्पारदारिकः।
कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः॥
तथा कुठारपाणिस्तु वनच्छेत्ता प्रकीर्त्तितः।
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः।
असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम्"—इति।

शङ्खलिखितावपि। "केशाकेशिग्रहणात् पारदारिक उल्काहस्तोऽग्निदग्धा शस्त्रपाणिर्घातकः लोप्त्रहस्तश्चोरः"—इति। साक्षिनिरूपणोपसंहारपुरःसरं लिखितनिरूपणं करोति बृहस्पतिः,—

---

* अत्र, न प्रष्टव्याः,—इति भवितुमुचितम्।

"साक्षिषामेव* निर्दिष्टः सङ्ख्यालक्षणनिश्चयः।
लिखितस्याधुना वच्मि विधानमनुपूर्वशः॥
ऋणादिकेऽपि† समये भ्रान्तिः सञ्जायते यतः।
धात्राऽक्षराणि सृष्टानि पत्रारूढान्यतः पुरा॥
देशाचारयुतं वर्षमासपक्षादिहर्द्धिमत्।
ऋणिसाक्षिलेखकानां हस्ताङ्कं लेख्यमुच्यते॥
राजलेख्यं स्थानकृतं स्वहस्तलिखितं तथा।
लेख्यञ्च त्रिविधं प्रोक्तं भिन्नन्तद् द्विधा पुनः‡"—इति॥

एतत्त्रयं द्विविधेन संगृह्णाति वशिष्ठः,—

"लौकिकं राजकीयञ्च लेख्यं विद्याद्द्विलक्षणम्"—इति।

तयोरवान्तरभेदानाह बृहस्पतिः,—

"भागदानक्रयाधानसंविद्दासऋणादिभिः।
सप्तधा लौकिकं लेख्यं त्रिविधं राजशासनम्॥
भ्रातरः संविभक्ता ये स्वरुच्या तु§ परस्परम्।
कुर्वन्ति भागपत्राणि भागलेख्यं तदुच्यते॥
भूमिं दत्वा तु यत्पत्रं कुर्वन्‖ चन्द्रार्ककालिकम्।
अनाच्छेद्यमनाहार्य्यं दानलेख्यन्तु तद्विदुः॥

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, साक्षिणामेव,—इति पाठः प्रतिभाति।

† षाण्मासिकेऽपि,—इति ग्रन्थान्तरे पाठः।

‡ भिन्नं तद्बहुधा पुनः,—इति का०।

§ स्वरूपात्तु,—इति धा० स०।

‖ इत्थमेव पाठः सर्व्वत्र। मम तु, कुर्य्यात्,—इति पाठः प्रतिभाति।

गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् ।
पत्रङ्कारयते यत्र* क्रयलेख्यं तदुच्यते ॥
जङ्गमं स्थावरं बद्धं यत्र लेख्यं करोति यः ।
गोप्य†भोग्यक्रियायुक्तमाधिलेख्यन्तु तन्मतम् ॥
ग्रामादिसमयात् कुर्य्यात् मतं लेख्यं परस्परम् ।
राजाविरोधिधर्म्मार्थं संवित्पत्रं वदन्ति तत् ॥
वस्त्रान्नहीनः कान्तारे लिखितं कुरुते तु यत् ।
कर्म्माणि ते करोमीति दासपत्रं तदुच्यते ॥
धनं वृद्ध्या गृहीत्वा तु स्वयं कुर्य्याच्च कारयेत् ।
उद्धारपत्रं तत्प्रोक्तं ऋणलेख्यं मनीषिभिः ॥
दत्वा भूम्यादिकं राजा ताम्रपत्रे पटेऽथ वा ।
शासनं कारयेत् धर्म्मं स्थानवंश्यादिसंयुतम्‡ ॥
अनाच्छेद्यमनाहार्य्यं सर्व्वभाव्यविवर्जितम् ।
चन्द्रार्कसमकालीनं पुत्रपौत्रान्वयानुगम् ॥
दातुः पालयितुः§ स्वर्गं हर्तुर्नरकमेव च ।
षष्टिवर्षसहस्राणि दानच्छेदफलं लिखेत् ॥
समुद्रं वर्षमासादिधनाध्यक्षाक्षरान्वितम् ।
दानमेवेति लिखितं सन्धिविग्रहलेखकैः ॥

---

* यत्तु,—इति ग्रन्थान्तरीयः पाठः समीचीनः ।

† गोप्यं,—इति का० ।

‡ स्थानपश्वादिकं युतम्,—इति शा० स० ।

§ पालयतः,—इति का० ।

एवंविधं राजकृतं शासनं समुदाहृतम्।
देशादिकं यस्य राजा लिखितन्तु प्रयच्छति॥
सेवाशौर्य्यादिना तुष्टः प्रसादलिखितन्तु तत्।
पूर्वोत्तरक्रियापादनिर्णयान्तं यदा नृपः।
प्रदद्यात् जयिने लेख्यं जयपत्रं तदुच्यते"—इति॥

यत्तु पूर्वमुदाहृतं, "लिखितं दशधा स्मृतम्"—इति। तत्तु विशदं समस्तं*, लौकिकस्य सप्तविधत्वात् राजपत्रस्य त्रिविधत्वात्। शासनमेकं, जयपत्रं द्वितीयं, राज्ञः शासनपत्रयोरेकीकरणो† तृतीयं द्रष्टव्यम्। वशिष्ठस्तु तयोर्भेदमाश्रित्य चातुर्विध्यमाह,—

"शासनं प्रथमं ज्ञेयं जयपत्रं तथाऽपरम्।
आज्ञापत्रं प्रसादोत्थं राजकीयं चतुर्विधम्"—इति॥

शासनजयपत्रे पूर्वमुदाहृते। तत्र शासने विशेषमाह याज्ञवल्क्यः,—

"दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यन्तु कारयेत्।
आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः"—इति॥

अत्र निबन्धो वाणिज्याधिकारिभिः प्रतिवर्षं प्रतिमासञ्च किञ्चिद्धनमस्मै ब्राह्मणायास्यै देवतायै वा देयमित्यादि प्रभुसमय-

---

* समन्वितं,—इति शा० स०। मम तु, सम्यक्,—इति पाठः प्रतिभाति।

† इत्यमेव पाठः सर्व्वत्र। मम तु, आज्ञाप्रसादपत्रयोरेकीकरणेन,—इति पाठः प्रतिभाति।

लभ्योऽर्थः । अत्र यद्यपि धनदातृत्वं वाणिज्यादिकर्त्तुः, तथापि निबन्धकर्त्तुरेव पुण्यं; तदुद्देशेनैव तत्प्रवृत्तेः* । व्यासोऽपि,—

"राज्ञा तु स्वयमादिष्टः सन्धिविग्रहलेखकः ।
ताम्रपट्टे पटे वाऽपि प्रलिखेद्राजशासनम् ।
क्रियाकारकसम्बन्धं समासार्थक्रियाऽन्वितम्"—इति ॥

क्रियाकारकयोः सम्बन्धो यस्मिन् शासने, तत्तथोक्तम् । समासार्थक्रियाऽन्वितं; सङ्क्षिप्तार्थं, क्रियया समक्रियया समन्वितमित्यर्थः। तत्र लेखनीयार्थमाह याज्ञवल्क्यः,—

"विलिखेदात्मनो वंश्यानात्मानं च महीपतिः ।
प्रतिग्रहपरीमाणं दानभेदोपवर्णनम्"—इति ॥

व्यासोऽपि,—

"सवर्षमासपक्षाहर्नृपनामोपलक्षितम् ।
प्रतिग्रहीतृजात्यादिसगोत्रब्रह्मचारिकम् ॥
स्थानं वंशानुपूर्वञ्च† देशं ग्राममुपागतम् ।
ब्राह्मणांस्तु तथैवान्यान्मान्यानधिकृतान् लिखेत् ॥
कुटुम्बिनायका यस्य दूतवैद्यमहत्तराः ।
ते च चण्डालपर्य्यन्ताः सर्वान् सम्बोधयन्निति ॥
मातापित्रोरात्मनस्च पुण्यायामुकसूनवे ।

---

* तदुद्देशेनैव तदुद्दिश्य प्रवृत्तेः,—इति शा० । मम तु, तद्दशेनैव तत्प्रवृत्तेः,—इति पाठः प्रतिभाति ।

† वंश्यानुपूर्व्वं च,—इति का० ।

इत्थं मयाऽमुकीयाय दत्तं सब्रह्मचारिणे"—इति ॥

अपरमपि विशेषं स एवाह,—

"सन्निवेश्य प्रमाणञ्च स्वहस्तञ्च लिखेत् स्वयम्।

मतं मेऽमुकपुत्रस्याप्यमुकस्य महीपतेः॥

सामान्योऽयं धर्मसेतुर्नृपाणां

काले काले पालनीयो भवद्भिः* ।

सर्वानेतान् भाविनः पार्थिवेन्द्रान्

भूयोभूयो याचते रामचन्द्रः"—इति।

जयपत्रे विशेषमाह व्यासः,—

"व्यवहारान् स्वयं दृष्ट्वा श्रुत्वा वा प्राड्विवाकतः।

जयपत्रं ततो दद्यात् परिज्ञानाय पार्थिवः॥

जङ्गमं स्थावरं येन परीक्ष्याथात्मसात्कृतम्।

नानाऽभिप्रायसन्दिग्धे यः सम्यक् विजयी भवेत्॥

तस्य राज्ञा प्रदातव्यं जयपत्रं सुलेखितम्।

पूर्णान्तरक्रियापादं† प्रमाणं तत्परीक्षणम्॥

निगदं स्मृतिवाक्यञ्च यथा सभ्यविनिश्चितम्।

---

* एतदनन्तरं, तस्मै राज्ञा प्रदातव्यं जयपत्रं सुलेखितम्। पूर्व्वपूर्व्व-क्रियायुक्तं प्रमाणं तत्त्ववेदिभिः,—इत्ययं श्लोकः का० ग्रा० पुस्तक-योर्दृश्यते।

† इत्थमेव सर्व्वत्र पाठः। मम तु, पूर्व्वोत्तरक्रियापादं,—इति पाठः प्रतिभाति।

12

एतत् सर्वं समासेन जयपत्रे विलेखयेत्”—इति ॥

वसिष्ठोऽपि,—

“प्राड्विवाकादिहस्ताङ्क*मुद्रितं राजमुद्रया ।

सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकम्”—इति ॥

जयपत्रभेदमाह कात्यायनः,—

“अनेन विधिना लेख्यं पश्चात्कार्य्यं विदुर्बुधाः ।

तिरस्कारक्रिया यत्र प्रमाणेनैव वादिना ॥

पश्चात्कारो भवेत्तत्र न सर्वासु विधीयते ।

अन्यवादादिहीनेभ्य इतरेषां विधीयते ॥

वृत्तानुभावासन्दिग्धं† तच्च स्याद्राजपत्रकम्”—इति ॥

आज्ञाप्रज्ञापनापत्रयोर्लक्षणमाह वसिष्ठः,—

“आज्ञाप्रज्ञापनापत्रे द्वे वसिष्ठेन दर्शिते ।

सामन्तेष्वथ भृत्येषु राष्ट्रपालादिकेषु च ॥

कार्य्यमादिश्यते येन तदाज्ञापत्रमुच्यते ।

ऋत्विक्पुरोहिताचार्य्यमान्येष्वर्हितेषु तु ।

कार्य्यं निगद्यते येन पत्रं प्रज्ञापनं यतः‡”—इति ॥

ज्ञानपदमपि पत्रं पुनर्व्यासेन निरूपितम्,—

“लेख्यं जानपदं लोके प्रसिद्धस्थानलेखकम् ।

---

* इत्थमेव पाठः सर्व्वत्र । मम तु, हस्ताङ्कं,—इति पाठः प्रतिभाति ।

† वृत्तानुवादसंसिद्धं,—इति का० ।

‡ इत्थमेव पाठः सर्व्वत्र । मम तु, मतम्,—इति पाठः प्रतिभाति ।

राजवंशक्रमयुतं वर्षमासार्धवासरैः* ॥

पितृपूर्वं नामजातिज्ञातिकर्णिकयोर्लिखेत्† ।

द्रव्यभेदप्रमाणञ्च वृद्धिञ्चोभयसम्मताम्"—इति ॥

वसिष्ठोऽपि,—

"कालं निवेश्य‡ राजानं स्थानं निवसनं तथा ।

दायकं ग्राहकं चैव पितृनाम्ना च संयुतम् ॥

जातिं गोत्रञ्च शाखाञ्च द्रव्यमाधिं सवृद्धिकम् ।

वृद्धिग्राहकहस्तञ्च विदितार्थौ च साक्षिणौ"—इति ॥

ग्राहकहस्तनिवेशनप्रकारमाह याज्ञवल्क्यः,—

"समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् ।

मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्"—इति ॥

ऋणिवत् साक्षिभिरपि स्वहस्तनिवेशनं कर्त्तव्यमित्याह सएव,—

"साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् ।

अत्राहममुकः साक्षी लिखेयुरिति ते समाः ॥

उभयाभ्यर्थितेनैव मया ह्यमुकसूनुना ।

लिखितं ह्यमुकेनेति लेखकस्त्वन्ततो लिखेत्"—इति ॥

पूर्वं लौकिकलिखितस्य§ बृहस्पतिना सप्तविधत्वं दर्शितं, व्यासस्तु प्रकारान्तरेणाष्टविधत्वमाह,—

---

* वर्षमासार्द्धवासरैः,—इति का० ।

† इत्थमेव पाठः सर्व्वत्र । मम तु, पितृपूर्व्वं नाम जातिं धनिकर्णिक-योर्लिखेत्,—इति पाठः प्रतिभाति ।

‡ इत्थमेव पाठः सर्व्वत्र । मम तु, निवेश्य,—इति पाठः प्रतिभाति ।

§ इत्थमेव पाठः सर्व्वत्र । मम तु, लिखितस्य,—इति पाठः प्रतिभाति ।

"चौकरञ्च* स्वहस्तञ्च तथोपगतसंज्ञितम् ।
आधिपत्रं चतुर्थं तु पञ्चमं क्रयपत्रकम् ॥
षष्ठन्तु स्थितिपत्राख्यं सप्तमं सन्धिपत्रकम् ।
विशुद्धिपत्रकं चैव अष्टधा लौकिकं स्मृतम्"—इति ॥

तेषां लक्षणमुच्यते । तत्र संग्रहकारः,—

"चौकरं नाम लिखितं पुराणैः पौरलेखकैः ।
अर्थिप्रत्यर्थिनिर्दिष्टं यथासम्भवसंस्कृतैः ॥
स्वकीयैः प्रतिनामाद्यैरर्थिप्रत्यर्थिसाक्षिणाम् ।
प्रतिनामभिराक्रान्तं पत्रं प्रोक्तं स्वहस्तवत् ।
स्वहस्तगमसंयुक्तं यथाऽस्त्युक्तलक्षणम्"—इति ॥

कात्यायनः । "पारकेण स्वहस्तेन† लिखितं पारकेनाभ्युपगतं लेख्यमुपगताख्यं विज्ञेयम्" । नारदः,—

"आधिकृत्य तु यद्द्रव्यं प्रयुक्तं तत् स्मृतं बुधैः ।
यत्तत्र क्रियते लेख्यमाधिपत्रं तदुच्यते"—इति ॥

अन्याधिलेख्ये विशेषमाह प्रजापतिः,—

"धनी धनेन तेनैव परमाधिं नयेद् यदि ।
कृत्वा तदन्याधिलेख्यं पूर्वं वाऽस्य समर्पयेत्"—इति ॥

पितामहः,—

"क्रीते क्रयप्रकाशार्थं द्रव्ये यत् क्रियते क्वचित् ।

---

* 'चौकर' स्थाने, 'चीरक'—इति पठ्यते का॰ पुस्तके । एवं परत्र ।

† इत्ययमेव पाठः सर्वत्र । मम तु, पारकेण स्वहस्तेन वा,—इति पाठः प्रतिभाति ।

विक्रेत्रनुमतं क्रेतुर्ज्ञेयं तत् क्रयपत्रकम्॥

पुरःसरश्रेणिगणा यत्र पौरादिकस्थितिः।

तत्सिद्ध्यर्थन्तु यल्लेख्यं तद्भवेत् स्थितिपत्रकम्॥

उत्तमेषु समस्तेषु अभिशापे समागते।

वृत्तानुवादलेख्यं यत् तज्ज्ञेयं सन्धिपत्रकम्॥

अभिशापे समुत्तीर्णे प्रायश्चित्ते कृते जनैः।

विशुद्धिपत्रकं ज्ञेयं तेभ्यः* साक्षिसमन्वितम्"—इति।

अन्यदपि लेख्यमाह कात्यायनः,—

"सीमाविवादे निर्णीते सीमापत्रं विधीयते"—इति।

याज्ञवल्क्योऽपि,—

"दत्त्वर्णं पाटयेत् पत्रं शुद्ध्यै चान्यत्तु कारयेत्"—इति।

लेख्यस्य प्रयोजनमाह मरीचिः,—

"स्थावरे विक्रयाधाने विभागे दानएव च।

प्रतिग्रहे च क्रीते च नालेख्या सिध्यति क्रिया"—इति।

लिप्यनभिज्ञस्त्वन्येन लेखयेदित्याह नारदः,—

"अलिपिज्ञ ऋणी यः स्यात् लेखयेत् स्वमतन्तु सः।

साक्षी वा साक्षिणोऽन्ये वा† सर्वसाक्षिसमीपतः"—इति।

पत्रनाशादौ पत्रान्तरं लेख्यमित्याह याज्ञवल्क्यः,—

---

* तेभ्योऽसाक्षिसमन्वितम्,—इति पा०।

† इत्थमेव पाठः सर्वत्र। साक्षी वा साक्षिणाऽन्येन,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः।

"देशान्तरस्थे दुर्लेख्ये नष्टे मृष्टे हृते तथा ।
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत्"—इति ।

यच्च नारदेनोक्तम्,—

"लेख्ये देशान्तरे न्यस्ते शीर्णे दुर्लिखिते हृते ।
सतस्तत्कालकरणमसतो दृष्टदर्शनम्*"—इति ।

तद्धनदानोद्यतच्छणिकविषयम् । लेख्यपरीक्षामाह वृहस्पतिः,—

"त्रिविधस्यापि लेख्यस्य भ्रान्तिः सञ्जायते यदा ।
धनिसाक्षिलेखकानां हस्तात् संशोधयेत्ततः"—इति ।

कात्यायनः,—

"राजाज्ञया समाहूय यथान्यायं विचारयेत् ।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः ॥
वर्णवाक्यक्रियायुक्तमसन्दिग्धस्फुटाक्षरम् ।
अहीनक्रमचिह्नञ्च लेख्यं तत्सिद्धिमाप्नुयात्"—इति ।

लेख्यस्य प्रामाण्यस्य सिद्धिमाह सएव,—

"लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा ।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः"—इति ।

देशस्थितिर्देशाचारः । स्वहस्तकृते विशेषमाह याज्ञवल्क्यः,—

"विनाऽपि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् ।
तत्प्रमाणं स्मृतं सर्वं बलोपाधिकृतादृते"—इति ।

---

* दृष्टदर्शनम्,—इति पा० । सतस्तत्कालकरणमसतो द्रष्टृदर्शनम्,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः ।

परहस्तकृते विशेषमाह स एव,—

"वादिनामभ्यनुज्ञातं लेखकेन ससाक्षिकम् ।

लिखितं सर्वकार्य्येषु तत्प्रमाणं स्मृतं बुधैः"—इति ।

आधिपत्ये नारद आह,—

"देशाचाराविरुद्धं यत् व्यक्ताधिविधिलक्षणम् ।

तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम्"—इति ।

लेख्यदोषमाह कात्यायनः,—

"स्थानभ्रष्टाः सकान्तिस्था सन्दिग्धालक्षणच्युताः ।

तोयसंस्थापिता वर्णा कूटलेख्यं तदा भवेत् ॥

देशाचारविरुद्धं यत् सन्दिग्धं क्रमवर्जितम् ।

कृतमस्वामिना यच्च साध्यहीनञ्च दुष्यति"—इति ।

हारीतोऽपि,—

"यच्च काकपदाकीर्णं तल्लेख्यं कूटतामियात् ।

विन्दुमात्राविहीनं यत् सहितं मसहितञ्च तत्"—इति ।

बृहस्पतिः,—

"दूषितो गर्हितः साक्षी यत्रैकोऽपि निवेशितः ।

कूटलेख्यन्तु तत्प्राहुर्लेखको वाऽपि तद्विधः ॥

मुमूर्षुधनलुब्धार्त्तसोन्मत्तव्यसनातुरैः ।

तत् सोपाधिबलात्कारकृतं लेख्यं न सिद्ध्यति ॥

अत्युज्ज्वलं चिरकृतं मलिनञ्चाल्पकालिकम् ।

भग्नोत्सृष्टाक्षरयुतं लेख्यं कूटत्वमाप्नुयात्"—इति ।

नारदोऽपि,—

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतं तु यत् ।
तदप्रमाणं लिखितम्भयोपाधिकृतं तथा"—इति ।

कात्यायनोऽपि,—

"साक्षिदोषात् भवेद्दुष्टं* पत्रं वै लेखकस्य वा ।
धनिकस्यापि वै दोषात् तथा वा धारिकस्य च"—इति ।

दोषोद्भावयितृन् सएवाह,—

"प्रमाणस्य हि ते दोषा:† वक्तव्यास्ते विवादिनः ।
गूढाः सुप्रकटाः सर्व्वैः कार्य्यं शास्त्रप्रदर्शनात्"—इति ॥

उद्भावनप्रकारांश्च सएवाह,—

"साक्षिलेखनकर्त्तारः कूटतां यान्ति वादिनः ।
तथा दोषाः प्रयोक्तव्या दुष्टे लेख्यं प्रदुष्यति ॥
न लेखकेन लिखितं न दृष्टं साक्षिभिस्तथा ।
एवं प्रत्यर्थिनोक्तेन कूटलेख्यं प्रकीर्त्तितम् ॥
तथ्येन हि प्रमाणं तु दूषणेन तु दूषणम् ।
मिथ्याऽभियोगे दण्ड्यः स्यात् साध्यार्थादपि हीयते"—इति ।

अनन्तरभाविराजकृत्यमाह बृहस्पतिः,—

"तथ्येन हि प्रमाणं तु दूषणेन तु दूषणम् ।
एवं दृष्टं नृपस्थाने यस्मिन् तद्धि विचार्य्यते ॥
विमृश्य ब्राह्मणैः सार्द्धं वक्तृदोषाच्च निश्चितम्"—इति ।

* इत्थमेव पाठः सर्व्वत्र । मम तु, भवेद्दुष्टं,—इति पाठः प्रतिभाति ।
† इत्थमेव पाठः सर्व्वत्र । मम तु, ये दोषाः,—इति पाठः प्रतिभाति ।

आह सएव,—

"दातुर्लेख्ये सहस्तन्तु धनिको यदि निह्नुते।

पत्रस्थसाक्षिभिर्वाऽपि लेखकस्य मतेन च"—इति।

निश्चयं कुर्य्यादिति शेषः। सन्दिग्धलेख्ये निर्णयमाह याज्ञवल्क्यः,—

"सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः।

युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः"—इति।

नारदोऽपि,—

"यत् साक्षिसंशये लेख्ये भूताभूतकृते क्वचित्।

तत् स्वहस्तक्रियाचिह्नप्राप्तियुक्तिभिरुद्धरेत्"—इति।

वृहस्पतिरपि,—

"विविधस्यास्य लेख्यस्य भ्रान्तिः सञ्जायते यदा।

धनिसाक्षिलेखकानां हस्तात्संशोधयेत्ततः"—इति।

कात्यायनः,—

"अथ पञ्चत्वमापन्ने लेखके सह साक्षिभिः।

तत् स्वहस्तादिभिस्तेषां विशुध्येत न संशयः॥

धनिस्वहस्तसन्देहे जीवतो वा मृतस्य च।

तत् स्वहस्तकृतैरन्यैः पत्रैर्लेख्यविनिर्णयः॥

समुद्रेऽपि यदा लेख्ये मृताः सर्वे च ते स्थिताः।

लिखितं तत् प्रमाणं तु मृतेष्वपि हि तेषु च"—इति

विष्णुरपि,—

"यत्नर्णी धनिको वाऽपि साक्षी वा लेखकोऽपि वा।

म्रियते तत्र तल्लेख्यं तत्स्वहस्तैः प्रसाधयेत्"—इति।

निराकरणे व्यवस्थितानि साधनान्याह कात्यायनः,—

"लिखिते लिखितं नैव स* साक्षी साक्षिभिर्हरेत्।
कूटोक्तौ साक्षिणो वाक्यात् लेखकस्य च पत्रकम्॥
आधर्त्ता† निकटस्थस्य पत्रकेन न साधितम्।
शुद्धपूर्वप्रसूत्या‡ तत्तु लेख्यं दुर्बलतामियात्॥
लेख्यं विंशत्समाऽतीतमदृष्टाश्रावितञ्च यत्।
न तत्सिद्धिमवाप्नोति तिष्ठत्स्वपि हि साक्षिषु॥
प्रयुक्ते प्राप्तिलाभे तु लिखितं यो न दर्शयेत्।
न वाच्यते च धनिकं न तत्सिद्धिमवाप्नुयात्"—इति।

नारदोऽपि,—

"योऽश्रुतार्थमदृष्टार्थं व्यवहारार्थमागतम्।
न लेख्यं सिद्धिमाप्नोति जीवत्स्वपि हि साक्षिषु॥
मृताः स्युः साक्षिणो यत्र धनिकर्णिकलेखकाः।
तदप्यपार्थं लिखितं ऋणलाभेस्थिराश्रयात्§॥
अदृष्टाश्रावितं लेख्यं प्रमीतधनिकर्णिकम्।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, न,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः सर्व्वत्र। मम तु, आधातुर,—इति पाठः प्रतिभाति।

‡ इत्थमेव पाठः सर्व्वत्र। मम तु, शुल्कार्थप्रसूत्या,—इति पाठः प्रतिभाति।

§ इत्थमेव पाठः सर्व्वत्र। ऋते त्वाधेः स्थिराश्रयात्,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः।

अतथाल्पशक्त्यैव बहु कार्यं न सिध्यति"—इति।

लेख्यहानेरपवादमाह बृहस्पतिः,—

"उन्मत्तजडमूकानां राजभीतिप्रवासिनाम्।

अप्रगल्भभयार्त्तानां न लेख्यं हानिमाप्नुयात्"—इति।

लेख्यशुद्धिप्रकारमाह नारदः,—

"दर्शितं प्रतिकालं यत् तथा तु श्रावितं च यत्।

न लेख्यसिद्धिः सर्वत्र धनिष्वपि हि साक्षिषु*"॥

कात्यायनोऽपि,—

"निर्दोषं प्रथितं यत्तु लेख्यं तत्सिद्धिमाप्नुयात्।

यथादृष्टे स्फुटं दोषं नोद्भवान् धनिको यदि॥

ततो विंशतिवर्षाणि क्रीतं पत्रं स्थितम्भवेत्।

शक्तस्य सन्निधावर्थो यस्य लेख्येन भुज्यते॥

वर्षाणि विंशतिं यावत् तत्परं दोषवर्जितम्।

अथ विंशतिवर्षाण्यधिकं भुक्तिः सुनिश्चिता॥

न लेख्येन तु तत्सिद्धं लेख्यदोषविवर्जितम्।

सीमाविवादे निर्णीते सीमापत्रं विधीयते॥

तस्य दोषाः प्रवक्तव्या यावद्वर्षाणि विंशतिः।

आधानचरितं यच्च ऋणं लेख्यं निवेशितम्॥

---

* इत्यमेव पाठः सर्व्वत्र। लेख्यं सिध्यति सर्व्वत्र मृतेष्वपि च साक्षिषु, इति ग्रन्थान्तरीयस्तु पाठः समीचीनः।

† पत्रं,—इति स० ग्रा०।

मृतः साक्षी प्रमाणन्तु स्वल्पभोगेषु तद्विदुः ।
प्राप्तं वाऽनेन चेत् किञ्चिद्दायश्चात्र निरूपितम् ॥
विनाऽपि मुद्रया लेख्यं प्रमाणं मृतसाक्षिकम् ।
*यदि लब्धं न चेत् किञ्चित् प्रज्ञप्तिर्वा कृता भवेत् ।
प्रमाणमेव लिखितं मृता यद्यपि साक्षिणः*"--इति ।

लेख्यानां मिथोविरोधे बाध्यबाधकमाह व्यासः । "स्वहस्तकाद्यानपेतं समकालं पश्चिमं वा तत्र राजकृतं शुभम्"--इति ।
साक्ष्याद्यसम्भवे हारीतः,--

"न मयैतत्कृतं पत्रं कूटमेतेन कारितम् ।
अधरीकृत्य तत्पत्रमर्थे दिव्येन निर्णयः"--इति ।

प्रजापतिः,--

"स्वनामगोत्रैस्तत्तुल्यं रूपं लेख्यं क्वचिद् भवेत् ।
अगृहीतधने तत्र कार्य्यो दिव्येन निर्णयः"--इति ।

कृत्स्नदानासमर्थं प्रति याज्ञवल्क्यः,--

"लेख्यस्य पृष्ठे विलिखेत् दत्वा तदृणिको धनम् ।
धनिकोपगतं दद्यात् स्वहस्तपरिचिह्नितम्"--इति ।

लेख्यदोषमनुद्धरतो दण्डमाह कात्यायनः,--

"कूटोक्तौ साक्षिणां वाक्यं लेखकस्य च पत्रकम् ।
न चेत् शुद्धिं नयेत् कूटं स दाप्यो दण्डमुत्तमम्"--इति ।

---

* नास्त्ययं श्लोकः स० शा० पुस्तकयोः ।

साक्षिणां वाक्यं लेखकस्य च प्रति कूटोक्तौ उक्तविधां यो वादी कूटशुद्धिं न नयेत्, स उत्तमसाहसं दण्ड्य इत्यर्थः। स्थावरादौ तु विशेषमाह सएव,—

"स्थावरे विक्रयाधाने लेख्यं कूटं करोति यः।

असम्यग्भावितः कार्य्यो जिह्वापाण्यङ्घ्रिवर्जितः"॥

अन्यलेख्यावारके याते* लेख्यागमनकारणमुद्भावनीयमित्याह व्यासः,—

"पश्चाद्यस्य कृतं लेख्यमन्यहस्ते प्रदृश्यते।

अवश्यं तेन वक्तव्यं पत्रस्यागमनं ततः"--इति।

नारदोऽपि,--

लेख्यं यच्चान्यनामाङ्कं वाद्यन्तरकृतं भवेत्।

विवृत्य वैपरीत्यां† तत्सर्वैरागमहेतुभिः"--इति।

इति लेख्यप्रकरणम्।

लिखितोपसंहारपुरःसरभुक्तिमुपक्रमते बृहस्पतिः,—

"एतद्विज्ञानमाख्यातं‡ साक्षिणां लिखितस्य च।

---

* इत्यमेव पाठः सर्व्वत्र। मम तु, अन्यलेख्ये अन्यकरं याते,—इति पाठः प्रतिभाति।

† इत्यमेव पाठः सर्व्वत्र। मम तु, विविच्य वै परीक्ष्यम्,—इति पाठः प्रतिभाति।

‡ इत्यमेव पाठः सर्व्वत्र। मम तु, एतद्विधानमाख्यातम्,—इति पाठः प्रतिभाति।

साम्प्रतं स्थावरप्राप्तेर्भुक्तेश्च विधिरुच्यते”--इति ।

तच्च स्थावरप्राप्तिनिमित्तानि सएवाह,--

“विद्यया क्रयबन्धेन* शौर्य्यभार्य्याऽन्वयागतम् ।

सपिण्डस्याप्रजस्यांशं स्थावरं सप्तधोच्यते”—इति ।

नारदोऽपि,—

“लब्धं दानक्रियाप्राप्तं शौर्य्यं वैवाहिकं तथा ।

बान्धवादप्रजाज्जातं षड्विधस्तु धनागमः”—इति ।

आगमपूर्वकमेव भुक्तेः प्रामाण्यमित्याह हारीतः,—

“न मूलेन विना शाखा अन्तरीचे प्ररोहति ।

आगमस्तु भवेन्मूलं भुक्तिः शाखा प्रकीर्त्तिता”—इति ।

नारदोऽपि,—

“आगमेन विशुद्धेन भोगोयाति प्रमाणताम् ।

अविशुद्धागमोभोगः प्रामाण्यं नैव गच्छति”—इति ।

आगमवद्दीर्घकालत्वादिकमपि भुक्तेः प्रामाण्यकारणमित्याह नारदः,—

“आगमोदीर्घकालश्च विच्छेदोपरवोज्झितः† ।

प्रत्यर्थिसन्निधानश्च पञ्चाङ्गोभोग इष्यते”—इति ।

अन्यतराङ्गस्य वैकल्ये भोगस्य प्रामाण्यं नास्तीति आह नारदः,—

---

* इत्थमेव पाठः सर्व्वत्र । मम तु, क्रयलब्धेन,—इति पाठः प्रतिभाति ।

† इत्थमेव पाठः सर्व्वत्र । निश्छिद्रोऽन्यरवोज्झितः,—इति ग्रन्थान्तरीयपाठस्तु सम्यक् ।

"सम्भोगं केवलं यस्तु कीर्त्तयेन्नागमं क्वचित्।
भोगच्छलापदेशेन विज्ञेयः स तु तस्करः"—इति।

कात्यायनोऽपि,—

"प्रणष्टागमलेख्येन भोगारूढेन वादिना।
कालः प्रमाणं दानञ्चाकीर्त्तनीयाभिसंसदि"—इति।

पञ्चाङ्गेषु विप्रतिपत्तौ साधनीयमित्याह संग्रहकारः,—

"भुक्तिप्रसाधने मुख्याः प्रथमन्तु कुलीवलाः।
ग्रामण्यः क्षेत्रसामन्तास्तत्सीमापतयः क्रमात्॥
लिखितं साक्षिणोभुक्तिः क्रियाः क्षेत्रगृहादिषु।
आगमे क्रयदानादौ प्रत्याख्याते चिरन्तने"—इति।

क्रयदानादावागमे प्रतिवादिना प्रत्याख्याते सति लिखितसाक्षिभुक्तयः क्रियाः प्रमाणम्। भुक्तेर्भेदमाह कात्यायनः,—

"भुक्तिस्तु द्विविधा प्रोक्ता सागमाऽनागमा तथा।
त्रिपुरुषी स्वतन्त्रा तु भवेदल्पा तु सागमा"—इति।

पुरुषत्रयानुगता भुक्तिरागमानुपन्यासेऽपि प्रमाणम्। स्वल्पा तु भुक्तिरागमसहितैव प्रमाणम्। एतदेव* वृहस्पतिः,—

"भुक्तिस्त्रैपुरुषी यत्र चतुर्थे सम्प्रवर्त्तिता।
तद्भोगः स्थिरतां याति न पृच्छेदागमं क्वचित्॥
अविच्छिन्नेन यद्भुक्तं पुरुषैस्त्रिभिरेव तु।
तत्र नैवागमः कार्यो भुक्तिस्त्रिपुरुषी यतः"॥
"तत्र नैवागमः कार्यो भुक्तिस्तत्र गरीयसी"—इति वा पाठः।

* इत्यमेव पाठः सर्व्वत्र। मम तु, एतदेवाह,—इति पाठः प्रतिभाति।

त्रिपुरुषभोगेन षष्टिसंवत्सराद्यः उपलक्ष्यन्ते। अतएव व्यासः,—

"पूर्वाणि*विंशतिं भुक्त्वा स्वामिनाऽव्याहता सती।

भुक्तिः सा पौरुषी ज्ञेया द्विगुणा च द्विपौरुषी॥

त्रिपुरुषी त्रिगुणिता तत्र नान्वेष्य आगमः"—इति।

बृहस्पतिर्नवतिसंवत्सरानुपलक्षयति,—

"पितामहो यस्य जीवेज्जीवेच्च प्रपितामहः।

त्रिंशत् समा या तु भुक्तिः† सा भुक्तिर्व्याहता परैः॥

भुक्तिः सा पौरुषी ज्ञेया द्विगुणा च द्विपौरुषी।

त्रिपौरुषी च त्रिगुणा परतः सा चिरन्तनी‡"—इति।

स्मृत्यन्तरे पञ्चत्रिंशद्वर्षाणि पौरुषोभोग इत्युक्तम्,—

"वर्षाणि पञ्चत्रिंशत्तु पौरुषोभोग उच्यते"—इति।

यदि विंशतिवर्षः पौरुषोभोगः, यदि वा त्रिंशद्वर्षः, पञ्चत्रिंशद्वर्षो वा, सर्वथाऽपि त्रिपुरुषभोगेन तत्करणयोग्यः कालउपलक्ष्यते। अतएव कात्यायनः,—

"स्मार्त्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते।

अस्मार्त्तेऽनुगमाभावात् क्रमात् त्रिपुरुषागता"—इति।

अनुगमाभावादिति योग्यानुपलब्ध्यभावेन आगमाभावनिश्चयासम्भवात्। एतदुक्तं भवति। स्मरणयोग्ये पञ्चाशदधिकशतवर्षपर्य्यन्तातीतकालमध्ये प्रारब्धा भुक्तिस्त्वेतत्सारप्रमाणावगममूलैव स्वले प्रमाणम्।

---

* इत्यमेव पाठः सर्व्वत्र। वर्षाणि,—इति ग्रन्थान्तरीयपाठस्तु सम्यक्।

† त्रिंशत्समायान्तु सुक्तौ,—इति शा०।

‡ स्याच्चिरन्तनी,—इति का०।

तन्मूलस्यागमस्याभावात्*योग्यानुपलब्ध्या बाध्यमानत्वात्। स्मरणायोग्ये पुनः पञ्चाशदधिकशतवर्षातीतकालात् प्राचीनकाले प्रारब्धा स्व-कालदार्श्यावसितागममूलिका विनाऽपि मानान्तरागतस्यागममूलतां स्वले प्रमाणमिति। अस्मार्त्तेऽपि काले अनागमस्मृतिपरम्परायां सत्यां न भोगः प्रमाणम्। अतएव नारदः,—

"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि।

चोरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः"—इति।

निश्चितानागमः स्वभोगस्तेनैव दर्शितः,—

"अन्याहितं हृतन्यस्तं बलावष्टब्धयाचितम्।

अप्रत्यक्षं च यद्भुक्तं षडेतेऽप्यागमं विना"—इति।

अन्याहितं अन्यस्मै दातुमर्पितम्। हृतमाहृतम्। न्यस्तं निक्षिप्तम्। बलावष्टब्धं राजप्रसादादिबलावष्टम्भेन भुक्तम्। याचितं परकीय-मलङ्काराद्यर्थमानीतम्। सम्वर्त्तोऽपि,—

"या राजक्रोधलोभेन छलान्यायेन वा कृता।

प्रदत्ताऽन्यस्य तुष्टेन न सा सिद्धिमवाप्नुयात्"—इति।

यत्तु हारीतेनोक्तम्,—

"अन्यायेनापि यद् भुक्तं पित्रा पूर्वतरैस्त्रिभिः।

न तत् शक्यं पराहर्तुं क्रमात् त्रिपुरुषागतम्"—इति।

एतच्च अन्यायेनापि भुक्तमाहर्तुमशक्यम्, किं पुनर्न्यायेन भुक्तमित्येतत्परम्। शासनविरोधे भुक्तेरप्रामाण्यमाह बृहस्पतिः,—

"यस्य त्रिपुरुषी भुक्तिः पारम्पर्य्यक्रमागता।

---

* तन्मूलमनागमाभावाद्,—इति श्रा०।

न सा चालयितुं शक्या पूर्विकाच्छासनादृते”—इति।

यत्तु पितामहेनोक्तम्,—

“स्वहस्तादागमपदं तस्मात्तु नृपशासनम्।

ततस्त्रिपुरुषो भोगः प्रमाणान्तरमिष्यते*”—इति।

तत्प्रवाहपरम्परया तत्प्रसिद्धा निश्चितागमभोगविषयम्। सत्य-विच्छेदे† सागमा भुक्तिः प्रमाणमित्याह बृहस्पतिः,—

“भुक्तिर्बलवती शास्त्रे त्वविच्छिन्ना चिरन्तनी।

विच्छिन्नाऽपि हि सा ज्ञेया या तु पूर्वप्रसाधिता”—इति।

चिरन्तनायाः भुक्तेः क्वचिदपवादमाह याज्ञवल्क्यः,—

“योऽभियुक्तः परेतः स्यात् तस्य रिक्थी तमुद्धरेत्।

न तत्र कारणं भुक्तिरागमेन विना कृता”—इति।

नारदोऽपि,—

“अथारूढविवादस्य प्रेतस्य व्यवहारिणः।

पुत्त्रेण सोऽर्थः शोध्यः स्यान्न तद्भोगान्निवर्त्तयेत्‡”—इति।

अनुद्धारे त्वभियुक्तस्यैव दण्डो न तत्पुत्त्रादेः। तदुक्तं स्मृत्यन्तरे,—

“आगमस्तु कृतो येन स दण्ड्यस्तमनुद्धरन्।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, प्रमाणतरमिष्यते,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः सर्व्वत्र। मम तु, सत्यपि विच्छेदे,—इति पाठः प्रतिभाति।

‡ तद्भोगमात्राद्धेतोर्व्यवहारं न निवर्त्तयेदित्यर्थः। न तं भोगो निवर्त्तयेत्,—इति ग्रन्थान्तरीयः पाठः।

न तत्सुतस्तत्सुतो वा भोग्यहानिस्तयोरपि"—इति।

एतदेवाभिप्रेत्य कात्यायन आह,—

"आहर्त्ता युक्तभुक्तोऽपि* लेख्यदोषान् विशोधयेत्।

तत्सुतो भुक्तिदोषांस्तु लेख्यदोषांस्तु नाप्नुयात्"—इति।

त्रिपुरुषेषु व्यवस्थितं साधकं क्रमेण दर्शयति नारदः,—

"आदौ तु कारणं भुक्तिर्मध्ये भुक्तिस्तु सागमा।

कारणं भुक्तिरेवैका सन्तता या चिरन्तनी"—इति।

अक्षरार्थस्तु संग्रहकारेण दर्शितः,—

"कृतागमस्योक्तकाले भुक्तेश्च प्रभुरागमः।

तस्यैवाथ तृतीयस्य प्रभुर्भुक्तिस्तु सागमा† ॥

भुक्तिर्या सा चतुर्थस्य प्रमाणं सन्तता महत्।

परित्यक्तागमा भुक्तिः केवलैव प्रभुर्मता"—इति।

क्वचित् भुक्तेरेव प्राबल्यमितराभ्यामित्याह कात्यायनः,—

"रथ्यानिर्गमनद्वारे जलवाहादिसंश्रये।

भुक्तिरेव तु गुर्वी स्यात् प्रमाणेष्विति निश्चयः"—इति।

नारदोऽपि,—

"विद्यमानेऽपि लिखिते जीवत्स्वपि हि साक्षिषु।

विशेषतः स्थावरेषु यन्न भुक्तं न तत् स्थिरम्"—इति।

सम्बर्त्तोऽपि,—

* युक्तभुक्तोऽपि,—इति पु॰।

† प्रभुर्भुक्तिः स्फुटागमा,—इति का॰।

"त्यज्यमाने प्रदत्वेन विद्यमाने तु राजनि ।
भुक्तिर्यस्य भवेत्तस्य न लेख्यं तत्र कारणम्"—इति ।

एतच्च लेख्यवैयर्थ्यकथनार्थमुक्तं, न पुनर्भोक्तुः स्वामित्वप्रतिपादनार्थम् । तस्य भोगमात्रेण स्वामित्वासिद्धेः । अपहारेणापि भोगसम्भवात् । अतएव कात्यायनः,—

"नोपभोगे बलं कार्य्यमाहर्त्रा तत्सुतेन वा ।
पशुस्त्रीपुरुषादीनामिति धर्म्मो व्यवस्थितः"—इति ।

यत्तु याज्ञवल्क्येनोक्तम्,—

"पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी"—इति ।

यदपि प्रजापतिनोक्तम्,—

"दानकालाद्यदाऽऽरभ्य भुक्तिर्यस्य विघातिनी ।
समा विंशत्यवधिका तस्यान्तं न विचारयेत्"—इति ।

तदेतदाक्षेधमकुर्वतां फलहानिविषयम् । न तु भूहानिविषयम् । यस्मात् तत्कालोपलक्षितभुक्तेरेव तत्र प्रामाण्यात् । अतएव वृहस्पतिः,—

"त्रिपुरुषं भुज्यते येन समन्तं भूरवारिता ।
तस्य नैवापहर्त्तव्या क्षमालिङ्गेन चेद्यथ*"—इति ।

आध्यादिपञ्चकस्य न फलहानिरित्याह याज्ञवल्क्यः,—

---

* क्षमालिङ्गेन चेद्यदा,—इति का० । मम तु, क्षमालिङ्गं न चेद्यथ,—इति पाठः प्रतिभाति ।

"आधिसीमोपनिक्षेपजडबालधनैर्विना।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि"—इति।

मनुरपि,—

"आधिः सीमा बालधनं निक्षेपोपनिधिस्त्रियः।
राजस्वं श्रोत्रियद्रव्यं नोपभोगेन नश्यति"—इति।

श्रोत्रियग्रहणमन्यासक्तोपलक्षणार्थम्। अतएव कात्यायनः,—

"ब्रह्मचारी चरेत् कश्चित् व्रतं षट्त्रिंशदाब्दिकम्।
अर्थार्थी चान्यविषये दीर्घकालं चरेन्नरः* ॥
समावृत्तो व्रती कुर्य्यात् स्वधनान्वेषणं ततः।
पञ्चाशदाब्दिको भोगः तद्धनस्यापहारकः ॥
प्रतिवेदं द्वादशाब्दः कालो विद्यार्थिनां स्मृतः।
शिल्पविद्यार्थिनाञ्चैव ग्रहणान्तः प्रकीर्त्तितः ॥
सुहृद्भिर्बन्धुभिश्चैषां यत्स्वं भुक्तमपश्यताम्।
नृपापराधिनां चैव भवेत् कालेन हीयते"—इति ॥

धनस्य दशवार्षिकी हानिरिति यदुक्तं, तस्य विषयविशेषे संकोचमाह मरीचिः,—

"धनवाह्यालंकरणं याचितं प्रीतिकर्म्मणा।
चतुःपञ्चाब्दिकं देयमन्यथा हानिमाप्नुयात्"—इति।

अत्रापवादमाह मनुः—

"संप्रीत्या भुज्यमानानि न नश्यन्ति कदाचन।

---

* वसेन्नरः,—इति का०।

धेनुरनडोवहद्दृढो यश्च वश्यः प्रयुज्यते"—इति।

याचितेष्वपवादमाह व्यासः,—

"याच्याधर्मेण यद्भुक्तं श्रोत्रिये राजपूरुषैः।

सुहृद्भिर्बान्धवैश्चापि न तद्भागेन हीयते"—इति।

वृहस्पतिरपि,—

"अनागमं तु यद्भुक्तं गृहक्षेत्रापणादिकम्।

सुहृद्बन्धुसकुल्येश्च न तद्भागेन हीयते"—इति।

हानौ कारणमाह सएव,—

"धर्मचयः श्रोत्रिये स्यादभयं राजपूरुषे।

स्नेहः सुहृद्बान्धवेषु भुक्तान्येतानि हीयते"—इति।

क्वचिदेकदेशभोगेऽनुपभुक्ते प्रत्येकदेशान्तरेषु* प्रमाणम्। तदाह वृहस्पतिः,—

"यथैकशासने ग्रामक्षेत्रारामाश्च लेखिताः।

एकदेशोपभोगेऽपि सर्वे भुक्ता भवन्ति ते"—इति।

इति भुक्तिप्रकरणम्।

भुक्त्युपसंहारपुरःसरं दिव्यमुपस्थापयति वृहस्पतिः,—

"स्थावरस्य तदाख्यातं† स्वाभभोगप्रसाधनम्।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, क्वचिदेकदेशभोगोऽनुपभुक्तप्रत्येकदेशान्तरेषु,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः सर्व्वत्र। मम तु, स्थावरस्यैतदाख्यातं,—इति पाठः प्रतिभाति।

प्रमाणहीने पादे तु न दोषो दैविकी क्रिया"—इति।

दिव्यमुद्दिशति बृहस्पतिः,—

"घटोऽग्निरुदकं चैव विषं कोशश्च पञ्चमः।

षष्ठश्च तण्डुलः प्रोक्तः सप्तमस्तप्तमाषकः॥

अष्टमं फालमित्युक्तं नवमं धर्म्मकं तथा।

दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवा॥

यस्माद्देवैः प्रयुक्तानि दुष्करार्थे महात्मनः"—इति।

शङ्खः। "तत्र दिव्यं नाम तुलाधारणं विषाशनं* कोशोऽग्नि-प्रवेशोलोहधारणमिष्टापूर्त्तप्रदानमन्यांश्च शपथान् कारयेत्"—इति।

शपथश्च बृहस्पतिना दर्शितः,—

"सत्यं वाहनशस्त्राणि गोवीजकनकानि च।

देवब्राह्मणपादांश्च पुत्त्रदारशिरांसि च।

एते च शपथाः प्रोक्ता अल्पार्थे सुकराः सदा"—इति।

शंखलिखितावपि। "इष्टापूर्त्तप्रदानमन्यांश्च शपथान् कारयेत्"—इति। उद्दिष्टानां दिव्यानां मध्ये तुलादीनि महाभियोगे प्रयोक्तव्यानि। तथाच याज्ञवल्क्यः,—

"तुलाऽग्न्यापोविषं कोशो दिव्यानीह विशुद्धये।

महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि"—इति॥

एषामग्निशब्देन तप्तायःपिण्डतप्तमाषतप्ततण्डुलाश्च गृह्यन्ते। "न भुक्तो कोशमल्पेऽपि दापयेत्"—इति स्वल्पाभियोगे कोशस्य।

---

* विषाकर्षणं—इति शा० स०।

कोशस्य तुलादिषु पाठः सावष्टंभाभियोगेऽपि प्राप्त्यर्थः। न महाभियोगेष्वेवेति नियमार्थः। अन्यथा कोशस्य शंकाभियोगएव प्राप्तिः स्यात्,—

"अवष्टंभाभियुक्तानां घटादीनि विनिर्दिशेत्।
तण्डुलाश्चैव कोशाश्च शंकाश्चेव न संशयः"—इति

स्मरणात्। शीर्षकं विवादपराजयनिबन्धनो दण्डः। तच शिरसि तिष्ठतीति शीर्षकस्थः। *यदा शीर्षकस्थोऽभियोक्ता न स्यात्तदा दिव्यानि देयानि। तथाच नारदः,—

"शीर्षकस्थो यदा न स्यात् तदा दिव्यं तु दीयते*"—इति।

दिव्यदाने नियममाह पितामहः,—

"अभियोक्ता शिरःस्थाने दिव्येषु परिकीर्त्त्यते।
अभियुक्ताय दातव्यं दिव्यं श्रुतिनिदर्शनात्"—इति।

कात्यायनोऽपि,—

"न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः"—इति।

अभियुक्ताय दातव्यं नान्यस्येति नियमस्य अपवादमाह याज्ञवल्क्यः,—

"रुच्या वाऽन्यतरः कुर्य्यादितरो वर्त्तयेत् शिरः"—इति।

---

* इत्यमेव पाठः सर्व्वत्र। मम तु, यदा शीर्षकस्थोऽभियोक्ता न स्यात्, तदा दिव्यानि न देयानि। तथाच नारदः,—शीर्षकस्थो यदा न स्यात्तदा दिव्यं न दीयते। इति पाठः प्रतिभाति। अन्यथा 'शीर्षकस्थेऽभियोक्तरि'—इति याज्ञवल्क्यादिवचनविरोधापत्तेरिति ध्येयम्।

नारदोऽपि,—

"परियोक्ता शिरःस्थाने सर्वत्रैकः* प्रकल्पितः।

इतरानितरः कुर्य्यादितरो वर्त्तयेत् शिरः†"—इति।

क्वचित् विषयविशेषेऽशिरो दिव्यं देयमित्याह कात्यायनः,—

"पार्थिवैः शंकितानाञ्च निर्दिष्टानाञ्च दस्युभिः।

शंकाशुद्धिपराणाञ्च दिव्यं देयं शिरो विना॥

लोकापवाददुष्टानां शंकितानान्तु दस्युभिः।

तुलादीनि नियोज्यानि नो शिरस्तत्र वै भृगुः॥

न शंकासु शिरः प्रोक्तं कल्पये न कदाचन।

अशिरांसि च दिव्यानि राजकृत्येषु दापयेत्"—इति।

विषयविशेषेषु दिव्यविशेषान् व्यवस्थापयति संग्रहकारः,—

"घटादीनि विषान्तानि गुर्व्वर्थेषु दापयेत्"—इति।

पितामहः,—

"अवष्टब्धाभियुक्तानां घटादीनि विनिर्द्दिशेत्।

तण्डुलस्यैव कोशस्य शंकास्वेतौ नियोजयेत्"—इति॥

कात्यायनः,—

"शंकाविश्वाससन्धाने विभागे रिक्थिनां तथा‡।

क्रियासमूहकर्त्तृत्वे कोशमेव प्रदापयेत्"—इति।

पितामहोऽपि,—

---

* सर्व्वत्रैव,—इति स०।

† अभियोक्ता शिरःस्थाने सर्व्वत्रैव प्रकीर्त्तितः। तथा वाऽन्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः,—इति ग्रन्थान्तरीयः पाठः समीचीनः।

‡ सदा,—इति स० शा०।

"विस्रम्भे सर्वशंकासु सन्धिकार्य्ये तथैव च।
एषु कोशः प्रदातव्यो विद्वद्भिः शुद्धिहेतवे* ॥
शिरस्थोऽपि विहीनानि दिव्यादीनि विवर्जयेत
घटादीनि विषान्तानि कोशएकोऽशिरःस्थितः†"—इति।
धनतारतम्येन‡ दिव्यव्यवस्थामाह वृहस्पतिः,—
"विषं सहस्रापहृते पादोने च हुताशनः।
त्रिभागोने च सलिलं सर्वे देयो घटः सदा॥
चतुःशतेऽभियोगे तु दातव्यं तप्तमाषकम्।
त्रिशते तण्डुलं देयं कोशएकः शिरः स्मृतः॥
शते हृते निहृत्ते वा दातव्यं धनशोधनम्।
गोचोरस्य प्रदातव्यं शस्ते फालं प्रयत्नतः॥
एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता।
चतुर्गुणोत्तमानां तु कल्पनीया परीक्षकैः"--इति॥
कात्यायनोपि,--
"ज्ञात्वा संख्यां सुवर्णानां शतमाने विषं स्मृतम्।
अशीतेस्तु विनाशे वै दद्याच्चैव हुताशनम्॥
षष्ट्यानाशे विषं देयं चत्वारिंशतिके घटम्।
त्रिंशद्द्विशविनाशे वै कोशपानं विधीयते॥
पञ्चाधिकस्य वा नाशे तदर्धार्धस्य तण्डुलम्।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, शुद्धिसिद्धये,—इति पाठः प्रतिभाति।
† कोशएकः शिरः स्मृतः,—इति शा॰ स॰।
‡ पणतारतम्येन,—इति शा॰ स॰।

तदर्धार्धस्य नाशे तु देयं पुष्पादिमस्तकम् ॥
तदर्धार्धविनाशे तु लौकिकास्तु क्रियाः स्मृताः"—इति ।

विष्णुरपि। "सर्व्वेषु चार्थजातेषु मूल्यं कनकं कल्पयेत् । तत्र कृष्णलोने शूद्रं दूर्वाङ्कुरैस्तु* स्नापयेत्। द्विकृष्णलोने तिलकरं, त्रिकृष्णलोने रजतकरं, चतुःकृष्णलोने सुवर्णकरं, पञ्चकृष्णलोने सीरभ्रतं, सीरोद्धृतमहीकरम्। द्विगुणार्थे यवा विहिताः† समय-क्रिया वैश्यस्य। त्रिगुणेऽर्थे राजन्यस्य। चतुर्गुणेऽर्थे ब्राह्मणस्य"—इति। पादस्पर्शादीनां विशेषाः स्मृत्यन्तरे दर्शिताः,—

"विप्रे तु सत्यवचनं द्विनिष्के पादलम्भनम् ।
ऊनं त्रिके तु कृप्यं स्यात् कोशपानमतः परम्"—इति ॥

निष्कशब्देन काञ्चनकर्षचतुर्थांशो यो मुद्रामुद्रितः प्रतिपाद्यते। तत्रापि कृषिहेशे निष्कव्यवहारात् । शाला संख्यां सुवर्णाना-मिति यदुक्तं, तत्र सुवर्णपरिमाणमाह मनुः,—

"लोकसंव्यवहारार्थं या संख्या प्रथिता भुवि ।
ताम्ररूप्यसुवर्णानाम्नाः प्रवक्ष्याम्यशेषतः ॥
जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमन्तत् प्रमाणानां त्रसरेणुं प्रचक्षते ॥
त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ।
ताराजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥

---

* दूर्वाकरं,—इति ग्रन्थान्तरीयः पाठः समीचीनः ।

† इत्थमेव पाठः सर्व्वत्र । मम तु, यथाभिहिता,—इति पाठः प्रतिभाति ।

सर्षपाः षट् यवोमध्यस्त्रियवन्त्वेककृष्णलम् ।
पञ्च कृष्णलकोमाषस्ते सुवर्णस्तु षोडश ॥
पलं सुवर्णाश्चत्वारः पञ्चानि धरणन्दश ।
द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः ॥
ते षोडश स्याद्धरणम्पुराणश्चैव राजतः ।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥
धरणानि दश ज्ञेयः शतमानस्तु राजतः ।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः"—इति ॥

माषशब्दः सुवर्णस्य षोड़शे भागे वर्तते । कृष्णलशब्दस्तु कर्ष-तृतीयभागवाची । माषपञ्चमांशस्य कर्षत्वात् । रूप्यद्रव्यस्य नामनि कर्षवचनमस्ति* । कार्षापणशब्दौ† पलचतुर्थांशस्य तत्तद्रव्यस्य नाम-धेये । गद्यानधारणशब्दौ पलदशमांशस्य रूप्यद्रव्यस्य नामनी । कर्ष-चत्वारिंशत्तमांशस्य रूप्यद्रव्यस्य माषसंज्ञा । निष्कशतमाषशब्दे एकपले रूप्यद्रव्ये वर्तते‡ । अतएव रूप्यसंज्ञाऽधिकारे याज्ञवल्क्यश्चाह,—

"शतमानन्तु दशभिर्धरणैः पलमेव तु ।
निष्कं सुवर्णाश्चत्वारः————"इति ।

बृहस्पतिः सुवर्णशब्दस्य अर्थान्तरमाह,—

"ताम्रकर्षकृता मुद्रा विज्ञेया कर्षका पणः ।

---

* रूप्यद्रव्यस्य नामनिष्कर्षवचनमस्ति—इति स० ।

† इत्थमेव पाठः सर्व्वत्र । मम तु, पुराणकार्षापणशब्दौ,—इति पाठः प्रतिभाति ।

‡ इत्थमेव पाठः सर्व्वत्र । मम तु, निष्कशतमाषशब्दौ एकपले रूप्य-द्रव्ये वर्त्तते,—इति पाठः प्रतिभाति ।

सएव चान्द्रिका प्रोक्ता तावतस्तु धानका: ॥

तद्द्वादश सुवर्णस्तु दीनाराख्यः सएव तु"—इति ।

याज्ञवल्क्यस्तु पले विकल्पमाह,—

"पलं सुवर्णाः चत्वारः पञ्च वाऽपि प्रकीर्त्तितम्"—इति ।

राजतेऽपि कार्षापणोऽस्तीत्याह नारदः,—

"कार्षापणो दक्षिणस्यां दिशि रौप्ये प्रवर्त्तते"—इति ।

व्यासस्तु सौवर्णनिष्कस्य प्रमाणमाह,—

"पलान्यष्टौ सुवर्णं स्युस्ते सुवर्णाश्चतुर्दश ।

एतत् निष्कप्रमाणन्तु व्यासेन परिकीर्त्तितम्"—इति ।

तत्र मनूक्तप्रमाणात् प्रमाणान्तरमाषादि दिव्यदण्डव्यतिरिक्त-विषये देशव्यवहाराविरोधेन ग्राह्यम् । तथा च बृहस्पतिः,—

"संख्या रश्मिरजोमूला* मनुना समुदाहृता ।

कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा ॥

कार्षापणसहस्रन्तु दण्ड उत्तमसाहसः ।

तदर्द्धो मध्यमः प्रोक्तः तदर्द्धमधमः स्मृतः"—इति ॥

जातिभेदेन दिव्यव्यवस्थामाह नारदः,—

"ब्राह्मणस्य धटो देयः क्षत्रियस्य हुताशनः ।

वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥

साधारणः समस्तानां कोशः प्रोक्तो मनीषिभिः"—इति ॥

अनित्या चेयं व्यवस्था ।

---

* इत्थमेव पाठः सर्व्वत्र । मम तु, संख्या रश्मिरजोमूर्या,—इति पाठः प्रतिभाति ।

"सर्वेषु सर्वदिव्यं वा विषवर्जं द्विजोत्तमः"—इति कात्यायनस्मरणात्। व्यवस्थापक्षे वयोविशेषादिना व्यवस्थापनीयम्। तदाह नारदः,—

"क्लीवानुन्मत्तवधिरान् पतितांश्चार्दितान्नरान्।
बालवृद्धस्त्रिय एषां* परीक्षेत धटे सदा॥
न स्त्रीणान्तु विषं प्रोक्तं न चापि सलिलं स्मृतम्।
धटकोशादिभिस्तासामतस्तासां विचारयेत्॥
न मज्जनीयाः स्त्रीबाला धर्मशास्त्रविचक्षणैः।
रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्भगाः॥
सहसाऽप्यागतानेतान्नैव तोये निमज्जयेत्।
न चापि हारयेदग्निं न विशेषं† विशोधयेत्"—इति।

कात्यायनः,—

"न लोहशिल्पिनामग्निं सलिलं नाम्बुसेविनाम्।
मन्त्रयोगविदाञ्चैव विषं दद्याच्च न क्वचित्॥
तण्डुले न नियुञ्जीत व्रतिनां मुखरोगिणाम्"—इति।

पितामहोऽपि,—

"कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम्।
पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्जयेत्॥
मद्यार्थं स्त्रीव्यसनिनां कितवानां तथैव च।

---

* बालवृद्धस्त्रियो येषां,—इति का०।

† इत्यमेव पाठः सर्व्वत्र। मम तु, न विषेण,—इति पाठः प्रतिभाति।

कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः"—इति ॥

कात्यायनोऽपि,—

"मातापितादिजगुरुवृद्धस्त्रीबालघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः ।
लिङ्गिनां प्रबलानान्तु मन्त्रयोगक्रियाविदाम् ।
वर्णसङ्करजातीनां पापाभ्याससप्रवर्त्तिनाम् ॥
एतेष्वेवाभियोगेषु निन्द्येष्वेव तु यत्नतः ।
एतैरेव नियुक्तानां साधूनां दिव्यमर्हति ॥
न सन्ति साधवो यत्र तत्र शोध्याः स्वकैर्नरैः"—इति ।

यदपि पितामहेनोक्तम्,—

"सव्रतानां कृशाङ्गानां बालवृद्धतपस्विनाम् ।
स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्मस्त्ववेक्ष्यते"—इति ॥

तदल्पाभियोगविषयम् । यत्तु कात्यायनेनोक्तम्,—

"धनदारापहाराणां* स्तेयानां पापकारिणाम् ।
प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि संशयेषु न निर्दिशेत्"—इति ॥

तत्तैर्नियुक्तपुरुषालाभविषयम् । हारीतः वर्णविषयो† विशेषमाह,—

"राजन्येऽग्निं घटं विप्रे वैश्ये तोयं नियोजयेत् ।

---

* अस्पृश्यधनदाराणां,—इति का० ।

† इत्थमेव पाठः सर्व्वत्र । मम तु, वर्णविशेषे,—इति प्रतिभाति ।

न विषं ब्राह्मणे दद्यात् विषं वर्णान्तरे स्मृतम्।
कोशतण्डुलधर्मस्तु धर्मसम्भवमेव च॥
पुत्रदारादिशपथान् सर्ववर्णे प्रयोजयेत्"—इति॥

दिव्यानां कालविशेषमाह पितामहः,—

"चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च।
एते साधारणा मासा दिव्यानामविरोधिनः॥
धटः सार्वत्रिकः प्रोक्तो वाते वाति विवर्जयेत्।
तथा शिशिरहेमन्ते वर्षास्वपि च दापयेत्।
ग्रीष्मे सलिलमित्युक्तं हिमकाले तु वर्जयेत्"—इति॥

नारदोऽपि,—

"अग्निः शिशिरहेमन्ते वर्षासु परिकीर्त्तितः।
शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम्॥
न शीते कोशशिद्धिः स्यात् नोष्णकालेऽग्निशोधनम्।
न प्रावृषि विषं दद्यात् प्रवाते न तुलां नृप"—इति॥

विष्णुरपि। "स्त्रीब्राह्मणविकलासमर्थरोगिणां तुला देया। सा च न वाति वायौ न नास्तिकस्य। असद्धर्मलोहकारिणामग्निर्देयः। न शरद्ग्रीष्मयोश्च। न कुष्ठिपैत्तिकब्राह्मणानां विषं देयम्। प्रावृषि न। श्लेष्मव्याध्यर्दितानां भीरूणां श्वासकाशिनामम्बुजीविनां न चोदकम्। हेमन्तशिशिरयोश्च न। नास्तिकेभ्यः कोशो न देयः। कुष्ठव्याधिमारकोपद्रुष्टेषु"—इति। पितामहोऽपि,—

"पूर्वाह्णेऽग्निपरीक्षा स्यात् पूर्वाह्णे च धटो भवेत्।
मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता॥

दिवसस्य तु पूर्वाह्णे कोषशुद्धिर्विधीयते।
रात्रौ तु पश्चिमे यामे विषं देयं सुशीतलम्"--इति॥

दिव्यदेशानाह,—

"प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे धटः सदा।
इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे"—इति॥

इन्द्रस्थानं प्रख्यातदेवतायतनोपलक्षणम्। अतएव नारदः,—

"सभाराजकुलद्वारे देवायतनचत्वरे"—इति।

अधिकारिविशेषेण देशविशेषान् व्यवस्थापयति कात्यायनः,—

"दण्डस्थानेऽभिशस्तानां महापातकिनां नृणाम्।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे।
अतोऽन्येषु तु कार्य्येषु सभामध्ये विदुर्बुधाः"—इति।

दिव्यदेशावचनादरे दिव्यस्य प्रामाण्यहानिरित्याह नारदः,—

"अदेशकालदत्तानि बहिर्वासकृतानि च।
व्यभिचारं सदाऽर्थेषु कुर्वन्तीह न संशयः"—इति॥

वासो जननिवासः। तस्माद्बहिर्निर्जनप्रदेशइति यावत्। तथा च पितामहः,—

"दिव्येषु सर्वकार्य्याणि प्राड्विवाकः समाचरेत्।
अध्वरेषु यथाऽध्वर्य्युः सोपवासोनृपाज्ञया॥
तत आवाहयेद्देवान् विधिनाऽनेन धर्मवित्।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततोवदेत्॥
एह्येहि भगवन् धर्म अस्मिन् दिव्ये समाविश।

सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आवाह्य तु घटे धर्मं पश्चादङ्गानि विन्यसेत्"।

घटग्रहणं सर्वद्रव्योपलक्षणार्थम्। एषां धर्मादीनां सर्वद्रव्यसाधारणत्वात्। अङ्गविन्यासप्रकारस्तेनैव दर्शितः,—

"इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा।
वरुणं पश्चिमे भागे कुबेरञ्चोत्तरे तथा ॥
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत्।
इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ॥
कुबेरस्तु सुवर्णाभस्त्वग्निश्चार्य्यसुवर्णभाः।
तथैव निर्ऋतिः श्यामो वायुस्ताम्रः प्रशस्यते ॥
ईशानस्तु भवेद्रक्तः एवं ध्यायेत् क्रमादिमान्।
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ॥
धर्मो* ध्रुवस्तथा व्योम आपश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥
देवेशेशानयोर्मध्ये आदित्यानां यथाक्रमम्।
धाताऽर्य्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ॥
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः।
ततस्त्वष्टा ततो विष्णुरजघो यो जघन्यजः ॥
इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः।
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ॥
वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः।

* धरो,—इति का०।

अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः॥
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः।
स्थाणुर्भवश्च* भगवान् रुद्राश्चैकादश स्मृताः॥
प्रेतेश्वररक्षोमध्ये च मातृस्थानं प्रकल्पयेत्।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥
वाराही च महेन्द्राणी† चामुण्डा गणसंयुता।
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः॥
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते।
गगनः स्पर्शनो वायुरनिलो मारुतस्तथा॥
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः।
धटस्योत्तरभागे‡ तु दुर्गामावाहयेद्बुधः॥
एतासां देवतानां च स्वनाम्ना पूजनं विदुः।
भूषाऽवसानं धर्माय दत्वा चार्घ्यादिकं§ क्रमात्॥
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत्।
गन्धादिकां निवेद्यान्तां परिचर्य्यां प्रकल्पयेत्॥
चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः।

---

* स्थाणुर्भगश्च—इति का०।

† तथेन्द्राणी,—इति का० स०।

‡ धर्म्मस्योत्तरभागे,—इति का०।

§ इत्थमेव पाठः सर्व्वत्र। मम तु, दत्त्वा चार्घ्यादिकं,—इति पाठः प्रतिभाति।

आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥

सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत्”—इति ॥

प्रणवादिकां गायत्रीमुच्चार्य्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य्य समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयात् ।

“अनुक्तसंख्या यत्र स्यात् शतमष्टोत्तरं स्मृतम्”—इति ।

एतत् सर्वमुपवासादिपूर्वकं कर्तव्यम् । तदाह नारदः,—

“अहोरात्रोषितः स्नात्वा आर्द्रवासा स मानवः ।

पूर्वाह्ने सर्वदिव्यानां प्रदानमनुकीर्तितम्”—इति ॥

याज्ञवल्क्योऽपि,—

“सचेलस्नातमाहूय सूर्योदयउपोषितम् ।

कारयेत् सर्वदिव्यानि देवब्राह्मणसन्निधौ”—इति ॥

पितामहोऽपि,—

“त्रिरात्रोपषितायैव एकरात्रोषिताय च ।

नित्यं देयानि दिव्यानि शुचये सार्द्रवाससे”—इति ॥

अयञ्चोपवासविकल्पोबलवदबलवद्विषयतया द्रष्टव्यः। होमानन्तरं पितामहः,—

“यच्चार्थमभियुक्तः* स्यात् लिखितं तन्तु पत्रके ।

मन्त्रेणानेन सहितं तत्कार्य्यञ्च शिरोगतम्”—इति ॥

मन्त्रश्च,—

* इत्थमेव पाठः सर्व्वत्र । यदर्थमभियुक्तः,—इति तु पाठः समीचीनः प्रतिभाति ।

"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापोहृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम्" ॥

अयञ्च विधिः सर्वदिव्यसाधारणः ।

"इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्"—इति पितामहस्मरणात् । प्रयोगावसाने दक्षिणां दद्यात् । तथा च सएव,—

"ऋत्विक्पुरोहिताचार्य्यान् दक्षिणाभिश्च तोषयेत्"—इति ।

इति दिव्यमातृका ।

अथ धटविधिः ।

तत्र पितामहः,—

"प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे धटः सदा ।
इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे"—इति ।

नारदोऽपि,—

"सभाराजगृहद्वारसुरायतनचत्वरे"—इति ।

पितामहः,—

"विशालामुच्छ्रितां शुभ्रां धटशालान्तु कारयेत् ।
यत्रस्थो नोपहन्येत श्वभिश्चण्डालवायसैः ॥
कवाटवीजसंयुक्तां परिचारकरक्षिताम् ।
पानीयादिसमायुक्तामशून्यां कारयेन्नृपः"—इति ॥

धटनिर्माणप्रकारमाह पितामहः,—

"चतुर्हस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ ।
अन्तरन्तु तयोर्हस्तौ न चेद्ध्यर्द्धमेवच ॥
छित्वा तु याज्ञिकं वृक्षं चेतुवन्मन्त्रपूर्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः"—इति ॥

नारदः,—

"खादिरीं कारयेत् तत्र निर्व्रणां शुक्लवर्जिताम् ।
शिंशपान्तदभावे तु शालं वा कोटरैर्विना ॥
अर्ज्जुनस्तिलकोऽशोकः शमीयो रक्तचन्दनः ।
एवंविधानि काष्ठानि धटार्थे परिकल्पयेत् ॥
जम्बी धटतुला कार्य्या खादिरी तैन्दुकी तथा ।
चतुरस्त्रस्त्रिभिः स्थानैर्धटः कर्कटकादिभिः"—इति ॥

पितामहः,—

"कर्कटानि च देयानि त्रिषु स्थानेषु यत्नतः ।
हस्तद्वयं शिखेयन्तु पादयोरुभयोरपि"—इति ॥

व्यासः,—

"हस्तद्वयं निखेयन्तु प्रोक्तं मुण्डकयोस्तयोः ।
षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः"—इति ॥

पितामहोऽपि,—

"तोरणे तु तयोः कार्य्ये पार्श्वयोरुभयोरपि ।
धटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ॥
अवलम्बौ तु कर्त्तव्यौ तोरणाभ्यामधोमुखौ ।

मृण्मयौ सूत्रसम्बद्धौ धटमस्तकचुम्बिनौ"--इति ॥

नारदः,--

"शिक्यद्वयं समासाद्य पार्श्वयोरुभयोरपि।

एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥

धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलाम्।

पीठकं पुरतस्तस्मिन्निष्टकां* पांशुलोष्टकम्"--इति ॥

पितामहः,—

"एकस्मिन् रोपयेन्मर्त्यमन्यस्मिन् मृत्तिकां शुभाम्।

इष्टकाभस्मपाषाणकपालास्थिविवर्जिते"—इति ॥

अत्र मृत्तिकेष्टकाग्रावपांशूनां विकल्पः। समतानिरीक्षणार्थं राज्ञा तद्विदो नियोक्तव्याः। तथाच पितामहः,—

"परीक्षका नियोक्तव्यास्तुलामानविशारदाः।

वणिजो हेमकाराश्च कांस्यकारास्तथैवच ॥

कार्य्यं परीक्षकैर्नित्यमवलम्बसमो धटः।

उदकञ्च प्रदातव्यं धटस्योपरि पण्डितैः ॥

यस्मिन्न स्रवते तोयं स विज्ञेयः समो धटः।

तोलयित्वा नरं पूर्वं पश्चात्तमवतारयेत् ॥

धटन्तु कारयेत् नित्यं पताकाध्वजशोभितम्।

तत आवाहयेत् देवान् विधानेन च मन्त्रवित् ॥

वाद्येन तूर्यघोषेण गन्धमाल्यानुलेपनैः"—इति।

अत्र विशेषमाह नारदः,—

* पिटकं पूरयेत्तस्मिन्निष्टकां,—इति का०।

"रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः ।
अर्चयेत्तु घटं पूर्वं ततः शिष्टांस्तु पूजयेत्"—इति ॥

इन्द्रादीनित्यर्थः । ततः प्राड्विवाकस्तुलामामन्त्रयेत् । तदाह पितामहः,—

"घटमामन्त्रयेच्चैवं विधिनाऽनेन शास्त्रवित् ।
त्वं घट, ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ॥
धकारात् धर्ममूर्त्तिस्त्वं टकारात् कुटिलं नरम् ।
धृतो भावयसे यस्मात् घटस्तेनाभिधीयते*"—इति ॥

शास्त्रवित् प्राड्विवाकः ।

"त्वमेव घट, जानीषे न विदुर्यानि मानवाः ।
व्यवहारेऽभिशस्तोऽयं मानुषस्तोल्यते त्वयि ।
तदेनं संशयं तस्मात् धर्मतस्त्रातुमर्हसि"—इति ॥

ततः संशोध्यां† तुलामामन्त्रयेत् । तदाह याज्ञवल्क्यः,—

"तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः ॥
त्वं तुले, सत्यधामासि‡ पुरा देवैर्विनिर्मिता ।

---

* इत्थमेव पाठः सर्व्वत्र । ममतु, घटस्तेनाभिधीयसे,—इति पाठः प्रतिभाति ।

† सशोध्य,—इति स० । शोध्य,—इति का० । ममतु, शोध्यः,—इति वा, स शोध्यः,—इति वा पाठः प्रतिभाति ।

‡ सन्निधौ मासि,—इति शा० स० ।

तत् सत्यं वद कल्याणि, संशयान्मां विमोचय॥
यद्यस्मि पापकृन्मातस्ततोमां त्वमधो नय।
शुद्धिश्चेद्गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेत्"—इति॥

ततः प्राड्विवाकस्तुलाधारकं शपथैर्नियम्य शोध्यं पुनरारोपयेत्।
तथा च नारदः,—

"समयं परिग्टह्याथ पुनरारोपयेत् नरम्।
निहिते दृष्टिरहिते शिरस्यारोप्य पत्रकम्—इति।

समयाः शपथाः। ते च विष्णुना दर्शिताः,—

"ब्रह्मघ्नानां कृता लोकाः* ये लोकाः कूटसाक्षिणाम्।
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा"--इति॥

पुनरारोपणानन्तरं नारदः,—

"त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च।
त्वमेव देव, जानीषे न विदुर्यानि मानवाः॥
व्यवहाराभिशस्तोऽयं मानुषं तोल्यते त्वया।
तदेवं संशयं रूढं धर्मतस्त्रातुमर्हसि॥
देवासुरमनुष्याणां सत्ये त्वमतिरिच्यते†।
सत्यसन्धोऽसि भगवन्, शुभाशुभविभावतः‡॥

---

* इत्यमेव पाठः सर्व्वत्र। मम तु, ब्रह्मघ्नोये स्मृतालोकाः,—इति पाठः प्रतिभाति।

† इत्यमेव पाठः सर्व्वत्र। मम तु, त्वमतिरिच्यसे,—इति पाठः प्रतिभाति।

‡ इत्यमेव पाठः सर्व्वत्र। मम तु, विभावितः,—इति पाठः प्रतिभाति।

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापोहृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम्"--इति।

तदनन्तरं पितामहः,—

"ज्योतिर्विद्ब्राह्मणश्रेष्ठः कुर्य्यात्कालपरीक्षणम्।
विनाड्यः पञ्च विज्ञेयाः परीक्षा कालकोविदैः॥
साक्षिणो ब्राह्मणश्रेष्ठाः यथादृष्टार्थवादिनः।
ज्ञानिनः शुचयोऽलुब्धाः नियोक्तव्या नृपेण तु॥
तेषां वचनतो गम्यः शुद्धयुक्तिविनिर्णयः*"—इति॥

आरोपितश्च विनाडीपञ्चकं यावत्तावत्तथैवा† स्थापयेत्। दशगु-र्वक्षरोच्चारणकालः प्राणः, षट्प्राणा विनाड़िका। उक्तञ्च,—

"दशगुर्वक्षरः प्राणः षट्प्राणाः स्याद्विनाड़िका"—इति।

शुध्यशुद्धिनिर्णयकारणमाह नारदः,—

"तुलितो यदि वर्धेत विशुद्धः स्यान्न संशयः।
समोवा हीयमानो वा न विशुद्धो भवेन्नरः—इति॥

व्यासः,—

"अधोगतो न वै शुद्धोच्छुद्धोदूर्ध्वंगतस्तथा।

---

* इत्यमेव पाठः सर्व्वत्र। मम तु, शुद्ध्यशुद्धिविनिर्णयः,—इति पाठः प्रतिभाति:

† यावत्तथैव,—इति का०।

समोऽपि न विशुद्धः स्यादेषा शुद्धिरुदाहृता ॥
शिरश्छेदेऽक्षभङ्गे च भूयस्तारोपयेन्नरम् ।
एवं निःसंशयज्ञानात्ततो भवति निर्णयः" ॥

शुद्धेस्तु संशयो नारदेन प्रपञ्चितः,—
"तुलाशिरोभ्यामुद्भ्रान्तं विषमं न्यस्तलक्षणम् ॥
यदा वा सुप्रणुन्ना वा चलेत्पूर्वमधोऽपिवा ।
निर्मुक्तः सहसा वाऽपि तदा नैकतरं वदेत्"—इति ॥

अयमर्थः । यदा तुलाग्रभागौ तिर्यक् चलितौ, यदा वा समताज्ञानार्थं न्यस्तमुदकादि चलितं, यदा च वायुना प्रेरिता तुला ऊर्द्धमधश्च कम्पते, यदा च तुलाधारकेण हठात् प्रमुच्यते, तदा जयं पराजयं वा न विनिश्चेतुं शक्नुयादिति। राज्ञः कर्त्तव्यमाह पितामहः,—

"सद्भिः परिवृतो राजा शुद्धं रूढं प्रपूजयेत् ।
ऋत्विक्पुरोहिताचार्य्यान् दक्षिणाभिश्च तोषयेत् ॥
एवं कारयिता राजा भुक्त्वा भोगान् मनोरमान् ।
महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते ॥

इति धटविधिः ।

अथाग्निविधिः ।

"अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितम् ।
कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा ॥
आग्नेयं मण्डलं चाद्यं द्वितीयं वारुणं तथा ।

तृतीयं वायुदैवत्यं चतुर्थं यमदैवतम् ॥
पञ्चमं लिङ्गदैवत्यं षष्ठं कौबेरमुच्यते" ।
सप्तमं सोमदैवत्यमष्टमं सर्वदैवतम् ॥
पुरस्तान्नवमं यत्तु तन्मरुद्दैवतं विदुः ।
गोमयेन कृतानि स्युरद्भिः पर्य्युक्षितानि च ॥
द्वात्रिंशदङ्गुलान्याहुर्मण्डलान्मण्डलान्तरम्(१) ।
अष्टभिर्मण्डलैरेवमङ्गुलानां शतद्वयम् ॥
षट्पञ्चाशत्समधिकं भूमेस्तु परिकल्पना ।
मण्डले मण्डले देयाः कुशाः शास्त्रप्रचोदिताः"—इति ।

तत्र, नवमं मण्डलं परिमिताङ्गुलप्रमाणकं, तद्विहाय अष्टभिर्मण्डलैरष्टभिश्चान्तरालैः प्रत्येकं षोडशाङ्गुलप्रमाणकैरङ्गुलानां षट्पञ्चाशदधिकशतद्वयं सम्पद्यते । अङ्गुलप्रमाणञ्च स्मृत्यन्तरेऽभिहितम्,—

"तिर्य्यग्यवोदराण्यष्टौ ऊर्द्धा वा व्रीहयस्त्रयः ।
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुला"—इति ।

अत्र च, गन्यानि सप्तैव मण्डलानि । "स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत्"—इति याज्ञवल्क्यस्मरणात् । नारदोऽपि,—

"हस्ताभ्यां तं समादाय प्राड्विवाकसमीरितः ।

---

(१) अत्र, मण्डलपरिमाणं षोडशाङ्गुलं मण्डलयोरन्तरपरिमाणमपि तावदेव । तथाच प्रथममण्डलमवधीकृत्य द्वितीयमण्डलपर्य्यन्तं द्वात्रिंशदङ्गुलपरिमाणं सम्पद्यते इति बोध्यम् ।

स्थितैकस्मिन् यतोऽन्यानि* अजेत्सप्त तथाङ्गुलः॥
असंभ्रान्तः शनैर्गच्छेद्दग्धुः सोऽष्टमं प्रति।
न पातयेत्तामप्राप्य या भूमिः परिकल्पिता॥
न मण्डलमतिक्रामेन्नार्वागर्पयेत्पदम्।
मण्डलञ्चाष्टमं गत्वा ततोऽग्निं विसृजेन्नरः"—इति।

अग्निविसर्गस्तु नवमे मण्डले कार्य्यः। तदाह पितामहः,—

"अष्टमं मण्डलं गत्वा नवमे निक्षिपेत्ततः†"—इति।

अथ पिण्डपरिमाणमाह पितामहः,—

"अशमं तं समं कृत्वा पञ्चाशत्पलिकं समम्।
पिण्डन्तु तापयेदग्नावष्टाङ्गुलमयोमयम्"—इति।

प्रथममण्डलाद्दक्षिणतोऽग्निं प्रतिष्ठाप्याग्नये पवमानायेति मन्त्रेणाष्टोत्तरशतवारं प्राड्विवाको जुहुयात्। "अग्नौ घृतमष्टोत्तरं शतम्"—इति स्मरणात्। तस्मिन्नग्नावयःपिण्डं लोहकारेण तापयेत्। तदाह नारदः,—

"जात्यैव लोहकारो यः कुशलश्चाग्निकर्मणि।
दृष्टप्रयोगश्चान्यच तेनायोऽग्नौ तु दापयेत्॥
अग्निवर्णमयःपिण्डं सस्फुलिङ्गं सुरञ्जितम्।
पञ्चाशत्पलिकं भूयः कारयित्वा शुचिर्द्विजैः॥

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, ततोऽन्यानि,—इति पाठः प्रतिभाति।

† निक्षिपेद्बुधः,—इति का०।

तृतीयतापे तापनं ब्रूयात्सत्यपुरस्कृतम्"—इति।

लोहशुद्ध्यर्थमुचितजले* निक्षिप्य पुनः सन्ताप्योदके निक्षिप्य पुनः सन्तापनं तृतीयस्तापः। तस्मिन् तापे वर्त्तमाने धर्मावाहनादिमन-मण्डपं पूर्व्वोक्तविधिं विधाय पिण्डस्थमग्निमेभिर्मन्त्रैरभिमन्त्रयेत्। मन्त्राश्च नारदेन दर्शिताः,—

"त्वमग्ने, वेदाश्चत्वारः त्वञ्च यज्ञेषु हूयसे।
त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम्॥
जठरस्थो हि भूतानां यथा वेत्सि शुभाशुभम्।
पापं पुनासि वै यस्मात् तस्मात्पावक उच्यसे॥
पापेषु दर्शयात्मानमर्चिष्मान् भव पावक।
अथवा शुद्धभावेषु शीतो भव हुताशन॥
त्वमग्ने, सर्व्वभूतानामन्तश्चरसि साक्षिवत्।
त्वमेव देव, जानीषे न विदुर्यानि मानुषाः॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि"—इति।

तत्रादावेव ब्रीहिविमर्दनेन शोध्यस्य करौ लक्षयेत्। तदाह विष्णुः। "करौ विमृदितौ ब्रीहिभिस्तस्यादावेव लक्षयेत्"—इति।

लक्षयेदित्यस्यार्थो नारदेन विवृतः,—

"लक्षयेत्तस्य चिह्नानि हस्तयोरुभयोरपि।
प्राकृतानीव गूढानि सव्रणान्यव्रणानि च॥

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, लोहमुद्धृत्योचितजले,—इति पाठः प्रतिभाति।

हस्तक्षतेषु सर्वेषु कुर्य्याद्धंसपदानि तु"।

अग्निधारणतः पूर्वमेतद्विधानार्थं तस्य शोध्यस्य करद्वयस्थितस्य व्रणादिस्थानेषु *अलक्तकादिरसेन हंसपदानि कुर्य्यादित्यर्थः। ततः कर्त्तव्यमाह याज्ञवल्क्यः,—

"करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत्।

सप्ताश्वत्थस्य पर्णानि तावत् सूत्रेण वेष्टयेत्"—इति।

पर्णानि च समानि,—

"पत्रैरञ्जलिमापूर्य्य अश्वत्थैः सप्तभिः समैः"—इति

स्मरणात्। वेष्टनसूत्राणि च सितानि कर्त्तव्यानि।

"वेष्टयेत सितैर्हस्तौ सप्तभिः सूत्रतन्तुभिः"—इति

नारदस्मरणात्। तथा, सप्त शमीपत्राणि सप्तैव दूर्वापत्राणि दध्यक्तांश्चाक्षतानपि अश्वत्थपत्राणामुपरि विन्यसेत्। तदुक्तं स्मृत्यन्तरे,—

"सप्त पिप्पलपत्राणि अक्षतान् सुमनोदधि।

हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा"—इति।

यत्तु स्मृत्यन्तरम्,—

"अयस्तप्तन्तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः।

अन्तर्हितं हरन् शुद्धस्त्वदग्धः सप्तमे पदे"—इति।

तदश्वत्थपत्राभावविषयम्। यतोऽश्वत्थपत्राणां मुख्यत्वमाह पितामहः,—

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, करद्वयस्थितेषु व्रणादिस्थानेषु,—इति पाठः प्रतिभाति।

"पिप्पलाज्जायते वह्निः पिप्पलो वृक्षराट् स्मृतः ।
अतस्तस्य तु पत्राणि हस्तयोर्निक्षिपेत् बुधः"—इति ।

तदनन्तरं कर्त्तव्यमाह सएव,—

"ततस्तं समुपादाय राजा धर्मपरायणः ।
सन्दंशेन नियुक्तोऽथ हस्तयोस्तत्र निक्षिपेत् ॥
त्वरमाणो न गच्छेत स्वस्थो गच्छेच्छनैः शनैः ।
न मण्डलमतिक्रामेन्नान्तरा स्थापयेत् पदम् ॥
अष्टमं मण्डलं गत्वा नवमे स्थापयेत् बुधः ।
भयार्त्तः पातयेद्यस्तु अशक्तश्च न विभाव्यते ॥
पुनरारोपयेत्तोहं स्थितिरेषा दृढीकृता"—इति ।

यदा दग्धसन्देहः तदा आह नारदः,—

"यदा तु न विभाव्येते दग्धाविति करौ तदा ।
व्रीहीनतिप्रयत्नेन सप्तवारांस्तु मर्दयेत् ।
मर्दितो यदि नो दग्धः सर्व्वैरेव विनिश्चितः ।
गोप्यः शुद्धस्तु तज्ज्ञत्वे दग्धोदण्ड्यो यथाक्रमम् ॥
पूर्वदृष्टेषु चिह्नेषु ततोऽन्यत्रापि लक्षयेत् ।
मण्डलं रक्तसङ्काशं यत्र स्यादाऽग्निसम्भवम् ॥
यो निरुद्धः स विज्ञेयः सत्यधर्मव्यवस्थितः"—इति ।

यत्तु* त्रासात् प्रस्खालेन हस्ताभ्यामन्यत्र दह्येत, तथाप्यशुद्धो-न भवति । तदाह कात्यायनः,—

* यत्तु,—इति का० स० । मम तु, यदि तु,—इति पाठः प्रतिभाति ।

"प्रज्वालेनाभिशस्तस्येत् स्थानादन्यत्र दृश्यते।
अदग्धन्तं विदुर्देवाः तस्य भूयो न योजयेत्"—इति।

शुद्धिकालावधिमाह पितामहः,—

"ततस्तद्धस्तयोः प्राश्येद्‌गृहीलाऽन्यैर्यवैर्यवान्।
निर्विशङ्केन तेषां तु हस्ताभ्यां मर्दने कृते॥
निर्विकारे दिनस्यान्ते शुद्धिं तस्य विनिर्दिशेत्"—इति।

इत्यग्निविधिः।

अथ जलविधिः।

तत्र पितामहः,—

"तोयस्यातः प्रवक्ष्यामि विधिं धर्मं सनातनम्।
मण्डलं धूपदीपाभ्यां पूजयेत् तद्विचक्षणः॥
शरान् संपूजयेत् भक्त्या वैणवञ्च धनुस्तथा।
मङ्गलैः पुष्पधूपैश्च ततः कर्म समाचरेत्"—इति।

धनुषः प्रमाणमाह नारदः,—

"क्रूरं धनुः सप्तशतं मध्यमं षट्‌शतं स्मृतम्।
मन्दं पञ्चशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः॥
मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयम्।
हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥
न्यूनाधिके तु दोषः स्यात् क्षिपतः सायकांस्तथा"—इति॥

अत्राङ्गुलिसञ्ज्ञा विवक्षिता। शरा अनायसाग्राः कर्त्तव्याः।

"शरैरनायसाग्रैश्च प्रकुर्वीत विशुद्धये।

धनुषस्ताञ्छरांश्चैव सुदृढानि विनिक्षिपेत्”—इति

स्मरणात्। क्षेप्ता चात्र क्षत्रियः, तद्वृत्तिर्ब्राह्मणो वा। तदाह पितामहः,—

“क्षेप्ता च क्षत्रियः कार्य्यस्तद्वृत्तिर्ब्राह्मणोऽपि वा।
अक्रूरहृदयः शान्तः सोपवासः क्षिपेत् शरान्॥
शरस्य पतनं ग्राह्यं सर्पणन्तु विवर्जयेत्।
सर्पन् सर्पङ्करो यायाद्दूराद्दूरतरं यतः॥
इषूंश्च प्रक्षिपेद्विद्वान् मारुते वाति वा भृशम्।
विषमे वा प्रदेशे च वृक्षस्थाणुसमाकुले॥
तरुगुल्मलतावल्लिपङ्कपाषाणसंयुते”—इति॥

तोरणं च मज्जनसमीपस्थाने समे शोध्यकर्णप्रमाणोच्छ्रितं कार्यम्। तदाह नारदः,—

“गत्वा तु सजलं स्थानं* तटे तोरणमुच्छ्रितम्।
कुर्वीत कर्णमात्रन्तु भूमिभागसमे शुचौ”—इति॥

उपादेयानुपादेयजले विविनक्ति पितामहः,—

“स्थिरवारिणि मज्जेत न ग्राहिणि न चाल्पके।
तृणशैवालरहिते जलौकामत्स्यवर्जिते॥
देवखातेषु यत्तोयं तस्मिन् कुर्य्याद्विशोधनम्।
आहार्य्यं वर्जयेत्तोयं शीघ्रगासु नदीषु च॥
आविशेदमले नित्यमूर्म्मिपङ्कविवर्जिते।
स्नापयेत् प्रथमं तोये शालं च पुरुषं नृपः॥

* तज्जलस्थानं,—इति का०।

आगतं प्राङ्मुखं कृत्वा तोयमध्ये च कारिणम्।
ततस्त्वावाहयेद्देवान् सलिलं चानुमन्त्रयेत्"—इति॥

तत्र चादौ वरुणपूजा कर्त्तव्या। तदाह नारदः,—

"गन्धमाल्यैः सुरभिभिर्मधुरैश्च घृतादिभिः।
वरुणाय प्रकुर्वीत पूजामादौ समाहितः"—इति॥

एवं वरुणपूजां कृत्वा धर्मावाहनादिसकलदेवतापूजां होमं समन्त्रकं प्रतिज्ञापत्रशिरोनिवेशनान्तं च कृत्वा प्राड्विवाको जलाभिमन्त्रणं कुर्य्यात्। मन्त्रश्च विष्णुना दर्शितः,—

"त्वमन्तः सर्वभूतानामन्तश्चरसि साक्षिवत्।
त्वमेषां भो विजानीषे न विदुर्यानि मानवाः॥
व्यवहाराभिशस्तोऽयं मानुषस्त्वयि मज्जति।
तदेनं संशयात्तस्मात् धर्मतस्त्रातुमर्हसि"—इति॥

पितामहेनापि,—

"तोय, त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्।
शुद्धेस्त्वं कारणं प्रोक्तं द्रव्याणां देहिनां तथा॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे"—इति॥

शोध्यस्येतिकर्त्तव्यतामाह याज्ञवल्क्यः,—

"सत्येन माऽभिरक्ष त्वं वरुणेत्यभिशाप्य तम्।
नाभिदघ्नोदकस्थस्य गृहीत्वोरूजलं विशेत्"—इति॥

तदनन्तरकर्त्तव्यमाह सएव,—

"समकालमिषुं मुक्तमानीयान्यो जवी नरः।
गते तस्मिन् निमग्नाङ्गं पश्येच्चेच्छुद्धिरात्मनः"—इति॥

अयमर्थः। त्रिषु शरेषु मुक्तेष्वेको वेगवान् मध्यशरपातस्थानङ्गत्वा तमादाय तत्रैव तिष्ठति। अन्यस्तु पुरुषो वेगवान् शरमोचनस्थाने तोरणमूले तिष्ठति। एवं स्थितयोस्तृतीयस्यां करतालिकायां शोध्यो निमज्जति। तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं मध्यशरपातस्थानङ्गच्छति। शरग्राही च तस्मिन् प्राप्ते तदुत्तरं तोरणमूलं प्राप्यान्तर्जलगतं यदि न पश्यति, तदा शुद्धो भवतीति। तदेव स्पष्टीकृतं पितामहेन,—

"गन्तुश्चापि च कर्त्तुश्च समंगमनमज्जनम्।
गच्छेत्तोरणमूलात्तु लक्ष्यस्थानं जवी नरः॥
तस्मिन्गते द्वितीयोऽपि वेगादादाय सायकम्।
गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्जलगतं सम्यक् तदा शुद्धिं विनिर्दिशेत्"—इति॥

जविनोश्च नरयोर्निर्द्धारणं कृतं नारदेन,—

"पञ्चाशतो धावकानां यौ स्यातामधिकौ जवे।
तौ च तत्र नियोक्तव्यौ शरानयनकारणात्"—इति॥

निमग्नस्य स्थानान्तरगमने अशुद्धिमाह पितामहः,—

"अन्यस्थानविशुद्धिः* स्यादेकाङ्गस्यापि दर्शनात्।
स्थानादन्यत्र गमनाद्यस्मिन् पूर्वं निवेशितः"—इति॥

एकाङ्गदर्शनादिति कर्णाद्यभिप्रायेण,

---

* इत्थमेव पाठः सर्व्वत्र। ममतु, अन्यस्थो न वि द्धः,—इति पाठः प्रतिभाति।

"शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिका।
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्"—इति

विशेषस्मरणात्। कारणान्तरेणोन्मज्जने पुनरपि कर्त्तव्यम्।
तदाह कात्यायनः,—

"निमज्ज्योत्प्लवते यस्तु दृष्टश्चेत् प्राणिभिर्नरः।
पुनस्तत्र निमज्जेत्स दंशचिह्नविभावितः*"—इति॥

इति जलविधिः।

अथ विषविधिः।

तत्र प्रजापतिः। विषस्यापि प्रवच्यामीति। विषं च वत्सना-
भादि ग्राह्यम्।

"शृङ्गिणो वत्सनाभस्य हिमजस्य विषस्य च"—इति॥

वर्ज्यान्याह सएव,—

"चारितानि च जीर्णानि कृत्रिमाणि तथैवच।
भूमिजानि च† सर्वाणि विषाणि परिवर्जयेत्"—इति॥

नारदोऽपि,—

"भ्रष्टं च चारितं चैव भूमिजं‡ मिश्रितं तथा।
कालकूटमलाबुञ्च विषं यत्नेन वर्जयेत्"—इति॥

---

* निमज्जेत शशिचिह्नविभावितः,—इति शा०।

† भूमिशातानि,—इति शा० स०।

‡ धूपितं,—इति का०।

कालश्च तेनैवोक्तः,—

"तोयपिण्डेस्थिते काले देयं तद्धि हिमागमे।

नापराह्णे न मध्याह्ने न सन्ध्यायां तु धर्मवित्"—इति॥

कालान्तरे तूक्तप्रमाणादल्पं देयम्। तदाह स एव,—

"वर्षे चतुर्यवा मात्रा ग्रीष्मे पञ्चयवा स्मृता।

हेमन्ते सा सप्तयवा शरद्यल्पा ततोऽपि हि"—इति॥

विषञ्च घृतप्लुतं देयम्। तदाह स एव,—

"विषस्य पलषड्भागाद्भागो विंशतिमस्तु यः।

तमष्टभागहीनन्तु शोध्ये दद्यात् घृतप्लुतम्"—इति॥

पलं चात्र चतुःसुवर्णकम्। तस्य षष्ठो भागो दश माषाः, माषस्य दश यवाश्च भवन्ति। त्रियवत्वं च कृष्णलं, पञ्चकृष्णलको माषः। एको माषः पञ्चदशयवा भवन्ति। एवं दशानां माषाणां यवाः सार्द्धशतं भवन्ति। पूर्वे च दश यवाः। एवं षष्ट्यधिकशतं यवाः पलस्य षष्ठो भागः। तस्माद्विंशतितमो भागो अष्टयवाः। तस्याष्टमभागहीनः एकयवहीनः। तं सप्तयवं घृतप्लुतं दद्यात्। घृतञ्च विषात् त्रिंशद्गुणं ग्राह्यम्। तदाह नारदः,—

"प्रदद्यात्सोपवासाय देवब्राह्मणसन्निधौ।

धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम्॥

द्विजानां सन्निधावेव दक्षिणाभिमुखे स्थिते।

उदङ्मुखः प्राङ्मुखो वा दद्याद्विप्रः समाहितः"—इति॥

प्राड्विवाकः कृतोपवासो महेश्वरं सम्पूज्य तत्पुरतो विषं स्थापयित्वा धर्मादिपूजां हवनान्तां पूर्ववद्विधाय प्रतिज्ञापत्रं शोध्यस्य

शिरसि निधाय विषमभिमन्त्रयेत् । मन्त्रश्च पितामहेनोक्तः,—

"त्वं विष, ब्रह्मणा सृष्टं परीक्षार्थं दुरात्मनाम् ।
पापेषु दर्शयात्मानं शुद्धानाममृतम्भव ॥
मृत्युमूर्त्ते, विष, त्वं हि ब्रह्मणा परिनिर्मितम् ।
त्रायस्वैनं नरं पापात्सत्येनास्यामृतम्भव"—इति ॥

कर्त्ता तु विषमभिमन्त्र्य भक्षयेत् । मन्त्रश्च याज्ञवल्क्येनोक्तः,—

"त्वं विष, ब्रह्मणः पुत्र, सत्यधर्मे व्यवस्थितः ।
त्रायस्वास्मादभीशापात् सत्येन भव मेऽमृतम् ॥
एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ।
यस्य वेगैर्विना जीर्येत् शुद्धिं तस्य विनिर्दिशेत् ॥

वेगो रोमाञ्चमाद्योरचयति विषजः स्वेदवक्त्रोपशोषौ
तस्योर्द्धं तत्परौ द्वौ वपुषि च अनयेद्वर्णभेदप्रवेपौ ।
यो वेगः पञ्चमोऽसौ नयनविवशतां कण्ठभङ्गं च हिक्कां
षष्ठो निश्वासमोहौ वितरति च मृतिं सप्तमो भक्षकस्य"—इति ।

शोध्यस्तु कुहकादिभ्यो रक्षणीय इत्याह पितामहः,—

"त्रिरात्रं पञ्चरात्रं स्यात्पुरुषैः स्वैरधिष्ठितम् ।
कुहकादिभयाद्राजा रक्षयेद्दिव्यकारिणम् ॥
ओषधीर्मन्त्रयोगांश्च मणीनथ विषापहान् ।
कर्त्तुः शरीरसंस्थांस्तु गूढोत्पन्नान् परीक्षयेत्"—इति ॥

शुद्धेः कालावधिमाह नारदः,—

"पञ्चतालशतं कालं निर्विकारो यदा भवेत् ।
तदा भवति संशुद्धस्ततः कुर्य्याच्चिकित्सितम्"—इति ॥

यावत् करतालिकाशतपञ्चकं, तावत् प्रतीक्षणीयमित्यर्थः। यत्तु पितामहेनोक्तम्,—

"भक्षिते तु यदा स्वस्थो मूर्च्छाछर्द्दिविवर्जितः।

निर्विकारो दिनस्यान्ते शुद्धन्तमपि निर्द्दिशेत्"—इति॥

तदेतत् चतुर्मात्राविषयम्।

इति विषविधिः।

अथ कोशविधिः।

तत्र नारदः,—

"अतः परं प्रवक्ष्यामि कोशस्य विधिमुत्तमम्।

शास्त्रविद्भिर्यथा प्रोक्तं सर्वकालाविरोधिनम्॥

पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च।

सशूकस्याव्यसनिनः कोशपानं विधीयते।

इच्छतः श्रद्दधानस्य देवब्राह्मणसन्निधौ"—इति॥

देवस्येति दुर्गाऽऽदित्यादयो ग्राह्याः। पितामहोऽपि,—

"प्राङ्मुखं कारिणं कृत्वा पाययेत् प्रसृतित्रयम्।

पूर्वोक्तेन विधानेन पीतमार्द्रपटञ्च तम्"—इति॥

पूर्वोक्तेनेति धर्म्मावाहनादि शोध्यशिरसि पत्रारोपणान्तमङ्गकलापं विधायेति। कारिणं नियुक्तं प्राङ्मुखं कृत्वा प्रसृतित्रयं पाययेत्। तत्र विशेषो नारदेनोक्तः,—

"तमाहूयाभिशस्तन्तु मण्डलाभ्यन्तरे स्थितम्।

पयस्य स्नापयित्वा तु पाययेत् प्रसृतित्रयम्"—इति॥

स्नापनीयदेवानाह पितामहः,—

"भक्तोयो यस्य देवस्य पाययेत् तस्य तज्जलम् ।
तदभावे तु देवानामादित्यस्य तु पाययेत् ॥
दुर्गायाः पाययेत् चोरान् ये च शस्त्रोपजीविनः ।
भास्करस्य तु यत्तोयं ब्राह्मणं तत्र* पाययेत्"—इति ॥

स्नापनीयप्रदेशविशेषमाह सएव,—

"दुर्गायाः पाययेच्छूलमादित्यस्य तु मण्डलम् ।
इतरेषान्तु देवानां स्नापयेदायुधानि तु"—इति ॥

शुद्धिकालावधिमाह पितामहः,—

"त्रिरात्रात् सप्तरात्राद्वा द्विसप्ताहात्तथाऽपिवा ।
वैकृतं यत्र दृश्येत पापकृत्स तु मानवः ॥
तस्यैकस्य तु‡ सर्वस्य जनस्य यदि वा भवेत् ।
रोगोऽग्निर्ज्ञातिमरणं सैव तस्य विभावयेत्"—इति ॥

विष्णुः,—

"यस्य पश्येत् द्विसप्ताहात् त्रिसप्ताहात् तथाऽपिवा ।
रोगोऽग्निर्ज्ञातिमरणं राजदण्डमथापिवा ॥
तमशुद्धं विजानीयाद्विशुद्धं तद्विपर्य्यये"—इति ॥

नारदोऽपि,—

"सप्ताहाभ्यन्तरे यस्य द्विसप्ताहेन वा पुनः ।

---

* तत्र,—इति शा० ।

† इत्थमेव पाठः सर्व्वत्र । ममतु, स्नापये,—इति पाठः प्रतिभाति ।

‡ तस्यैकस्य न,—इति ग्रन्थान्तरीयः पाठः समीचीनः ।

रोगोऽग्निर्ज्ञातिमरणमर्थसंशोधनक्षयः ॥

प्रत्यात्मिकं भवेत्तस्य विद्यात्तस्य पराजयम्"—इति ॥

एतानि द्विचिसप्ताहाद्यवधिवचनानि द्रव्यास्पलमहत्त्वाभ्यामभियोगास्पलमहत्त्वाभ्यां वा व्यवस्थापनीयानि। अवधेरूर्द्धं वैकृतदर्शने न पराजय इत्याह नारदः,—

"ऊर्द्धं तस्य द्विसप्ताहाद्वैकृतं सुमहद्भवेत्।

नाभियोज्यस्स विदुषा कृतकालव्यतिक्रमात्"—इति ॥

वृहस्पतिरपि,—

"सप्ताहाद्वा द्विसप्ताहाद्यस्य किञ्चित् न जायते।

पुचदारधनानां वा स शुद्धः स्यान्न संशयः"—इति ॥

इति कोशविधिः।

अथ तण्डुलविधिः।

तच पितामहः,—

"तण्डुलानां प्रवक्ष्यामि विधिं भक्षणचोदितम्।

चौर्य्ये तु तण्डुला देया नान्यचेति विनिश्चयः"—इति ॥

चौर्य्यग्रहणमर्थविवादप्रदर्शनार्थम्। "ततस्त्वर्थस्य तण्डुलाः"-इति धनविवादे कात्यायनेन दर्शितत्वात्। पूर्वेद्युर्य्यत्कर्त्तव्यं, तदाह सएव,—

"तण्डुलान् कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित्।

मृण्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥

स्नानोदकेन संमिश्रान् राचौ तचैव वासयेत्।

आवाहनादि पूर्वन्तु कृत्वा राचौ विधानतः"—इति ॥

धर्म्मावाहनादि हवनान्तं साधारणविधिना दिव्यस्य, पुरतः कृत्वा देवतास्नानोदकेन तण्डुलानाप्लुत्य प्रभातपर्य्यन्तं प्राड्विवाकस्तथैव स्थापयेत्। तदनन्तरकर्त्तव्यं तेनैव दर्शितम्,—

"प्रभाते कारिणो देयाः चिः कृत्वा प्राङ्मुखं तथा।
प्राड्विवाकसमाहूतस्तण्डुलान् भक्षयेच्छुचिः॥
शुद्धिः स्याच्छुक्लनिष्ठीवे विपरीते च दोषभाक्।
शोणितं दृश्यते यस्य हनुस्तालु च शीर्य्यते॥
गात्रं च कम्पते यस्य तस्याशुद्धिं विनिर्द्दिशेत्"—इति॥

इति तण्डुलविधिः।

अथ तप्तमाषविधिः।

तत्र पितामहः,—

"तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभम्।
कारयेदायसम्पात्रं ताम्रं वा षोड़शाङ्गुलम्॥
चतुरङ्गुलखातन्तु मृण्मयं वाऽथ मण्डलम्"—इति॥

मण्डलं वर्त्तुलम्। एवंविधपात्रं घृततैलाभ्यां पूरयेत्। तथाच सएव,—

"पूरयेत् घृततैलाभ्यां विंशत्या वै पलैस्तु तत्।
तैलं घृतमुपादाय तदग्नौ पाचयेच्छुचिः॥
सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः।
अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम्॥
कराग्रं यो न धुनुयात् विस्फोटो वा न जायते॥

शुद्धो भवति धर्मेण निर्विकारा यदाऽङ्गुलिः”—इति॥

अङ्गुष्ठाङ्गुलियोगेन तर्जन्यङ्गुष्ठमध्यमानां समूहेनेत्यर्थः। केवल-गव्यघृततापने विशेषमाह स एव,—

“सौवर्णे राजते ताम्रे आयसे मृण्मयेऽपि वा।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः॥
सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोधिताम्।
सलिलेन सकृद्धौतां प्रक्षिपेत् तत्र मुद्रिकाम्॥
भमद्वीचीतरङ्गाढ्ये अनखस्पर्शगोचरे।
परीक्षेदार्द्रपर्णेन सचित्कारं सघोषकम्”—इति॥

प्राड्विवाको धर्म्मावाहनादि शोध्यशिरःपत्रारोपणान्तं कर्म्म कृत्वाऽभिमन्त्रणं कुर्य्यात्। मन्त्रस्तु तेनैव दर्शितः,—

“परम्पवित्रममृतं घृत, त्वं यज्ञकर्मसु।
दह पावक, पापन्तु हिमशीतं शुचौ भव॥
उपोषितं ततः स्नातमार्द्रवाससमागतम्।
ग्राहयेन्मुद्रिकां तान्तु घृतमध्यगतां तथा”—इति॥

शोध्यस्तु, त्वमग्ने सर्वभूतानामित्यादिमन्त्रं पठेत्। शुद्धिलिङ्गान्याह स एव,—

“प्रदेशिनं च तस्याथ परीक्षेयुः परीक्षकाः।
यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः”—इति॥

इति तप्तमाषविधिः।

अथ फालविधिः।

तत्र बृहस्पतिः,—

"आयसं द्वादशपलघटितं फालमुच्यते।

अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तृतम्॥

अग्निवर्णन्तु तच्चौरो जिह्वया लेलिहेत्सकृत्।

न दग्धश्चेच्छुचिर्भूयात् अन्यथा तु स हीयते"—इति॥

अत्रापि धर्मावाहनादिशोध्यशिरःपत्रारोपणान्तं कार्य्यम्।

इति फालविधिः।

अथ धर्माधर्मविचारविधिः।

तत्र पितामहः,—

"अधुना सम्प्रवक्ष्यामि धर्माधर्मपरीक्षणम्।

राजतं कारयेद्धर्ममधर्मं सीसकायसम्॥

लिखेत् भूर्जे पटे वाऽपि धर्माधर्मौ सितासितौ।

अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत्॥

सितपुष्पस्तु धर्मः स्यात् अधर्मोऽसितपुष्पधृक्।

एवंविधायोपलिप्य पिण्डयोस्तौ निधापयेत्॥

गोमयेन मृदा वाऽपि पिण्डौ कार्य्यौ समन्ततः।

मृद्भाण्डकेऽनुपहिते* स्थाप्यौ चानुपलक्षितौ॥

उपलिप्य शुचौ देशे देवब्राह्मणसन्निधौ।

आवाहयेत् ततो देवान् लोकपालांश्च पूर्ववत्॥

---

* नुपहितौ,—इति का०।

धर्माावाहनपूर्वन्तु प्रतिज्ञापत्रकं लिखेत्।
यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे॥
अभियुक्तस्ततश्चैकं प्रगृह्णीताविलम्बितम्*।
धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते॥
एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणम्"—इति॥

मौसकायसमिति मौसकमिश्रायसम्।

इति धर्माधर्मदिव्यविधिः।

इति क्रियापादः।

अथ क्रमप्राप्तो निर्णयपादः कथ्यते।

अत्र बृहस्पतिः,—

"धर्मेण व्यवहारेण चरित्रेण नृपाज्ञया।
चतुःप्रकारोऽभिहितः सन्दिग्धार्थविनिर्णयः॥
एकैको द्विविधः प्रोक्तः क्रियाभेदान्मनीषिभिः।
अपराधानुरूपन्तु दण्डन्तु परिकल्पयेत्॥
प्रतिवादी प्रपद्येत यत्र धर्मस्य निर्णयः।
दिव्यैर्विशोधितस्सम्यग्विनयस्समुदाहृतः॥
प्रमाणनिश्चितो यस्तु व्यवहारः स उच्यते।
वाक्छलानुत्तरत्वेन द्वितीयः परिकीर्त्तितः॥
अनुमानेन निर्णीतं चरित्रमिति कथ्यते।
देशस्थित्या तृतीयस्तु तत्त्वविद्भिरुदाहृतः॥

---

* प्रगृह्णीताविलम्बितः,—इति का०।

प्रमाणसमतायान्तु राजाज्ञा निर्णयः स्मृतः।
शास्त्रसभ्याविरोधेन चतुर्थः परिकीर्त्तितः"—इति॥

संग्रहकारोऽपि,—

"उक्तप्रकाररूपेण स्वमतस्थापिता क्रिया।
राज्ञा परीक्ष्या सभ्यैश्च स्थाप्यौ जयपराजयौ॥
सोऽर्थोऽन्यतमया चैव क्रियया सम्प्रसाधयेत्।
भाषाऽक्षरसमं साध्यं स जयी परिकीर्त्तितः॥
असाधयन् साधयन् वा विपरीतार्थमात्मनः।
दृष्टकारणदोषो वा यः पुनः स पराजितः"—इति॥

व्यासोऽपि,—

"तन्तु प्रदण्डयेद्राजा जेतुः* पूजां प्रवर्त्तयेत्।
अजिताश्चापि दण्ड्याः स्युर्वेदशास्त्रविरोधिनः"—इति॥

पूजाकरणानन्तरं कात्यायनः,—

"सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम्।
लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः"—इति॥

नारदोऽपि,—

"मध्ये यत् स्थापितं द्रव्यं चलं वा यदि वा स्थिरम्।
पश्चात् तत्सोदयं दाप्यं जयिने पत्रसंयुतम्"—इति॥

पत्रं जयपत्रम्। तदाह बृहस्पतिः,—

"पूर्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः।
प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते"—इति॥

---

* जितं,—इति शा॰ स॰।

धनदापनप्रकारे विशेषमाह* कात्यायनः,—

"राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत् ।

देशाचारेण चान्यांस्तु दुष्टान् सम्पीड्य दापयेत् ॥

रिक्थिनः सुहृदं वाऽपि छलेनैव प्रदापयेत्"—इति ॥

न केवलं स्वामिने धनदापनमात्रं, स्वयमपि दण्डं गृह्णीयादित्याह नारदः,—

"धनिकः सधनोयस्तु दौरात्म्यान्न प्रयच्छति ।

राज्ञा दापयितव्यः स्यात् गृहीत्वा तन्तु विंशकम्"—इति ॥

एतदपि सम्प्रपन्नधनिकविषयम् । विप्रतिपन्नधनिकविषये विष्णुराह । "उत्तमर्णश्चेद्राजानमियात् तद्विभावितोऽधमर्णोदशमभागसमं दण्डं दद्यात् । प्राप्तार्थश्चोत्तमर्णो विंशतितमम्"—इति । उत्तमर्णाधनदानं भृतित्वे दण्डत्वे† । यदा तु राज्ञः प्रियोऽधमर्णोऽपलापबुध्या राज्ञे पूर्वं निवेदयति, तत्र दण्डविशेषमाह मनुः,—

"यः शोधयन् स्वच्छन्देन वेदयेद्धनिकं नृपे ।

स राज्ञर्णचतुर्भागं दाप्यस्तस्य च तद्धनम्"—इति ॥

यत्तु तेनैवोक्तम्,—

"यो यावन्निह्नवीतार्थं मिथ्या वा ह्यभिवादयेत् ।

तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम्"—इति ॥

---

* इत्थमेव पाठः सर्व्वत्र । मम तु, धनदापने प्रकारविशेषमाह,—इति पाठः प्रतिभाति ।

† इत्थमेव पाठः सर्व्वत्र । मम तु, उत्तमर्णस्य धनदानं भृतित्वेन न दण्डत्वेन,—इति पाठः प्रतिभाति ।

तद्भृताधमर्णोत्तमर्णविषयम्*। यत्तु याज्ञवल्क्येनोक्तम्,—

"निह्नवे भावितो दद्यात् धनं राज्ञे च तत्समम्"—इति ॥

तद्द्विगुणदण्डपर्य्याप्तधनाभावविषयम्। मिथ्याऽभियोगिनस्तु अल्पा-पर्य्याप्तधनस्यापि न तत्समं दण्डः। यदाह सएव,—

"मिथ्याभियोगाद्द्विगुणमभियोगाद्धनं वहेत्"—इति ॥

धनाभावेऽपि, "आनृण्यं कर्मणा गच्छेत्"—इत्यनुकल्पो द्रष्टव्यः। †प्र-थमतोनिह्नवं कृत्वा पश्चात्स्वयं सम्प्रतिपद्यते, तस्यार्द्धं दण्डमाह व्यासः,—

"निह्नवे तु यदा वादी स्वयं तत्प्रतिपद्यते।

ज्ञेया सा प्रतिपत्तिस्तु तस्यार्द्धंविनयः स्मृतः"—इति ॥

यत्पुनर्मनुनोक्तम्,—

"अर्थेऽपव्ययमानन्तु कारणेन विभावितम्।

दापयेद्धनिकस्यार्थं दण्डलेशं‡ च शक्तितः"—इति।

तत्सद्वृत्तब्राह्मणाधमर्णविषयम्। विह्नवविषये विशेषमाह याज्ञवल्क्यः,-

"निह्नुते लिखितं नैकमेकदेशविभावितः।

दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः"—इति।

नैकमनेकं प्रतिज्ञाकाले लिखितमभियुक्तं प्रत्यर्थी यदि सर्वमेव मिथ्येतदिति प्रतिजानीते, तदाऽर्थिना एकदेशभूहिरण्यादिविषये प्रमाणादिभिः§ प्रत्यर्थी भावितः अङ्गीकारितः, तदा स सर्वं पूर्वलि-

---

* तद्वृत्ताधमर्णोत्तमर्णविषयम्,—इति का०। मम तु, तत् सद्वृत्ताधमर्णो-त्तमर्णविषयम्,—इति पाठः प्रतिभाति।

† अथ, यत्तु,—इति भवितुमुचितम्।

‡ दशकं देयं,—इति ग्रा०।

§ पाक्रमस्यादिभिः,—इति का०।

खितमर्थिने नृपेणार्थं दाप्यः। सर्वं* भाषाकाले अर्थिनाऽनिवेदितञ्चेत्, पश्चात् निवेद्यमानो न ग्राह्यो नादर्त्तव्यो नृपेणेत्यर्थः। नारदोऽपि,—

"अनेकार्थाभियुक्तेन सर्वार्थस्यापलापिना।
विभावितैकदेशेन देयं यदभियुज्यते"—इति।

ननु प्राचीनवचनानां प्रागुक्तार्थाभिधाने धर्मनिर्णयार्थत्वं न स्यात्, छलानुसारेण तेषां व्यवहारनिर्णयाभिधायकत्वात्। सत्यं, तथापि न दोषः। प्रागुक्तविषये व्यवहारनिर्णयस्य धर्मनिर्णयबाधकत्वात्†। अतएव बृहस्पतिः,—

"केवलं शास्त्रमाश्रित्य क्रियते यत्र निर्णयः।
व्यवहारः स विज्ञेयो धर्मस्तेनापि हीयते"—इति।

यत्तु कात्यायनवचनम्,—

"अनेकार्थाभियोगे तु यावत्तत्साधयेद्धनम्।
साक्षिभिस्तावदेवासौ लभते साधितं धनम्"—इति।

तत्पुत्रादिदेयपित्रादिऋणविषयम्। तत्र हि बहूनर्थानभियुक्तः पुत्रादिर्न ज्ञायते इति वदन्‡ निह्नववादी न भवतीति एकदेशविभावितन्यायस्य तत्राप्रवृत्तिः। दिव्ये जयपराजयावधारणदण्डविशेषः कात्यायनेन दर्शितः,—

"शताद्र्धं दापयेत् शुद्धं, न शुद्धो दण्डभाग्भवेत्।
विषे तोये हुताशे च तण्डुले तप्तमाषके"—इति।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, पूर्व्वं,—इति पाठः प्रतिभाति।

† धर्म्मनिर्णयाधायकत्वात्,—इति शा०।

‡ तदंश,—इति शा०। मम तु, इति वदन् तदंशनिह्नववादी,—इत्यादि पाठः प्रतिभाति। तदंशस्य अभियोगविषयार्थांशस्य,—इत्यर्थः।

दिव्यक्रमाद्दण्डं प्रकल्पयेत्,

"सहस्रं षट्शतञ्चैव तथा पञ्चशतानि च।

चतुस्त्रीन् द्व्येकमेकन्तु हीनं हीनेषु कल्पयेत्"—इति*।

सपणविधाने† विशेषमाह याज्ञवल्क्यः,—

"सपणश्चेद्विवादः स्यात्तत्र हीनन्तु दापयेत्।

दण्डञ्च स्वपणञ्चैव धनिने धनमेवच"—इति।

नारदोऽपि‡,—

"विवादे चोत्तरपणो§ द्वयोर्यस्तत्र हीयते।

स पणं स्वकृतं दाप्यो विनयं च पराजये"—इति।

उक्तस्य दण्डस्य द्वैविध्यमाह सएव,—

"शारीरश्चार्थदण्डश्च दण्डो वै द्विविधः स्मृतः।

शारीरस्ताड़नादिस्तु मरणान्तः प्रकीर्त्तितः॥

काकिन्यादिश्चार्थदण्डः सर्वतस्तु‖ तथैवच।

शारीरो दशधा प्रोक्तो ह्यर्थदण्डस्त्वनेकधा"—इति।

दशधेति न सङ्ख्यानियमार्थम्। बहुविधस्य बन्धनाङ्ककरण-कर्मकरणबन्धनागारप्रवेशनताड़नरूपस्य शारीरे विद्यमानत्वात्। तच्च दशविधत्वं शारीरदण्डस्य दर्शयति मनुः,—

"दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।

---

* इति वचनात्,—इति भवितुमुचितम्।

† इत्यमेव पाठः सर्व्वत्र। मम तु, सपणविवादे,—इति पाठः प्रतिभाति।

‡ शातातपोऽपि,—इति शा०।

§ इत्यमेव पाठः सर्व्वत्र। मम तु, सोत्तरपणे,—इति पाठः प्रतिभाति।

‖ इत्यमेव पाठः सर्व्वत्र। मम तु, सर्व्वस्वान्तः,—इति पाठः प्रतिभाति।

उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्॥
चक्षुर्नासा च कर्णौ च मरदेहस्तथैवच"—इति।

द्विविध इत्युपलक्षणार्थम्,

"शिरसोमुण्डनं दण्डस्तथा निर्वासनं पुरात्।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च"—इति

विध्यन्तरस्मृतत्वात्। याज्ञवल्क्यस्तु दण्डस्य चातुर्विध्यमाह,—

"वाग्दण्डस्त्वथ धिग्दण्डो धनदण्डो बधस्तथा।
योज्या व्यस्ताः समस्ता वा अपराधवशादितः"—इति।

वाग्दण्डः परुषशापवचनात्मकः। धिग्दण्डो धिगिति भर्त्सनम्। समस्तानां योजने क्रममाह मनुः,—

"वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डन्तु बधदण्डमतः परम्"—इति।

व्यस्तानां योजने व्यवस्थामाह बृहस्पतिः,—

"स्वल्पेऽपराधे वाग्दण्डो धिग्दण्डः पूर्वसाहसे।
मध्यमे धनदण्डस्तु राजद्रोहे च बन्धनम्॥
निर्वासनं बधो वाऽपि कार्य्यमात्महितैषिणा।
व्यस्ताः समस्ता एकस्मान्* महापातककारिणाम्"—इति।

पुरुषतारतम्येन व्यवस्थामाह सएव,—

"भिक्षादिषु प्रयुञ्जीत वाग्दण्डं धिक् तपस्विनाम्।
विवादिनो नरांश्चापि न्यायादर्थेन दण्डयेत्॥
गुरून् पुरोहितान् पूज्यान् वाग्दण्डेनैव दण्डयेत्।

---

* एकस्यां,—इति का०। मम तु, एकस्मिन्,—इति पाठः प्रतिभाति।

विवादिनो नरांश्चान्यान् धिग्धनाभ्यां च दण्डयेत्”—इति।

यत्तु शङ्खेनोक्तम्। “अदण्ड्यौ मातापितरौ स्नातकपुरोहितौ परिव्राजकवानप्रस्थौ अन्मकर्मश्रुतशीलशौचाचारवन्तश्च”—इति। यदपि कात्यायनेन,—

“आचार्य्यस्य पितुर्मातुर्बान्धवानां तथैव च।
एतेषामपराधे तु दण्डोनैव विधीयते”—इति।

यच्च गौतमेन। “षड्भिः परिहार्य्यो राज्ञाऽबध्यश्चादण्ड्यश्चाबहिःकार्य्यश्चापरिवाद्यश्चापरिहार्य्यश्च”—इति। तदेतत्, “सएव बहुश्रुतो भवति। वेदवेदाङ्गविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चाष्टचत्वारिंशत्संस्कारैः संस्कृतः त्रिषु कर्मस्वभिरतः समयाचारेष्वपि निविष्टः[१]”—इति प्रतिपादितबहुश्रुतविषयम्। यत्तु पित्रादीनां दण्डविधानं मनुवृहस्पतिभ्यामुक्तम्,—

(१) अत्र, अष्टचत्वारिंशत् संस्कारैः संस्कृतइत्यस्य, अष्टभिरात्मगुणैश्चत्वारिंशत् संस्कारैश्च संस्कृतइत्यर्थोबोध्यः। यस्मादनन्तरं गौतमएवाह। “गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म्मनामकरणान्नप्राशनं, चौलोपनयनं, चत्वारि वेदव्रतानि, स्नानं, सहधर्म्मचारिणीसंयोगः, पञ्चानां यज्ञानामनुष्ठानं, देवपितृमनुष्यब्रह्मणामेतेषाञ्चाष्टका, पार्व्वणश्राद्धश्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः, अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ आग्रयणं चातुर्मास्यानि निरूढ़पशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः, अग्निष्टोमोऽत्यग्निष्टोमउक्थ्यः षोड़शी वाजपेयोऽतिरात्र आप्तोर्याम इति सप्त सोमसंस्थाः, इत्येते चत्वारिंशत् संस्काराः। अथाष्टावात्मगुणाः, दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति। यस्यैते न चत्वारिंशत् संस्काराः न चाष्टावात्मगुणा न स ब्रह्मणः सालोक्यं सायुज्यं च गच्छति”—इति। त्रिषु कर्म्मसु दानाध्ययनयागेषु। समयाचाराः यज्ञाध्ययनदानयाजनाध्यापनप्रतिग्रहाः।

"पिताऽऽचार्यः सुहृन्माता भार्य्या पुत्रः पुरोहितः ।
नादण्ड्यो नाम राज्ञोऽस्ति धर्म्माद्विचलिताः स्वकात् ॥
ऋत्विक्पुरोहितामात्याः पुत्राः सम्बन्धिबान्धवाः ।
धर्म्माद्विचलिता दण्ड्या निर्वास्या राजभिः पुरात्"—इति।

तदेतच्छारीरार्थदण्डव्यतिरिक्तदण्डविषयम्,

"गुरून् पुरोहितान् पूज्यान् वाग्दण्डेनैव दण्डयेत्"—इति

उक्तत्वात् । ब्राह्मणस्य वधदण्डो नैव कार्यः, किन्तु स वहिस्कार्य-
इत्याह कात्यायनः,—

"न जातु ब्राह्मणं हन्यात् सर्वपापेष्ववस्थितम् ।
राष्ट्रादेनं वहिः कुर्य्यात् समग्रधनमक्षतम्"—इति ।

यस्तु वहिस्कारं नाङ्गीकारोति, तस्य क्षत्रियादिवदेव दण्ड-
इत्याह सएव,—

"चतुर्णामपि वर्णानां प्रायश्चित्तमकुर्वताम् ।
शारीरं धनसंयुक्तं दण्डं धर्मं प्रकल्पयेत्"—इति ।

यत्तु गौतमेन । "न शारीरोब्राह्मणदण्डः"—इति। तदङ्गभङ्ग-
रूपदण्डनिषेधार्थम् ।

"न लङ्गभेदं विप्रस्य प्रवदन्ति मनीषिणः"—इति

हारीतेनोक्तत्वात् । यत्तु शङ्खेनोक्तम् । "त्रयाणामपि वर्णानाम-
पहारबधबन्धक्रिया, विवासनधिक्करणं ब्राह्मणस्य"--बति । तदकि-
ञ्चनब्राह्मणविषयम् । तथाच गौतमः । "कर्मवियोगविख्यापनविवा-
सनाङ्ककरणाप्रवृत्तौ"—इति । अप्रवृत्तिर्निर्धनः । धनदानासमर्थं
प्रत्याह मनुः,—

"क्षत्रविट्शूद्रयोनिस्तु दण्डं दातुमशक्नुवन्।
आनृण्यं कर्मणा गच्छेत् विप्रो दद्याच्छनैः शनैः"—इति।

कर्मकरणासामर्थ्ये तु कात्यायन आह,—

"धनदानासहं बुध्वा स्वाधीनं कर्म कारयेत्।
अशक्तौ बन्धनागारप्रवेशो ब्राह्मणादृते"—इति।

मनुरपि,—

"स्त्रीबालोन्मत्तवृद्धानां दरिद्राणां च रोगिणाम्।
शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिमर्दनम्*"—इति।

ब्राह्मणस्य वधस्थाने मौण्ड्यं विदधाति मनुः,—

"मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते।
इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत्॥
न ब्राह्मणवधात् पापादधर्मो विद्यते क्वचित्।
तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत्॥
ललाटाङ्को ब्राह्मणस्य नान्यो दण्डो विधीयते।
महापातकयुक्तोऽपि न विप्रो वधमर्हति॥
निर्वासनाङ्ककरणे मौण्ड्यं कुर्यान्नराधिपः"—इति।

अङ्कने च विशेषो नारदेन दर्शितः,—

"गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः।
स्तेये च श्वपदं कार्य्यं ब्रह्महण्यशिराः पुमान्"—इति।

अङ्कनं न क्षत्रियादिषु कर्त्तव्यम्।

---

* विदध्याच्च नृपतिर्धनम्,—इति शा० स०।

"ब्राह्मणस्यापराधे तु चतुर्ष्वेव विधीयते।
गुरुतल्पे सुरापाने स्तेये ब्राह्मणहिंसने॥
इतरेषान्तु वर्णानामङ्कनं नाच कारयेत्"—इति।

न केवलं सभ्यादीनामेव दण्डः, किन्तु जयिनोऽपीत्याह बृहस्पतिः,—

"निश्चित्य बहुभिः सार्द्धं ब्राह्मणैः शास्त्रपारगैः।
दण्डयेज्जयिना साकं पूर्वसभ्यांस्तु दोषिणः"—इति।

याज्ञवल्क्योऽपि,—

"दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु।
सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम्"—इति।

जयलोभादिना व्यवहारस्य अन्यथा करणे जयिसहिताः सभ्याः प्रत्येकं विवादपराजयनिमित्तादर्शनात्* द्विगुणं दण्ड्याः। यदा पुनः साक्षिणो दोषेण व्यवहारस्यान्यथात्वं, तदा साक्षिणएव दण्ड्या न सभ्यादय इत्यर्थः। यः पुनर्न्यायतो निर्णीतमपि व्यवहारं मौढ्याद्धर्म इति मन्यते, तम्प्रत्याह नारदः,—

"तीरितं चानुशिष्टञ्च यो मन्येत विधर्मवित्।
द्विगुणं दण्डमास्थाय तत्कार्य्यं पुनरुद्धरेत्"—इति।

वशिष्ठोऽपि,—

"यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः।

---

* इत्थमेव पाठः सर्व्वत्र। ममतु, विवादपराजयनिमित्तादर्थात्,—इति पाठः प्रतिभाति।

यत्तं पापमजित्वा च* पातयेद्द्विगुणं दमम्"—इति।

तीरितानुशिष्टयोर्भेदः कात्यायनेन स्पष्टीकृतः,—

"असत्सद्दिति यः पक्षः सभ्यैर्वा योऽवधार्यते।

तीरितः सोऽनुशिष्टस्तु साक्षिवाक्यात् प्रकीर्त्तितः"—इति।

यत्पुनर्मनुनोक्तम्,—

"तीरितं चानुशिष्टं च यत्र क्वचन यद्भवेत्।

कृतं तद्धर्मतो विद्यान्न तद्भूयोऽपि वर्त्तयेत्†"—इति।

तत्स्त्रीकृतत्वादिनिवृत्तिहेत्वभावविषयम्। स्त्र्यादिविषये पुनर्व्यवहारः प्रवर्त्तनीयः। तदाह नारदः,—

"स्त्रीषु रात्रौ वहिर्ग्रामादन्तर्वेश्मस्वरातिषु।

व्यवहारः कृतोऽप्येषु पुनः कर्त्तव्यतामियात्"—इति।

बलात्कारादिना कृतोऽपि व्यवहारो निवर्त्तनीय इत्याह याज्ञवल्क्यः,—

"बलोपधिविनिर्वृत्तान् व्यवहारान् निवर्त्तयेत्।

स्त्रीनक्तमन्तरागारवहिःशत्रुकृतं तथा"—इति।

कर्तृवैगुण्येऽपि पुनर्व्यवहारासिद्धिमाह सएव,—

"मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः।

असंबद्धकृतश्चैव व्यवहारो न सिध्यति"—इति।

आदिशब्देन वृद्धादिप्रयुक्तव्यवहारो गृह्यते। तथाच मनुः,—

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, पुनर्जित्वा च तं पापं,—इति पाठः प्रतिभाति।

† तद्भूयोनिवर्त्तयेत्,—इति ग्रन्थान्तरीयः पाठः समीचीनः।

"मत्तोन्मत्तार्त्तव्यसनिबालेन स्थविरेण वा।
असंबद्धकृतश्चैव व्यवहारो न सिध्यति"—इति।

नारदोऽपि,—

"पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः।
असंबद्धो भवेद्वादो धर्मविद्भिरुदाहृतः"—इति।

हारीतोऽपि,—

"राज्ञा विवर्जितो यस्तु स्वयं पौरविरोधकृत्।
राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च॥
अन्ये वा ये पुरग्राममहाजनविरोधकाः।
अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्त्तिताः"—इति।

स्ववाक्यजितस्य तु न पुनर्न्याय इत्याह नारदः,—

"साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः।
स्ववाचैव जितानान्तु नोक्तः पौनर्भवो विधिः"—इति।

अन्यानपि निवर्त्तनीयव्यवहारानाह मनुः,—

"योगाधमनविक्रीतं योगदानप्रतिग्रहम्।
यत्र वाऽप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेत्"—इति।

परकीयधनस्यात्मीयत्वच्छलभावे याचितकादिना प्राप्तिर्योगः। आधमनमाधिः। योगे आधमनं योगाधमनम्। एवं क्रीतमित्यत्रापि योज्यम्। यमोऽपि,—

"बलाद्दत्तं बलाद्भुक्तं बलाच्चापि विलेखितम्।
सर्वान् बलकृतानर्थान् निवर्त्यानाह वै मनुः"—इति।

कात्यायनोऽपि,—

"उन्मत्तेनैव मत्तेन तथा वाचान्तरेण* वा।
यद्दत्तं यत्कृतं वाऽथ प्रमाणं नैव तद्भवेत्।
यद्बालः कुरुते कार्यमस्वतन्त्रस्तथैव च।
अकृतं तदपि प्राहुः शास्त्रे शास्त्रविदो जनाः॥
गर्भस्थसदृशो ज्ञेयः अष्टमाद्वत्सराच्छिशुः।
बाल आषोड़शाद्वर्षात् पौगण्डश्चेति कथ्यते॥
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते।
जीवतोर्न स्वतन्त्रः स्याज्जरयाऽपि समन्वितः॥
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्।
अभावे बीजिनो माता तदभावे तु पूर्वजः"—इति।

केषुचित् कार्यविशेषेषु स्त्रीणामस्वातन्त्र्यमित्याह हारीतः,—

"दाने वाऽधमने वाऽपि धर्म्मार्थे वाऽविशेषतः।
आदाने वा विसर्गे वा न स्त्री स्वातन्त्र्यमर्हति"—इति।

नारदः,—

"अस्वतन्त्राः प्रजाः सर्वाः स्वतन्त्रः पृथिवीपतिः।
अस्वतन्त्रः स्मृतः शिष्य आचार्य्ये तु स्वतन्त्रता"—इति।

अत्रास्वतन्त्रकृतव्यवहारनिवर्त्तनं स्वतन्त्रानुमत्यभावविषयं वेदितव्यम्। तथाच नारदः,—

"एतान्येव प्रमाणानि भर्त्ता यद्यनुमन्यते।
पुत्रः पत्युरभावे वा राजा वा पतिपुत्रयोः॥
तत्र दासकृतं कार्य्यं न कृतं परिचक्षते।

---

* इत्यमेव पाठः सर्व्वत्र। मम तु, वादान्तरेण,—इति पाठः प्रतिभाति।

अन्यच स्वामिसन्देशात् न दासः प्रभुरात्मनः॥
पुत्रेण वा कृतं कार्य्यं यस्मादच्छन्दतः पितुः।
तदप्यकृतमेवाहुर्दासः पुत्रश्च तौ समौ"—इति।

कात्यायनोऽपि,—

"न चेच्छिष्यदासानां दानाधमनविक्रयाः।
अस्वतन्त्रकृताः सिद्धिं प्राप्नुयुर्नानुवर्णिताः॥
प्रमाणं सर्वएवैते पण्यानां क्रयविक्रये।
यदि स्वं व्यवहारन्ते कुर्वन्तो ह्यनुमोदिताः॥
चेचादीनां तथैव स्युर्भ्राता भ्रातृसुतः सुतः।
निसृष्टाः कृत्यकरणे गुरुणा यदि गच्छति"—इति।

बृहस्पतिरपि,—

"स्वस्वामिना नियुक्तस्तु धनमस्यापलापयेत्*।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः॥
प्रमाणं तत्कृतं सर्वं लाभालाभं व्ययोदयम्।
स्वदेशे वा विदेशे वा न स्वातन्त्र्यं विसंवदेत्"—इति।

अनुमत्यभावेऽपि कुटुम्बभरणार्थं अस्वतन्त्रकृतं नान्यथा कर्त्तुमर्हतीत्याह मनुः,—

"कुटुम्बार्थेऽप्यधीनोऽपि व्यवहारं समाचरेत्†।

---

* इत्थमेव पाठः सर्व्वत्र। यः स्वामिना नियुक्तस्तु धनायव्ययपालने,—इति ग्रन्थान्तरीयस्तु पाठः समीचीनः।

† कुटुम्बार्थेऽनधीनोऽपि,—इत्यादि का०। कुटुम्बार्थेऽप्यधीनोऽपि व्यवहारं समाचरेत्,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः।

स्वदेशे वा विदेशे वा तन्न्याय्यं न विचालयेत्”—इति।

प्रकृतिस्थस्वतन्त्रकृतं कार्य्यं सिध्यति, नाप्रकृतिस्थकृतम्। तथाच नारदः,—

“कुलज्येष्ठस्तथा श्रेष्ठः प्रकृतिस्थश्च यो भवेत्।

तत्कृतं स्यात् कृतं कार्य्यं नास्वतन्त्रकृतं* कृतम्”—इति।

स्वतन्त्रप्रकृतिस्थकृतमपि कार्य्यं क्वचिन्न सिध्यतीत्याह कात्यायनः,—

“सुतस्य सुतदाराणां वशीत्वं† त्वनुशासने।

विक्रये चैव दाने च स्वातन्त्र्यं न सुते पितुः”—इति।

एवं शास्त्रोक्तमार्गेण निर्णयं कुर्वतो राज्ञः फलं दर्शयति वृहस्पतिः,—

“एवं शास्त्रोदितं राजा कुर्वन्निर्णयपालनम्।

वितत्येह‡ यशो लोके महेन्द्रसदृशो भवेत्॥

साक्षिणस्त्वानुमानेन§ प्रकुर्वन् कार्यनिर्णयम्।

वितत्येह यशो राजा ब्रध्नस्याप्नोति विष्टपम्”—इति।

इति निर्णयपादः समाप्तः।

---

* न स्वतन्त्रकृतं,—इति का०।

† वशित्वं,—इति का०

‡ विततं च,—इति का०।

§ इत्यमेव पाठः सर्व्वत्र। मम तु, साक्षिभिस्त्वानुमानेन,—इति पाठः प्रतिभाति।

अष्टादशपदोपयोगिनी व्यवहारमातृका निरूपिता ।
अथेदानीमष्टादशपदान्यनुक्रमेण निरूप्यन्ते ।

तत्र बृहस्पतिः,—

"पदानां सहितस्त्वेष व्यवहारः प्रकीर्त्तितः ।
विवादकारणान्यस्य पदानि शृणुताधुना ॥
ऋणादानप्रदानानि* द्यूताह्वानादिकानि च ।
क्रमशः सम्प्रवक्ष्यामि क्रियाभेदांश्च तत्त्वतः"—इति ।

तत्र प्रथमोद्दिष्टत्वेन ऋणादानाख्यस्य पदस्य विधिरुच्यते । तत्र ऋणादानं सप्तविधम् । तदाह नारदः,—

"ऋणं देयमदेयञ्च येन यत्र यथा च यत् ।
दानग्रहणधर्मांश्च ऋणादानमिति स्मृतम्"—इति ।

तत्राधमर्णे पञ्चविधमीदृशमृणं देयमीदृशमदेयमनेनाधिकारिणा देयमस्मिन्समये देयमनेन प्रकारेण देयमिति । उत्तमर्णे द्विविधं, दानविधिरादानविधिश्चेति । तत्र दानविधिपूर्वकत्वादितरेषां तत्रादौ दानविधिरुच्यते । तत्र बृहस्पतिः,—

"परिपूर्णं गृहीत्वाऽऽधिं बन्धं वा साधु लग्नकम् ।
लेख्यारूढं साक्षिमद्वा ऋणं दद्याद्धनी सदा"—इति ।

वृद्धेः परिपूर्णत्वं सवृद्धिकमूलद्रव्यपर्य्याप्तता । वृद्धिप्रभेदाश्च बृहस्पतिना निरूपिताः,—

"वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधाऽन्यैः प्रकीर्त्तिता ।

* इत्यमेव पाठः सर्व्वत्र । मम तु, ऋणादानप्रधानानि,—इति पाठः प्रतिभाति ।

चतुर्विधाऽस्मिन्समाख्याता तत्त्वतस्तां निबोधत* ॥

कायिका कालिका चैव चक्रवृद्धिरतः परा ।

कारिता च शिखावृद्धिर्भोगलाभस्तथैव च ॥

कायिका कर्मसंयुक्ता मासग्राह्या तु कालिका ।

वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता ॥

प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा मता ।

गृहात् लोमः सदः चेत्रात्[१]भोगलाभः प्रकीर्त्तितः”—इति ।

वृद्धेस्तु परिमाणं मनुनोक्तम्,—

“अशीतिभागं गृह्णीयान्मासि वार्धुषिकः शते”—इति ।

इत्यर्थं निष्कशते प्रयुक्ते सपादनिष्कपरिमितां वृद्धिं मासि मासि गृह्णीयात् । एतत्सबन्धकविषयम् । तथाच याज्ञवल्क्यः,—

“अशीतिभागोवृद्धिः स्यान्मासि मासि सबन्धके ।

वर्णक्रमाच्छतन्द्विचितुःपञ्चकमन्यथा ॥

मासस्य वृद्धिं गृह्णीयात् वर्णानामनुपूर्वशः”—इति ।

सलग्नकप्रयोगे व्यासः,—

“सबन्धे भाग आशीतः षष्ठो भागः सलग्नके ।

निराधाने द्विकशतं मासलाभ उदाहृतः”—इति ।

ग्रहीतृभेदेर्वृद्धेः परिमाणान्तरमाह याज्ञवल्क्यः,—

---

* तत्त्वतस्तान् निबोधत,—इति क०

---

(१) लोमोऽत्र सूत्रवासनिमित्तकं भाटकम् । सदः क्षेत्रभवं फलादि,—इति चण्डेश्वरेण व्याख्यातम् ।

"कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्"—इति।

कान्तारगाः दुर्गमवर्त्मगन्तारः, ते प्रतिमासन्दशकं शतं दद्युः। सामुद्रास्समुद्रगन्तारः विंशकं शतं दद्युरित्यर्थः। कारितायां तु न नियम इत्याह सएव,—

"दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु"—इति।

सर्वे ब्राह्मणादयोऽधमर्णाः। सबन्धके अबन्धके सर्वासु जातिषूत्तमर्णानुभूतासु स्वाभ्युपगतां वृद्धिं दद्युः। कचिदनङ्गीकृताऽपि वृद्धिर्भवति। तदाह विष्णुः,—

"यो गृहीत्वा ऋणं पूर्वं दास्यामीति च सामकम्।

न दद्याल्लोभतः पश्चात् स तस्मात् वृद्धिमाप्नुयात्"—इति।

सममेव सामकम्। प्रतिदिनकालावधिमङ्गीकृत्य गृहीतमवृद्धिकं धनं यदि न प्राग्ददाति, तदा अवधेरनन्तरकालादारभ्य वर्द्धतएवेत्यर्थः। कालावधिमनङ्गीकृत्य स्वीकृतस्य धनस्य षण्मासादूर्द्धं वृद्धिर्भवतीत्याह नारदः,—

"न वृद्धिः प्रीतिदत्तानां या त्वनाकारिता कचित्।

अनाकारितमप्यूर्द्धं वत्सरार्द्धाद्विवर्धते"—इति।

याचितकं गृहीत्वा देशान्तरगमने कात्यायनः,—

"यो याचितकमादाय तमदत्वा दिशं व्रजेत्।

ऊर्द्धं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्"—इति।

एतच्चाप्रतियाचितविषयम्। प्रतियाचिते तु सएवाह,—

"कृत्वोद्धारमदत्वा यो याचितस्तु दिशं व्रजेत्।

ऊर्द्धं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात्"—इति।

कलोद्धारं, याचितकमादायेत्यर्थः। यस्तु याचितकं गृहीत्वा देशे एव स्थितोऽपि याचितकं न प्रयच्छति, तं प्रत्याह सएव,—

"स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्।
तं ततोऽकारितां वृद्धिमनिच्छन्तञ्च दापयेत्"—इति।

ततः, प्रतियाचनकालादारभ्येत्यर्थः।

"याच्यमानं न वर्द्धेत यावन्न प्रतियाचितम्।
याच्यमानमदत्तञ्चेत् वर्द्धते पञ्चकं शतम्"—इति।

निक्षेपादावपि सएव,—

"निक्षिप्तं वृद्धिशेषञ्च क्रयविक्रयएवच।
याच्यमानमदत्तं चेत् वर्द्धते पञ्चकं शतम्"—इति।

गृहीतपण्यमौल्यानर्पणविषये तु सएव,—

"पण्यं गृहीत्वा यो मौल्यमदत्त्वैव दिशं व्रजेत्।
ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्"—इति।

एतच्चाप्रतियाचितविषयम्। अनाकारितवृद्धेरपवादो नारदेन दर्शितः,—

"पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः।
वृथादानाक्षिकपणं वर्द्धते नाविवक्षितम्"—इति।

वृथादानं, नटादिभ्यः प्रतिश्रुतम्। आक्षिकपणं द्यूतद्रव्यम्। विवक्षितं अनाकारितम्। पण्यमूल्यस्य वृद्ध्यभावः, प्रवासप्रतियाचनाभावे। न्यासस्य तु वृद्ध्यभावः, यथाऽवस्थाने प्रतियाचनाभावे च। अन्यथा कात्यायनवचनविरोधापत्तेः। समन्तोऽपि,—

"न वृद्धिः स्त्रीधने लाभे निक्षिप्ते च यथास्थिते।

सन्दिग्धे प्रातिभाव्ये च यदि न स्यात्स्वयं कृता"—इति।

यथास्थिते निक्षेपे व्यक्तमन्यथाकरणरहिते। दातुं योग्यमयोग्यञ्चेति सन्दिग्धे। प्रातिभाव्ये ऋणिप्रत्यर्पणादौ। कात्यायनोऽपि,—

"कर्म्मसख्यासवद्यूते पण्यमूल्ये च सर्वदा।

स्त्रीशुल्केषु न वृद्धिः स्यात् प्रातिभाव्यगतेषु च"—इति।

सर्वदेति प्रतियाचनादेः परस्तादप्यकृता वृद्धिर्नास्तीत्यर्थः। पण्यमूल्ये कात्यायनवचनविरोधः पूर्वमेव परिहृतः। व्यासोऽपि,—

"प्रातिभाव्यं भुक्तबन्धमगृहीतञ्च दित्सतः।

न वर्द्धते प्रपन्नः स्यादथ शुल्कं प्रतिश्रुतम्"—इति।

भुक्तबन्धग्रहणं निक्षेपोपायने यथा वृद्धिर्देया, तथा गोप्यभोगे वृद्धिर्न देयेत्येवमर्थम्। "भुक्ताधिर्न वर्द्धते"—इति गौतमस्मरणात्। अगृहीतं च दित्सतः,—इति कृतवृद्ध्यपवादः, अकृतवृद्ध्यपवादप्रसङ्गादुक्तः। कृतवृद्ध्यपवादस्य याज्ञवल्क्येन दर्शितः,—

"दीयमानं न गृह्णाति नियुक्तं यत्स्वकं धनम्।

मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परम्"—इति।

प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य परम्। वृद्धिद्रव्यभेदानाह याज्ञवल्क्यः,—

"सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा।

वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा"—इति।

पशुस्त्रीणां सन्ततिरेव वृद्धिः। रसस्य तैलघृतादेः स्वकृतया वृद्ध्या वर्द्धमानस्याष्टगुणा वृद्धिः परा। नातः परं वर्द्धते। वस्त्रधान्यहिरण्यानां यथाक्रमं चतुर्गुणा त्रिगुणा द्विगुणा च परा वृद्धिः।

यत्तु वशिष्ठेनोक्तम्। "द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः। पुष्पमूलफलानि च तुलाधृतमष्टगुणम्"—इति। यच्च मनुनोक्तम्,—

"धान्ये शदे लवे वाह्ये नातिक्रमति पञ्चताम्"—इति।

शदः क्षेत्रफलं पुष्पमूलफलानि। लवो मेषोर्णाचमरीकेशादिः। वाह्यो बलीवर्दतुरगादिः। धान्यशदलववाह्यविषया वृद्धिः पञ्चगुणत्वं नातिक्रामतीति।

"उक्ताऽप्यष्टगुणा शाके बीजेक्षौ षड्गुणा स्मृता।
लवणे कुप्यदमद्येषु वृद्धिरष्टगुणा मता॥
गुडे मधुनि चैवोक्ता प्रयुक्ते चिरकालिका"—इति।

कुप्यन्त्रपुसीसकम्। तदेतत्सर्वमधमर्णयोग्यताऽनुसारेण दुर्भिक्षादिकालवशेन व्यवस्थापनीयम्। देशभेदेनापि परां वृद्धिं दर्शयति नारदः,—

"द्विगुणं त्रिगुणं चैव तथाऽस्मिंश्च चतुर्गुणम्।
तथाऽष्टगुणमन्यस्मिन् देयं देशेऽवतिष्ठते"—इति।

देयमृणं वर्द्धमानं चिरकालावस्थितं क्वचित्त्रिगुणं क्वचिच्चतुर्गुणं क्वचिदष्टगुणं भवतीत्यर्थः। वसिष्ठोऽपि,—

"वज्रमुक्तिप्रवालानां रत्नस्य रजतस्य वा।
द्विगुणा दीयते वृद्धिः कृतकालानुसारिणी॥
ताम्रायःकांस्यरीतीनान्त्रपुणस्सीसकस्य च।
त्रिगुणा तिष्ठते वृद्धिः कालाद्धैरकृतस्य तु"—इति।

मुक्तिरिति मुक्ताफलं लक्ष्यते, वज्रसाहचर्य्यात्। व्यासोपि,—

"शाककार्पासबीजेषौ षड्गुणा परिकीर्त्तिता।
वदन्त्यष्टगुणान् काले मद्यस्नेहरसासवान्"—इति।

कात्यायनोऽपि,—

"तैलानाञ्चैव सर्वेषां मद्यानामथ सर्पिषाम्।
वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च"—इति।

यत्र वृद्धिविशेषो न श्रूयते, तत्र द्विगुणैव। तथाच विष्णुः। "अनुक्तानां द्विगुणा"—इति। अयं च वृद्ध्युपरमः सकृत्प्रयोगे सकृदाहरणे च वेदितव्यः। तथाच मनुः,—

"कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहिता"—इति।

उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं, तस्य वृद्धिः कुसीदवृद्धिः। द्वैगुण्यं नात्येति नातिक्रामति। यदि सकृदाहिता सकृत्प्रयुक्ता। पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे, तस्मिन्नेव वा पुरुषे रेकलेकाभ्यां* प्रयोगान्तरकरणे द्वैगुण्यमतिक्रम्य पूर्ववत् वर्द्धते। सकृदाहृतेति पाठे शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वाऽधमर्णादाहृत्य द्वैगुण्यमत्येतीति व्याख्येयम्। गौतमोऽपि। "चिरस्थाने द्वैगुण्यं प्रयोगस्य"—इति। प्रयोगस्येत्येकवचननिर्देशेन प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः। चिरस्थाने,—इति निर्देशाच्छनैः शनैः वृद्धिग्रहणे द्वैगुण्यातिक्रमोऽभिमतः। उक्तस्य वृद्ध्युपरमस्य कचिद्द्रव्यविशेषेऽपवादमाह बृहस्पतिः,—

---

* एकशफाभ्यां,—इति शा०।

"तृणकाष्ठेष्टकासूत्रकिण्वचर्म्मास्थिवर्म्मणाम्।

हेतिपुष्पफलानाञ्च वृद्धिस्तु न निवर्त्तते"—इति।

किण्वः सुराद्रव्योपादानभूतो मलविशेषः। चर्म्म वाणादिनिवारकफलकः। वर्म्म तनुत्रम्। हेतिरायुधम्। पुष्पफलयोर्वृद्ध्यनिवृत्तिरत्यन्तसम्बद्धाधमर्णविषयः। अन्यथा त्रिगुणवृद्धिप्रतिपादकव्यासवचनविरोधः पूर्ववद्विज्ञेयः। वशिष्ठोऽपि,—

"दण्डवर्म्मास्थिशृङ्गाणां मृण्मयानां तथैव च।

अक्षया वृद्धिरेतेषां पुष्पमूलफलस्य च"—इति।

बृहस्पतिरपि,—

"शिखावृद्धिं कायिकाञ्च भोगलाभं तथैव च।

धनी तावत्समादद्यात् यावन्मूलं न शोधितम्"—इति।

तदेवं, परिपूर्णं गृहीलाऽऽधिमित्यत्र आधेः परिपूर्णत्वनिरूपणप्रसङ्गागता सविशेषा वृद्धिर्निरूपिता।

इदानीमाधिर्निरूप्यते।

तत्र नारदः,—

"अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।

कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥

स पुनर्द्विविधः प्रोक्तो गोप्योभोग्यस्तथैव च"—इति।

गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णे अधिक्रियते

आधीयते इत्याधिः। कृतकाले आधानकालएवैतद्दिवसाद्यवध्यय-माधिर्मया मोच्यते, अन्यथा तवैव भविष्यतीत्येवं निरूपितकाले। उपरिष्टात्सेवनीय इत्यर्थः*। यावद्देयोद्यतः, गृहीतधनप्रत्यर्पणावधि-निरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः, भोग्यः फलभोग्यादिः। बृहस्पतिरपि,—

"आधिर्बन्धः समाख्यातः स च प्रोक्तश्चतुर्विधः।
जङ्गमः स्थावरश्चैव गोप्योभोग्यस्तथैवच॥
यादृच्छिकः सावधिश्च लेख्यारूढ़ोऽथ साक्षिमान्"—इति।

आधिर्नाम बन्धः। स द्विविधः, गोप्यो भोग्यश्च। पुनश्चैकैकशो-द्विविधः, जङ्गमः स्थावरश्चेत्येवं चतुर्विधः। पुनरपि प्रत्येकं द्विविधः, यादृच्छिकः सावधिश्चेति। यावदृणन्तव न ददामि तावदयमाधि-रित्येवं कालविशेषावधिशून्यतया कृतो यादृच्छिकः। कृतकालोप-नेयः सावधिः। पुनश्च लेख्यारूढ़ः साक्षिमानिति द्विविधः। भर-द्वाजः प्रकारान्तरेणाधेश्चातुर्विध्यमाह,—

"आधिश्चतुर्विधः प्रोक्तो भोग्यो गोप्यस्तथैवच।
अर्थप्रत्ययहेतुश्च चतुर्थस्त्वाज्ञया कृतः॥
आवणात्पूर्वलिखितो भोग्याधिः श्रेष्ठ उच्यते।
गोप्याधिस्तु परेभ्यः स्वन्दत्वा यो गोप्यते गृहे॥
अर्थप्रत्ययहेतुर्य्य अर्थहेतुः स उच्यते।
आज्ञाधिर्नामयो राज्ञा संसदि त्वाज्ञया कृतः"—इति।

---

* स विनेय इत्यर्थः,—इति ग्रा०।

श्रावणं संसदि प्रकाशनम् । आधिग्रहणानन्तरं नाशविकारा-
द्योयथा न भवन्ति, तथा पालनीय इत्याह हारीतः,—

"बन्धं यथा स्थापितं स्यात्तथैव परिपालयेत् ।
अन्यथा नश्यते लाभो मूलं वा तद्व्यतिक्रमात्"—इति ।

बृहस्पतिरपि,—

"न्यासवत्परिपाल्योऽसौ वृद्धिर्नश्येत्तथाऽकृते ।
भुक्ते वाऽसारतां प्राप्ते मूलहानिः प्रजायते ।
बहुमूल्यं यत्र नष्टमृणिकं न च तोषयेत् ॥
दैवराजोपघाते च यत्राधिर्नाशमाप्नुयात् ।
तत्राधिं दापयेद्दृष्टान् सोदयं धनमन्यथा"—इति ।

तथाच व्यासः,—

"दैवराजोपघाते तु न दोषो धनिनां क्वचित् ।
अन्यथा नश्यते लाभो मूलं वा नाशमाप्नुयात् ॥
ऋणं दाप्यस्तु तन्नाशे बन्धनान्यमृणं तथा"—इति ।

आधेरसारत्वेऽप्येवमनुसन्धेयम् । तथाच नारदः,—

"रक्ष्यमाणोऽपि यस्त्वाधिः कालेनेयादसारताम् ।
आधिरन्योऽथवा कार्य्यो देयं वा धनिने धनम्"—इति ।

याज्ञवल्क्योऽपि,—

"आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोऽप्यसारताम् ।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्"—इति ।

अयमर्थः। आधेर्गोप्यस्य भोग्यस्य च स्वीकरणात् ग्रहणात् उप-

भोगाद्याधिग्रहणसिद्धिः, न साक्षिलेख्यमात्रेण नापुद्देशमात्रेण । तदाह नारदः,—

"आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा ।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा"—इति ।

एवं च सति, या स्वीकारात्मा क्रिया पूर्वा, सा बलवती; या पूर्वाऽपि स्वीकारादिरहिता, सा न बलवतीत्युक्तं भवति । आधिः प्रयत्नेन रक्ष्यमाणोऽपि कालादिवशेन यद्यसारतां गतस्तदाऽन्य आधेयः । अथ वा धनिने धनं देयम् । आधिसिद्धौ भोगएव प्रमाणमित्याह विष्णुः—

"द्वयोर्निक्षिप्तयोराधिर्विवदेतां यदा नरौ ।
यस्य भुक्तिर्जयस्तस्य बलात्कारं विना कृता"—इति ।

द्वयोरपि भुक्तस्याह बृहस्पतिः,—

"क्षेत्रमेकन्द्वयोर्बन्धे यद्दत्तं समकालिकम् ।
येन भुक्तं भवेत्तस्य तत् तत्सिद्धिमवाप्नुयात्"—इति ।

वसिष्ठोऽपि,—

"तुल्यकाले विनष्टानां लेख्यानामाधिकर्मणि ।
येन भुक्तं भवेत्पूर्वं तस्याधिर्बलवत्तरा"—इति ।

भोगाधिशेषे सएवाह,—

"यद्येकदिवसे तौ तु भोक्तुकामावुपागतौ ।
विभज्याधिः समन्तेन भोक्तव्य इति निश्चयः"—इति ।

द्वयोरेकमाधिं कुर्वतो दण्डमाह कात्यायनः,—

"आधिमेकं द्वयोः कृत्वा यद्येका प्रतिपद्भवेत्।
तयोः पूर्वकृतं ग्राह्यं तत्कर्त्ता दण्डभाग्भवेत्"—इति।

प्रतिपदिति प्रतिपत्तिरित्यर्थः। आधिविशेषे दण्डविशेषमाह विष्णुः। "गोचर्ममात्राधिकां भुवमन्यस्य आधिं कृत्वा तस्मादनिर्मोच्यान्यस्य यः प्रयच्छेत्स वध्यः। ऊनां चेत्, षोड़शसुवर्णं दण्ड्यः,—इति। साचिलेख्यसिद्धयोर्लेख्यसिद्धिर्बलवतीत्याह कात्यायनः,—

"आधानं विक्रयो दानं लेख्यसाचिकृतं यदा॥
एकक्रियाविरुद्धन्तु लेख्यं तत्रापहारकम्"—इति।

लेख्यसिद्धत्वाविशेषेऽपि सएवाह,—

"अनिर्द्दिष्टञ्च निर्द्दिष्टमेकत्र च विलेखितम्।
आकाशभूतमादाय अनादिष्टं च तद्भवेत्॥
यद्यद्यदाऽस्य विद्येत तदादिष्टं विनिर्द्दिशेत्"—इति।

अयमर्थः। आधातुराधानकाले यद्विद्यमानं धनं निरूपितस्वरूपं च, तद्धनमाधित्वेनादिष्टं, तन्निर्द्दिष्टमित्युच्यते। तद्विपरीतन्तु धनमाधित्वेन कल्प्यमानमनिर्द्दिष्टमिति निर्द्दिशेदिति। निर्द्दिष्टत्वाविशेषे याज्ञवल्क्यः,—

"आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा"—इति।

एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याधाय किमपि गृह्णाति, तत्र पूर्वस्यैव तत्क्षेत्रम्भवति नोत्तरस्य। एवं प्रतिग्रहे क्रये च योजनीयम्। ऋणादिषूत्तरक्रियायाः प्राबल्यमाह सएव,—

"सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया"—इति।

यद्येकं क्षेत्रमेकस्याधिं कृत्वाऽन्यस्य विक्रीणीते, तत्राह वसिष्ठः,—

"यः पूर्वान्तरमाधाय विक्रिणीते तु तं पुनः।
किमेतयोर्बलीयः स्यात् प्रोक्तेन बलवत्तरम्"—इति।

आध्यादीनां यौगपद्येऽप्याह स एव,—

"कृतं यच्चैकदिवसे दानमाधानविक्रयम्।
त्रयाणामपि सन्देहे कथं तत्र विचिन्तयेत्॥
त्रयोऽपि तद्धनं धार्य्यं विभजेयुर्यथांऽशतः।
उभौ क्रियानुसारेण त्रिभागोनं प्रतिग्रही"—इति।

एतदाधितोऽप्यधिकर्णिकविषयम्। ऋणपर्य्याप्ताधिनाशे त्वाह नारदः,—

"विनष्टे मूलनाशः स्यात् दैवराजकृतादृते"—इति।

बहुमूल्याधिनाशे धनिकं समर्पयेदित्युक्तम्। तत्र विशेषमाह मनुः,—

"मूलेन तोषयेदेनमाधिस्तेनोऽन्यथा भवेत्"—इति।

गोप्याधिभोगे लाभहानिमाह याज्ञवल्क्यः,—

"गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते।
नष्टो देयो विनष्टश्च दैवराजकृतादृते"—इति।

अयमर्थः। गोप्यस्याधेः समयातिक्रमेण भोगे सति महत्यपि वृद्धिर्दातव्या। सोपकारे सवृद्धिके भोग्याधौ हापिते व्यवहारा-क्षमत्वं प्रापिते सति न वृद्धिः। गोप्याधिर्विकारं प्रापितः, पूर्वव-त्कृत्वा देयः। विनष्टश्चेदात्यन्तिकनाशं प्राप्तश्चेत्तन्मूल्यादिद्वारेणैव निवेद्यः। गोप्याधिभोगे नो वृद्धिरित्येतद्बलात्कारभोगविषयम्। अत-एव मनुः,—

“न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्”—इति ।

वचनाद्विना आधिभोगे भोगानुसारेण लाभद्रव्यस्य नाशमाह सएव,—

“यः स्वामिनाऽननुज्ञातमाधिं भुङ्क्तेऽविचक्षणः ।
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः”—इति ।

क्वचिद्विषये मूलद्रव्यनाशेन सह लाभनाशस्य विकल्पमाह कात्यायनः,—

“अकाममननुज्ञातमाधिं यः कर्म कारयेत् ।
भोक्ता कर्मफलं दाप्यो वृद्धिं वा लभते न सः”—इति ।

दास्याद्याधौ कर्मफलं वेतनम् । आहितदास्यादिपीड़ने सएवाह,—

“यस्त्वाधिं कर्म कुर्वाणः वास्यादन्तेन कर्मभिः* ।
पीड़येत् भर्त्सयेच्चैव प्राप्नुयात्पूर्वसाहसम्”—इति ।

आहितस्य द्रव्यस्य स्वत्वनिवृत्तिकालमाह याज्ञवल्क्यः,—

“आधिः प्रणश्येद्विगुणे धने यदि न मोच्यते ।
काले कालकृतो नश्येत् फलभोग्यो न नश्यति”—इति ।

प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्वैगुण्यं प्राप्ते सति यद्यकृतकालो गोप्याधिर्न मोच्यते, तदा नश्येदधमर्णस्य, धनं प्रयोक्तुः सम्भवति । कृतकालो गोप्यो भोग्यश्चाधिः सम्प्रतिपन्ने काले यदि न

---

* वास्वा दण्डेन कर्म्मभिः,—इति का० । मम तु, यस्त्वाधिं कर्म्मः कुर्व्वाणां वेणुदण्डेन चर्म्मभिः,—इति पाठः प्रतिभाति ।

मोच्यते, तदाऽधमर्णस्य नश्येत् । अकृतकालः फलभोग्यः कदाचिदपि न नश्यति । द्वैगुण्यनिरूपितकालयोरुपरि चतुर्दशदिवसप्रतीक्षणं कर्त्तव्यमित्याह व्यासः,—

"हिरण्ये द्विगुणीभूते पूर्णकाले कृतावधौ ।
बन्धकस्य धनस्वामी द्विसप्ताहं प्रतीक्षते ॥
तदन्तरा धनं दत्त्वा ऋणी बन्धमवाप्नुयात्"—इति ।

नन्वाधेः स्वत्वनिवृत्तेः स्वत्वोत्पत्तेश्च कारणं नास्ति, विषयोऽपि नास्ति । नैवम् । न केवलं दानादिरेव स्वत्वनिवृत्तिकारणम्, प्रतिग्रहादिरेव स्वत्वापत्तिकारणम्; किन्तु द्वैगुण्यनिरूपितकालप्राप्तौ द्रव्यादीनामपि तस्य याज्ञवल्क्यवचनेनैव ऋणिधनिनोरात्यन्तिकस्वत्वनिवृत्तिस्वत्वोत्पत्तिकारणत्वावगमात् । न च मनुवचनविरोधः, तस्योक्तकालभोग्याधिविषयत्वेनाप्युपपत्तेः । यत्तु बृहस्पतिना दशाहप्रतीक्षणमुक्तम्,—

"पूर्णावधौ शान्तलाभे बन्धस्वामी धनी भवेत् ।
अनिर्गते दशाहे तु ऋणी मोचितुमर्हति"—इति ।

तद्वस्त्रादिविषयम् । हिरण्ये द्विगुणीभूते,—इति व्यासेन विशेषोपादानात् । यत्पुनस्तेनैवोक्तम्,—

"गोप्याधिर्द्विगुणादूर्ध्वं कृतकालस्तथाऽवधेः ।
आवेदयेद्दृणिकुले भोक्तव्यस्तदनन्तरम्"—इति ।

तद्भोगमात्रविधिपरम्, न पुनः स्वत्वापत्तिपरम् । यदा तु शान्तलाभे धने बन्धस्य तथैवावस्थितस्य मोचनात् प्राग्दृणिकस्य मरणादिर्भवेत्, तदा किं कार्य्यमित्यपेक्षितमाह बृहस्पतिः,—

"हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके।
द्रव्यन्तदीयं संगृह्य विक्रिणीत ससाक्षिकम्॥
रक्षेद्वा कृतमूल्यं तु दद्याद्वं जनसंसदि।
ऋणानुरूपं परतो गृह्णीयादन्यत्तु वर्जयेत्"—इति।

हिरण्ये द्विगुणीभूते पश्चादाधिमोक्षणादर्वागधमर्णिके मृते नष्टे कुत्रचिद्गते चिरकालमविज्ञाते सति, आधिकृतं द्रव्यं ससाक्षिकं विक्रीय चरितानुरूपं द्विगुणीभूतद्रव्यपर्याप्तं गृह्णीत, ततोऽवशिष्टं वर्जयेत् राज्ञे समर्पयेदित्यर्थः। तथाच कात्यायनः,—

"आधाता यत्र नष्टः स्यात् धनी बन्धं निवेदयेत्।
राज्ञा ततः स विख्यातो विक्रेय इति धारणा॥
सवृद्धिकं गृहीत्वा तु शेषं राजन्यथार्पयेत्"—इति।

राज्ञे समर्पणञ्च ज्ञात्याद्यभावविषयम्। तत्सद्भावे तत्रैव समर्पणस्य न्याय्यत्वात्। अन्यत्तु वर्जयेदित्यनेन धनद्वैगुण्येऽप्यकृतकालावधिकाधौ धनिकस्यास्वामित्वमवगम्यते। धनद्वैगुण्ये स्वत्वप्रतिपादकं याज्ञवल्क्यवचनं समानाधिविषयम्*। अतएव, न्यूने अधिके च बन्धे आधिनाशोनास्ति, किन्तु द्विगुणीभूतं द्रव्यमेव राज्ञा दाप्य इत्याह याज्ञवल्क्यः,—

"चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम्।
सत्यङ्कारकृतं द्रव्यं द्विगुणं दापयेत् ततः"—इति।

चरित्रं शोभनाचरितं स्वच्छाशयत्वम्। तेन यत् बन्धकं, चरित्रबन्धकम्। तेनाधिकेन यद्द्रव्यमात्मसात् कृतं पराधीनं वा कृतं, तच्च

* समांशाधिविषयम्,—इति पा०।

रित्रबन्धककृतम्। अथवा चरित्रमग्निहोत्रादिजनितमपूर्वम्। तदेव बन्धकं चरित्रबन्धकम्। तेन यद्द्रव्यमात्मसात्कृतं, तत्सवृद्धिकमेव दापयेत्, न तु धनद्वैगुण्येऽप्याधिनाशः। सत्यस्य कारः सत्यङ्कारः। तेन कृतं सत्यङ्कारकृतम्। तदपि द्विगुणमेव देयं, न तु लाभादिनाशः*। अयमभिप्रायः। बन्धकार्पणसमयएव मया द्विगुणमेव द्रव्यं दातव्यं नाधिनाशः इति नियमे कृते, तदेव द्विगुणभूतं दातव्यं नाधिनाशः इति। क्रयविक्रयादिव्यवस्थानिर्वाहाय यदङ्गुलीयकादि परहस्ते समर्पितं,तत्सत्यङ्कारकृतम्। तच्चाङ्गुलीयकादि गृहीत्वा व्यवस्थामतिक्रामन् तदेवाङ्गुलीयकादि द्विगुणं प्रतिपादयेत्। इतरश्चेदङ्गुलीयकादिकमेव त्यजेत्। वस्त्राधौ नियममाह प्रजापतिः,—

"यो वै धनेन तेनैव परमाधिं नयेद्यदि।

कृत्वा तदाऽऽधिलिखितं पूर्वञ्चापि समर्पयेत्"—इति।

यद्बन्धकस्वामिनि धनं प्रयुक्तं तत्तुल्येनैव धनेन परं धनिकान्तरमाधिं नयेत्, न त्वधिकेन। अयं वस्त्राधिर्धनस्य द्वैगुण्ये सति। सम्प्रतिपत्तौ तु द्वैगुण्यादर्वागपि द्रष्टव्यः।

अथाधिमोचनम्।

तत्र बृहस्पतिः,—

"धनं मूलीकृतं दत्वा यदाऽऽधिं प्रार्थयेदृणी।

तदैव तस्य मोक्तव्यस्त्वन्यथा दोषभाग्धनी"—इति।

---

* लाभनाशः,—इति का०।

मूलीकृतमधमर्णेन देयं धनम्; वस्तुभोग्याधौ मूलमात्रं, गोप्याधौ तु सवृद्धिकम्। यदा तद्दत्वा ऋणी आधिं प्रार्थयते, तदा धनिना स मोक्तव्यः। अन्यथा दोषभाग्भवेदित्यर्थः। तदाह याज्ञवल्क्यः,—

"उपस्थितस्य मोक्तव्यः आधिस्तेनोऽन्यथा भवेत्।
प्रयोजके सति धनं कुलेऽन्यस्याधिमाप्नुयात्"—इति।

धनप्रयोक्तर्य्यसन्निहिते सति तदाप्तहस्ते सवृद्धिकं धनं निधाय स्वकीयमाधिं गृह्णीयात्। भोग्याधिस्तु मूलमात्रं दत्वा फलकालान्ते मोक्तव्यइत्याह व्यासः,—

"फलभोग्यं पूर्णकालं दत्वा द्रव्यन्तु सामकम्"—इति।

सममेव सामकम्। मूलमात्रं दत्वा ऋणी बन्धमवाप्नुयादिति। आधिनाशनिबन्धनत्वे वैगुण्यादिकालादर्वागेव आधिर्मोक्तव्यः। तथाच सएव,—

"अतोऽन्तरा धनं दत्वा ऋणी बन्धमवाप्नुयात्"—इति।

यत्तु तेनैवोक्तम्,—

"गोप्याधिं द्विगुणादूर्द्धं मोचयेदधमर्णिकः"—इति।

तद्वैगुण्यादूर्द्धं, अर्वाक् द्विसप्ताहान्मोचयेदित्येवम्परम्। अन्यथा, आधिः प्रणश्येद्द्विगुणे धने इति याज्ञवल्क्यवचनविरोधापत्तेः। यदि प्रयोक्तर्य्यसन्निहिते तत्कुले धनग्रहीतारो न सन्ति, यदि वाऽऽधिविक्रयेण धनादित्सा स्यादधमर्णस्य, तत्र यत्कर्त्तव्यं तदाह याज्ञवल्क्यः,—

"तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः"—इति।

ऋणदानेच्छाकाले यत् तस्याधेर्मूल्यं, तत्परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेत्तत ऊर्ध्वं न वर्द्धते इति। भोग्याधिविषये कश्चिद्विशेषमाह बृहस्पतिः,—

"क्षेत्रादिकं यदा भुक्तमत्यन्तमधिकं ततः।
मूलोदयं प्रविष्टं चेत्तदाऽऽधिं प्राप्नुयादृणी"—इति।

तेन प्रविष्टे सोदये द्रव्ये त्वयैतन्मोक्तव्यमित्येवं परिभाष्य यदा क्षेत्रादिकमादद्यात्, तदा भोगेन क्षेत्रार्थव्ययसहितसवृद्धिकधनप्रवेशे सति आधिमाददीतादधमर्ण इत्यर्थः। याज्ञवल्क्योऽपि,—

"यदा तु द्विगुणीभूतमृणमाधौ तदाऽखिलम्।
मोच्यआधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने"—इति।

अयमेव क्षयाधिरित्युच्यते लोकैः। यत्र तु वृद्ध्यर्थएव भोग इति परिभाष्यते, तत्र भोगेनाधिकधनप्रवेशे यावन्मूलदानं नाधिर्मोक्तव्यः।

"परिभाष्य यदा क्षेत्रं तथा तु धनिके ऋणी।
त्वयैतद्वृत्तलाभेऽर्थे भोक्तव्यमिति निश्चयः॥
प्रविष्टे सोदये द्रव्ये प्रदातव्यन्त्वया मम"—इति।

ऋणग्रहणकाले धनद्वैगुण्यानन्तरं भोगः। मूलमात्रं दत्वाऽधमर्णो बन्धनं प्राप्नोति। धनी च ऋणं मूलमात्रं न गृह्णीयात्। किन्तु पूर्णे वर्षे समग्रवृद्धिपर्य्याप्ते धने प्रविष्टे सति धनिनो मूलमात्रं देयम्। ऋणिनो बन्धलाभ इति। परस्परानुमतौ तु वृद्ध्यपर्य्याप्तभोगेऽपि मूलमात्रदानेनैवाधिलाभः इत्यर्थः। परिभाषितकालैकदेशेनैव समग्रवृद्धिपर्य्याप्तवर्षप्रवेशे सएवाह,—

"यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी ।
ऋणी न लभते बन्धं परस्परमतं विना"—इति ।

इत्याधिविधिः ।

अथ प्रतिभूः ।

तत्र बृहस्पतिः,—

"दर्शने प्रत्यये दाने ऋणे द्रव्यार्पणे तथा ।
चतुःप्रकारः प्रतिभूः शास्त्रे दृष्टो मनीषिभिः ॥
आद्यैको दर्शयामीति साधुरित्यपरोऽब्रवीत् ।
दाताऽहमेतद्द्रविणमर्पयामीति चापरः"—इति ।

अहमेव तदीयं धनमर्पयामीति ब्रवीतीत्यर्थः । दर्शनप्रतिभुवः कृत्यमाह सएव,—

"दर्शनप्रतिभूर्यस्तु देशे काले च दर्शयेत् ।
निबन्धं वाहयेत् तत्र नैव राजकृतादृते"—इति ।

निबन्धं ऋणं वाहयेत् धनिनं प्रापयेत् । यस्तु न दर्शयति, तं प्रत्याह मनुः,—

"यो यस्य प्रतिभूस्तिष्ठेत् दर्शनायेह मानवः ।
अदर्शयन्स तं तत्र प्रयच्छेत् स्वधनादृणम्"—इति ।

दर्शनाय कालं दद्यादित्याह बृहस्पतिः,—

"नष्टस्यान्वेषणे कालं दद्यात्प्रतिभुवे धनी ।
देशानुरूपतः पक्षं मासं सार्द्धमथापिवा"—इति ।

कात्यायनोऽपि,—

"नष्टस्यान्वेषणार्थन्तु देयं पक्षत्रयं परम्।
यद्यसौ दर्शयेत्तस्य मोक्तव्यः प्रतिभूर्भवेत्॥
कालेऽप्यतीते प्रतिभूर्यदि तं नैव दर्शयेत्।
स तमर्थं प्रदाप्यः स्यात्प्रेते चैवं विधीयते"—इति।

दानप्रत्ययप्रतिभुवोः कृत्यमाह नारदः,—

"ऋणिष्वप्रतिकुर्वत्सु प्रत्यये वाऽथ ह्रापिते।
प्रतिभूस्तु ऋणं दद्यादनुपस्थापयंस्तदा"—इति।

अप्रतिकुर्वत्सु बन्धनदार्ढ्येन अददत्सु। प्रत्यये ह्रापिततद्विश्वासेऽपगते। धनार्पणप्रतिभुवः कृत्यमाह सएव,—

"विश्वासार्थं कृतस्त्वाधिर्न प्राप्तो धनिना यदा।
प्रापणीयस्तदा तेन देयं वा धनिनां धनम्"—इति।

आधिप्रत्यर्पणप्रतिभुवं प्रत्याह सएव,—

"खादको वित्तहीनः स्यु लग्नको वित्तवान् यदि।
मूलं तस्य भवेद्देयं न वृद्धिं दातुमर्हति"—इति।

खादको बन्धभक्षकः, लग्नकः प्रतिभूः। स तु वृद्धिं दातुं नार्हति। खादकादप्यत्र, मूल्येन तोषयेदिति वचनात् तन्मूल्यमात्रमेव* देयम्। एवमितरेषां प्रतिभुवामपि देयद्रव्यविधयो द्रष्टव्याः। प्रतिभूर्ग्राह्य इति प्रकृतमाह कात्यायनोऽपि,—

"दानोपस्थानवादेषु विश्वासप्रपथाय च।
लग्नकं कारयेदेवं यथायोगं विपर्य्यये"—इति।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, मूलेन तोषयेदिति वचनात् मूलमात्रमेव,—इति पाठः प्रतिभाति।

उपस्थानं दर्शनम्। व्यासोऽपि,—

"लेख्ये कृते च दिव्ये वा दानप्रत्ययदर्शने।

गृहीतबन्धोपस्थाने ऋणिद्रव्यार्पणे तथा"—इति।

प्रतिभूर्ग्राह्य इति शेषः। प्रतिभूमरणे व्यवस्थामाह याज्ञवल्क्यः,—

"दर्शनप्रतिभूर्यश्च मृतः प्रात्ययिकोऽपिवा।

न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः"—इति।

यदा दर्शनप्रतिभूः प्रत्ययिको वा मृतः, तदा तयोः पुत्राः प्रातिभाव्यायातं पितृकृतमृणं न दद्युः। यस्तु दानाय स्थितः प्रतिभूर्मृतस्तत्पुत्रा ऋणं दद्युः। तत्पौत्रपुत्रैरपि मूल्यमेव* देयं, न वृद्धिर्देया। तथाच व्यासः,—

"ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः।

समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः"—इति।

तत्सुतौ पौत्रप्रपौत्रौ। बृहस्पतिः,—

"आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनम्।

उत्तरौ तु विसंवादे तौ विना तत्सुतौ तथा"—इति।

आद्यौ दर्शनप्रत्ययप्रतिभुवौ, वितथे अहमेनं दर्शयिष्यामि असौ साधुरित्येवं विधयोर्वाक्ययोः मिथ्यात्वे राज्ञा दाप्यौ। उत्तरौ दानर्णिद्रव्यार्पणप्रतिभुवौ विसंवादे दार्ढ्यादिना धने ऋणिकेन अप्रतिदत्ते दाप्यौ। तयोरभावे तत्सुतौ दाप्यौ। प्रत्ययप्रतिभुवत्प्रमाण

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, मूलमेव,—इति पाठः प्रतिभाति।

प्रतिभूरेव दाप्यो न तत्पुत्रः विवादप्रतिभूप्रसाधितं धनं दण्डश्च दाप्यः। तदभावे तत्पुत्रोऽपीत्याह व्यासः,—

"विप्रत्यये लेख्यदिव्ये दर्शने वाऽकृते सति।
ऋणं दाप्याः प्रतिभुवः पुत्रस्तेषां न दापयेत्॥
दानवादप्रतिभुवौ दाप्यौ तत्पुत्रकौ तथा"—इति।

यत्र दर्शनप्रत्ययप्रतिभुवौ बन्धकं गृहीत्वा प्रातिभाव्यमङ्गीकुरुतः, तत्र विशेषमाह कात्यायनः,—

"गृहीत्वा बन्धकं यत्र दर्शनस्य स्थितो भवेत्।
विना पित्रा धनं तस्माद्दाप्यस्तस्य ऋणं सुतः"—इति।

अनेकप्रतिभूदानप्रकारमाह याज्ञवल्क्यः,—

"बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम्।
एकच्छायाश्रितेष्वेषु धनिकस्य यथा रुचिः"—इति।

*एकस्मिन् प्रयोगे द्वौ बहवो वा प्रतिभुवः, तदर्णं विभज्य स्वांशेन दद्युः। एकच्छायाश्रितेषु यं पुरुषं धनिकः प्रार्थयेत्, सएव कृत्स्नं दद्यात् नांशतः। एकच्छायाधिष्ठितेषु यदि कश्चिद्देशान्तरङ्गतः, तदा तत्पुत्रोऽपि दद्यात्। मृते तु पितरि पुत्रः पित्रंशमेव दद्यात्, न कृत्स्नम्। तथाच कात्यायनः,—

"एकच्छायाप्रविष्टानां दाप्योयस्तत्र दृश्यते।
प्रोषिते तत्सुतः सर्वं पित्रंशन्तु मृते तु सः"—इति।

प्रातिभाव्यापलापे दण्डमाह पितामहः,—

"यो यस्य प्रतिभूर्भूत्वा मिथ्या चैव तु पृच्छति।

---

* अत्र, यदि,—इति भवितुमुचितम्।

धनिकस्य धनं दाप्यो राज्ञा दण्डेन तत्समम्॥

कुर्य्याच्च प्रतिभूर्वादं कार्य्ये चार्थेऽर्थिना सह।

सोपसर्गस्तदा दण्ड्यो विवादात् द्विगुणं दमम्"—इति।

अथ प्रतिक्रियाविधिः। तत्र याज्ञवल्क्यः,—

"प्रतिभूर्दापितो यत्र प्रकाशं धनिने धनम्।

द्विगुणं प्रतिदातव्यं ऋणिकैस्तस्य तद्भवेत्"—इति।

धनिकेन पीड़ितः सन् प्रतिभूस्तत्सुतोवा जनसमक्षं राज्ञा यद्धनं दापितस्तद्द्विगुणमृणिकः प्रतिभुवे दद्यात्। यदाह नारदः,—

"यं चार्थं प्रतिभूर्दद्याद्धनिकेनोपपीड़ितः।

ऋणिकः स्वप्रतिभुवे द्विगुणं प्रतिदापयेत्"—इति।

कदा हि द्विगुणं दद्यादित्यपेक्षिते आह कात्यायनः,—

"प्रतिभाव्यं तु यो दद्यात्पीड़ितः प्रतिभावितः।

त्रिपक्षात्परतः सोऽर्थं द्विगुणं लब्धुमर्हति"—इति।

द्वैगुण्यं हिरण्यविषयम्। पश्वादौ तु विशेषो याज्ञवल्क्येनोक्तः,—

"सन्ततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च।

वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा"—इति।

प्रातिभाव्ये निषेधानाह कात्यायनः,—

"न स्वामी न च वै शत्रुः स्वामिनाऽधिकृतस्तथा।

निरुद्धो दण्डितश्चैव सन्दिग्धश्चैव न क्वचित्॥

नैव रिक्थी न मित्रं वा न चैवात्यन्तवासिनः।

राजकार्य्यनियुक्तश्च ये च प्रव्रजिता नराः॥

नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम्।

जीवन् वाऽपि पिता यस्य तथैवेच्छाप्रवर्त्तकः ॥
नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रति"—इति ।

सन्दिग्धोऽभिशस्तः । अत्यन्तवासिनो नैष्ठिकब्रह्मचारिणः । याज्ञवल्क्योऽपि,—

"भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यं अविभक्ते न तु स्मृतम्"—ति ।

नारदोऽपि,—

"साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेवच ।
विभक्ता भ्रातरः कुर्य्युः नाविभक्ताः परस्परम्"—इति ।

अस्वतन्त्रेषु धनप्रयोगनिषेधमाह याज्ञवल्क्यः,—

''नस्त्रीभ्यो दासबालेभ्यः प्रयच्छेच्च कचिद्धनम् ।
दत्तञ्च लभते तत्तु तेभ्यो दत्तं तु यद्धनम्"—इति ।

अथर्णग्रहणधर्म्माः ।

तत्र याज्ञवल्क्यः,—

"प्रच्छन्नं साधयन्नर्थं स वाच्यो नृपतेर्भवेत् ।
साध्यमानो नृपं गच्छेत् दण्ड्यो दाप्यश्च तद्धनम्"—इति ।

अस्यार्थः । अधमर्णेनाभ्युपगतं साक्ष्यादिभिर्भावितं वा धर्म्मादिभिरुपायैः साधयन् राज्ञा न निवारणीयः । यदि तु पापात्तदा

बृहस्पतिः,—

"धर्म्मोपधिबलात्कारैर्गृहसम्बोधनेन* च"—इति ।

---

* इत्थमेव पाठः सर्व्वत्र । मम तु, संरोधनेन,—इति पाठः प्रतिभाति ।

धर्म्मादीन् स्वयमेवाह,—

"सुहृत्सम्बन्धिसन्दिष्टैः सामोक्त्याऽनुगमेन च।

प्रायेणाथ ऋणी दाप्यो धर्म एवमुदाहृतः॥

छद्मना याचितं चार्थमानीय ऋणिकात् धनी।

अन्वाहितं समाहृत्य दाप्यते यत्र सोपधिः॥

यदा स्वगृहमानीय ताड़नाद्यैरुपक्रमैः।

ऋणिको दाप्यते यत्र बलात्कारः प्रकीर्त्तितः॥

दारपुत्रपशून् बध्वा कृत्वा द्वारोपरोधनम्।

यत्रर्णं दाप्यतेऽर्थन्तु तदाचरितमुच्यते"—इति।

मनुरपि धर्म्मादीनुपायान् दर्शयति,—

"धर्म्मेण व्यवहारेण छलेनाचरितेन च।

प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च"—इति।

धर्म्मादयस्तूपायाः पुरुषापेक्षया प्रयोक्तव्याः। तदाह कात्यायनः,—

"राजा तु स्वामिनं विप्रं सान्त्वेनैव प्रदापयेत्।

रिक्थिनं सुहृदं वाऽपि छलेनैव प्रदापयेत्॥

वणिकाः कर्षिकाः चैव शिल्पिनस्त्वाब्रवीद्भृगुः।

देशाचारेण दाप्याः स्युर्दुष्टान् सम्पीड्य दापयेत्"—इति।

दापने विशेषमाह याज्ञवल्क्यः,—

"गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः।

दत्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम्"—इति।

समानजातीयेषु धनिषु युगपत्प्राप्तेषु गृहीतानुक्रमात् धनं

दाप्यः, भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण। साधयितुमशक्तं धनिकं प्रत्याह याज्ञवल्क्यः,—

"राज्ञाऽधमर्णिकोदाप्यः साधिताद्दशकं शतम्।
पञ्चकन्तु शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः"—इति।

प्रतिपन्नस्यार्थस्य राजा दशमांशमधमर्णिकाद्दण्डरूपेण गृह्णीयादुत्तमर्णाद्विंशतितमं भागं भृत्यर्थं गृह्णीयादित्यर्थः। अधनिकऋणादानप्रकारमाह याज्ञवल्क्यः,—

"हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्"—इति।

ब्राह्मणग्रहणमुत्कृष्टजात्युपलक्षणार्थम्।

"कर्मणाऽपि समं कार्य्यं धनिकं वाऽधमर्णिकः।
समोऽपकृष्टजातिश्च दद्यात् श्रेयांस्तु तच्छनैः"—इति स्मरणात्।

नारदोऽपि,—

"अथ शक्तिविहीनस्स्यादृणी कालविपर्य्ययात्।
शनैरपेक्ष्यमृणं दाप्यः काले काले यथोदयम्"—इति।

दुष्टाधमर्णिकं प्रत्याह मनुः,—

"ऋणिकः सधनोयस्तु दौरात्म्यान्न प्रयच्छति।
राज्ञा दापयितव्यः स्यात् गृहीला द्विगुणो दमः"—इति।

सन्दिग्धेऽर्थे ऋणग्रहणं कुर्वतोऽर्थहानिर्दण्डश्चेत्याह बृहस्पतिः,—

"अनावेद्य तु राज्ञे यः सन्दिग्धार्थे प्रवर्त्तते।
प्रसह्य स प्रवेश्यः स्यात्सर्वोऽप्यर्थो न सिध्यति"—इति।

कात्यायनोऽपि,—

पीड़येत्तु धनी यत्र ऋणिकं न्यायवादिनम्।
तस्मादर्थात्स हीयेत तत्समं प्राप्नुयात् दमम्"—इति।

यस्त्वधमर्णस्तूत्तमर्णसकाशात् व्यवहारार्थं धनं गृहीतवान्, स तस्यैव धनं दद्यात्, नान्येषाम्। तदाह कात्यायनः,—

"यस्य द्रव्येण यत्पण्यं साधितं यो विभावयेत्।
तद्द्रव्यमृणिकेणैव दातव्यं तस्य नान्यथा"—इति।

निर्धनाधमर्णविषये ऋणप्रतिदानप्रकारमाह भारद्वाजः,—

"ऋणिकस्य धनाभावे देयोऽन्योऽर्थस्तु तत्क्रमात्।
धान्यं हिरण्यं लौहं वा गोमहिष्यादिकं तथा॥
वस्त्रं भूर्दासवर्गश्च वाहनादि यथाक्रमम्।
धनिकस्य तु विक्रीय प्रदेयमनुपूर्वशः॥
क्षेत्राभावे तथाऽऽरामस्तस्याभावे हयक्रयः।
द्विजातीनां गृहाभावे कालहारो विधीयते"—इति।

मनुरपि,—

"ऋणं दातुमशक्तो यः कर्त्तुमिच्छेत्पुनः क्रियाम्।
स दत्वा निर्जितां वृद्धिं करणं परिवर्त्तयेत्"—इति।

अयमर्थः। प्रतिदानकाले धनासम्पत्तिवशात्सवृद्धिकमूलदानाशक्तोऽधमर्णः ऋणस्य चिरन्तनत्वं परिहरतो धनिकस्य समानार्थक्रियां लेख्यादिरूपां पुनः कर्त्तुमिच्छेत्, स निष्पन्नां वृद्धिं दत्वा करणं परिवर्त्तयेत्; पुनर्लेख्यादिक्रियां वर्त्तमानवत्सरादिचिह्नितां कुर्य्यादिति। यः पूर्वनिर्जितवृद्धिं दातुमसमर्थः, स तु तां मूलत्वेनारोपयेत्। तदाह सएव,—

"अदर्शयित्वा तत्रैव हिरण्यं परिवर्त्तयेत्।
यावती सम्भवेद्वृद्धिः तावती दातुमर्हति"—इति।

हिरण्यमदर्शयित्वा निर्जितां वृद्धिमदत्वा तत्रैव लेख्ये परिवर्त्तयेत्। यस्तु ऋणप्रतिदानकाले सवृद्धिकं मूलं दातुं न शक्नोति, तं प्रत्याह याज्ञवल्क्यः,—

"लेख्यस्य पृष्ठेऽभिलिखेत् दत्वा दत्वर्णिको धनम्"—इति।

लेख्यासन्निधाने विष्णुः। "असमग्रदाने लेख्यासन्निधाने चोत्तमर्णस्य लिखितं दद्यात्"—इति। नारदोऽपि,—

"गृहीतोपगतं दद्यादृणिकात् वृद्धिमाप्नुयात्।
यदि वा नो परिलिखेदृणिना चोदितोऽपि सन्॥
धनिकस्यैव वर्द्धेत तथैव ऋणिकस्य च"—इति।

यस्तु ऋणापाकरणं न करोति, तस्य प्रत्यवायः पुराणेऽपि दर्शितः,—

"तपस्वी चाग्निहोत्री च ऋणवान् म्रियते* यदि।
तपश्चैवाग्निहोत्रञ्च सर्वं तद्धनिने भवेत्"—इति।

कात्यायनोऽपि,—

"उद्धारादिकमादाय स्वामिने न ददाति यः।
स तस्य दासोभृत्यः स्त्री पशुर्वा जायते गृहे"—इति।

उद्धारादिकं दातुर्व्यवहार्यतया स्थितम्। नारदोऽपि,—

"याच्यमानं न दद्यात्तु ऋणमाधिप्रतिग्रहम्।
तद्द्रव्यं वर्द्धयेत्तावत् यावत्कोटिशतं भवेत्॥

---

* ऋणं नोम्रियते,—इति पा०।

ततः कोटिशते पूर्णे दासनष्टेन* कर्मणा ।

अश्वः खरोष्ट्रगोदासो भवेज्जन्मनि जन्मनि”—इति ।

प्रतिदातुः कर्त्तव्यमाह याज्ञवल्क्यः,—

“दत्त्वर्णं पाटयेल्लेख्यं शुद्धै चान्यत्तु कारयेत् ।

साक्षिमत् क्षापयेद्यद्वा दातव्यं वा ससाक्षिकम्”—इति ।

ससाक्षिकमृणं पूर्वसाक्षिसमक्षमेव दातव्यम् । पूर्वसाक्षिणामसम्भवे साक्ष्यन्तरसमक्षमेव दातव्यमिति । नारदोऽपि,—

“लेख्यं दत्वा ऋणी शुद्ध्येत्तदभावे श्रुतैरिति” ।

†अल्पकालमदीर्घकालमृणं याच्यमानसमनन्तरमेव देयम् । सावधित्वेन कृतं तु पूर्णे त्ववधौ सान्त्वलाभं संश्रवे । धनिकर्णिकयो-रेवं विशुद्धिः स्यात् प्रतिश्रवमिति† । ऋणप्रतिदातृनाह बृहस्पतिः,—

“याच्यमानाय दातव्यमल्पकालमृणं कृतम् ।

पूर्णेऽवधौ सान्त्वलाभमभावे च पितुः क्वचित्”—इति ॥

अनन्तरं ऋणग्रहणं‡ तस्य पितुरभावे पितृकृतमृणं सुतैरवश्यं दातव्यम् । अवश्यं दातव्यमित्यत्र हेतुमाह नारदः,—

---

* वार्छ्वे नष्टेन,—इति का० ।

† इत्यमेव पाठः सर्व्वत्र । मम तु, “अल्पकालमृणं देयं याचितं समन-न्तरम् । पूर्णेऽवधौ सावधौ तु सान्त्वलाभं विनिर्दिशेत् । धनिकर्णि-कयोरेवं विशुद्धिः स्यात् प्रतिश्रवम्”—इति । अल्पकालमदीर्घ-कालमृणं याच्यमानसमनन्तरमेव देयम् । सावधित्वेन कृतन्तु पूर्णे अवधौ सान्त्वलाभं देयम् । इति पाठोभवितुमर्हति, अन्योवा कोऽ-प्येवं विधः पाठः स्यात्,—इति प्रतिभाति । परं सर्व्वत्र दर्शनादस्य समएव पाठोमूले रक्षितः । एवं परत्र ।

‡ इत्य मेव पाः सर्व्वत्र ।

"इच्छन्ति पितरः पुत्रान् स्वार्थहेतोर्यतस्ततः ।
उत्तमर्णाधमर्णाभ्यां मामयं मोचयिष्यति ॥
अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः ।
ऋणात्पिता मोचनीयो यथा न नरकं व्रजेत्"—इति ।

उत्तममृणं, "जायमानोवै ब्राह्मणस्त्रिभिर्ऋणवान् जायते"—इति श्रुतिप्रतिपादितमृणम् । अधममृणं परहस्तात् कुसीदविधिना गृहीतम् । कात्यायनोऽपि,—

"ऋणात्तु सूनुभिर्जातैः दानेनैवाधमादृणात् ।
विमोक्षस्तु यतस्तस्मादिच्छन्ति पितरः सुतान्"—इति ।

जातेनेत्यभिधानान्न जातमात्रस्य ऋणमोचनेऽधिकारः, किन्तु प्राप्तव्यवहारस्येत्याह सएव,—

"नाप्राप्तव्यवहारस्तु पितर्य्युपरते क्वचित् ।
काले तु विधिना देयं वसेयुर्नरकेऽन्यथा"—इति ।

कश्चिद्विद्यमानेऽपि पितरि सुतैर्देयमित्याह सएव,—

"विद्यमानेऽपि रोगार्त्ते स्वदेशात्प्रोषिते तथा ।
विंशात्संवत्सराद्देयमृणं पितृकृतं सुतैः"—इति ।

वृहस्पतिरपि,—

"सान्निध्येऽपि पितुः पुत्रैः ऋणं देयं विभावितम् ।
जात्यन्धपतितोन्मत्तक्षयश्वित्रादिरोगिणः"—इति ।

ऋणदाने अधिकारिणं पुत्रं दर्शयति कात्यायनः,—

"ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवम् ।
द्रविणार्हस्य धूर्य्यस्य नान्यथा दापयेत्सुतम्"—इति ।

नारदोऽपि,—

"पितर्य्युपरते पुत्रा ऋणं दद्युर्यथांऽशतः।

विभक्ता वाऽविभक्ता वा यो वा तामुद्वहेद्धुरम्"—इति।

विभागोत्तरकालं पित्रा यदृणं कृतं, तत्केन देयमित्यपेक्षिते आह

कात्यायनः,—

"पितृणां विद्यमानेऽपि न च पुत्रो धनं हरेत्।

देयं तद्धनिके द्रव्यं मृते गृह्णंस्तु दाप्यते"—इति।

पित्रादिकृतर्णसमवाये दानक्रममाह बृहस्पतिः,—

"पित्र्यमादावृणं देयं पश्चादात्मीयमेवच।

तयोः पैतामहं पूर्वं देयमेवमृणं सदा"—इति।

पैतामहमृणं सममेव देयम्। तथाच सएव,—

"ऋणमात्मीयवत् पित्र्यं पुत्रैर्देयं च याचितम्।

पैतामहं समं देयमदेयं तत्सुतस्य च"—इति।

तत्सुतस्याऽगृहीतधनस्य प्रपौत्रस्य। एतदेव अभिप्रेत्य नारदः,—

"ऋणाद्व्याहृतं प्राप्तं पुत्रैर्य्यच्चर्णमुद्धृतम्।

दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्त्तते"—इति।

कात्यायनोऽपि,—

"पित्रभावेऽपि दातव्यमृणं पौत्रेण यत्नतः।

चतुर्थेन न दातव्यं तस्मात्तदिनिवर्त्तते"—इति।

देयमृणमनेन देयमित्यस्मिन्काले देयमित्येतत्त्रितयं याज्ञ-

वल्क्य आह,—

"पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपिवा।

पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम्”—इति।

अदेयमृणमाह वृहस्पतिः,—

“सौराक्षिकं वृथादानं कामक्रोधप्रतिश्रुतम्।

प्रातिभाव्यं दण्डशुल्कं शेषं यत्तन्न दापयेत्”—इति।

सुरापानार्थं यत्कृतं तत्सौरम्। द्यूतपराजयनिमित्तकं आक्षिकम्। वृथादानं धूर्त्तादिभ्यो यत्तु दत्तम्। कामक्रोधप्रतिश्रुतयोः स्वरूपं कात्यायनेन दर्शितम्,—

“लिखितं मुक्तकं वाऽपि देयं यत्तु प्रतिश्रुतम्।

परपूर्वस्त्रियै दत्तं विद्यात्कामकृतं नृणाम्॥

यत्र हिंसां समुत्पाद्य क्रोधाद्द्रव्यं विनाश्य च।

उक्तं तुष्टिकरं तत्तु विद्यात्क्रोधकृतं तु तत्”—इति।

मुक्तकं लेखनरहितम्। प्रतिभाव्यं दर्शनप्रातिभाव्यागतम्। तथाच मनुः,—

“प्रातिभाव्यं वृथादानमाक्षिकं सौरिकञ्च तत्।

दण्डशुल्कावशिष्टञ्च न पुत्रो दातुमर्हति”—इति।

दर्शनप्रातिभाव्ये तु नैष विधिः स्यात्।

“दण्डो वा दण्डशेषं वा शुल्कं तच्छेषमेव वा।

न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम्”।

कुटुम्बार्थे पितृव्यादिना कृतमृणं गृही दद्यादित्याह वृहस्पतिः,—

“पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः।

यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति”—इति।

नारदोऽपि,—

"शिष्यान्तेवासिदासस्त्रीप्रेष्यकृत्यकरैश्च यत्।
कुटुम्बहेतोरुत्क्षिप्तं दातव्यं तत्कुटुम्बिना"—इति।
शिष्योऽत्र विद्यार्थी। शिल्पशास्त्रार्थी अन्तेवासी। उत्क्षिप्तम-सन्निधानादिना स्वानुज्ञां विनाऽपि कृतमृणम्। कात्यायनोऽपि,—
"प्रोषितस्वामतेनापि कुटुम्बार्थमृणं कृतम्।
दासस्त्रीभ्रातृशिष्यैर्वा दद्यात्पुत्रेण वा पिता"—इति।
भृगुरपि,—
"ऋणं पुत्रकृतं पित्रा शोध्यं यदनुमोदितम्।
सुतस्नेहेन वा दद्यान्नान्यत्तद्दातुमर्हति*"—इति।
नारदोऽपि,—
"पितुरेव नियोगाद्वा कुटुम्बभरणाय च"—इति।
कुटुम्बव्यतिरिक्तर्णविषये याज्ञवल्क्यः,—
"न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता।
दद्यादृणं कुटुम्बार्थो न पतिः स्त्रीकृतं तथा"—इति।
न पुत्रेण कृतं पितेत्यस्य क्वचिदपवादमाह बृहस्पतिः,—
"कृतं वा यदृणं कृच्छ्रं दद्यात्पुत्रेण तत्पिता"—इति।
अत्र पुत्रग्रहणं कुटुम्बोपलक्षणार्थम्। पितृग्रहणञ्च प्रभोरुप-लक्षणार्थम्। तथाच कात्यायनः,—
"कुटुम्बार्थमशक्ते तु गृहीतं व्याधिनाऽथवा।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत्॥
कन्यावैवाहिकञ्चैव प्रेतकार्य्येषु यत्कृतम्।

* इत्यमेवं पाठः सर्व्वत्र। मम तु, दद्यान्नान्यथा दातुमर्हति,—इति पाठः प्रतिभाति।

एतत्सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः"—इति ।

न पतिः स्त्रीकृतं तथेत्यस्यापवादमाह याज्ञवल्क्यः,—

"गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।

ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया"—इति ।

योषित्पत्या कृतमृणं न दद्यादित्यस्यापवादमाह नारदः,—

"दद्यादपुत्रा विधवा नियुक्ता वा मुमूर्षुणा ।

या वा तद्रिक्थमादद्याद् यतो रिक्थमृणं ततः"—इति ।

याज्ञवल्क्योऽपि,—

"प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत् कृतम् ।

स्वयं कृतं वा यदृणं नान्यत् स्त्री दातुमर्हति"—इति ।

अप्रतिपन्नमपि तद्रिक्थग्रहणे स्त्रिया देयमित्याह कात्यायनः,—

"ऋणे कृते कुटुम्बार्थे भर्त्तुः कामेन या भवेत् ।

दद्युः तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि"—इति ।

अविभक्तैः कुटुम्बार्थे कृतमृणं कुटुम्बी दद्यात् । तस्मिन् प्रोषिते तद्रिक्थिनः सर्वे दद्युः । नारदोऽपि,—

"पितृव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतम् ।

मात्रा वा यत्कुटुम्बार्थे दद्युस्तत्सर्वमृक्थिनः"—इति ।

अनेकऋणदातृसमवाये याज्ञवल्क्यः,—

"रिक्थग्राही ऋणं दाप्यो योषिद्ग्राहस्तथैव च ।

पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः"—इति ।

यो यदीयं द्रव्यं रिक्थरूपेण गृह्णाति, स तत्कृतमृणं दाप्यः । तदभावे तु रागादिवशाद्यो यदीयां भार्य्यां गृह्णाति, स तत्कृतमृणं

दाप्यः। तदभावे अनन्याश्रितद्रव्यः पुत्र ऋणं दाप्यः। पुत्रहीनस्य रिक्थिनः ऋणं दाप्याः। एतेषां समवाये पाठक्रमादेव दाप्यः।

नन्वेतेषां समवाय एकदाऽनुपपन्नः। पुत्रे सत्यन्यस्य रिक्थग्राहित्वा-सम्भवात्। न च पुत्रे सत्यपि पितृभ्रात्रोः रिक्थहारित्वमिति वाच्यम्।

"न भ्रातरो न पितरः पुत्रे तद्रिक्थहारिणः।

यतो रिक्थहरा एते पुत्रहीनस्य रिक्थिनः"—इति

पुत्रे सति रिक्थग्राहित्वस्यास्तत्वात्। योषिद्ग्राहित्वमपि न सम्भवति,

"न द्वितीयस्य साध्वीनां क्वचिद्भर्त्तोपदिश्यते"—इति

तेनैवोक्तत्वात्। पुत्रोऽनन्याश्रितद्रव्यः,—इत्येतदप्यनर्थकम्। रि-क्थग्राही ऋणं दाप्यः,—इत्यनेनैकार्थत्वात्। पुत्रहीनस्य रिक्थिनः,—इत्येतदपि। पुत्रस्य रिक्थग्राहिण एव ऋणापाकरणाधिकारस्य रिक्थ-ग्राही ऋणं दाप्य इत्युक्तत्वात्,—इति।

तदेतदसङ्गतम्। सत्स्वपि क्लीवादिषु पुत्रेष्वन्यायवर्त्तिषु वा सवर्णपुत्रेषु पितृव्यादीनां रिक्थग्राहित्वसम्भवात्। क्लीवादीनां रिक्थग्राहित्वाभावं मनुराह,—

"अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा।

उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः"—इति।

सवर्णापुत्रस्यान्यायवृत्तस्य रिक्थायोग्यतां गौतम आह। "तथा सवर्णापुत्रोऽप्यन्यायवृत्तो न लभेतैकेषाम्"—इति। अतः पुत्रे सत्यपि रिक्थग्राही अन्यः सम्भवति। योषिद्ग्राही शास्त्रनिषिद्धोऽप्यतिक्रा-न्तनिषेधः सम्भवत्येव। तदाह नारदः,—

"परपूर्व्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम्।
पुनर्भूस्त्रिविधा तासां स्वैरिणी च चतुर्व्विधा॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता।
पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्म्मणा॥
देशधर्म्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्त्तिता॥
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता॥
स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति।
कामात् समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा॥
कौमारं पतिमुत्सृज्य त्वन्यं पुरुषमाश्रिता।
पुनः पत्युर्गृहं यायात् सा द्वितीया प्रकीर्त्तिता।
मृते भर्त्तरि तु प्राप्तान् देवरादीनपास्य या।
उपगच्छेत्परं कामात् सा तृतीया प्रकीर्त्तिता॥
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासाऽऽतुरा च या।
तवाहमित्युपगता सा चतुर्थी प्रकीर्त्तिता॥
अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम्।
ऋणं तयोः पतिकृतं दद्याद्यस्ते उपासितः"—इति।

यत्तु तेनैवोक्तम्,—

"या तु लब्धधनैव स्त्री सापत्या वाऽन्यमाश्रयेत्।
सोऽस्यादद्यादृणं भर्त्तुरुत्सृजेद्वा तथैव ताम्"—इति।

तदाश्रितभार्य्यादिविषयम्। अतएव कात्यायनः,—

"बालपुत्राऽधिकार्था वा भ्रातरं* याऽन्यमाश्रिता।
आश्रितस्तदृणं दद्याद्बालपुत्राविधिः स्मृतः"—इति।

यदपि नारदेनोक्तम्,—

"अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियम्।
ऋणं वोढुः स भजते सैव चास्य धनं स्मृतम्"—इति।

तत्, धनभागिनोः पुत्रयोषिद्ग्राहयोरभावे यः कोऽपि तदुपभोक्ता स ऋणं दद्यादित्येवं प्रतिपादनार्थम्। यद्वा, पुत्रहीनस्य रिक्थिन इत्यनेन पुत्राभावे योषिद्ग्राही दाप्य इत्युच्यते। रिक्थशब्देन सैव चास्य धनं स्मृतमिति योषितो विवक्षितत्वात्। अयमभिप्रायः। स्वैरिणीनामन्तिमायाः पुनर्भुवां प्रथमायाश्च स्वप्रधनायाः सापत्यस्त्रियाश्च ग्राहिणः अभावे पुत्रोदाप्यः, पुत्राभावे धनं निरपत्ययोषिद्ग्राही दाप्य इति। अतएव नारदः,—

"धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्।
पुत्रो धनस्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः"—इति।

धनस्त्रीहारिपुत्राणां समवाये धनहारी ऋणं दद्यात्। धनहारिणः स्त्रीहारिणश्चाभावे पुत्रएव दद्यात्। धनपुत्रहीनस्य रिक्थिनइत्यनेन पुत्रहीनस्योत्तमर्णस्य यो रिक्थी, तस्य धनस्त्रीहारिपुत्रऋणं दाप्य इत्युच्यते। तथाच नारदः,—

"ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति चेत्।
निर्वपेत् तत्सकुल्येषु तदभावेऽस्य बन्धुषु॥

---

* भर्त्तारं,—इति पु०।

यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः ।
तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत्”—इति ॥

इति ऋणादानप्रकरणम् ।

अथ निक्षेपाख्यस्य द्वितीयपदस्य विधिरुच्यते ।

तत्र निक्षेपस्वरूपं नारद आह,—

“स्वं द्रव्यं यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः ।
निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः”—इति ।

उपनिधिन्यासौ निक्षेपविशेषौ । तयोः स्वरूपमाह बृहस्पतिः,—

“अनाख्यातं व्यवहितमसङ्ख्यातमदर्शितम् ।
मुद्राङ्कितञ्च यद्दत्तन्तदौपनिधिकं स्मृतम् ।
राजचौरादिकभयाद् दायादानाञ्च वञ्चनात् ।
स्थाप्यतेऽन्यस्य यद्द्रव्यं न्यासः स परिकीर्त्तितः”—इति ।

रूपसङ्ख्याविशेषमकथयित्वा समयमन्यहस्ते रक्षणार्थं यत् स्थाप्यते, तद्द्रव्यमौपनिधिकम् । निक्षेपणविधिमाह मनुः,—

“कुलजे वृत्तसम्पन्ने धर्मज्ञे सत्यवादिनि ।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः”—इति ।

बृहस्पतिः,—

“स्थानं गृहं स्वजनञ्चैव तदर्थं विविधान् गुणान्* ।
सत्यं शौचं बन्धुजनं परीक्ष्य स्थापयेन्निधिम्”—इति ।

तस्य निक्षेपस्य पुनर्द्वैविध्यमाह नारदः,—

---

* स्थानं गृहं गृहस्थञ्च तद्धनं विभवं गुणान्,—इति पुस्तकान्तरे पाठः ।

"स पुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा।

प्रतिदानं तथैवास्य प्रत्ययः स्याद् विपर्य्यये"—इति।

वृहस्पतिरपि,—

"ससाक्षिकं रहोदत्तं द्विविधं तदुदाहृतम्।

पुत्रवत् परिपाल्यं तद्विनश्यत्यनवेक्षया॥

स्थापितं येन विधिना येन यच्च विभावितम्*।

तथैव तच्च दातव्यमदेयं प्रत्यनन्तरे"—इति।

स्थापकेतरस्य यस्य स्थापितद्रव्ये स्वाम्यमस्ति, स इह प्रत्यनन्तर-इत्युच्यते। मनुरपि,—

"यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः।

स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः"—इति।

दायो दानं स्थापनमिति यावत्। ग्रहो ग्रहणम्। पालयितुः फलमाह वृहस्पतिः,—

"ददतो यद्भवेत्पुण्यं हेमरूप्याम्बरादिकम्।

तत् स्यात् पालयतो न्यासं तथैव शरणागतम्"—इति।

भक्षकस्य च दोषस्तेनैव दर्शितः,—

"भर्तृद्रोहे यथा नार्य्याः पुंसः पुत्रसुहृद्वधे।

दोषोभवेत्तथा न्यासे भक्षितोपेक्षिते नृणाम्"—इति।

दैवाद्युपघाते तु न दोष इत्याह वृहस्पतिः,—

"राजदैवोपघातेन यदि तन्नाशमाप्नुयात्।

ग्रहीतृद्रव्यसहितं तत्र दोषो न विद्यते"—इति।

---

* यथाविधि,—इति पुस्तकान्तरे पाठः।

गृहीतुरितिशेषः। राजशब्देनाशमाधेयनिमित्तमुपलक्ष्यते।
अतएव कात्यायनः,—

"अराजदैविकेनापि निक्षिप्तं यत्र नाशितम्।

गृहीतुः सह भाण्डेन दातुर्नष्टं तदुच्यते"—इति।

नारदः,—

"गृहीतुः सह योऽर्थेन नष्टो नष्टः स दायिनः।

दैवराजकृते तद्वत्र चेत् तज्जिह्मकारितम्"—इति।

दैवग्रहणं तस्करोपलक्षणार्थम्। अतएव याज्ञवल्क्यः,—

"न दाप्योऽपहृतं तत्तु राजदैविकतस्करैः"—इति।

मनुरपि,—

"चौरैर्हृतं जलेनोढ़मग्निना दग्धमेवच।

नदद्याद्यदि तस्मात्स न संहरति किञ्चन"—इति।

यदि तस्माद्धनात् स्तोकमपि स गृह्णाति, तदा दद्यादित्यर्थः।
तथाच सएव,—

"समुद्रे नाप्नुयात् किञ्चित् यदि तस्मान्न संहरेत्"—इति।

क्वचित् केनचित् हेतुना नष्टमपि गृहीता मूलदारेण न दाप्य-
इत्याह कात्यायनः,—

"ज्ञात्वा द्रव्यवियोगन्तु दाता यत्र विनिक्षिपेत्।

सर्वापायविनाशेऽपि गृहीता नैव दाप्यते"—इति।

उपेक्षादिना नाशे तु वृहस्पतिराह,—

"भेदेनोपेक्षया न्यासं गृहीत्वा यदि नाशयेत्।

न दद्याद्याच्यमानो वा दाप्यस्तं सोदयं भवेत्"—इति।

कात्यायनोऽपि,—

"न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितम्।

अज्ञाननाशितञ्चैव येन दाप्यः सएव तत्"—इति।

अत्र विशेषमाह व्यासः,—

"भक्षिते सोदयं दाप्यः समं दाप्य उपेक्षिते।

किञ्चिदूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशितम्"—इति।

याचनानन्तरं अदत्तस्य पश्चाद्दैवराजोपघाते स्थापकाय मूल्यमात्रं देयम्। तथाच व्यासः,—

"याचनानन्तरं नाशे दैवराजकृतेऽपि सः।

गृहीता प्रतिदाप्यः स्यात्"—इति।

मूल्यमात्रमिति शेषः। प्रत्यर्पणविलम्बमात्रापराधेन वृद्धिदानायोगात्। याचनानन्तरमदाने दण्डमाह नारदः,—

"याच्यमानस्तु यो दातुर्निक्षेपं न प्रयच्छति।

दण्ड्यः स राज्ञा भवति नष्टे दाप्यश्च तत्समम्"—इति।

यः पुनः स्थापकाननुज्ञया निक्षेपं प्रभुङ्क्ते, तस्य दण्डमाह सएव,—

"यथार्थं साधयेत्तेन निक्षेप्तुरननुज्ञया।

तत्रापि स भवेद्दण्ड्यस्तञ्च सोदयमावहेत्"—इति।

याज्ञवल्क्योऽपि,—

"आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तञ्चापि सोदयम्"—इति।

बृहस्पतिरपि,—

"न्यासद्रव्येण यः कश्चित् साधयेदात्मनः सुखम्*।

* साधयेद्वा कार्य्यमात्मनः,—इति का०।

दण्ड्यः स राज्ञा भवति दाप्यस्तचापि सोदयम्”—इति ।

अत्र दण्डोऽपि समएव ग्राह्यः । तदाह मनुः,—

“निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दमम् ।

तथोपनिधिहर्त्तारं विशेषेणैव पार्थिवः”—इति ।

बृहस्पतिरपि,—

“गृहीतं निह्नुते यत्र साक्षिभिः शपथेन वा ।

विभाव्य दापयेन्न्यासं तत्समं विनयं नृपः”—इति ।

स्थापकस्यानृतवादित्वे दण्डमाह मनुः,—

“निक्षेपो ह्यनिवेद्यो यः धनवान् कुलसन्निधौ ।

तावानेव स विज्ञेयो विब्रुवं दण्डमर्हति”—इति ।

ससाक्षिनिक्षेपे साक्षिवचनविरुद्धं न दण्ड्यः । असाक्षिके तु बृह-स्पतिराह,—

“रहो दत्ते निधौ यत्र विसंवादः प्रजायते ।

विभावकं तत्र दिव्यमुभयोरपि च स्मृतम्”—इति ।

ग्रहीतृस्थापकयोरनृतवादित्वे दण्डमाह मनुः,—

“निक्षेपस्यापहर्त्तारं अनिक्षेप्तारमेव च ।

सर्वैरुपायैरन्विच्छेत् शापयेच्चैव वैदिकैः ॥

यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।

तावुभौ चौरवच्छास्यौ प्रदाप्यौ तत्समं दमम्”—इति ।

निक्षिप्तद्रव्यमकाले ददतो द्विगुणोदण्डः । तदाह कात्यायनः,—

“ग्राह्यस्तूपनिधिः काले कालहीनन्तु वर्जयेत् ।

कालहीनं ददद्दण्डं द्विगुणञ्च प्रदाप्यते”—इति ।

यन्नयादुपनिधिरन्यस्य हस्ते न्यस्तः, तन्नयातीते काले च ग्राह्यः। तन्नयातीतेऽपि काले स्वयमेव नार्पणीयः। "सन्नद्दयाचनेऽर्पयेत्"— इति बृहस्पतिस्मरणात्। तन्नये वर्त्तमाने स्वयमेव दीयमानं कालहीनम्। तद्दानमिष्टं नैवेति तद्ददतोऽपि दण्डोयुक्तः। यस्तु बलावष्टम्भेन निक्षेपं न ददाति, तं राजा निगृह्य दापयेदित्याह मनुः,—

"येषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि।
इत्यं निगृह्य दाप्यः स्यादिति धर्मस्य धारणा॥
निक्षिप्तस्य धनस्यैव प्रीत्योपनिहितस्य च।
कुर्य्याद्विनिर्णयं राजाऽप्रक्षिण्वन्न्यासधारिणम्"—इति।

अप्रक्षिण्वन् अताड़यन्। यदा तु स्वयमेव न दद्यात्, तदा प्रत्यनन्तरं प्रत्याह सएव,—

"अच्छलेनैव वाऽन्विच्छेत्तमर्थं प्रीतिपूर्वकम्।
विचार्य्य तस्य वा वृत्तं साम्नैव परिसाधयेत्"—इति।

निक्षेपेऽभिहितं धर्मं याचितादिष्वतिदिशति नारदः,—

"एषएव विधिर्दृष्टो याचितान्वाहितादिषु।
शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैवच"—इति।

याज्ञवल्क्योऽपि,—

"याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः"—इति।

याचितमुत्सवादिषु परकीयमलङ्काराद्यर्थम्। अन्वाहितं स्वस्मिन् स्थितं परधनं धनिकान्तरस्य तथा कृतम्। न्यासनिक्षेपौ पूर्वमेवाभिहितौ। बृहस्पतिरपि,—

"अन्वाहिते याचितके शिल्पिन्यासे सबन्धके।

एषएवोदितो धर्मस्तथाच शरणागते"—इति ।

शिल्पिन्यासोनाम, अङ्गुलीयकरणाय स्वर्णकारादिहस्तसमर्पितः। अनेनायाचितस्य शिल्पिहस्तन्यस्तस्य दैवराजोपघातेन विनाशे स्वर्णकारप्रभृतयस्तदा न दाप्या इत्युक्तं भवति। अत्रापवादमाह कात्यायनः,—

"येन संस्क्रियते न्यासो दिवसैः परिनिश्चितैः ।
तदूर्द्ध्वं स्थापयन् शिल्पी दाप्यो दैवहतेऽपि तम्"—इति ।

नैर्मल्यार्थं रजकादिन्यस्तवस्त्रादिविषयेऽप्याह सएव,—

"न्यासदोषाद्विनाशः स्याच्छिल्पिनस्तन्न दापयेत् ।
दापयेच्छिल्पिदोषात्तत् संस्कारार्थं यदर्पितम्"—इति ।

यच तन्त्वादिकं वस्त्राद्यर्थं कुविन्दादौ न्यस्तं, खण्डपटादिदशायां नष्टं, परिपूर्णदशायां वा कुविन्दादिना दीयमानं स्वामिना न गृहीतं नष्टञ्च, तत्राप्याह सएव,—

"स्वल्पेनापि च यत्कर्म नष्टं चेद्भृतकस्य तत् ।
पर्य्याप्तं दित्सतस्तस्य विनश्येत्तदगृह्णतः"—इति ।

स्वल्पेन प्रान्तरचनादिना विकलं नष्टञ्चेत्, भृतकस्य शिल्पिनो नष्टम्। पुनर्वेतनग्रहणमन्तरेणैव रचनादिक्रियां कुर्य्यादित्यर्थः। यदि स्वामी पुनस्तन्त्वादिकं नार्पयति, तदा पुनर्वानाद्यभावे वेतनं शिल्पिने दत्तं दाता न लभते। पर्य्याप्तं परिपूर्णवस्त्रादिकं, आदित्सतो-भृतकस्य यः स्वामी, तस्य दीयमानमगृह्णतस्तत्पर्य्याप्तं विनश्यति। याचितकविषयेऽपि विशेषस्तेनैवोक्तः,—

"यदि तत्कार्य्यमुद्दिश्य कालं परिनियम्य वा ।

याचितोऽर्द्धं हृते तस्मिन्नप्राप्तं न तु दाप्यते"—इति ।

यत्तु कार्य्यं दीर्घकालसाध्यं, तत्कार्य्यार्थं यदि याचितः, यदि वा संवत्सरपर्य्यन्तं दीयतामित्येवं कालं परिनियम्य याचेत, तत्र कार्य्यमध्ये परिनियतकालमध्ये वा प्रतियाच्यमानो याचितकं न ददाति ; असौ न सोदयं दाप्यः । याचितकमात्रमेवासौ हृते कार्य्ये परिनियतकालात्यये वा दद्यात् । यदि तदाऽपि न ददाति, तदा दैवादितोविनाशे जाते मूल्यं देयमित्यर्थः । आह सएव,—

"अथ कार्य्यविपत्तिस्तु तथैव स्वामिनो भवेत् ।
अप्राप्ते चैव काले तु दाप्यस्त्वर्द्धं हृतेऽपि तत्"—इति ।

इति निक्षेपप्रकरणम् ।

अथास्वामिविक्रयः ।

तस्य स्वरूपमाह नारदः,—

"निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वाऽपहृत्य वा ।
विक्रीयेतासमक्षं* यत्स ज्ञेयोऽस्वामिविक्रयः"—इति ।

बृहस्पतिरपि,—

"निक्षेपान्वाहितन्यासहृतयाचितबन्धकम् ।
उपांशु येन विक्रीतमस्वामी सोऽभिधीयते"—इति ।

अस्वामिना कृतो व्यवहारो निवर्त्तते इत्याह कात्यायनः,—

"अस्वामिविक्रयं दानमाधिं च विनिवर्त्तयेत्"—इति ।

---

* विक्रीयतेऽसमक्षं,—इति ग्रन्थान्तरधृतः पाठः ।

नारदोऽपि,—

"अस्वामिना कृतो यस्तु क्रयो विक्रयएवच।

अकृतः स तु विज्ञेयो व्यवहारेषु नित्यशः"—इति।

ततश्चास्वामिविक्रये याज्ञवल्क्यः,—

"हृतं प्रनष्टं यद्द्रव्यं परहस्तादवाप्नुयात्।

अनिवेद्य नृपे दण्ड्यः स तु षस्नवतिं पणान्"—इति।

यदा पुनः परहस्तादवाप्नुयात्स धनस्वामी, तदा स्वाह सएव,—

"नष्टापहृतमासाद्य हर्त्तारं ग्राहयेन्नरम्।

देशकालातिपत्तौ वा गृहीत्वा* स्वयमर्पयेत्"—इति।

नष्टमपहृतं वा स्वकीयद्रव्यं अधिगन्तुरपहर्त्तुर्वा हस्ते दृष्ट्वा अधिगन्तारमपहर्त्तारं वा राजपुरुषादिभिर्ग्राहयेत् पुरुषः; राजाद्यानयनार्थं देशकालातिक्रमश्चेद्भवति, तदा स्वयमेव गृहीत्वा राज्ञे समर्पयेदित्यर्थः। यदा पुनर्विक्रयार्थमेव स्वकीयं द्रव्यं क्रेतुर्हस्ते पश्यति, तदाऽप्याह सएव,—

"स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते।

हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः"—इति।

स्वामी स्वसम्बन्धिद्रव्यमन्यविक्रीतं यदि पश्यति, तदा लभेत गृह्णीयात्। अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात्। क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति। हीनाद्द्रव्यागमोपायहीनात् रहएकान्ते हीनमूल्ये अल्पतरेण द्रव्येणाधिकमूल्ये वेलाहीने रात्र्यादौ

* गृहीता,—इति ग्रन्थान्तरधृतः पाठः।

कृते क्रये च स चोरो भवति। तस्करवद्दण्ड्यो भवतीत्यर्थः। यथोक्तं मनुना,—

"द्रव्यमस्वामिविक्रीतं प्राक् राज्ञे विनिवेदितम्।

न तत्र विद्यते दोषः स्तेनः स्यादुपविक्रये"—इति।

येन क्रेत्रा हीनमूल्येन क्रयात् प्रागेव राज्ञे निवेदितं, न तत्र दोषः। उपविक्रयशब्दस्यार्थस्तेनैव दर्शितः,—

"अन्तर्गृहे वहिर्ग्रामान्निशायामसतो जनात्।

हीनमूल्यञ्च यत्क्रीतं ज्ञेयोऽसावुपविक्रयः"—इति।

असतोजनात् चण्डालादेरित्यर्थः। असद्ग्रहणं स्वाम्यननुज्ञाताद्युपलक्षणार्थम्। अतएव नारदः,—

"अस्वाम्यनुमताद्दासादसतश्च जनाद्रहः।

हीनमूल्यमवेलायां क्रीणंस्तद्दोषभाग्भवेत्"—इति।

कात्यायनः,—

"नाष्टिकस्तु प्रकुर्व्वीत तद्धनं ज्ञातृभिः स्वकम्"—इति।

नाष्टिको नष्टधनः, तद्धनं नष्टधनं, ज्ञातृभिः साक्ष्यादिभिः, प्रकुर्वीत साधयेदित्यर्थः। आह याज्ञवल्क्यः,—

"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा।

पञ्चबन्धोदमस्तत्र राज्ञस्तेनाविभाविते"—इति।

आगमस्तु स्मृत्यन्तरेऽभिहितो द्रष्टव्यः,—

"लब्धं दानक्रयप्राप्तं शौर्य्यं वैवाहिकं तथा।

बान्धवादप्रजातस्य षड्विधस्तु धनागमः"—इति।

स्वकीयधनस्य स्वकीयत्वानपगतिरपि दानाद्यभावेन साधनीये-

त्याह कात्यायनः,—

"अदत्त्वात्यकविक्रीतं कृत्वा स्वं लभते धनम्"—इति ।

अथैतद्दत्तन्यकं विक्रीतस्य न भवतीति प्रमाणैः प्रसाध्य स्वकीयं धनं नाष्टिकः विक्रेत्रादेः सकाशाल्लभते इत्यर्थः । पत्रविषये* विशेषमाह बृहस्पतिः,—

"पूर्वस्वामी तु तद्द्रव्यं यदाऽऽगत्य विभावयेत् ।

तत्र मूलं दर्शनीयं क्रेतुः शुद्धिस्ततो भवेत्"—इति ।

मूलं विक्रेता । विक्रेतुर्दर्शनानन्तरं व्यासः,—

"मूले समाहृते क्रेता नाभियोज्यः कथञ्चन ।

मूलेन सह वादस्तु नाष्टिकस्य तदा भवेत्"—इति ।

यदा तु मूलभूतो दर्शितोविक्रेता न किञ्चिदुत्तरं ददाति, तदात्वाह बृहस्पतिः,—

"विक्रेता दर्शितो यत्र विहीनो व्यवहारतः ।

क्रेतृराज्ञोर्मूल्यदण्डौ प्रदद्यात् स्वामिनोधनम्"—इति ।

यदा तु मूलभूतोविक्रेता देशान्तरङ्गतः, तदा कात्यायन आह,—

"मूलानयनकालस्तु देयो योजनसङ्ख्यया ।

प्रकाशं प्रक्रयं कुर्य्यात् साक्षिभिर्ज्ञातिभिः स्वकैः ॥

न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुषी ।

प्रसाधिते क्रये राज्ञा वक्तव्यः स न किञ्चन"—इति ।

अयमर्थः । यस्तु क्रेता कालविलम्बेनापि मूलं दर्शयितुं न

---

* यत्र विषये,—इति का० । मम तु, अत्र विषये,—इति पाठः प्रतिभाति ।

प्नोति, क्रयप्रकाशनञ्च करोति, स नराधमः। तस्माच्च नाष्टिकोधनं लभते इति। तदुक्तं मनुना,—

"अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितम्।

अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम्"—इति।

क्रेतुः सकाशाद्धनग्रहणमर्द्धमूल्यं दत्त्वैव। तथाच कात्यायनः,—

"वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः।

अविज्ञाताश्रयात् क्रीतं विक्रेता यत्र वा मृतः॥

स्वामी दत्त्वाऽर्द्धमूल्यन्तु प्रगृह्णीयात्स्वकं धनम्"—इति।

अविज्ञाताश्रयादविज्ञातस्थानकादित्यर्थः। क्रयप्रकाशनपक्षयोः* सति सम्भवे मूलानयनपक्षएव ग्राह्यः। तदुक्तं कात्यायनेन,—

"यदा मूलमुपन्यस्य पुनर्वादी क्रयं वदेत्।

आहरेत् मूलमेवासौ न क्रयेण प्रयोजनम्॥

असमाहार्य्यमूलस्तु क्रयमेव विशोधयेत्"—इति।

यदा मूलदर्शनं क्रयप्रकाशनं वा न करोति, तदा दण्ड्य इत्याह सएव,—

"अनुपस्थापयन्मूलं क्रयं वाऽप्यविशोधयन्।

यथाऽभियोगं धनिने धनं दाप्योदमञ्च सः"—इति॥

नाष्टिकविप्रयोगमाह सएव,—

"यदि स्वं नैव कुरुते ज्ञातिभिर्नाष्टिको धनम्।

प्रसङ्गविनिवृत्यर्थं चोरवद्दण्डमर्हति"—इति।

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, मूलानयनक्रयप्रकाशनपक्षयोः,—इति पाठः प्रतिभाति।

यत्तु प्रकाशिते क्रये क्रेतुः स्वत्वप्रतिपादकं मरीचिवचनम्,—
"वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः।
दिवा गृहीतं यत् क्रेता स शुद्धो लभते धनम्"—इति।
तदेवं नाष्टिकेन साधितद्रव्यविषयम्*। अन्यथा, अथ मूलमनाहार्य्यम्,—इति प्रागुदाहृतमनुवचनविरोधप्रसङ्गात्। यदा क्रेता साक्ष्यादिभिः क्रयं न विभावयति, नाष्टिकोऽपि स्वकीयत्वं, तदा निर्णयमाह बृहस्पतिः,—
"प्रमाणहीनवादे तु पुरुषापेक्षया नृपः।
समन्यूनाधिकत्वेन स्वयं कुर्य्याद्विनिर्णयम्"—इति।
ननु मानुषप्रमाणाभावेऽपि दिव्यस्य विद्यमानत्वात्प्रमाणहीनवादएव न सम्भवति। उच्यते। अस्वस्वामिविक्रयविवादे दिव्याभावात् तथा†।
"प्रकाशं च क्रयं कुर्य्यात् साधुभिर्ज्ञातिभिः स्वकैः।
न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुषी॥
अभियोक्ता धनं कुर्य्यात् प्रथमं ज्ञातिभिः स्वकम्।
पश्चादात्मविशुद्ध्यर्थं क्रयं क्रेता स्वबन्धुभिः"॥—इति
वचनेन साक्षीतरप्रमाणाभावोऽवगम्यते। तदेवाह कात्यायनः,—
"अर्द्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः।
अविज्ञातक्रयोदोषस्तथा चापरिपालनम्॥

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, तदेवं नाष्टिकेनासाधितद्रव्यविषयम्,—इति पाठः प्रतिभाति।

† अस्मिन्नस्वामिविक्रये दिव्याभावान्न तथा,—इति का०।

एतद्द्वयं समाख्यातं द्रव्यहानिकरं बुधैः ।
अविज्ञातस्थानकृतक्रेतृनाष्टिकयोर्द्वयोः”—इति ।

अस्वामिविक्रेतुरिव स्वाम्यदत्तमुपभुञ्जानस्य दण्डमाह नारदः,—

“उच्छिष्टमेव भोक्तव्यं स्त्री पशुर्वसुधाऽपि वा”—इति ।

*अविज्ञानात् क्रयोऽविज्ञातक्रयः । अथवा परमार्थतोऽयं स्वामी-
त्यज्ञानात्क्रयोऽविज्ञातक्रयः* । मरीचिरपि,—

“अविज्ञातनिवेशत्वाद्यत्र मूल्यं न विद्यते ।
हानिस्तत्र समा कल्प्या क्रेतृनाष्टिकयोर्द्वयोः ॥
अनर्पितन्तु यो भुङ्क्ते भुक्तभोगं प्रदापयेत् ।
अनिर्दिष्टन्तु यद्द्रव्यं वासचेलघटादिकम् ॥
स्वबलेनैव भुञ्जानः चोरवद्दण्डमर्हति ।
अनड्वाहं तथा धेनुं नावं दासं तथैव च ॥
अनिर्दिष्टं स भुञ्जानो दद्यात्पणचतुष्टयम् ।
दासी नौका तथा धुर्य्या यन्त्रकं नोपभुज्यते ।
उपभोक्ता तु तद्द्रव्यं पणेनैव विशोधयेत् ॥
दिवसे द्विपणं दासीं धेनुमष्टपणं तथा ।
त्रयोदशमनड्वाहं मत्स्यं भूमिञ्च षोडश ॥
नौकामश्वञ्च धेनुञ्च स्त्राङ्गलं कार्म्मिकस्य च ।
बलात्कारेण यो भुङ्क्ते दाप्यश्चाष्टपणं दिने ॥

---

* अयं ग्रन्थः, अस्वामिविक्रेतुरिवेत्यादिग्रन्थात् पूर्व्वं भवितुमुचितः । परमादर्शपुस्तकेषु दर्शनादत्रैव रक्षितः ।

† इत्थमेव पाठः सर्व्वत्र । मम तु, मूल्यं,—इति पाठः प्रतिभाति ।

उलूखले पणार्द्धन्तु मुसलस्य पणद्वयम्।
शूर्पस्य च पणार्द्धन्तु द्वैविध्यं मुनिरब्रवीत्"—इति।

अस्वामिविक्रयाख्यं पदं समाप्तम्।

अथ सम्भूयसमुत्थानाख्यं पदमुच्यते।

तस्य स्वरूपमाह नारदः,—

"वणिक्प्रभृतयो यत्र क्रयं* सम्भूय कुर्वते।
तत्सम्भूयसमुत्थानं व्यवहारपदं स्मृतम्"—इति।

तत्राधिकारिणो दर्शयति बृहस्पतिः,—

"कुलीनदक्षानलसैः प्राज्ञैः नाणकवेदिभिः।
आयव्ययज्ञैः शुचिभिः शूरैः कुर्य्यात्सह क्रियाम्"—इति।

क्रियां कृषिवाणिज्यशिल्पिक्रतुसङ्गीतस्तैन्यात्मिकाम्। नाणकविज्ञानं वाणिज्यक्रियायामुपयुज्यते। आयव्ययज्ञानमात्रं कृषिक्रियायाम्। सङ्गीतादिशिल्पक्रियायां प्राज्ञत्वमुपयुज्यते। क्रतुक्रियायां तु कुलीनत्वप्राज्ञत्वशुचित्वादि। स्तैन्यक्रियायां शूरत्वमात्रम्। दक्षत्वानलसत्वे तु सर्वत्रोपयुज्येते। अतएवादक्षादि निषेधति स एव,—

"अशक्तालसदुर्बुद्धिमन्दभाग्यनिराश्रयैः।
वाणिज्याद्याः सहैतैस्तु न कर्त्तव्या बुधैः क्रियाः"—इति।

ये तु सम्भूय वाणिज्यादिक्रियां कुर्वन्ति, ते द्रव्यानुसारेण लाभभाजः। तथाच बृहस्पतिः,—

"प्रयोगं कुर्वते ये तु हेमधान्यरसादिना।

---

* क्रमं,—इति क०। कर्म,—इति ग्रन्थान्तरधृतस्तु पाठः समीचीनः।

समन्यूनाधिकैरंशैर्लाभस्तेषां तथाविधः"—इति।

लाभवदेव व्ययादिरपि तथैवेत्याह स एव,—

"समन्यूनाधिकोवाऽंशो येन क्षिप्तस्तथैव सः।
व्ययं दद्यात्कर्म कुर्य्यात्ततस्तेषां* तथाविधः"—इति।

द्रव्यानुसारेण लाभ इत्यस्यापवादमाह याज्ञवल्क्यः,—

"समवायेन वणिजां लाभार्थं कर्म कुर्वताम्।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ"—इति।

संविदा समयेन पुरुषविशेषानुसारेण, कृतौ कल्पितौ लाभालाभौ ज्ञेयौ, न तु द्रव्यानुसारेणेत्यर्थः। सम्भूयकारिणां कर्त्तव्यमाह व्यासः,—

"समक्षमसमक्षं वाऽवञ्चयन्तः परस्परम्।
नानापण्यानुसारात्ते प्रकुर्य्युः क्रयविक्रयौ॥
अगोपयन्तो भाण्डानि शुल्कं दद्युश्च तेऽध्वनि।
अन्यथा द्विगुणं दाप्यः शुल्कस्थानात् वहिः स्थिताः"—इति।

नारदोऽपि,—

"भाण्डपिण्डव्ययोद्धारभारसाराद्यवेक्षणम्[(१)]।
कुर्य्युस्तेऽव्यभिचारेण समये स्वे व्यवस्थिताः"—इति।

---

* इत्यमेव पाठः सर्व्वत्र। मम तु, कुर्य्यात् लाभस्तेषां,—इति पाठः प्रतिभाति। कुर्य्यात् लाभं गृह्णीत चैवहि,—इति ग्रन्थान्तरधृतः पाठः।

---

(१) भाण्डं क्रय्यविक्रय्यसमूहः। पिण्डं पाथेयम्। व्ययोवेतनम्। उद्धारस्तस्मात् देयद्रव्यात् प्रयोजनविशेषादाकर्षणम्। भारजड्राद्यः। सारं प्रकृष्टं चन्दनादि। अन्ववेक्षणं रक्षणयोजनादि। इति विवादरत्नाकरीया व्याख्या।

सम्भूयकारिणां परस्परं विवादनिर्णयप्रकारमाह बृहस्पतिः,—

"परीक्षकाः साक्षिणश्च तएवोक्ताः परस्परम्।

सन्दिग्धेऽर्थे वञ्चनायां ते न चेद् द्वेषसंयुताः* ॥

यः कश्चिद्वञ्चकस्तेषां विज्ञातः क्रयविक्रये।

शपथैः स विशोध्यः स्यात् सर्ववादेष्वयं विधिः"—इति।

दैवराजकृतद्रव्यहानिविषयेऽप्याह सएव,—

"क्षयहानिर्यदा तत्र दैवराजकृताद्भवेत्।

सर्वेषामेव सा प्रोक्ता कल्पनीया यथाऽंशतः"—इति।

क्षयाद्येव हानिः क्षयहानिः, न तु क्षयाद्यर्थो व्ययः। प्रातिस्विक-दोषेण द्रव्यनाशे सएवाह,—

"अनिर्दिष्टो वार्य्यमाणः प्रमादाद्यस्तु नाशयेत्।

तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम्"—इति।

अनिर्दिष्टः समवाय्यः, न तु अनुज्ञातः। चौरादिभ्यः पालयितु-र्लाभाधिक्यमस्तीत्याह कात्यायनः,—

"चौरतः सलिलादग्नेर्द्रव्यं यस्तु समाहरेत्।

तस्यांशो दशमो देयः सर्वद्रव्येष्वयं विधिः‡"—इति।

समाहरेत् स्वशक्त्या परिपालयेत्।

यस्तु समवायिभिः प्रयुक्तं धनं समवायिभिः सह प्रतिपादना-दिभिः न साधयति, तस्य लाभहानिः। तदाह बृहस्पतिः,—

---

* न चेद्विद्वेषसंयुताः,—इति ग्रन्थान्तरधृतः पाठः।

† प्रवासार्थं,—इति का०।

‡ तस्यांशं दशमं दत्वा स्वकीयस्ते ततोऽपरम्,—इति पाठान्तरम्।

"समवेतैस्तु यद्दत्तं प्रार्थनीयं* तथैव तत्।
न याचते च यः कश्चित् लाभात्स परिहीयते"—इति।

सर्वानुगतः सर्वेषां कार्य्यमेकएव कुर्य्यात्। तदाह सएव,—

"बहूनां सम्मतो यस्तु दद्यादेकोधनं नरः।
करणं कारयेद्वाऽपि सर्वैरेव कृतम्भवेत्"—इति।

करणान्तरस्थादिकम्†। सम्भूयकारिणामृत्विजां कर्त्तव्यमाह मनुः,—

"ऋत्विजः समवेतास्तु यथा यज्ञे निमन्त्रिताः।
कुर्य्युर्यथाऽर्हतः कर्म गृह्णीयुर्दक्षिणान्तथा"—इति।

तथेति कर्मानुसारेण दक्षिणां गृह्णीयुरित्यर्थः। तथाच सएव,—

"सम्भूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः।
अनेन कर्मयोगेन कर्त्तव्यांशप्रकल्पयेत्"—इति।

इयं चांशकल्पना "तस्य द्वादशशतं दक्षिणा"—इत्येवं क्रतुसम्बन्धित्वेनैव विहितायां दक्षिणायामेव, न ऋत्विग्विशेषोल्लेखेन विहितायाम्। अतएवोक्तं तेनैव,—

"रथं हरेत वाऽध्वर्य्युर्ब्रह्माऽऽधाने च वाजिनम्।
होता हरेत्तथैवाश्वं उद्गाता चाप्यनः क्रये(१)"—इति।

दक्षिणांशप्रकल्पनामाह सएव,—

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, साधनीयं,—इति पाठः प्रतिभाति।

† करणं लेख्यादिकम्,—इति विवादरत्नाकरव्याख्या।

---

(१) केषांचिच्छाखिनामाधाने अध्वर्य्यवे रथआम्नायते, ब्रह्मणे वेगवानश्वः, होत्रे चाश्वः, उद्गात्रे सोमोद्वाहकमनः शकटम्। इति चण्डेश्वरीया व्याख्या।

"सर्वेषामर्धिनोमुख्यास्तदर्धेनार्धिनोऽपरे।
तृतीयिनस्तृतीयांशास्तुरीयांशास्तु पादिनः"—इति।

सर्वेषां षोड़शर्त्विजां मध्ये मुख्याश्चत्वारोहोत्रध्वर्य्युब्रह्मोद्गातारः। ते गोशतस्यार्धिनः, सर्वेषां भागपरिपूर्णोपपत्तिवशादायातादष्टाचत्वारिंशद्रूपार्द्धेणार्द्धभाजः। अपरे मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्द्धिनः धनमुख्यांशस्यार्द्धेन चतुर्विंशतिरूपेणार्द्धभाजः। ये पुनस्तृतीयिनोऽच्छावाकनेष्टृग्नीध्रप्रतिहर्त्तारस्ते तृतीयिनोमुख्यांशस्य षोड़शगोरूपतृतीयांशभाजः। ये पादिनो ग्रावस्तोतृनेतृपोतृसुब्रह्मण्यास्ते मुख्यस्य भागस्य चतुर्थांशेन द्वादशगोरूपेणांशभाजः। मुख्यानां चतुर्णां मिथोविभागः समत्वेनैव। एवं तदनन्तरादीनामपि मिथोविभागः। तथाच कात्यायनसूत्रम्। "द्वादश द्वादशाद्येभ्यः षट्षट्द्वितीयेभ्यः चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्रः इतरेभ्यः"—इति। स्वकीयकर्मकलापस्याशक्त्याऽकरणे कृतानुसारेण भागोदेयइत्याह मनुः,—

"ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्।
तस्य कर्मानुरूपेण देयोऽंशः सहकर्तृभिः"—इति।

सहकर्तृभिः, सम्भूयकारिभिरित्यर्थः। कृतकर्मांशानुसारेण दक्षिणां दद्यादित्युक्तम्। तस्य क्वचिदपवादमाह सएव,—

"दक्षिणासु प्रदत्तासु स्वकर्म परिहापयन्।
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत्"—इति।

अन्येन स्वस्वगणवर्त्तिनां मध्ये प्रत्यासन्नेन। कर्ममध्ये ऋत्विक्करणे* नारद आह,—

* इत्थमेव पाठः सर्व्वत्र। मम तु, ऋत्विङ्मरणे,—इति पाठः प्रतिभाति।

"ऋत्विजां व्यसनेऽप्येवमन्यस्तत्कर्म्म विस्तरेत्।

लभते दक्षिणाभागं स तस्मात्सम्प्रकल्पितम्"—इति।

सम्भूयकारिणां कृषिकराणां कर्त्तव्यमाह बृहस्पतिः,—

"पर्वते नगराभ्यासे तथा राजपथस्य च।

ऊषरं मूषिकव्याप्तं चेत्रं यत्नेन वर्जयेत्"—इति।

वाह्यविवर्ज्जनीयानाह सएव,—

"कृशातिवृद्धं चुद्रं च रोगिणं प्रपलायिनम्।

काणं खञ्जं विनाऽऽदद्यात् वाह्यं प्राज्ञः कृषीवलः"—इति।

प्रातिस्विकदोषात् फलहानौ विशेषमाह सएव,—

"वाह्यबीजात्ययाद्यस्य चेत्रहानिः प्रजायते।

तेनैव सा प्रदातव्या सर्वेषां कृषिजीविनाम्"—इति।

वाह्यबीजग्रहणं कृषिसाधनानामुपलक्षणार्थम्। सम्भूयकारिणां शिल्पिनां विभागमाह सएव,—

"हेमकारादयो यत्र शिल्पं सम्भूय कुर्वते।

कर्म्मानुरूपं निर्वेशं लभेरंस्ते यथांऽशतः"—इति।

निर्वेशोभृतिः। कात्यायनोऽपि,—

"शिक्षाकारिज्ञकुशला* आचार्य्यश्चेति शिल्पिनः।

एकद्वित्रिचतुर्भागान् हरेयुस्ते यथांऽशतः"—इति।

स्तेनान् प्रत्याह सएव,—

"स्वाम्याज्ञया तु यच्चौरैः परदेशात्समाहृतम्।

राज्ञे दत्त्वा तु षड्भागं भजेयुस्ते यथांऽशतः॥

---

* शिष्यकाभिज्ञकुशला,—इति रत्नाकरधृतः पाठः।

चतुरोऽंशान् भजेन्मुख्यः शूरस्त्वंशमवाप्नुयात् ।
समर्थस्तु हरेद्द्व्यंशं शेषास्त्वन्ये समांशिनः”—इति ।

परदेशात् वैरिदेशादित्यर्थः । प्रबलवैरिदेशादाहृतधनविषयमेतत् । दुर्बलवैरिदेशादाहृतविषये त्वाह कात्यायनः,—

“परराज्याद्धनं यत्तु चौरैः स्वेदाज्ञयाऽऽहृतम् ।
राज्ञे दशांशमुद्धृत्य विभजेरन् यथाविधि”—इति ।

सम्भूयसमुत्थानाख्यं पदं समाप्तम् ।

अथ दत्ताप्रदानिकाख्यं पदमुच्यते ।

तत्र नारदः,—

“दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम तद्विवादपदं स्मृतम् ॥
अदेयमथ देयं च दत्तं चादत्तमेव च ।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः”—इति ।

अदेयस्वरूपभेदानाह बृहस्पतिः,—

“सामान्यं पुत्त्रदाराधिसर्वस्वन्यासयाचितम् ।
प्रतिश्रुतमथान्यस्य न देयं त्वष्टधा स्मृतम्”—इति ।

सामान्यमनेकस्वत्वकं रथ्यादि । नारदोऽपि,—

“अन्वाहितं याचितकमाधिः साधारणञ्च यत् ।
निक्षेपं पुत्त्रदारञ्च सर्वस्वं चान्वये सति ॥
आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना ।
अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम्”—इति ।

अन्वाहितादिवत् स्त्रीधनमप्यदेयम्। अतएव दक्षः,—

"सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम्।

अन्वाहितञ्च निक्षेपं सर्वस्वं चान्वये सति॥

आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः।

यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः"—इति।

अदेयदाने प्रतिग्रहे च दण्डो मनुनाऽभिहितः,—

"अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति।

तावुभौ चोरवच्छास्यौ दण्ड्यौ चोत्तमसाहसम्"—इति।

अदेयग्रहणमदत्तस्याप्युपलक्षणार्थम्। अतएव नारदः,—

"गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छति।

दण्डनीयावुभावेतौ धर्मज्ञेन महीक्षिता"—इति।

किं तर्हि देयमित्यपेक्षिते सएवाह,—

"कुटुम्बभरणाद्द्रव्यं यत्किञ्चिदतिरिच्यते।

तद्देयमुपरुध्यान्यत् ददद्दोषमवाप्नुयात्"—इति।

भर्त्तव्यं कुटुम्बमुपरुध्येत्यर्थः। कात्यायनोऽपि,—

"सर्वस्वं गृहवर्जन्तु कुटुम्बभरणाधिकम्।

यद्द्रव्यं तत्स्वकं देयमदेयं स्यादतोऽन्यथा"—इति।

याज्ञवल्क्योऽपि,—

"स्वं कुटुम्बाविरोधेन देयं दारसुतादृते"—इति।

सुतस्यादेयत्वं एकपुत्रविषयम्। तस्यापि दाने कृते सन्तानविच्छेदापत्तेः। अतएवैकस्य पुत्रस्य दानं निषेधति वसिष्ठः। "न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषाम्"—इति।

"अतश्च सुतदाराणां वशित्वं त्वनुशासने।
विक्रये चैव दाने च वशित्वं न सुतेपितुः"—इति।

एवमादीनि सुतस्यादेयत्वप्रतिपादकानि वचनान्येकपुत्रविषयाणीत्यवगम्यते। अनेकपुत्रेष्वपि मातापितृवियोगसहनक्षमएव देयः।

"विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः।
दाराः पुत्राश्च सर्वस्वमात्मन्येव तु योजयेत्"—इति

कात्यायनस्मरणात्। न नेयाः स्युरनिच्छव इत्यनापद्विषयम्।

"आपत्कालेऽपि कर्त्तव्यं दानं विक्रयएववा।
अन्यथा न प्रवर्त्तेत इति शास्त्रविनिश्चयः"—इति

तानेवाधिकृत्य तेनैवोक्तत्वात्। पुत्रस्य प्रतिग्रहप्रकारविशेषो-वसिष्ठेन दर्शितः। "पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि च निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरबान्धवमसन्निकृष्टमेव गृह्णीयात्"— इति। अदूरबान्धवं सन्निकृष्टमातुलादिबान्धवम्। असन्निकृष्टं सन्निकृष्टभ्रातृपुत्रादिव्यतिरिक्तमेव। स्थावरविषये देयं द्रव्यमाह प्रजापतिः,—

"सम्प्रागमात् गृहक्षेत्राद् यद्यत् क्षेत्रं प्रचीयते।
पित्र्यं वाऽथ स्वयं प्राप्तं तद्दातव्यं विवक्षितम्"—इति।

सम्प्रत्यभ्यागमेभ्यो यत् प्रचीयते समधिकं स्यात्तद्दातव्यत्वेन विवक्षितमिति। स्वयं प्राप्तं द्रव्यं अविभक्तधनैर्भ्रातृभिरननुज्ञातमपि देयम्। "स्वेच्छादेयं स्वयम्प्राप्तम्"—इति बृहस्पतिवचनात्। यत्तु तेनैवोक्तम्,—

"विभक्ता वाऽविभक्ता वा दायादाः स्थावरे समाः।

एकोऽप्यनीशः सर्वत्र दानाधमनविक्रये"—इति ।

तद्विभक्तस्थावरविषयं, सप्तानधिकस्थावरविषयं वा । सप्ताधिकस्यैव देयत्वेनाभिधानात् । किंचिद् भर्त्रा भार्य्ययाऽनुज्ञातमेव देयम् । किञ्चिद्दासेन स्वार्जितमपि स्वाम्यनुज्ञातमेव देयम् । तथाच सएव,—

"सौदायिकं क्रमायातं शौर्य्यप्राप्तञ्च यद्भवेत् ।
स्त्रीज्ञातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयात्"—इति ।

सौदायिकं विवाहलब्धम् । क्रमायातं पितामहादिक्रमायातम् । स्त्रीज्ञात्यनुमतं सावशेषं देयम् ।

"वैवाहिके क्रमायाते सर्वं दानं* न विद्यते"—इति तेनैवोक्तत्वात् ।

इत्थं देयादेयस्वरूपंनिरूपितम् । दत्तादत्तयोस्तु स्वरूपं निरूप्यते। तत्र दत्तं सप्तविधमदत्तं षोड़शात्मकम् । तथाच नारदः,—

"दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकम् ।
पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ॥
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ।
अदत्तन्तु भयक्रोधशोकवेगारुगन्वितम् ॥
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ।
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितम् ॥
कर्त्ता ममायं कर्म्मेति प्रतिलाभेच्छया च यत् ।
अपात्रे पात्रमित्युक्ते कार्य्ये चाधर्म्मसंहिते ॥

* इत्थमेव पाठः सर्व्वत्र । मम तु, सर्व्वदानं,—इति पाठः प्रतिभाति ।

यद्दत्तं स्याद्विश्वासाददत्तमिति तत् स्मृतम्”—इति।

पण्यस्य क्रीतद्रव्यस्य मूल्यम्। भृतिर्वेतनं कृतकर्मणे दत्तम्। तुष्ट्या वन्दिचारणादिभ्यो दत्तम्। स्नेहाद्दुहित्रादिभ्यो दत्तम्। प्रत्युपकारतः उपकृतवते प्रत्युपकाररूपेण दत्तम्। स्त्रीशुल्कं परिणयनार्थं दत्तम्। अनुग्रहार्थं अदृष्टार्थे* दत्तम्। तदेतत्पण्यमूल्यादि सप्तविधं दत्तमेव न प्रत्याहरणीयम्। तथाच याज्ञवल्क्यः,—

“देयं प्रतिश्रुतञ्चैव दत्त्वा नापहरेत्पुनः”—इति।

भयेन वन्दिग्रहादिभ्यो दत्तम्। क्रोधेन पुत्रादिविषयकोपनिर्यातनायान्यस्मै दत्तम्। पुत्रवियोगादिनिमित्तशोकावेशेन दत्तम्। उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम्। परिहासेनोपहासेन दत्तम्। द्रव्यव्यत्यासेन दत्तं एकस्य द्रव्यमन्यस्मै ददाति, दानव्यत्यासेन दत्तं अन्यस्मै दातव्यस्यान्यस्मै दानम्। छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य दत्तम्। बालेनाप्राप्तषोड़शवर्षेण दत्तम्। मूढ़ेन लोकवेदानभिज्ञेन दत्तम्। अस्वतन्त्रेण पुत्रदासादिना दत्तम्। आर्त्तेन रोगोपहतेन दत्तम्। मत्तेन मदनियमितेन, उन्मत्तेन वातिकाद्युन्मादग्रस्तेन अपवर्जितं दत्तम्। अयं मदीयमिदं करिष्यतीति प्रतिलाभेच्छया प्रतिलाभमकुर्वाणाय दत्तम्। अयोग्याय योग्योक्तिमात्रेण दत्तम्। यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तम्। एवं षोड़शप्रकारमपि दत्तं पुनः प्रत्याहरणीयत्वाददत्तमित्युच्यते। तथाच कात्यायनः,—

* अदृष्टार्थे,—इति का॰ पुस्तके नास्ति।

"कामक्रोधाभिमत्तार्त्ता क्लीवोन्मत्तप्रमोहितैः ।
व्यत्यासपरिहासाच्च यद्दत्तं तत्पुनर्हरेत् ॥
या तु कार्य्यस्य सिद्ध्यर्थमुत्कोचा स्यात्प्रतिश्रुता ।
तस्मिन्नपि प्रसिद्धेऽर्थे* न देया स्यात् कथञ्चन ॥
अथ प्रागेव दत्ता स्यात् प्रतिदाप्यः स तां बलात् ।
दण्डश्चैकादशगुणमाहुर्गार्गीयमानवाः"—इति ।

उत्कोचस्वरूपमाह सएव,—

"स्तेनसाहसिकोद्वृत्तपारदारिकसम्भवात्† ।
दर्शनाद्वृत्तनष्टस्य तथाऽसत्यप्रवर्त्तनात् ॥
प्राप्तमेतैस्तु यत्किञ्चिदुत्कोचाख्यं तदुच्यते ।
न दाता तत्र दण्ड्यः स्यान्मध्यस्थश्चैव दोषभाक्"—इति ।

मध्यस्थ उक्तानुवादकः‡ । चकारात् ग्राहकः समुच्चीयते । तावुभौ दोषभाजौ दण्डनीयावित्यर्थः । आर्त्तदत्तेत्यादिकं तु धर्म्मकार्य्य-व्यतिरिक्तविषयम् । तथाच सएव,—

"स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात् ।
अदत्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः"—इति ।

मनुरपि सोपाधिकदानादेर्निवर्त्तनीयतामाह,—

"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।

---

* इत्थमेव पाठः सर्व्वत्र । तस्मिन्नर्थेऽप्रसिद्धे तु,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः ।

† ध्वंसनात्,—इति ग्रन्थान्तरधृतः पाठः ।

‡ उक्तापादकः,—इति का० ।

यच वाऽप्युपधिं पश्येत् तत् सर्व्वं विनिवर्त्तयेत्"—इति ।

योगउपधिः । अदेयदानतत्प्रतिग्रहयोर्दण्डो नारदेनोक्तः,—

"मृत्वात्यदत्तं योलोभाद्यश्चादेयं प्रयच्छति ।

अदेयदायको* दण्ड्यस्तथाऽदत्तप्रतीच्छकः"—इति ।

इति दत्ताप्रदानिकम् ।

अथ वेतनस्यानपाकर्म्माख्यं विवादपदमुच्यते ।

तस्य स्वरूपमाह नारदः,—

"भृत्यानां वेतनस्योक्तो दानादानविधिक्रमः ।

वेतनस्यानपाकर्म्म तद्विवादपदं स्मृतम्"—इति ।

वेतनं कर्म्ममूल्यम् । तस्यानपाकर्म्म भृत्यायासमर्पणं, समर्पितस्य परावर्त्तनं वा । तत्र समर्पणे विशेषमाह नारदः,—

"भृत्याय वेतनं दद्यात् कर्म्मस्वामी यथाक्रमम् ।

आदौ मध्येऽवसाने च कर्म्मणो यद्विनिश्चितम्"—इति ।

एतावदेव तत्कर्म्मकरणाद्दास्यामीति भाषाया अभावे विशेषमाह सएव,—

"भृतावनिश्चितायान्तु दशभागमवाप्नुयुः ।

लाभगोवीर्य्यशस्यानां वणिग्गोपकृषीवलाः"—इति ।

गोवीर्यं पाल्यमानगवादिप्रभवं पयःप्रभृति । यदि कर्म्मस्वामी भृत्याय दशमं भागं न प्रयच्छति, तदाऽसौ राज्ञा दाप्य इत्याह याज्ञवल्क्यः,—

---

* दायको,—इति का° ।

"दाप्यस्तु दशमं भागं वाणिज्यपशुशस्यतः।
अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता"—इति।

यत्तु बृहस्पतिनोक्तम्,—

"त्रिभागं पञ्चभागं वा गृह्णीयात्सीरवाहकः"—इति।

तद्ग्रासाच्छादनाभ्यामभृतकर्तृविषयम्। तथापि त्रिभागपञ्चभागौ व्यवस्थया विकल्पितौ वेदितव्यौ। तथाच स एव,—

"भक्ताच्छादभृतः सीराद्भागं गृह्णीत पञ्चकम्।
जातशस्यात् त्रिभागन्तु प्रगृह्णीयात्तथाऽभृतः"—इति।

अन्नाच्छादनाभ्यां भृतः कृषीवलः क्षेत्रजातशस्यात्पञ्चमं भागं गृह्णीयात्। ताभ्यामभृतस्तृतीयं भागमित्यर्थः। एतावद्दास्यामीति परिभाषायां सत्यामपि क्वचित्ततोन्यूनं स्वामिबुद्धिपरिकल्पितं वेतनं देयं, क्वचित्ततोऽप्यधिकं देयम्। तदाह याज्ञवल्क्यः,—

"देशं कालञ्च योऽतीयाल्लाभं कुर्य्याच्च योऽन्यथा।
तदा तु स्वामिनः छन्दोऽधिकं देयं ततोऽधिके"—इति।

यः स्वाम्याज्ञामन्तरेण वाणिज्यादिलाभसाधनदेशकालातिक्रमं करोति, लाभं च बहुतरव्ययकरणादल्पं करोति, तस्मै स्वामी स्वेच्छानुसारेण किञ्चिद्दद्यात्। यस्तु स्वातन्त्र्येण बहुलाभं करोति, तस्मै परिभाषितमूल्यादधिकं देयमित्यर्थः। अनेकभृत्यकर्तृककर्मणि वेतनार्पणप्रकारमाह स एव,—

"यो यावत् क्रियते कर्म्म तावत्तस्य तु वेतनम्।
उभयोरप्यसाध्यं चेत् साध्ये कुर्य्यात् यथाश्रुतम्"—इति।

यदा पुनरेकं कर्म्म नियतवेतनमुभाभ्यां बहुभिर्वा क्रियमाण-

मुभयोरप्यसाध्यं चेदुभाभ्यामेवापरिसमापितं; तदा यो यावत्कर्म्म-करोति, तस्मै तत्कर्म्मानुसारेण मध्यस्थकल्पितं वेतनं देयं, न पुनः समम्। साध्ये उभाभ्यां कर्म्मणि परिसमापिते तु यथाश्रुतं यथावत्प-रिभाषितं तावदुभाभ्यां देयम्। न पुनः प्रत्येकं कृत्स्नवेतनं देयं, नापि कर्म्मानुरूपं परिकल्प्य देयम्। भृत्यानां कर्त्तव्यमाह नारदः,—

"कर्म्मोपकरणं तेषां क्रियां प्रति यदाहितम्।
आप्तभावेन तद्रक्ष्यं न जैह्म्येन कदाचन"—इति।

तेषां कर्म्मस्वामिनां कर्म्मोपकरणं लाङ्गलादि क्रियां उद्दिश्य यस्मिन् भृत्ये निहितं, तेन सर्वदा निःशाठ्येन रक्ष्यमित्यर्थः। बृह-स्पतिरपि,—

"भृतकस्तु न कुर्व्वीत स्वामिना शाठ्यमण्वपि।
भृतिहानिं समाप्नोति ततो वादः प्रवर्त्तते"—इति।

यस्तु भृतिं स्वीकृत्य कर्म्म न करोति, तं प्रत्याह सएव,—

"गृहीतवेतनः कर्म्म न करोति यदा भृतः।
समर्थश्चेद्दमं दाप्यो द्विगुणं तच्च वेतनम्"—इति।

अगृहीतवेतनविषये याज्ञवल्क्य आह,—

"अगृहीते समं दाप्यो भृत्यैरक्ष्य उपस्करः"—इति।

समं, यावता वेतनेन भृत्यत्वमङ्गीकृतं, तावदेव स्वामिने दद्यात्, न तु राज्ञे दण्डमित्यर्थः। यद्वा, अचाङ्गीकृतवेतनं दत्वा बला-त्कारयितव्यः। तदाह नारदः,—

"कर्म्माकुर्वन् प्रतिश्रुत्य कार्य्योदत्वा भृतिं बलात्।
भृतिं गृहीत्वाऽकुर्वाणः द्विगुणं भृतिमाप्नुयात्"—इति।

प्रतिश्रुत्येति प्रारम्भस्याप्युपलक्षणार्थम्। तदाह कात्यायनः,—

"कर्म्मारम्भं तु यः कृत्वा सर्व्वं नैव तु कारयेत्।

बलात् कारयितव्योऽसावकुर्व्वन् दण्डमर्हति।

स चेन्न कुर्य्यात् तत्कर्म्म प्राप्नुयाद्द्विगुणं दमम्"—इति।

द्विशतं कार्षापणद्विशतमित्यर्थः(१)। यत्तु मनुवचनम्,—

"भृत्योऽनार्त्तो न कुर्य्याद् यो दर्पात्कर्म्म यथोचितम्।

स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम्"—इति।

तदर्धावशेषितविषयम्। किञ्चिन्मात्रावशेषे तु दण्डवर्जवेतना-दानम्। तदाह सएव,—

"यथोक्तमार्त्तः स्वस्थो वा यस्तु कर्म्म न कारयेत्।

न तस्य वेतनं देयमल्पोनस्यापि कर्म्मणः"—इति।

यस्तु कालविशेषावधिकं कर्म्म प्रतिज्ञाय कालात्पूर्व्वमेव कर्म्म त्यजति, तं प्रत्याह नारदः,—

"कालेऽपूर्णे त्यजन् कर्म्म भृतेर्नाशमवाप्नुयात्।

स्वामिदोषादकरणे यावत्कृतिमवाप्नुयात्"—इति।

स्वामिदोषात् पारुष्यकरणादिस्वामिदोषात्। नारदः,—

"भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः।

दाप्योयत्तत्र नष्टं स्याद्दैवराजकृताद्दृते"—इति।

वाहकदोषतः भृतकदोषतः। वृद्धमनुः,—

---

(१) एतद्व्याख्यानदर्शनात् द्विशतं दममिति पाठः प्रतीयते। लेखक-प्रमादात्तु सर्व्वत्रैव द्विगुणं दममिति पाठोदृश्यते।

"प्रमादान्नाशितं दाप्यः समं द्विर्द्रोहनाशितम्।
न तु दाप्यो हृतञ्चौरैर्दग्धमूढं जलेन वा"—इति।

द्रोहनाशितं तीव्रप्रहरादिना द्रोहेण नाशितम्। तद्दृमनुः,—

"यः कर्म्मकाले संप्राप्ते न कुर्य्यादिन्नमाचरेत्।
उद्धृत्यान्यस्तु कार्य्यः स्यात् स दाप्योद्विगुणां भृतिम्"—इति।

याज्ञवल्क्यः,—

"अराजदैवकाघातं भाण्डं दाप्यस्तु वाहकः।
प्रस्थानविघ्नकच्चैव प्रदाप्यो द्विगुणां भृतिम्॥
प्रक्रान्ते सप्तमं भागं चतुर्थं पथि संत्यजन्।
भृतिमर्द्धपथे सर्व्वां प्रदाप्यस्त्याजकोऽपि च"—इति।

अराजदैवकोघातो यस्य भाण्डस्य, तद्यदि प्रज्ञाहीनतया वाहकेन नाशितं, तदा तन्मूल्यानुसारेण तद्भाण्डं दापनीयः। यस्तु प्रस्थानसमयसमयएव व्यवस्थाऽभ्युपगतं कर्म्म त्यजन् प्रस्थानविघ्नं करोति, तदाऽसौ द्विगुणां भृतिं दाप्यः। यस्तु भृत्यान्तरोपादानावसरसम्भवे स्वाङ्गीकृतं कर्म्म त्यजति, असौ भृत्यः सप्तमं भागं दाप्यः। यः पुनः पथि प्रक्रान्ते गमने वर्त्तमाने सति कर्म्म त्यजति, स भृतेश्चतुर्थं भागं दाप्यः। अर्द्धपथे त्यजन् सर्व्वाभृतीर्दापनीयः। यस्तु स्वामी भृत्यं स्वयमेव कर्म्म त्याजयति पूर्व्वोक्तदेशेषु, असावपि पूर्व्वोक्तसप्तमभागादिकं दापनीयः। एतच्चाव्याधितादिविषयम्। व्याधितस्यापराधाभावात्। यदा पुनर्व्याधितो व्याध्यपगमे तदितरदिवसान् परिगणय्य पूरयति, तदा लभतएव सर्व्वां भृतिम्। तदाह मनुः,—

"आर्त्तः स कुर्य्यात् स्वस्थः सन् यथाभाषितमादितः।

सुदीर्घस्यापि कालस्य तल्लभेतैव वेतनम्"—इति।

त्याजकस्य स्वामिनश्चतुर्थभागादिदापनमविक्रीतभाण्डविषयम्।
विक्रीते तु भाण्डे विशेषो वृद्धमनुनाऽभिहितः,—

"पथि विक्रीय तद्भाण्डं वणिग्भृत्यस्त्यजेद्यदि।

अगतस्यापि[1] देयं स्यात् भृतेरर्द्धं लभेत सः"—इति।

आसेधेन प्रतिबद्धभाण्डविषये राजाद्यपहृतभाण्डविषये* चाह
कात्यायनः,—

"यथा† च पथि तद्भाण्डमासिद्धेत ह्रियेत वा।

यावानध्वा गतस्तेन प्राप्नुयात् तावतो भृतिम्"—इति।

भाटकस्वीकृतेन यानादिना भाण्डनेतारं प्रत्याह नारदः,—

"आनीय भाटयित्वा तु भाण्डवान् यानवाहने[2]।

दाप्यो भृतेः चतुर्भागं सर्वामर्द्धपथे त्यजन्॥

अनयन् वाहकोऽप्येवं भृतिहानिमवाप्नुयात्"—इति।

यः शकटादिकं भाटयित्वा तदेवोपकारं‡ शून्यमादाय देशा-

---

* इत्थमेव पाठः सर्व्वत्र। ममतु, राजाद्यपहृतभाण्डविषये,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः सर्व्वत्र। ममतु, यदा,—इति पाठः प्रतिभाति।

‡ इत्थमेव पाठः सर्व्वत्र। ममतु, उपस्कार,—इति पाठः प्रतिभाति। एवं परत्र।

---

(१) अगतस्यापि यावद् गन्तव्यमगतस्यापीति चण्डेश्वरीया व्याख्या।

(२) भाण्डवान् स्वामी। यानं शकटादि। वाहनमश्वादि।

मारण्यच्छति भाटकः* । उपकारशब्देन तदाधारोलच्यते। परभूमौ गृहनिर्माणादिभाटकदातारमत्याह नारदः,—

"परभूमौ गृहं कृत्वा स्तोमं(१) दत्वा वसेत्तु यः ।

स तद्गृहीत्वा निर्गच्छेत् तृणकाष्ठानि चेष्टकाम्"—इति।

तथा,—

"स्तोमाद्विना वसित्वा तु परभूमावनिश्चितः ।

निर्गच्छंस्तृणकाष्ठादि न गृह्णीयात् कथञ्चन ॥

यान्येव तृणकाष्ठानि लिष्टकाविनिवेशिताः ।

विनिर्गच्छंस्तु तत्सर्वं भूमिस्वामिनि वेदयेत्"—इति ।

अनिश्चितः तृणकाष्ठादिग्रहणपरिभाषायामित्यर्थः । परिभाषिते तु यथा परिभाषा तथेति । वेदयेत्, निवेदयेदित्यर्थः । भाटकं दत्वा द्रव्याद्यर्पणार्थं गृहीतमणिकादिपात्रभेदनादावप्याह सएव,—

"स्तोमवाहीनि भाण्डानि पूर्णकालान्युपानयेत् ।

ग्रहीतुरावहेद्भग्नं नष्टं वाऽन्यत्र संप्लवात्"—इति ।

संप्लवः परस्परसंघर्षः। तेनाल्पकेन† कार्त्स्न्येन वा भिन्नं पूर्ववत्कृत्वा भाण्डं वा तन्मूल्यं वा स्वामिने देयम् । संप्लवादन्यत्र भेदे तु भाटकग्रहीतुरेव तदित्यर्थः । कृतकर्मणे भृत्याय वेतनादातारमत्याह बृहस्पतिः,—

* इत्यमेव पाठः सर्व्वत्र । स भृतिं न प्राप्नुयात्,—इति त्वधिकं भवितुं युक्तम् ।

† तेन लेशतः,—इति का० ।

(१) स्तोमं वासमूल्यम् ।

"कृते कर्म्मणि यः स्वामी न दद्याद्वेतनं भृते।
राज्ञा दापयितव्यः स्यात् विनयं चानुरूपतः"—इति।

निमग्नं भृत्यं पथि त्यजतो दण्डमाह कात्यायनः,—

"त्यजेत्पथि सहायं यो भृत्यं रोगार्त्तमेव च।
प्राप्नुयात् साहसं पूर्वं ग्रामे त्र्यहमपालयन्"—इति।

पण्यस्त्रीतदुपभोक्तृविषये त्वाह नारदः,—

"शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्*।
अनिच्छन् शुल्कदाताऽपि शुल्कहानिमवाप्नुयात्"—इति।

एतदव्याधितादिविषयम्। व्याधितविषये तु स्मृत्यन्तरम्,—

"व्याधिता संभ्रमा व्यग्रा राजा†धर्म्मपरायणा।
आमन्त्रिता च नागच्छेत् अवाच्या वड़वा स्मृता"—इति।

अत्यन्तावश्यके जातसम्भ्रमा सम्भ्रमपदेन उक्ता। तत्रैव व्याकुला व्यग्रा। वड़वा दासी। दासीग्रहणमत्र पण्यस्त्रीप्रदर्शनार्थम्। उपभोक्तारं प्रत्याह नारदः,—

"अप्रयच्छन् तथा शुल्कमनुभूय पुमान् स्त्रियम्।
अक्रमेण च सङ्गच्छेद्घातयेद्वा नखादिभिः॥
अयोनौ यः समाक्रामेद्बहुभिर्वा विवासयेत्(१)।

* तदा,—इति का०।
† जड़,—इति का० ग्रा०।

(१) अक्रमेण कामशास्त्रोक्तप्रकारविरोधेन। घातयेद्वा नखादिभिरित्यप्येतदनुसन्धानीयम्। अयोनौ मुखादौ, समाक्रामेत् ग्राम्यधर्म्मं कुर्य्यात्। आत्मार्थं भाटयित्वा बहुभिः पुरुषैः सह विशेषेण वासयेदिति वचनार्थः।

शुल्कं त्वष्टगुणं दाप्यो विनयं तावदेव तु"—इति।

पण्यस्त्रियास्त्वपराधे दण्डादिकं मत्स्यपुराणेऽभिहितम्,—

"गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति।

तां द्विगुणं दापयेद्दण्ड्यादित्यस्यापि च भाटकम्"—इति।

अत्र निर्णयमाह नारदः,—

"वेश्या प्रधाना यास्तत्र कामुकाः तद्गृहोषिताः।

तत्समुत्थेषु कार्य्येषु निर्णयं संशये विदुः"—इति।

इत्थं वेतनस्यानपाकर्म्माभिहितम्।

अथेदानीमभ्युपेत्याशुश्रूषाख्यं विवादपद-मभिधीयते।

तस्य स्वरूपं नारद आह,—

"अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते।

अशुश्रूषाऽभ्युपेत्यैतद्विवादपदमुच्यते"—इति।

आज्ञाकरणं शुश्रूषा। शुश्रूषकस्य पञ्चप्रकारः। तथाच सएव,—

"शुश्रूषकः पञ्चविधः शास्त्रे दृष्टोमनीषिभिः।

चतुर्विधः कर्म्मकरः शेषा दासास्त्रिपञ्चकाः॥

शिष्यान्तेवासिभृतकाः चतुर्थस्त्वधिकर्म्मकृत्।

एते कर्म्मकराज्ञेया दासास्तु गृहजादयः॥

सामान्यमस्वतन्त्रत्वं तेषामाहुर्मनीषिणः।

जातकर्मंकरस्त्वन्यो[१] विशेषो वृत्तिितस्तथा ॥

कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।

अशुभं दासकर्मोक्तं शुभङ्कर्मकरे स्मृतम् ॥

गृहद्वाराशुचिस्थानरथ्याऽवस्करशोधनम् ।

गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥

इच्छतः स्वामिनश्चाङ्गैरुपस्थानमथान्ततः ।

अशुभङ्कर्म विज्ञेयं शुभमन्यदतः परम्"—इति ।

तत्र शिष्यो वेदविद्यार्थी । अन्तेवासी शिल्पशिक्षार्थी । मूल्येन यः कर्म करोति, स भृतकः । अधिकर्मकृत्कर्मकुर्वतामधिष्ठाता । अशुचिस्थानं उच्छिष्टप्रक्षेपार्थगर्त्तादिकम् । अवस्करः गृहसंमार्जितपांश्वादिनिचयत्यागस्थानम् । भृतकस्त्रिविधः । तदुक्तं तेनैव,—

"उत्तमः कार्य्यकर्त्ता च मध्यमस्तु कृषीवलः ।

अधमो भारवाही स्यादित्येवं त्रिविधो भृतः"—इति ।

दासस्वरूपमपि तेनैव दर्शितम्,—

"गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।

अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥

मोचितो महतश्चर्णाद्युद्धे प्राप्तः पणे जितः ।

तवाहमित्युपगतः प्रव्रज्याऽवसितः कृतः ॥

भक्तदासश्च विज्ञेयस्तथैव बड़वाऽऽहृतः ।

विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः"—इति ।

---

(१) जातएव यः कर्मंकरः स जातकर्मंकरः । ग्रन्थान्तरे तु जातिकर्मंकर-इति पाठः । अत्रापि तथैवार्थः ।

गृहजातः स्वगृहे दास्यां जातः। क्रीतो मूल्येन। लब्धः प्रति-ग्रहादिना। दायागतो रिक्थग्राहित्वेन प्राप्तः। अन्नाकालभृतः दुर्भिक्षे दासत्वाय पोषितः। आहितः स्वामिना धनग्रहणेनाधीनतां नीतः। ऋणमोचित ऋणमोक्षप्रत्युपकारतया दासत्वमभ्युपगतः। युद्धप्राप्तः समरे विजित्य गृहीतः। पणविजितः दासत्वपणके द्युतादौ जितः। तवाहमित्युपगतः तव दासोऽस्मीति स्वयमेवागतः। प्रव्रज्याऽवसितः प्रव्रज्यातश्च्युतः। कृतः कृतकालः, एतावत्कालं त्वं मद्दास इत्युपगत-इति। भक्तदासः सर्वकालं भक्तार्थं एव दासत्वमभ्युपगतः। वडवया गृहदास्या आहृतः तल्लोभेन तामुद्दाह्य दासत्वेन प्रविष्टः। यः आत्मानं विक्रीणीते असावात्मविक्रेता। एवं पञ्चदशप्रकाराः। यत्तु मनुनोक्तम्,—

"ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ।
पैतृको दण्डदासश्च सप्तैते दासयोनयः"—इति।

तत् तेषां दासत्वप्रतिपादनार्थं, न तु परिसङ्ख्यार्थम्। अथ शिष्याणां कर्म्मकृतौ विशेषो नारदेनोक्तः,—

"आ विद्याग्रहणाच्छिष्यः शुश्रूषेत् प्रयतो गुरुम्।
तद्वृत्तिर्गुरुदारेषु गुरुपुत्त्रे तथैव च"—इति।

विद्या चात्र त्रयी। तदुक्तं वृहस्पतिना,—

"विद्या त्रयी समाख्याता ऋग्यजुःसामलक्षणा।
तदर्थं गुरुशुश्रूषां प्रकुर्य्याच्च प्रचोदिताम्"—इति।

अन्तेवासिनामपि कर्म्मकृतौ विशेषस्तेनैवोक्तः,—

"विज्ञानमुच्यते शिल्पं हेमरूप्यादिसंस्कृतिः।

नृत्यादिकञ्च तन्मात्रं* कुर्य्यात्कर्म्म गुरोर्गृहे"—इति ।

नारदोऽपि,—

"स्वं शिल्पमिच्छन्नाहर्त्तुं बान्धवानामनुज्ञया ।

आचार्य्यस्य वसेदन्ते कालं कृत्वा सुनिश्चितम्"—इति ।

आचार्य्यस्यापि कर्त्तव्यमाह सएव,—

"आचार्य्यः शिक्षयेदेनं स्वगृहे दत्तभोजनम् ।

न चान्यत्कारयेत्कर्म्म पुत्त्रवच्चैनमाचरेत्"—इति ।

अन्यकर्म्मकारकमाचार्य्यं प्रत्याह कात्यायनः,—

"यस्तु न ग्राहयेत् शिष्यं कर्म्माण्यन्यानि कारयेत् ।

प्राप्नुयात्साहसं पूर्वं तस्मात् शिष्यो निवर्त्तते"—इति ।

परिभाषितकालात्प्रागेव विद्याप्राप्तावपि तावत्कालं वसेदित्याह नारदः,—

"शिक्षितोऽपि कृतं कालमन्तेवासी समापयेत् ।

तत्र कर्म्म च यत् कुर्य्यादाचार्य्यस्यैव तत्फलम्"—इति ।

याज्ञवल्क्योऽपि,—

"कृतशिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे ।

अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः"—इति ।

दुष्टं प्रत्याह नारदः,—

"शिक्षयन्तमदुष्टञ्च यस्त्वाचार्य्यं परित्यजेत् ।

बलाद्वासयितव्यः स्यात् वधबन्धं च सोऽर्हति"—इति ।

---

* तत् शिक्षन्,—इति ग्रन्थान्तरधृतः पाठः ।

वधोऽत्र ताडनादिः। परिभाषितकालसंपूर्त्तौ कर्त्तव्यमाह नारदः,—

"गृहीतशिल्पः समये कृत्वाऽऽचार्य्यप्रदक्षिणम्।
शक्तितश्चानुमान्यैनं अन्तेवासी निवर्त्तते"—इति।

भृतकानामपि भृतिकृतः कालकृतश्च विशेषो बृहस्पतिना दर्शितः,—

"यो भुङ्क्ते परदासीन्तु स ज्ञेयो बड़वाभृतः।
कर्म्म तत्स्वामिनः कुर्य्यात् यथाऽन्येन भृतो नरः॥
बहुधाऽर्थभृतः प्रोक्तस्तथा भागभृतोऽपरः।
हीनमध्योत्तमत्वञ्च सर्वेषामेव चोदितम्॥
दिनमासार्द्धषण्मासत्रिमासाब्दभृतस्तथा।
कर्म्म कुर्य्यात् प्रतिज्ञातं लभते परिभाषितम्"—इति।

अर्थभृतस्य बहुधात्वं समर्थाल्पमहत्वाभ्यां द्रष्टव्यम्। ते चाल्पत्व-महत्वे शक्त्यनुसारतो द्रष्टव्ये। तथाच नारदः,—

"भृत्यस्तु त्रिविधो ज्ञेय उत्तमो मध्यमोऽधमः।
शक्तिभक्तानुसाराभ्यां तेषां कर्म्माश्रया भृतिः"—इति।

भागभृतस्य द्वैविध्यमाह बृहस्पतिः,—

"द्विप्रकारो भागभृतः कृषणो जीवितः स्मृतः।
जातसस्यात्तथा क्षीराल्लभते तु न संशयः"—इति।

अधिकर्म्मकृतस्तु स्वरूपमाह नारदः,—

"अर्थेष्वधिकृतो यः स्यात् कुटुम्बस्य तथोपरि।
सोऽधिकर्म्मकृतोज्ञेयः स च कौटुम्बिकः स्मृतः"—इति।

एवं निरूपितेभ्यः शिष्यान्तेवासिभ्यः भृतकाधिकर्म्मकरेभ्यो* दासानां भेदं दासशब्दव्युत्पत्तिदर्शनमुखेनाह कात्यायनः,—

"स्वतन्त्रस्यात्मनोदानाद्दासत्वं दारवद्भृगुः"—इति ।

अयमर्थः । यथा भर्त्तुः सम्भोगार्थं स्वशरीरदानाद्दारत्वं, तथा स्वतन्त्रस्यात्मनो दानाद्दासत्वम्,—इति भृगुराचार्य्यो मन्यते,—इति । तेन चात्यन्तपारार्थ्यमासाद्य शुश्रूषकाः दासाः पारार्थ्यमात्रमासाद्य शुश्रूषकाः कर्म्मकरा इत्युक्तं भवति । दासत्वञ्च ब्राह्मणव्यतिरिक्तेष्वेव त्रिषु वर्णेषु विज्ञेयम् । "दास्यं विप्रस्य न क्वचित्"—इति तेनैवोक्तत्वात् । तेष्वपि दास्यमानुलोम्येनैवेत्याह सएव,—

"वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः ।

राजन्यवैश्यशूद्राणान्त्यजतां हि स्वतन्त्रताम्"—इति ।

प्रातिलोम्येन दासत्वप्रतिषेधः स्वधर्म्मपरित्यागिभ्योऽन्यत्र द्रष्टव्यः । तथाच नारदः,—

"वर्णानां प्रातिलोम्येन दासत्वं न विधीयते ।

स्वधर्म्मत्यागिनोऽन्यत्र दारवद्दासता मता"—इति ।

दारवद्दासता मतेति वचनात् ब्राह्मणस्य सवर्णं प्रति दासत्वप्रामाण्यमाह कात्यायनः,—

"असवर्णे तु विप्रस्य दासत्वं नैव कारयेत्"—इति ।

यदि ब्राह्मणः स्वेच्छया दास्यं भजते, तदाऽसौ नाशुभं कर्म्म कुर्य्यादित्याह सएव,—

"श्रुताध्ययनसम्पन्नं तदूनं कर्म्म कामतः ।

---

* भृतकाधिकर्म्मकरेभ्यश्च,—इति भवितुं युक्तम् ।

तथापि नाशुभं किञ्चित् प्रकुर्व्वीत द्विजोत्तमः"—इति।

उक्तं हीनमपि कर्म्म कामतो वेतनग्रहणमन्तरेण स्वेच्छया परहितार्थम्। क्षत्त्रियवैश्यविषये स्वामिनः कर्त्तव्यमाह मनुः,—

"क्षत्त्रियञ्चैव वैश्यञ्च ब्राह्मणोऽवृत्तिकर्षितम्।

बिभृयादानृशंस्येन स्वानि कर्म्माणि कारयेत्"—इति।

यस्तु द्विजातिं बलाद्दास्यं कर्म्म कारयति, तस्य दण्डमाह सएव,—

"दास्यन्तु कारयेन्मोहाद्ब्राह्मणः संस्कृतान् द्विजान्।

अनिच्छतः प्रभावत्वाद्राज्ञा दाप्यः शतानि षट्"—इति।

प्रभावस्य भावः प्रभावत्वं, तस्मादिति। शूद्रन्तु यथा कथमपि दास्यं कारयेदित्याह सएव,—

"शूद्रन्तु कारयेद्दास्यं क्रीतमक्रीतमेवच।

दास्यायैव हि सृष्टोऽसौ स्वयमेव स्वयम्भुवा"—इति।

पञ्चदशप्रकाराणां दासानां मध्ये गृहजातक्रीतलब्धदायागतानां चतुर्णां दासत्वं स्वामिप्रसादादेव मुच्यते नान्यथेत्याह नारदः,—

"तत्र पूर्वश्चतुर्वर्गो दासत्वात् न विमुच्यते।

प्रसादात् स्वामिनोऽन्यत्र दास्यमेषां क्रमागतम्"—इति।

आत्मविक्रेतुरपि दासत्वं स्वामिप्रसादादन्यतो नापैतीत्याह नारदः,—

"विक्रीणीते स्वतन्त्रः सन् य आत्मानं नराधमः।

स जघन्यतमस्तेषां सोऽपि दास्यान्न मुच्यते"—इति।

प्रव्रज्याऽवसितस्यापि दास्यमोक्षो नास्तीत्याह सएव,—

"राज्ञएव हि दासः स्यात् प्रव्रज्याऽवसितो नरः।

न तस्य प्रतिमोक्षोऽस्ति न विशुद्धिः कथञ्चन"—इति।

याज्ञवल्क्योऽपि,—

"प्रव्रज्याऽवसितो राज्ञो दास आमरणान्तिकम्"—इति।

प्रव्रज्याऽवसितस्य दासत्वं ब्राह्मणेतरविषयम्। ब्राह्मणस्तु निर्व्वास्य-इत्याह कात्यायनः,—

"प्रव्रज्याऽवसिताये तु त्रयोवर्णाद्विजातयः॥

निर्वासं कारयेद्विप्रं दासत्वं क्षत्रियं विशः"—इति।

निर्वासनप्रकारमाह नारदः,—

"पारिव्राज्यं गृहीत्वा तु यः स्वधर्म्मे न तिष्ठति।

श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत्"—इति।

प्रव्रज्यावसितात्मविक्रेतृव्यतिरिक्तानामन्नाकालभृतादीनां दास्या-पनयनप्रकारमाह सएव,—

"अन्नाकाले भृतोदास्यान्मुच्यते गोद्वयं ददत्।

तद्भक्षितं दुर्भिक्षे यत् न तु शुद्ध्येद्कर्म्मणा* ॥

आहितोऽपि धनं दत्वा स्वामी यद्येनमुद्धरेत्।

ऋणपर्य्याप्तमृणं दत्वा तदृणात्स विमुच्यते॥

भक्तस्योत्क्षेपणेनैव भक्तदासो विमुच्यते।

निग्रहाद्वड़वायास्तु मुच्यते वड़वाऽऽहृतः"—इति।

स्वामिनः प्राणसंरक्षणादपि गृहजातादयः सर्वे दास्यान्मुच्यन्ते इत्याह नारदः,—

---

* इत्यमेव पाठः सर्व्वत्र। भक्षितचापि यत्तेन न तच्छुध्यति कर्म्मणा,—इति ग्रन्थान्तरधृतपाठस्तु समीचीनः।

"यश्चैषां स्वामिनं कश्चिन्मोक्षयेत्प्राणसंशयात्।
दासत्वात्स विमुच्येत पुत्त्रभागं लभेत च"—इति।

दासाभासानां मोचनमाह याज्ञवल्क्यः,—

"बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते"—इति।

चकारादाहितो दत्तश्च मुच्यत। नारदोऽपि,—

"चौरापहृतविक्रीता ये च दासीकृता बलात्।
राज्ञा मोचयितव्यास्ते दासत्वं तेषु नेष्यते"—इति।

यस्त्वेकस्य पूर्वं दास्यमङ्गीकृत्य परस्यापि दासत्वमङ्गीकरोति, असावपरेण विसर्जनीय इत्याह स एव,—

"तवाहमिति वाऽऽत्मानं योऽस्वतन्त्रः प्रयच्छति।
न स तत्प्राप्नुयात्कामं पूर्वस्वामी लभेत तम्"—इति।

दासविमोचणेतिकर्त्तव्यतामाह स एव,—

"स्वदासमिच्छेद्यः कर्त्तुमदासम्प्रीतमानसः।
स्कन्धादादाय तस्यासौ भिन्द्यात्कुम्भं सहाम्भसा॥
साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत्।
अदास इति चोक्त्वा त्रिः प्राङ्मुखस्तु तयोत्सृजेत्*॥
ततः प्रभृति वक्तव्यः स्वाम्यनुग्रहपालितः।
भोज्यान्नोऽथ प्रतिग्राह्यो भवत्यभिमतः सताम्"—इति।

इत्यभ्युपेत्याशुश्रूषाख्यं विवादपदं समाप्तम्।

---

* प्राङ्मुखं तमथोत्सृजेत्,—इति ग्रन्थान्तरस्थतः पाठः।

अथ सम्विद्व्यतिक्रमाख्यविवादपदस्य विधिरुच्यते।

तस्य लक्षणं नारदेन व्यतिरेकमुखेन दर्शितम्,—

"पाषण्डनैगमादीनां स्थितिः समय उच्यते।

समयस्यानपाकर्म्म तद्विवादपदं स्मृतम्"—इति।

समयस्यानपाकर्म्म अव्यतिक्रमः समयपरिपालनम्। तद्व्यतिक्रमाख्यं विवादपदं भवतीत्यर्थः। तदुपयोगिनमर्थमाह बृहस्पतिः,—

"वेदविद्याविदोविप्रान् श्रोत्रियांस्ताग्निहोत्रिणः।

आहृत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत्"—इति।

याज्ञवल्क्योऽपि,—

"राजा कृत्वा पुरे स्थानं ब्राह्मणान् न्यस्य तत्र तु।

त्रैविद्यान् वृत्तिमद्ब्रूयात्स्वधर्म्मः पाल्यतामिति"—इति।

ब्राह्मणान् त्रैविद्यान् वेदत्रयसम्पन्नान् वृत्तिमद्भूरिहिरण्यादिसम्पन्नं कृत्वा स्वधर्म्मोवर्णाश्रमश्रुतिस्मृतिविहितो भवद्भिरनुष्ठीयतामिति तान् ब्रूयात्। वृत्तिसम्पत्तिश्च बृहस्पतिना दर्शिता,—

"अनाच्छेद्यकरास्तेभ्यः प्रदद्यात् गृहभूमयः।

मुक्तभाव्यास्त्र(१) नृपतिर्लेखयित्वा स्वशासने"—इति।

तेभ्यो दद्यादित्यर्थः। तेषां कर्त्तव्यमाह बृहस्पतिः,—

"नित्यं नैमित्तिकं काम्यं शान्तिकं पौष्टिकं तथा।

---

(१) अनाच्छेद्यकराः, न आच्छेद्यः आहर्त्तव्यः करोराजग्राह्यभागोयासां तथाविधाः। गृहभूमय इति द्वितीयार्थे प्रथमा। गृहभूमीरित्यर्थः। मुक्तभाव्याश्च्युक्तराजदेयाः।

पौराणां कर्म्म कुर्य्युस्ते सन्दिग्धेऽर्थे च निर्णयम्"—इति।

याज्ञवल्क्योऽपि,—

"निजधर्म्माविरोधेन यस्तु सामयिको भवेत्।

सोऽपि यत्नेन संरक्ष्यो धर्म्मो राजकृतश्च यः"—इति।

श्रौतस्मार्त्तधर्म्मानुपमर्द्देन गोचारादिरक्षण*देवगृहपालनादिरूपो- यो धर्म्मः समयान्निष्पन्नो भवेत्, सोऽपि यत्नेन पालनीयः। तथा, राज्ञा च निजधर्म्माविरोधेनैव यावत्पथिकभोजनं देयं अस्मद्राति- मण्डलं तुरङ्गादयो न प्रस्थापनीया इत्येवं रूपः समयनिष्पन्नः, सोऽपि रक्षणीयः। एवं राजनियुक्तसमुदायविशेषस्य कर्त्तव्यविशेषोऽभिहितः। ग्रामादिसर्वसमुदायानां तु साधारणकार्य्यमाह बृहस्पतिः,—

"ग्रामश्रेणीगणानाञ्च सङ्केतः समयक्रिया।

बाधाकाले तु सा कार्य्या धर्म्मकार्य्ये तथैव च॥

वाटचोरभये बाधा सर्वसाधारणी स्मृता।

तच्चोपशमनं कार्य्यं सर्वेणैकेन केनचित्"—इति।

चकारेण पाषण्डनैगमादीनां चोपसंग्रहः। ततश्च ग्रामश्रेणीगण- पाषण्डनैगमादीनामुपद्रवकाले धर्म्मकार्य्ये च यां पारिभाषिकीं समयक्रियां विना उपद्रवो दुःपरिहरः धर्म्मकार्य्यञ्च दुःसाध्यं, सा पारिभाषिकी समक्रिया सर्व्वैर्मिलितैः कार्य्या। वाटचौरेभ्यो भये प्राप्ते तदा चोरोपशमनं सर्वैः सम्भूय कर्त्तव्यमित्यर्थः। धर्म्मकार्य्ये तु विशेषस्तेनैवोक्तः,—

---

* गोप्रचाररक्षण,—इति का०।

"सभा प्रपा देवगृहं तड़ागारामसंस्कृतिः।
तथाऽनाथदरिद्राणां संस्कारो यजनक्रिया॥
कुलायनं निरोधश्च कार्य्यमस्माभिरंशतः।
यत्त्वेवं* लिखितं पत्रं धर्म्या सा समयक्रिया॥
पालनीया समस्तैस्तु यः समर्थो विसंवदेत्।
सर्व्वस्वहरणं दण्डस्तस्य निर्वासनं पुरात्"—इति।

यजनक्रिया सोमयागादिकर्तृभ्यो दानम्। कुलायनं दुर्भिक्षादिपीड़ितस्तथागमनम्†। तस्मिन्नागते सति यत्संविधानं विधेयं, तदेव तच्छब्देनोच्यते। निरोधः दुर्भिक्षाद्यपगमपर्य्यन्तं धारणम्। अंशतः गृहक्षेत्रपुरुषादिप्रयुक्तसंगृहीतधनेनाल्पकालेन वा स्थितेन कार्य्यमिति। एवं कृता समयक्रिया न केवलं समुदायिभिः पालनीया, किन्तु राज्ञाऽपीत्याह नारदः,—

"पाषण्डनैगमश्रेणिपूगव्रातगणादिषु।
संरक्षेत्समयं राजा दुर्गे जनपदे तथा"—इति।

पाषण्डा वेदवाह्या वेदोक्तलिङ्गधारिणो वा अतिरिक्ता वा सर्वे लिङ्गिनः। तेषु मध्ये अभिचरणाद्याः समयाः सन्ति। नैगमाः सार्थिका वणिक्प्रभृतयः। तेषु सकलपकसन्देशहरपुरुषतिरस्कारिणो दण्ड्या इत्येवमादयो बहवः समयाः विद्यन्ते। अथवा, नैगमा-

---

* इत्थमेव पाठः सर्व्वत्र। मम तु, यत्त्वेवं,—इति पाठः प्रतिभाति।

† इत्थमेव पाठः सर्व्वत्र। मम तु, पीड़ितजनागमनम्,—इति पाठः प्रतिभाति।

आप्तप्रणीतत्वेन वेदप्रामाण्यमिच्छन्ति ये पाशुपतादयः। व्रातगण-शब्दयोरर्थः कात्यायनेन दर्शितः,—

"नानायुधधरा व्राताः समवेतास्तु कीर्त्तिताः।

कुलानान्तु समूहस्तु गणः स परिकीर्त्तितः"—इति।

पूगे व्राते चान्योन्यमुत्सृज्य समरे न गन्तव्यमित्यादयः सन्ति समयाः। गणे तु पञ्चमेऽहनि पञ्चमे वाऽब्दे कर्णवेधः कर्त्तव्य इत्यादि-समयाः। दुर्गे धान्यादिकं गृहीत्वा अन्यच याचता न तद्विक्रेय-मित्यादिः समयः। जनपदे तु कपिविक्रेतुर्हस्ते कपित् क्रेतृहस्ते शुल्कग्रहणमित्यादिकोऽप्यनेकविधः समयः। तत्समयजातं यथा न भ्रश्यति न च व्यतिवर्त्तते, तथा राजा कुर्य्यादित्यर्थः। समुदाये तु पुरुषविशेषे विशेषमाह बृहस्पतिः,—

"कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्परम्।

विश्वासं प्रथमं कृत्वा कुर्य्युः कार्य्याण्यनन्तरम्"—इति।

मध्यस्थैः प्रतिभूभिः। कार्य्याणि समूहकार्य्याणि। कात्यायनोऽपि,—

"समूहानां तु यो धर्म्मः तेन धर्म्मेण ते सदा।

प्रकुर्य्युः सर्वकर्म्माणि स्वधर्म्मेषु व्यवस्थिताः"—इति।

समूहकार्य्यकारिषु हेयोपादेयान्विभजति बृहस्पतिः,—

"विद्वेषिणो व्यसनिनः शालीनालसभीरवः।

लुब्धातिवृद्धबालाश्च न कार्य्याः कार्य्यचिन्तकाः॥

शुचयो वेदधर्म्मज्ञाः दक्षाः दान्ताः कुलोद्भवाः।

सर्वकार्य्यप्रवीणाश्च कर्त्तव्यास्तु महत्तमाः"—इति।

ते च कियन्तः कर्त्तव्या इत्यपेक्षिते सएवाह,—

"द्वौ त्रयः पञ्च वा कार्य्याः समूहहितवादिनः।
यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमम्"—इति।

कात्यायनोऽपि,—

"युक्तियुक्तञ्च यो हन्याद्यः कार्य्यानवकाशदः।
अयुक्तञ्चैव यो ब्रूयात्स दाप्यः पूर्वसाहसम्"—इति।

बृहस्पतिरपि,—

"यस्तु साधारणं हिंस्यात् क्षिपेत् त्रैविद्यमेव वा।
संवित्क्रियां विहन्याच्च स निर्वास्यस्ततः पुरात्"—इति।

समूहिनामप्यधर्म्मेण द्वेषादिना कार्य्यकरणे दण्डमाह स एव,—

"बाधाङ्कुर्य्युर्यदेकस्य सम्भूताद्वेषसंयुताः।
राज्ञा सर्वे गृहीतार्थाः शास्याश्चैवानुबन्धतः॥
न यथा समयं जह्युः स्वमार्गे स्थापयेच्च तान्"—इति।

यस्तु मुख्यः समूहद्रव्यादिकमपहरति, तस्य दण्डमाह याज्ञवल्क्यः,—

"गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेत्तु यः।
सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्"—इति।

मर्म्मोद्घाटकादीनां पुरान्निर्वासनमेव दण्डमाह बृहस्पतिः,—

"अरुन्तुदः सूचकश्च भेदकृत्साहसी तथा।
श्रेणीपूगनृपद्वेष्टा क्षिप्रं निर्वास्यते तदा॥
पुरश्रेणीगणाध्यक्षाः पुरदुर्गनिवासिनः।
वाग्धिग्दमं परित्यागं प्रकुर्य्युः पापकारिणः॥
तैः कृतं यत्स्वधर्म्मेण निग्रहानुग्रहं नृणाम्।

तद्राज्ञाऽप्यनुमन्तव्यं निसृष्टार्था हि ते स्मृताः"—इति ।

निसृष्टार्थाः, अनुज्ञातकार्य्या इत्यर्थः । पाषण्ड्यादिसर्वसमूहेषु यथा राज्ञा वर्त्तितव्यं, तदाह नारदः,—

"यो धर्म्मः कर्म्म यच्चैषामुपस्थानविधिश्च यः ।
यच्चैषां प्राप्नुयादर्थमनुमन्येत तत्तथा ॥
प्रतिकूलञ्च यद्राज्ञः प्रकृत्यवमतं च यत् ।
दोषवत् करणं यत्तु स्यादनाम्नायकल्पितम् ॥
प्रवृत्तमपि तद्राजा श्रेयस्कामो निवर्त्तयेत्"—इति ।

धर्म्मोजटावल्कादि । कर्म्म प्रात*पर्य्युषितभिक्षाटनादि । उपस्थानविधिः समूहकार्य्यार्थे पटहादिध्वनिमाकर्ण्य मण्डपादौ मेलनम् । वृत्त्युपादानं[१] जीवनार्थं तापसवेषपरिग्रहः । राज्ञः प्रतिकूलमाधिकारिशूद्रकर्त्तृकं त्रैवर्णिकविवादे धर्म्मविवेचनम् । तच्च प्रतिकूलत्वमुक्तं स्मृत्यन्तरेण,—

"यस्य राज्ञस्तु कुरुते शूद्रो धर्म्मविवेचनम् ।
तस्य प्रपश्यते राष्ट्रं बलं कोषश्च नश्यति"—इति ।

---

* इत्यमेव पाठः सर्व्वत्र । मम तु, प्रातः,—इति पाठः प्रतिभाति ।

---

(१) इयञ्च, यच्चैषां प्राप्नुयादर्थमित्यस्य व्याख्या । एतद्व्याख्यादर्शनेन, यच्चैषां प्राप्नुयादर्थमित्यत्र, यच्चैषां वृत्त्युपादानम्,—इति पाठः प्रतिभाति । विवादरत्नाकरे तथैव पाठोधृतोवर्त्तते । परमादर्शपुस्तकेषु दर्शनात् यच्चैषां प्राप्नुयादर्थमित्ययमेव पाठो मूले रक्षितः । प्रा० का० पुस्तकयोस्तु, प्रत्युपादानं,—इति पाठो वर्त्तते ।

प्रकृत्यवमतं स्वभावतएव यदननुज्ञातं; पाषण्डादिषु ताम्बूल-भक्षणं, परस्परोपतापः, राजपुरुषाश्रयणेनान्योन्यमर्थापहरणादि। दोषवत्करणं श्रुतिस्मृतिविरुद्धं विधवादौ वेश्यालादिकं पाषण्डादिभिः प्रकल्पितम्। संविल्लङ्घने दण्डमाह मनुः,—

"यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम्।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत्॥
निगृह्य दापयेदेनं समयव्यभिचारिणम्।
चतुःसुवर्णकं निष्कं* शतमानञ्च राजतम्[१]॥
एवं दण्डविधिङ्कुर्य्यात् धार्मिकः पृथिवीपतिः।
ग्रामजातिसमूहेषु समयव्यभिचारिणाम्"—इति।

सत्येन शपथेन। एतेषां निर्वासनचतुःसुवर्णनिष्कशतमानरूपाणां जातिविद्यागुणाद्यपेक्षया व्यवस्था कल्पनीया। समूहपूजार्थं राज्ञा समर्पितं द्रव्यं समूहाय यो न ददाति, तं प्रत्याह याज्ञवल्क्यः,—

"समूहकार्य्ये आयातान् कृतकार्य्यान् विसर्जयेत्।
सदा सम्मानसत्कारैः पूजयित्वा महीपतिः॥

---

* चतुः सुवर्णान् षट् निष्कान्,—इति ग्रन्थान्तरधृतः पाठः।

---

(१) अत्र च, "द्वात्रिंशं शतं सुवर्णानां निष्कमाहुर्मनीषिणः"—इत्यादि-निष्काणां व्यवच्छेदार्थं चतुःसुवर्णकमिति निष्कविशेषणमुपात्तम्। शतमानं राजतं रक्तिकानां विंशत्यधिकं शतत्रयमिति चण्डेश्वरेण व्याख्यातम्।

समूहकार्य्यप्रहितो यल्लभेत तदर्पयेत्।

एकादशगुणं दाप्यो यद्यसौ नार्पयेत् स्वयम्"—इति।

विभज्य ग्रहणमनुद्धृतविषयम्। यतस्तत्पक्षविषये सएवाह,—

"षाण्मासिकं वत्सरं वा विभक्तव्यं यथांऽशतः।

देयं बधिर* वृद्धान्धस्त्रीबालातुररोगिषु॥

सान्तानिकादिषु तथा धर्म्मएष सनातनः"—इति।

राज्ञः प्रसादलब्धवद्धनमपि सर्व्वेषां सममित्याह सएव,—

"यत्तैः प्राप्तं रक्षितं वा गणार्थे वा ऋणं कृतम्।

राज्ञः प्रसादलब्धञ्च सर्व्वेषां तत्समाहितम्†"—इति।

एतदभक्षितविषयम्। भक्षिते तु कात्यायन आह,—

"गणमुद्दिश्य यत्किञ्चित्कृत्वर्णं भक्षितं भवेत्।

आत्मार्थं विनियुक्तं वा देयं तैरेव तद्भवेत्"—इति।

ये तु समुदायं प्रसाद्य तदन्तर्गता ये च समुदायक्षोभादिना ततो बहिर्भूताः, तान् प्रत्याह सएव,—

"गणिनां श्रेणिवर्गाणां गताः स्युर्ये तु मध्यताम्।

प्राक्तनस्याधमर्णस्य‡ समांशाः सर्व्वएव ते॥

---

* देयं वा निःस्व,—इति का०।

† सर्व्वेषां तत्समूहितम्,—इति का०। सर्व्वेषामेव तत्समम्,—इति ग्रन्थान्तरधृतः पाठः।

‡ इत्थमेव पाठः सर्व्वत्र। प्राक्कृतस्य धनर्णस्य,—इति ग्रन्थान्तरधृतस्तु पाठः समीचीनः।

तथैव भोजनैर्भाव्यं* दानधर्मक्रियासु च।

समूहस्थोऽंशभागी स्यात् प्रगतस्त्वंशभागभाक्†"—इति।

संविद्व्यतिक्रमाख्यं विवादपदम्।

अथ क्रीतानुशयः कथ्यते।

तत्स्वरूपं नारदेनोक्तम्,—

"क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते।

क्रीतानुशय इत्येतद्विवादपदमुच्यते"—इति।

क्रीत्वाऽनुशयानुत्पत्त्यर्थं क्रेता क्रयात् प्रागेव सम्यक् परीक्षेत। तथाच सएव,—

"क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः।

परीक्षाऽभिमतं क्रीतं विक्रेतुर्न भवेत्पुनः"—इति।

परीक्षाऽभिमतं क्रीतं तद्दोषदर्शनेऽपि ग्रहीतुरेव भवति, न विक्रेतुः। तथाच बृहस्पतिः,—

"परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्"—इति।

तत्कालपरीक्षितस्य पुनरर्पणाभावः सावधिविषयः। तत्सद्यः‡ परीक्षणस्य विहितत्वात्। तथाच व्यासः,—

"चर्मकाष्ठेष्टकासूत्रधान्यासवरसस्य च।

---

* भोज्यवैभाज्य,—इति का०।

† प्रगतस्त्वंशभागिति,—इति का०। प्रगतस्त्वंशभाङ् न तु,—इति ग्रन्थान्तरीयः पाठस्तु समीचीनः।

‡ इत्थमेव पाठः सर्व्वत्र। मम तु, अन्येषां सद्यः,—इति पाठः प्रतिभाति।

वस्त्ररूप्यहिरण्यानां सद्यएव परीक्षणम्”—इति।

क्रीतानां पण्यानां द्रव्यविशेषेण परीक्षणकालावधिमाह सएव,—

“त्र्यहाद्दोह्यं परीक्षेत पञ्चाहाद्वाह्यमेव तु।

मणिमुक्ताप्रवालानां सप्ताहात् स्यात् परीक्षणम्॥

द्विपदामर्धमासं स्यात् पुंसान्तद्द्विगुणं स्त्रियाः।

दशाहात्सर्वबीजानामेकाहाल्लोहवाससाम्॥

अतोऽर्वाक् पण्यदोषस्तु यदि संजायते क्वचित्।

विक्रेतुः प्रतिदेयं तत् क्रेता मूल्यमवाप्नुयात्”—इति।

यथोक्तपरीक्षाकालातिक्रमे तु न प्रतिदेयमित्याह कात्यायनः,—

“अविज्ञातं तु यत्क्रीतं दुष्टं पश्चाद्विभावितम्।

क्रीतं तत् स्वामिने देयं पण्यं कालेऽन्यथा न तु”—इति।

अविज्ञातं परीक्षया तत्त्वतोऽपरिज्ञानं यस्य द्रव्यस्य; तत् यावत्-परीक्षाकाल उक्तः, तस्मिन् काले प्रतिदेयम्। अन्यथा तत्कालातिक्रमे दुष्टतया परिज्ञातमपि क्रीतं तत्स्वामिने न देयमित्यर्थः। पण्यानां देशकालवशादुपचयापचयौ प्रथमतो ज्ञातव्यावित्याह नारदः,—

“क्षयं वृद्धिं च जानीयात् पण्यानामागमं तथा”—इति।

अश्वादिपण्यानामस्मिन् काले अस्मिन्देशे च वृद्धिर्भविष्यतीति जानीयात्, तथा आगमं कुलीनत्वादिज्ञानार्थमुत्पादकजन्मभूम्यादिकञ्च जानीयादित्यर्थः। एवं सम्यक् परीक्ष्य गुणदोषदर्शनादिकारणमन्तरेण नानुशयः कार्य्य इत्याह याज्ञवल्क्यः,—

“क्षयं वृद्धिञ्च वणिजा पण्यानामविजानता।

क्रीत्वा नानुशयः कार्य्यः कुर्वन् षड्भागदण्डभाक्”—इति।

परीक्षितपण्यानां क्रयकालोत्तरकालम्*। क्रयकालपरिज्ञाने पुनः क्रेतुर्विक्रेतुरनुशयो न भवतीति व्यतिरेकादुक्तं भवति। पण्य-दोषतद्वृद्धिक्षयकारणचिन्तयाभावेऽनुशयकालाभ्यन्तरे यद्यनुशयं करोति, तदा पण्यषड्भागं दण्डनीयः। अनुशयकारणसद्भावेऽप्यनुशयकालातिक्रमेण योऽनुशयं करोति, सोऽप्येवं दण्डनीयः। एतच्चोपभोगविनश्वरवस्तुविषयम्। उपभोगेनाविनश्वरवस्तुविषये प्रत्य-र्पणे वृद्धिमाह नारदः,—

"क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी‡।
विक्रेतुः प्रतिदेयन्तत्तस्मिन्नेवाविचचितम्§"इति।

द्वितीयादिदिवसप्रत्यर्पणे तु विशेषस्तेनैवोक्तः,—

"द्वितीयेऽह्नि ददत्क्रेता मूल्यात् त्रिंशांशमावहेत्।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेवच"—इति।

परतोऽनुशयः न कर्त्तव्य इत्यर्थः। यत्तु पुनर्मनुनोक्तम्,—

"क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत्।
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा"—इति।

---

* अत्र, इति शेषः,—इति भवितुमुचितम्।

† इत्थमेव पाठः सर्व्वत्र। मम तु, क्रेतुरिव विक्रेतुः,—इति पाठः प्रतिभाति।

‡ दुष्क्रीतां मन्यते क्रियाम्,—इति का०।

§ तस्मिन्नेवाह्नि चाक्षतम्,—इति, तस्मिन्नेवाह्न्यवीक्षितम्,—इति च ग्रन्थान्तरधृतौ पाठौ।

तदुपभोगेनाविनश्वरगृहक्षेत्रक्रयानुशयादिविषयम्। तत्रैव द-शाहादेरुक्तत्वात्। तथाच कात्यायनः,—

"भूमेर्दशाहे विक्रेतुरायः तत्क्रेतुरेव च*।

द्वादशाहः सपिण्डानामपि चाब्दमतः परम्"—इति।

वासोविषयेऽपि नारदः,—

"परिभुक्तन्तु यद्वासः क्लिष्टरूपं मलीमसम्।

सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः"—इति॥

इति क्रीतानुशयः।

अथ विक्रीयासम्प्रदानम्।

तस्य स्वरूपं नारदेनोक्तम्,—

"विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते।

विक्रीयासम्प्रदानन्तत् विवादपदमुच्यते"—इति।

पण्यद्वैविध्यमुक्तं तेनैव,—

"लोकेऽस्मिन् द्विविधं द्रव्यं स्थावरं जङ्गमन्तथा।

क्रयविक्रयधर्मेषु सर्वं तत्पण्यमुच्यते॥

षड्विधस्तस्य तु बुधैः दानादानविधिक्रमः।

गणिमन्तुलिमं मेयं क्रियया रूपतः श्रिया"—इति।

गणिमं सङ्ख्येयं क्रमुकफलादि। तुलिमं तुलया धार्य्यं हेमचन्द-नादि। मेयं व्रीह्यादि। क्रियया वाहनदोहनादिक्रियोपलक्षितमश्व-

---

* इत्यमेव पाठः सर्व्वत्र।

महिष्यादि। रूपतः पण्यांगनादि। श्रिया पद्मरागादि। तदेतत् षट्-
प्रकारमपि पण्यं विक्रीयाप्रयच्छन्सोदयन्दाप्य इत्याह याज्ञवल्क्यः,—

"गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति।

सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते"—इति।

गृहीतमूल्यं पण्यं विक्रेता यदि प्रार्थयमानाय स्वदेशवणिजे
क्रेत्रे न समर्पयति; तच्च पण्यं परिक्रयकाले बहुमूल्यं सत्कालान्तरे
स्वल्पमूल्येनैव लभ्यते, तदा सोदयं वृद्ध्या सहितं विक्रेता क्रेत्रे दाप-
नीयः। यदा मूल्यह्रासकृतः पण्यस्योदयो नास्ति; किन्तु क्रयकाले
यावदेव यतो मूल्यस्य यत्पण्यमिति प्रतिपन्नं तावदेव, तदा तत्पण्य-
मादाय तस्मिन् देशे विक्रीणानस्य योलाभस्तेनोदयेन सहितं दाप-
नीयः। यथाऽऽह नारदः,—

"अर्घश्चेदवहीयेत सोदयं पण्यमावहेत्।

स्थानिनामेष नियमोदिग्लाभं दिग्विचारिणाम्"—इति।

यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन् पण्ये वस्त्रगृहा-
दिके य उपभोगः तदाच्छादनसुखनिवासादिरूपो विक्रेतुः, तत्-
सहितं पण्यमसौ दाप्यः। यथाऽऽह नारदः,—

"विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति।

स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम्"—इति।

क्षयशब्देन गतभोग उक्तः। यद्यपि तस्य दानमशक्यं, तथापि
तदनुगुणद्रव्यं देयम्। जङ्गमानां तु तत्कर्मनिमित्तं मूल्यं दाप्यः।
यदा त्वसौ क्रेता देशान्तरात्पण्यग्रहणार्थमागतस्तदा तत्पण्यमादाय
देशान्तरे विक्रीतस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दाप-

नीयः। विष्णुस्तु विक्रेतुर्दण्डमप्याह। "गृहीतमूल्यं यः पण्यं क्रेतुर्नैव दद्यात्तस्यासौ सोदयं दाप्यो राज्ञा चापि पणशतं दण्ड्यः"—इति। यस्तु विक्रीयानुशयवशान्नार्पयति, यश्च क्रीत्वाऽनुशयवशान्न गृह्णाति, तं प्रत्याह कात्यायनः,—

"क्रीत्वा प्राप्तं न गृह्णीयाद् यो न दद्याददूषितम्।
स मूल्याद्दशभागन्तु दत्त्वा स्वद्रव्यमाप्नुयात्॥
अप्राप्तेऽर्थे क्रियाकाले कृते नैव प्रदापयेत्।
एवं धर्म्मो दशाहात्तु परतोऽनुशयो न तु"—इति।

अदूषितं, जलादिनेति शेषः। दोह्यवाह्यादिपण्यस्य दोहना-दिनेति शेषः। दोह्यवाह्यादिपण्यस्य दोहनादिकालोऽर्थक्रिया-कालः। तस्मिन् प्राप्ते सति अग्रहणे अदाने वा कृते दशमभागं प्रदापयेत्[१]। किन्तु तमदत्त्वैव स्वद्रव्यमवाप्नुयात्। एष धर्म्मो-दशाहात् प्राग्वेदितव्यः। ततः परमनुशयो न कर्त्तव्यः। विक्रीया-सम्प्रयच्छतोऽपि विक्रीतं पण्यं विक्रेतृपार्श्वे स्थितं तस्य यदि दैवादिना नाशः स्यात्तदा विक्रेतुरेव हानिरित्याह याज्ञवल्क्यः,—

"दैवराजोपघातेन पण्यदोषउपागते।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः"—इति।

याचितस्येति विशेषणेन अयाचने न विक्रेतुर्हानिरित्यर्थादव-गम्यते। नारदोऽपि,—

---

(१) एतद्व्याख्यानदर्शनात्, अप्राप्तेऽर्थक्रियाकाले कृती नैव प्रदापयेत्,— इति वचनपाठः प्रतिभाति। परमादर्शपुस्तकेषु दृष्टएव पाठः मूले निवेशितः। मम तु, अग्रहणे अदाने वा कृते,—इत्येव पाठः प्रतिभाति।

"उपहन्येत वा पण्यं दह्येतापह्रियेत वा।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः"—इति।

यथा याचितस्याप्रयच्छतो विक्रेतुर्हानिः, तथा दीयमानपण्यमगृह्णतः क्रेतुरपीत्याह सएव,—

"दीयमानं न गृह्णाति क्रीतं पण्यञ्च यः क्रयी।
सएवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः"—इति।

याज्ञवल्क्योऽपि,—

"विक्रीतमपि विक्रेयं पूर्वं क्रेतर्यगृह्णति*।
हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत्"—इति।

यस्तु विशेषं पण्यं दर्शयित्वा सदोषं विक्रीणीते, यश्चान्यहस्ते विक्रीय तदन्यस्मै तत् प्रयच्छति, तयोः समानदण्ड इत्याह,—

"निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
मूल्यं तद्द्विगुणं दाप्यो विनयं तावदेव च॥
अन्यहस्ते च विक्रीय तथाऽन्ये तत् प्रयच्छति।
सोऽपि तद्द्विगुणं दाप्यो विनयं तावदेव च"—इति।

एतद्बुद्धिपूर्वकविषयम्।

"ज्ञात्वा सदोषं पण्यं यो विक्रीणीतेऽविचक्षणः।
तदेव द्विगुणं दाप्यस्तत्समं विनयं तथा"—इति

बृहस्पतिनोक्तत्वात्। अबुद्धिपूर्वके तु क्रेतुः अपरावर्त्तनमेव। अतएव एवंविधनियमोदत्तमूल्ये क्रये द्रष्टव्यः। अदत्तमूल्ये पुनः

---

* इत्थमेव पाठः सर्व्वत्र। पूर्व्वक्रेतर्य्यगृह्णति,—इति ग्रन्थान्तरधृतपाठस्तु समीचीनः।

पश्चे क्रेटविक्रेचोः समयादृते प्रवृत्तौ वा न कश्चिद्दोषः। तथाच नारदः,—

"दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्त्तितः।

अदत्तेऽन्यत्र समयान्न विक्रेतुरतिक्रमः"—इति।

यत्र पुनर्वाङ्मात्रेण क्रयोमा भूदिति विक्रेतृहस्ते क्रेचा यत्किञ्चिद्द्रव्यं दत्तम्, तत्र क्रेतुर्दोषवशेन क्रयासिद्धौ आह व्यासः,—

"सत्यंकारञ्च[१] यो दत्वा यथाकालं न दृश्यते।

पण्यमेव निसृष्टन्तद्दीयमानमगृह्णतः"—इति।

अत्र पण्यद्रव्यस्योत्सर्गः सत्यंकारद्रव्यस्योत्सर्गोऽभिमतः। अस्मिन्नेव विषये विक्रेतृदोषवशेन क्रयासिद्धौ आह याज्ञवल्क्यः,—

"सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्"—इति।

क्रीताऽनुशयानुत्पत्त्यर्थं कतिपयपण्यानां विक्रयानर्हत्वमाह मनुः,—

"नान्यदन्येन संसृष्टं रूपं विक्रयमर्हति।

न सावद्यञ्च न न्यूनं न दूरे न तिरोहितम्,,—इति।

इति क्रयविक्रयानुशयाख्यं विवादपदम्।

अथ स्वामिपालविवादपदविधिः।

तत्र तु तदभिधानप्रतिज्ञा मनुना कृता,—

"पशुषु स्वामिनाञ्चैव पालानाञ्च व्यतिक्रमे।

---

(१) यत् क्रेतुकामेन क्रयपरिस्थितये विक्रेत्रे समर्पितं, तत्सत्यंकारपदार्थः— इति चण्डेश्वरीया व्याख्या।

विवादं सम्प्रवक्ष्यामि यथावद्धर्मतत्त्वतः"—इति।

विवादं विवादापनोदमित्यर्थः। स्वामिपालयोः कर्त्तव्यमाह नारदः,—

"उपानयेद्गाः गोपालः पुनः प्रत्यर्पयेत्तथा"—इति।

यावन्तः प्रातः समर्पितास्तावन्तः सायं प्रत्यर्पणीया इत्यर्थः। गवादिपरिपालकस्य भृतिपरिमाणमाह नारदः,—

"गवां शताद् वत्सतरी धेनुः स्याद्द्विशताद् भृतिः।

प्रतिसंवत्सरं गोपे सन्दोहो वाऽष्टमेऽहनि"—इति।

प्रतिसंवत्सरं वत्सतरी द्विहायनी गौः भृतिः भृतके कल्पनीया, द्विशते तु सवत्सा गौः, अष्टमे दिवसे दोहस्य भृतित्वेन कल्पनीय इत्यर्थः। सन्दोहः सर्वदोहः।

"तथा धेनुभृतः क्षीरं लभेतैवाष्टमेऽखिलम्"—इति

बृहस्पतिस्मरणात्। इयञ्च भृतिकल्पना परिभाषितभृतिविशेषाभावविषये। परिभाषिते तु भृतिविशेषे सएव देयः। मनुस्तु प्रकारान्तरेण भृतिमाह,—

"गवां क्षीरभृतोयस्तु स दुह्याद्दशतोवराम्।

गोस्वाम्यनुमतो भृत्यः सा स्यात्पालेऽभृते भृतिः"—इति।

दशतो दशदोग्ध्रीणां मध्ये वरामुत्कृष्टां स्वीकृत्य तत्क्षीरं क्षीरभृतो गृह्णीयात्। क्षीरशून्यानां तु क्षीरमूल्यतो भृतिः कल्पनीया। यद्यसौ द्रव्यान्तरेण भृतः, न तत्रैषा भृतिरित्यर्थः। यस्त्वेवं परिकल्पितं वेतनं गृहीत्वा पशून् पालयन् भृत्यः स्वदोषेण पशून् मारयेत् विनाशयति वा, तं प्रत्याह याज्ञवल्क्यः,—

"प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः"—इति ।

प्रमादग्रहणं पालकदोषोपलक्षणार्थम् । प्रमादश्च मनुना स्पष्टी-कृतः,—

"नष्टं विनष्टं कृमिणा दंशितं विषमे मृतम् ।
हीनं पुरुषकारेण प्रदद्यात् पालएव तु"—इति ।

प्रसह्य चौरैरपहृतो न दाप्यः । तथाच सएव,—

"विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति ।
यदि देशे च काले च स्वामिनः स्वस्य शंसति"—इति ।

व्यासोऽपि,—

"पालग्रहे ग्रामघाते तथा राष्ट्रस्य विप्लवे ।
यत्प्रणष्टं हृतं वा स्यान्न पालेष्वच किल्बिषम्"—इति ।

एतत्पुरुषकारकरणे वेदितव्यम् । पुरुषकाराकरणे तु भवत्येव किल्बिषी । पुरुषकारस्य स्वरूपं नारदेन दर्शितम्,—

"कृमिचोरव्याघ्रभयात् दरीश्वभ्राच्च पालयेत् ।
व्यायच्छेच्छक्तितः क्रोशेत् स्वामिने तु निवेदयेत्"—इति ।

व्यायच्छेत्, प्रयतेतेत्यर्थः । यः प्रस्तुतार्थं न यतते, तं प्रत्याह सएव,—

"अव्यायच्छन्नविक्रोशन् स्वामिने चानिवेदयन् ।
दातुमर्हति गोपस्तान् विनयश्चैव राजनि"—इति ।

विनयप्रमाणमाह याज्ञवल्क्यः,—

"पालदोषविनाशे तु पाले दण्डो विधीयते ।
अर्द्धत्रयोदशपणः स्वामिने द्रव्यमेवच"—इति ।

अर्द्धत्रयोदशपणाः सार्द्धदादशकार्षापणाः। पालदोषमाह मनुः,—

"अजाविके तु संरुद्धे वृकैः पाले त्वनायति।

यां प्रसह्य वृकोहन्यात्पाले तत्किल्बिषं भवेत्"—इति।

अनायति, उपद्रवनिराकरणाय अनागच्छतीत्यर्थः। यां, अजाविकजातीयाम्। एतत्सुगमस्थलस्थविषयम्। दुर्गमस्थलविषयेतु न दोष इत्याह सएव,—

"तासां चेदवरुद्धानां चरन्तीनां मिथोवने।

यामुपेत्य वृकोहन्यान्न पालस्तत्र किल्बिषी"—इति।

अवरुद्धानां, पालकेन स्थापितानामित्यर्थः। दैवमृतानां पुनः कर्णादिकं दर्शनीयम्। तथाच मनुः,—

"कर्णौ चर्म च बालांश्च वस्तिस्नायुरोचनम्।

पशुस्वामिषु दद्यात्तु मृतेष्वङ्काभिदर्शनम्"—इति।

स्मृत्यन्तरमपि,—

"कर्णौ चर्म च बालांश्च शृङ्गस्नाय्वस्थिरोचनम्।

पशुस्वामिषु दद्यात्तु मृतेष्वङ्गानि दर्शयेत्"—इति।

गोप्रचारभूमिमाह याज्ञवल्क्यः,—

"ग्रामेच्छया गोप्रचारो भूमीराजेच्छयाऽपिच"—इति।

ग्रामेच्छया ग्रामाल्पत्वमहत्त्वापेक्षया यदृच्छया वा गवां तृणादिभक्षणार्थं कियानपि भूभागः क्षतः परिकल्पनीयः। गवां प्रचारस्थानासनसौकर्य्यार्थं ग्रामक्षेत्रयोरन्तरमाह सएव,—

"धनुःशतं परीणाहो ग्रामक्षेत्रान्तरम्भवेत्।

द्वे शते खर्वटे स्यात् नगरस्य चतुःशतम्"—इति।

ग्रामक्षेत्रयोरन्तरं धनुःशतपरिमितम्। सर्वदैवं विधिना शस्यं कार्य्यम्। खर्वटस्य प्रचुरकण्टकसन्तानस्य ग्रामस्य द्वे शते अन्तरे शस्यं, नगरस्य च बहुजनसङ्कीर्णस्य चतुःशतपरिमिते अन्तरे शस्यं कार्य्यमिति। तत्र पशुनिवारणाय वृतिरपि कल्पनीयेत्याह कात्यायनः,—

"अजातेष्वेव शस्येषु कुर्य्यादावरणं सदा।
दुःखेन विनिवार्य्यन्ते लक्ष्यस्वादुरसा मृगाः"—इति।

नारदोऽपि,—

"पथि क्षेत्रे वृतिः कार्य्या यामुष्ट्रो नावलोकयेत्।
न लङ्घयेत् पशुर्नाश्वो न भिन्द्यात् यां च सूकरः"—इति।

एवं च पशुनिवारणे कृतेऽपि तामतिक्रम्य शस्यादिविनाशे सति मनुराह,—

"पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः।
स पालः शतदण्डार्हो विपालान् वारयेत् पशून्"—इति।

पथि क्षेत्रे परिवृते सति तां वृतिमतिक्रम्य शस्यघाते स पालः पशुकार्य्ये पणशतदण्डार्हः। एवं, ग्रामान्तीये ग्रामसमीपवर्त्तिनि क्षेत्रे परिवृते सति तां वृत्तिमतिक्रम्य शस्यघाते स पालः शतपणदण्डार्हः। तदनेन, अपरिवृते पालस्य दण्डाभावः सूचितः। मनुस्तु साक्षात् दण्डं निषेधति,—

"तत्रापरिवृतं धान्यं प्रहिंस्युः पशवो यदि।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्"—इति।

एतद्दीर्घकालप्रचारविषयम्। दीर्घकालप्रचारे तु दण्डमर्हति।

अतएवाल्पकालप्रचारे दोषाभावमाह विष्णुः। "पथि ग्रामप्रान्ते च न दोषोऽल्पकालम्"—इति। दण्डपरिमाणन्तु पशुविशेषेण दर्शितं याज्ञवल्क्येन,—

"माषानष्टौ तु महिषी शस्यघातस्य कारिणी।
दण्डनीया तदर्द्धन्तु गौस्तदर्द्धमजाविकम्॥
भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः।
सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्"—इति।

परशस्यघातकारिमहिषीस्वामी प्रतिमहिष्यष्टौ माषान् दण्डनीयः। चतुरोमाषान् गोस्वामी। मेषस्वामी द्वौ द्वौ माषौ। एषामेव पशूनां शस्यभक्षणादारभ्य यावच्छयनमनिवारितानां स्वामी यथोक्तदण्डात् द्विगुणं दण्डनीयः। तथा,

"तथाऽजाविकवत्सानां पादोदण्डः प्रकीर्त्तितः"—इति

स्मृत्यन्तरोक्तं वेदितव्यम्। माषश्चात्र ताम्रिकपणस्य विंशतितमो भागः,

"माषो विंशतिमो भागः पणस्य परिकीर्त्तितः"—इति

नारदस्मरणात्। भक्षयित्वोपविष्टसवत्सविषये यथोक्ताच्चतुर्गुणोदण्डः। तदुक्तं स्मृत्यन्तरे,—

"वत्सानां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः"—इति।

यत्पुनर्नारदेनोक्तम्,—

"माषं गां दापयेद्दण्डं द्वौ माषौ महिषं तथा।
तथाऽजाविकवत्सानां दण्डः स्यादर्द्धमाषिकः"—इति।

तन्मुहूर्त्तमात्रभक्षणविषयम्। अतएवाहतुः शङ्खलिखितौ।

"रात्रौ चरन्ती गौः पञ्च माषान् रात्रिमुहूर्त्तं माषं दण्डं याप्ये"—इति।

आतुरपशुविषये तु न दण्ड इत्याह नारदः,—

"जराग्रह* गृहीतो वा वज्राशनिहतोऽपिवा।
अपि सर्पेण वा दष्टो वृक्षाद्वा पतितो† भवेत्॥
व्याघ्रादिभिर्हतो वाऽपि व्याधिभिर्वाऽप्युपद्रुतः।
न तत्र दोषः पालस्य न च दोषोऽस्ति गोमिनाम्"—इति।

अनातुरेष्वपि केषुचित् पशुषु दण्डाभावमाह सएव,—

"गौः प्रसूता दशाहन्तु महोक्षो वाऽपि कुञ्जराः।
निवार्य्याः स्युः प्रयत्नेन तेषां स्वामी न दण्डभाक्"—इति।

मनुरपि,—

"अनिर्दशाहां गां सूतां वृषान् देवपशून् तथा।
सपालान् वा विपालान् वा न दण्ड्यान्मनुरब्रवीत्"—इति।

वृषामहोक्षाः। अथवा, वृषोत्सर्गविधानेनोत्सृष्टाः। याज्ञवल्क्योऽपि,—

"महोक्षोत्सृष्टपशवः सूतिकाऽऽगन्तुकादयः।
पालोयेषां च ते मोच्या देवराजपरिप्लुताः"—इति।

आदिशब्देन मृतवत्सादयो गृह्यन्ते। अतएवोशना,—

"अदण्ड्या मृतवत्सा च संज्ञा रोगवती कृशा।
अदण्ड्याऽऽगन्तुकी गौश्च सूतिका चाभिसारिणी॥
अदण्ड्या चोत्सवे गावः श्राद्धकाले तथैव च"—इति।

---

* ग्राह,—इति पु०।

† वृक्षादापतितो,—इति का०।

परशस्यविनाशे न केवलं स्वामी दण्डनीयः, अपि तु शस्यमपि दापनीयः। तथाच वृहस्पतिः,—

"शस्याभिवारयेत् गास्तु चीर्णे दोषद्वयं भवेत्।
स्वामी शतदमं दाप्यः पालस्ताड़नमर्हति॥
अदम्य सदमं चीर्णे समूले कार्षभक्षिते"—इति।

अतएव नारदः,—

"समूलशस्यनाशे तु तत्स्वामी प्राप्नुयात्कृतम्।
बधेन गोपोमुच्येत दण्डं स्वामिनि पातयेत्"—इति।

तत्स्वामी शस्यस्वामी। अदम्य सामन्तादिभिः परिकल्पितो देयः। तथाच सएव,—

"गोभिस्तु भक्षितं शस्यं यो नरः प्रतियाचते।
सामन्तानुमतं देयं धान्यवत्तच कल्पितम्"—इति।

यत्तूशनसा अदयाचननिषेधोऽर्थात् कृतः,—

"गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते।
पितरस्तस्य नाश्नन्ति नाश्नन्ति चिदिवौकसः"—इति।

स ग्रामादिसमीपस्थानावृतक्षेत्रविषयः।

इति स्वामिपालाख्यं विवादपदम्।

अथ सीमाविवादनिर्णयः।

तत्र तावत्सीमा चतुर्विधा। जनपदसीमा ग्रामसीमा गृहसीमा क्षेत्रसीमा च,—इति। सा च यथाक्रमं पञ्चलक्षणा। तदुक्तं नारदेन,—

"ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता।

राजशासननीता च सीमा पञ्चविधा स्मृता"—इति।

ध्वजिनी वृक्षादिसूचिता। मत्स्यिनी जलसिन्नान्विता। नैधानी निखाततुषाङ्गारादिमती। भयवर्जिता अर्थिप्रत्यर्थिपरस्परविषयापत्तिनिर्म्मिता। राजशासननीता ज्ञातृचिह्नाद्यभावे राजेच्छया निर्मिता। तथाच व्यासः,—

"ग्रामयोरुभयोः सीम्नि वृक्षा यत्र समुन्नताः।
समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्त्तिता॥
स्वच्छन्दगा बहुजला मत्स्यकूर्म्मसमन्विता।
प्रत्यक् प्रवाहिनी यत्र सा सीमा मत्स्यिनी मता॥
तुषाङ्गारकपालैस्तु कुम्भैरायतनैस्तथा।
सीमाऽत्र चिह्निता कार्य्या नैधानी सा निगद्यते"—इति।

वृक्षाश्च न्यग्रोधादयः। तदाह मनुः,—

"सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंसुकान्।
ग्रामसीमासु वृक्षांश्च चौरिकांश्चैव पादपान्"—इति।

प्रत्यक् प्रवाहिनीत्यनेन वाप्यादीनि प्रकाशचिह्नान्युपलक्ष्यन्ते। तानि च बृहस्पतिना दर्शितानि,—

"वापीकूपतडागानि चैत्यारामसुरालयाः।
स्थलनिम्ननदीस्रोतःशरगुल्मनगादयः॥
प्रकाशचिह्नान्येतानि सीमायां कारयेत् सदा"—इति।

तुषाङ्गारकपालैरिति करीषादीनां गुप्तचिह्नानामप्युपलक्षणम्। तानि च तेनैव दर्शितानि,—

"करीषास्थितुषाङ्गारशर्कराऽश्मकपालिका।

विकृतेष्टकगोवालकार्पासास्थीनि भस्म च ॥

प्रक्षिप्य कुम्भेष्वेतानि सीमान्तेषु निधापयेत्"—इति।

तानि च सीमालिङ्गानि स्थविरैर्बालानां दर्शनीयानि। तथाच बृहस्पतिः,—

"ततः पौगण्डबालानां प्रयत्नेन प्रदर्शयेत्।

वार्द्धके च शिशूनान्ते दर्शयेयुस्तथैव च ॥

एवं परम्पराज्ञाते सीमाभ्रान्तिर्न जायते"—इति।

एवं निरूपितैर्लिङ्गैः सीमाविवादनिर्णयं कुर्य्यादित्याह मनुः,—

"एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः।

यदि संशयएव स्याल्लिङ्गानामपि दर्शने ॥

साक्षिप्रत्ययएव स्यात् सीमावादविनिर्णये।

साक्ष्यभावे तु चत्वारो ग्रामाः सीमान्तवासिनः ॥

सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ"—इति।

प्रथमं तावदर्थिप्रत्यर्थिलिङ्गैः सीमाविवादनिर्णयः। यथाचाप्यविश्वासस्तदा लिङ्गविषयकात् सीमाविषयकाद्वा साक्षिप्रत्ययात् निर्णयः। यदा साक्षिणामभावस्तदा सामन्तैर्विनिर्णयः इत्यर्थः। "तेषामभावे सामन्ताः"—इति कात्यायनेनोक्तत्वात्। के पुनः सामन्ता इत्यपेक्षिते सएवाह,—

"संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः।

संसक्तसक्तसंसक्ताः पद्माकाराः प्रकीर्त्तिताः"—इति।

विप्रतिपन्नसीमकस्य क्षेत्रस्य चतसृषु दिक्षु सन्निहितग्रामादिभोक्तारः संसक्ताः। एतएव सामन्तशब्दाभिधेयाः। यदा पुनरदुष्ट-

संसक्तका न सन्ति, तदा संसक्तसंसक्तसंसक्तैः निर्णयः कार्य्यः। तदाह स एव,—

"स्वार्थसिद्धौ च दुष्टेषु सामन्तेष्वर्थगौरवात्।
तत्संसक्तैस्तु कर्त्तव्य उद्धारो नात्र संशयः॥
संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्त्तिताः।
कर्त्तव्यास्त्वविदुष्टास्तु राज्ञा धर्म्मं विजानता॥
तेषामभावे सामन्तामौलवृद्धोद्धृतादयः।
स्थावरे षट्प्रकारेऽपि कार्य्या नात्र विचारणा"—इति।

वृद्धादिलक्षणं तेनैवोक्तम्,—

"निबध्यमानं यैर्दृष्टं तत्कार्य्यं सुगुणान्वितैः।
वृद्धा वा यदि वाऽवृद्धास्ते च वृद्धाः प्रकीर्त्तिताः॥
ये तत्र पूर्वसामन्ताः पश्चाद्देशान्तरङ्गताः।
तन्मूलत्वात्तु ते मौलाः ऋषिभिः परिकीर्त्तिताः।
उपश्रवणसम्भोगभयस्थानोपचिह्निताः।
उद्धरन्ति पुनर्य्यस्मादुद्धृतास्ते ततः स्मृताः"—इति॥

साक्षिप्रभृत्युद्धृतपर्य्यन्तानामभावे मनुराह,—

"सामन्तानामभावे तु मौलानां सीमसाक्षिणाम्।
इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान्॥
व्याधान् शाकुनिकान् गोपान् कैवर्त्तान्मूलखानकान्।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान्"—इति।

अन्यांश्चेति चकारेण सीमाकर्षका उपलक्ष्यन्ते। तथाच याज्ञवल्क्यः,—

"सीमाविवादे क्षेत्रस्य सामन्ताः स्थविरादयः।
गोपाः सीमाकृषाणाश्च सर्वे च वनगोचराः।
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः॥
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम्"—इति।

नारदोऽपि,—

"ग्रामसीमासु च वहिर्ये च स्युः कृषिजीविनः।
गोपाः शाकुनिकव्याधा ये चान्ये वनगोचराः"—इति।

ते च शपथैः शापिताएव निर्णयं ब्रूयुः। तथाच वृहस्पतिः,—

"शापिताः शपथैः स्वैः स्वैर्ब्रूयुः सीमाविनिर्णयम्।
दर्शयेयुश्च लिङ्गानि तत्प्रमाणमिति स्थितिः"—इति।

स्वैः स्वैरिति,

"सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः"—

इत्यादि लोकव्यवस्थया प्रतिपादितैः इत्यर्थः। मनुरपि,—

"ग्रामेयककुलानां तु समक्षं सीमसाक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तथैवच विवादिनोः॥
ते पृष्टास्तु यथा ब्रूयुः सीमासन्धिषु लक्षणम्।
तत्तथा स्थापयेद्राजा धर्म्मेण ग्रामयोर्द्वयोः"—इति।

सीमासाक्षिणां तु लक्षणमाह वृहस्पतिः,—

"आगमञ्च प्रमाणञ्च भोगं कालञ्च नाम च।
भूभागलक्षणञ्चैव ये विदुस्तेऽत्र साक्षिणः"—इति।

यदा पुनस्तिङ्गानि न सन्ति, विद्यमानानि वा लिङ्गालिङ्गतया* सन्दिग्धानि, तदा निर्णयोपायमाह याज्ञवल्क्यः,—

* लिङ्गतया,—इति का०।

"सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा।

रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः"—इति।

रक्तस्रग्विणो रक्ताम्बरधरा धर्मारोपितक्षितिखण्डाः* सीमां प्रदर्शयेयुः। स्वैः स्वैः शपथैः शापिताः सन्तः सीमां नयेयुः। तथाच मनुः,—

"शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः।

सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्"—इति।

नयेयुरिति बहुवचनमपि अविवक्षितम्। एकस्यापि सीमाप्रदर्शकस्य बृहस्पतिना दर्शितत्वात्,—

"शास्त्रचिह्नैर्विना साधुरेकोऽप्युभयसंमतः।

रक्तमाल्याम्बरधरो मृदमादाय मूर्द्धनि॥

सत्यव्रतः सोपवासः सीमानं दर्शयेन्नरः"—इति।

यत्तु नारदेनोक्तम्,—

नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि।

गुरुत्वादस्य कार्य्यस्य क्रियैषा बहुषु स्थिता"—इति।

तदुभयानुमतधर्मविद्व्यतिरिक्तविषयम्। स्थलादिचिह्नाभावेऽपि साक्षिसामन्तादीनां सीमाज्ञान उपायविशेषमाह† नारदः,—

"निम्नगाऽपहृतोत्सृष्टनष्टचिह्नासु भूमिषु‡।

तत्प्रदेशानुमानाच्च प्रमाणाद्भोगदर्शनात्"—इति।

प्रत्यर्थिसमक्षमविप्रतिपन्नाया अस्मार्त्तकालोपलक्षितभुक्तेर्वा निश्चिनुयुरित्यर्थः। एतेषां साक्षिसामन्तप्रभृतीनां सीमासङ्क्रमण-

---

* इत्थमेव पाठः सर्व्वत्र। मूर्द्धारोपितक्षितिखण्डाः—इति तु भवितुं युक्तम्।

† साक्षिसामन्तादिना सीमाज्ञानोपाये विषयमाह,—इति शा०।

‡ निम्नगापहृतोच्छिन्नचिह्नैर्विगतभूमिषु,—इति शा०।

दिनादारभ्य यावत् त्रिपक्षं यदि राजदैविकव्यसनं नोत्पद्यते, तदा तत्प्रदर्शनात् सीमानिर्णयः। तथाच कात्यायनः,—

"सीमाचङ्क्रमणे कोशे पादस्पर्शे तथैव च।

त्रिपक्षपञ्चसप्ताहं दैवराजकमिष्यते"—इति।

यस्त्वत्र निषेधः स्मृत्यन्तरेऽभिहितः,—

"वाक्पारुष्ये महीवादे दिव्यानि परिवर्जयेत्"—इति।

स उक्तलक्षणपुरुषाभावविषय इत्यविरोधः। कथन्तर्हि निर्णय-इत्यपेक्षिते नारदः,—

"यदा तु न स्युर्ज्ञातारः सीमायाश्चापि लक्षणम्।

तदा राजा द्वयोः सीमामुन्नयेदिष्टतः स्वयम्"—इति।

इष्टतः, इच्छातः। याज्ञवल्क्योऽपि,—

"अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता"—इति।

ज्ञातॄणां सामन्तादीनां चिह्नानां वृक्षादीनामभावे राजैव सीम्नः प्रवर्त्तयिता। ग्रामद्वयमध्यवर्त्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्य उभयोर्ग्रामयोः समर्प्य तन्मध्ये सीमाचिह्नानि कारयेत्। यदा तस्याभूमेर्यस्यैवोपकारातिशयो दृश्यते, तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया। तथाह मनुः,—

"सीमायामविषह्यायां स्वयं राजैव धर्मवित्।

प्रदिशेद्भूमिमेकेषां उपकारादिति स्थितिः"—इति।

अविषह्यायां, ज्ञातृज्ञापकशून्यायामित्यर्थः। ऋणादिनिर्णयवत् सीमानिर्णयो नावेदनानन्तरमेव कार्य्यः, किन्तु प्रकाशितेषु मेलादिषु। तदाह स एव,—

"सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः ।
ज्येष्ठे मासे नयेत्सीमां सुप्रकाशेषु सेतुषु"—इति ।

ग्रामग्रहणं नगरादेरप्युपलक्षणार्थम् । अतएव कात्यायनः,—

"सीमान्तवासि* सामन्तैः कुर्य्यात् क्षेत्रादिनिर्णयम् ।
ग्रामसीमादिषु तथा तद्वन्नगरदेशयोः"—इति ।

यदा रागलोभादिवशात् सीमासाक्षिणोनिर्णयं न कुर्य्युः, तदा दण्डनीया इत्याह सएव,—

"सङ्कनान्तु गृहीतानां न सीमानिर्णयं यदि ।
कुर्य्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसम्"—इति ।

एतत् ज्ञानविषयम् । अज्ञानविषये तु नारदः,—

"अथ चेदनृतं ब्रूयुः सामन्ताः सीमनिर्णये ।
सर्वे पृथक् पृथग्दण्ड्याः राज्ञा मध्यमसाहसम् ॥
सामन्तात्परतो ये स्युस्तत्संसक्ता मृषोदिते ।
संसक्तसक्तसक्तास्तु विनेयाः पूर्वसाहसम् ॥
मौलवृद्धादयस्त्वन्ये दण्डं दत्वा पृथक् पृथक् ।
विनेयाः प्रथमेनैव साहसेन व्यवस्थिताः"—इति ।

साक्षिणां मिथोवैमत्याभिधाने दण्डमाह कात्यायनः,—

"कीर्त्तिते यदि भेदः स्याद्दण्ड्यास्तूत्तमसाहसम्"—इति ।

सीमाचङ्क्रमणकर्तॄणामपि दण्डमाह सएव,—

"यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः ।
विपरीतं नयन्तस्तु दाप्यास्तु द्विशतं दमम्"—इति ।

---

* सामन्तभावे—इति का० आ० ।

अज्ञानादनृतवचने साक्ष्यादीन् दण्डयित्वा पुनर्विचारः प्रवर्त्तयितव्यः। तथाच कात्यायनः,—

"अज्ञानोक्तान्* दण्डयित्वा पुनः सीमां विचारयेत्।
त्यक्त्वा दुष्टांस्तु सामन्तान् तस्मान्मौलादिभिः सह।
समीक्ष्य† कारयेत्सीमामेवं धर्मविदो विदुः"—इति।

नद्युत्सृष्टक्षेत्रविषये निर्णयमाह बृहस्पतिः,—

"अन्यग्रामात्समाहृत्य‡ दत्ताऽन्यस्य यदा मही।
महानद्याऽथवा राज्ञा कथं तत्र विचारणा॥
नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही।
अन्यथा न भवेल्लाभो नराणां राजदैवकः॥
क्षयोदयौ जीवनस्य दैवराजवशान्नृणाम्।
तस्मात्सर्वेषु कार्य्येषु तत्कृतं न विचालयेत्॥
ग्रामयोरुभयोर्यत्र मर्य्यादा कल्पिता नदी।
कुरुते दानहरणं भाग्याभाग्यवशान्नृणाम्॥
एकत्र कूलपातन्तु भूमेरन्यत्र संस्थितिम्।
नदीतीरे प्रकुरुते तस्य तां न विचालयेत्"—इति।

एतदव्युप्त§सस्यतीरविषयम्। उप्तसस्यविषये तु सएवाह,—

"क्षेत्रसस्यं समुत्सृज्य|| भूमिश्छिन्ना यदा भवेत्।

---

* अज्ञानोक्तौ,—इति का०।
† स वैश्य,—इति ग्रा०।
‡ समाहृत्य,—इति ग्रा०।
§ एतदनुप्त,—इति ग्रा०। एवं परत्र।
|| समुत्सृज्य,—इति ग्रा०।

नदीस्रोतःप्रवाहेण* पूर्वस्वामी लभेच्च ताम्”—इति।

तां मग्नस्थां भूमिं पूर्वस्वामी यावद्भग्नशस्यफलप्राप्तिस्तावल्लभेतेत्यर्थः। फलप्राप्तेरूर्द्धं तु पूर्ववचनविषयसमानता। राजदत्तविषये कञ्चिदपवादमाह स एव,—

“या राज्ञा क्रोधलोभेन छलन्यायेन वा हृता।

प्रदत्ताऽन्यस्य तुष्टेन न सा सिद्धिमवाप्नुयात्”—इति।

एतच्च खलहेतुप्रमाणवत्त्वेचविषयम्। प्रमाणाभावे तु स एवाह,—

“प्रमाणरहितां भूमिं भुञ्जतोयस्य या हृता।

गुणाधिकाय वा दत्ता तस्य तां न विचालयेत्”—इति।

गृहादिविषये निर्णयस्तेनैव दर्शितः,—

“निवेशकालादारभ्य गृहवार्य्यापणादिकम्†।

येन यावद्यथा भुक्तं तस्य तन्न विचालयेत्॥

अरत्निद्वयमुत्सृज्य परकुड्यादि वेशयेत्”—इति।

अवस्करादिभिश्चतुष्पथादिकं न रोधयेदित्याह नारदः,—

“अवस्करस्थलश्वभ्रभ्रमस्यन्दनिकादिभिः।

चतुष्पथसुरस्थानराजमार्गांश्च रोधयेत्”—इति।

बृहस्पतिः,—

“यान्त्यायान्ति जना येन पशवश्चानिवारिताः।

तदुच्यते संसरणं न रोद्धव्यन्तु केनचित्”—इति।

---

* प्रवाहे च,—इति का॰ शा॰।

† गृहचर्य्यापणादिकम्,—इति शा॰।

यस्तु संसरणे श्वभ्रादिकं करोति, तस्य दण्डमाह सएव,—

"यस्तत्र संसरे श्वभ्रं वृक्षारोपणमेववा ।

कामात्पुरीषङ्कुर्य्याच्चेत्तस्य दण्डस्तु माषकः"—इति ।

राजमार्गे तु पुरीषकर्त्तुर्दण्डमाह मनुः,—

"समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि ।

स द्वौ कार्षापणौ दद्यात् अमेध्यञ्चाशु शोधयेत् ।

आपद्गतस्तथा वृद्धो गर्भिणी बालएवच ।

परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः"—इति ।

अमेध्यादिना तड़ागादिषु दोषं कुर्वतां दण्डमाह कात्यायनः,—

"तड़ागोद्यानतीर्थानि योऽमेध्येन विनाशयेत् ।

अमेध्यं शोधयित्वा तु दण्डयेत् पूर्वसाहसम् ॥

दूषयन् सिद्धतीर्थानि स्थापितानि महात्मभिः ।

पुण्यानि पावनीयानि प्राप्नुयात् पूर्वसाहसम्"—इति ।

मर्य्यादाभेदनादौ दण्डमाह याज्ञवल्क्यः,—

"मर्य्यादायाः प्रभेदे तु सीमाऽतिक्रमणे तथा ।

क्षेत्रस्य हरणे दण्डाअधमोत्तममध्यमम्"—इति ।

अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमर्य्यादा । तस्याः प्रकर्षेण भेदने, सीमानमतिलङ्घ्य कर्षणे, क्षेत्रस्य तथा निन्दितप्रदर्शनेन* हरणे, यथाक्रमेणाधमोत्तममध्यमसाहसा दण्डा वेदितव्याः । क्षेत्रग्रहणं गृहारामाद्युपलक्षणार्थम् । अज्ञानात् क्षेत्रादिहरणे सएवाह,—

---

* इत्थमेव पाठः सर्व्वत्र । मम तु, निन्दितत्वप्रदर्शनेन,—इति पाठः प्रतिभाति ।

"गृहं तटाकमारामं क्षेत्रं वा भीषया हरन् ।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्विशतं दमः"—इति ।

ये तु बलादपह्रियमाणक्षेत्रादिभूमयस्तेषां उत्तमोदण्डः प्रयोक्तव्यः।

"बलात्सर्वस्वहरणं पुरान्निर्वासनाङ्कने ।
तदङ्गच्छेदइत्येको दण्ड उत्तमसाहसः"—इति

स्मरणात्। यत्तु शङ्खलिखिताभ्यां सीमाऽतिक्रमणे दण्डाधिक्यमुक्तम् । "सीमाव्यतिक्रमे लष्टसहस्रम्"—इति । तत्समयसीमाऽतिक्रमविषयम् । सीमासन्धिषूत्पन्नवृक्षादिविषये कात्यायनः,—

"सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः ।
फलं पुष्पञ्च सामान्यं क्षेत्रस्वामिषु निर्दिशेत्"—इति ।

अन्यक्षेत्रे जातवृक्षादिविषये सएव,—

"अन्यक्षेत्रे तु जातानां शाखा यत्रान्यसंस्थिता ।
स्वामिनन्तु विजानीयात् यस्य क्षेत्रे तु संस्थिता"—इति ।

परक्षेत्रे प्रार्थनया क्रियमाणसेतुकूपादिकं क्षेत्रस्वामिना न निषेद्धव्यम् । तदाह याज्ञवल्क्यः,—

"न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः ।
परभूमौ हरन् कूपः स्वल्पक्षेत्रो बहूदकः"—इति ।

यत्स्वल्पबाधकं महोपकारकं क्षेत्रादिकञ्च भवति, तत् क्षेत्रं स्वामिना न निषेद्धव्यम् । यत्पुनर्बहुबाधकं स्वल्पोपकारकं च, तन्निषेद्धव्यं भवति । नारदोऽपि,—

"परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिबध्यते ।
महागुणोऽल्पदोषश्चेत् वृद्धिरिष्टा क्षये सति"—इति ।

सेतुश्च द्विविधः। तथाच सएवाह,—

"सेतुस्तु द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैवच।

तोयप्रवर्त्तनात् खेयो बन्ध्यः स्यात्तन्निवर्त्तनात्"—इति।

सेत्वादिसंस्कारविषये नारदः,—

"पूर्वप्रवृत्तमुच्छिन्नं न पृष्ट्वा स्वामिनन्तु यः।

सेतुं प्रवर्त्तयेत् कश्चिन्न स तत्फलभाग्भवेत्॥

मृते तु स्वामिनि पुनस्तद्वंश्ये वाऽपि मानवे।

राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम्"—इति।

क्षेत्रस्वामिनमनभ्युपगम्य तदभावे राजानं वा सेत्वादिप्रवर्त्तने याज्ञवल्क्यः,—

"स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्।

उत्पन्ने स्वामिनो भोगः तदभावे महीपतेः"—इति॥

प्रार्थनयाऽर्थदानेन वा लब्धानुज्ञः सन्नेव परक्षेत्रे सेतुं प्रवर्त्तये-दित्यस्य तात्पर्य्यम्। न तु सेतुप्रवर्त्तकस्य पालनाद्यपिनिषेधे तात्पर्य्यम्। तस्याप्रसक्तत्वात्। अथ वा, दृष्टलाभफलभोक्तृत्वनिषेधे तात्पर्य्यमस्तु। कात्यायनोऽपि,—

"अस्वाम्यनुमतेनैव संस्कारं कुरुते तु यः।

गृहोद्यानतड़ागानां संस्कर्त्ता लभते न तु॥

व्ययं* स्वामिनि चायाते न निवेद्य नृपे यदि।

अथावेद्य प्रयुक्तस्तु तद्गतं लभते व्ययम्"—इति॥

* देयं,—इति ग्रन्थान्तरधृतः पाठ।

क्षेत्रस्वामिपार्श्वे क्षेत्रमिदमहं कर्षामीत्यङ्गीकृत्य पश्चाद्योन कर्षति, अन्येन वा न कर्षयति, तं प्रत्याह याज्ञवल्क्यः,—

"फालाहतमपि क्षेत्रं यो न कुर्य्यान्न कारयेत्।

स प्रदाप्योऽकृष्टशदं क्षेत्रमन्येन कारयेत्"—इति॥

यद्यपि फालाहतं ईषत्फालेन विदारितं न सस्यबीजावापार्हं, तथाप्याकृष्टक्षेत्रस्य फलं यावद्यद्यत्रोत्पत्त्यर्थं सामन्तादिकल्पितं तावदसौ स्वामिने दापनीयः। तच्च क्षेत्रं पूर्वकर्षकादौ विधाय तत्कारयेत्। बृहस्पतिरपि,—

"क्षेत्रं गृहीत्वा यः कश्चित् न कुर्य्यान्न च कारयेत्।

स्वामिने स शदं दाप्यो राज्ञे दण्डञ्च तत्समम्"—इति॥

स्वामिने कियान् शदोदेय इत्यपेक्षिते सएवाह,—

"चिरावसन्ने दशमं कृष्यमाणे तथाऽष्टमम्।

सुसंस्कृतेषु षष्ठं स्यात् परिकल्प्य यथाविधि"—इति॥

चिरावसन्ने चिरकालमकृष्टे क्षेत्रे कर्षामीति स्वीकृत्योपेक्षिते, यावत् फलमनुपेक्षिते लभ्यते तस्य दशमभागन्दाप्यः। सुसंस्कृते क्षेत्रे उपेक्षिते षष्ठं भागं दाप्य इत्यर्थः। असक्तप्रेतनष्टक्षेत्रविषये नारदः,—

"असक्तप्रेतनष्टेषु क्षेत्रिकेषु निवापितः।

क्षेत्रञ्चेद्विकृषेत् कश्चिदनर्हति च* तत्फलम्॥

कृष्यमाणेषु क्षेत्रेषु क्षेत्रिकः पुनराव्रजेत्।

खिलोपचारं तत्सर्वं दत्त्वा क्षेत्रमवाप्नुयात्"—इति॥

---

* कश्चिदनुकुर्व्वीत,—इति का०। कश्चिदश्नुवीत स,—इति ग्रन्थान्तरधृतपाठस्तु समीचीनः।

खिलोपचारः खिलभञ्जनार्थोव्ययः। तस्येयत्ताऽवधारणार्थं विचारं तत्राह सएव,—

"संवत्सरेणार्धखिलं खिलं स्याद्वत्सरैस्त्रिभिः।
पञ्चवर्षावसन्नन्तु चेत्रं स्यादटवीसमम्"—इति॥

यदा पुनः खिलोपचारं स्वामी न ददाति, तदाऽप्याह कात्यायनः,—

"अशक्तितो न दद्याच्चेत् खिलार्थं यः कृतोव्ययः।
तदष्टभागहीनन्तु कर्षकः फलमाप्नुयात्॥
वर्षानष्टौ स भोक्ता स्यात् परतः स्वामिने तु तत्"—इति।

इति सीमाविवादनिर्णयः समाप्तः।

अथ दण्डपारुष्यम्।

तत्स्वरूपं नारदेनोक्तम्,—

"परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः।
भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते"—इति॥

परगात्रेषु स्थावरजङ्गमादेरनेकद्रव्येषु। हस्तपादायुधादिभिरित्यादिग्रहणाद्ग्रावादिभिः। द्रोहोहिंसनम्। तथा भस्माभिः भस्मरजःपङ्कपुरीषाद्यैः। उपघातः संस्पर्शरूपं मनोदुःखोत्पादनम्। तदुभयं दण्डपारुष्यम्। तस्य त्रैविध्यमाह सएव,—

"तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात्
अवगूरणनिःशङ्कपातनक्षतदर्शनैः॥

हीनमध्योत्तमानान्तु द्रव्याणामनतिक्रमात्।
त्रीण्येव साहसान्याहुस्तत्र कण्टकशोधनम्"—इति॥

निःशङ्कपातः निःशङ्कप्रहरणम्। त्रीण्येव साहसानि साह-सीक्ताानि दण्डपारुष्याणीत्यर्थः। दण्डपारुष्ये पञ्चप्रकाराविधय-स्तेनैवोक्ताः,—

"विधिः पञ्चविधस्तूक्तः एतयोरुभयोरपि।
पारुष्ये सति संरम्भादुत्पन्ने क्षुब्धयोर्द्वयोः॥
स मान्यते यः क्षमते दण्डभाग्योऽतिवर्त्तते।
पूर्वमाचारयेद्यस्तु नियतं स्यात्स दोषभाक्॥
पश्चाद्यस्सोऽप्यसत्कारी पूर्वंतु विनयो गुरुः।
द्वयोरापन्नयोस्तुल्यमनुबध्नाति योऽधिकम्॥
स तयोर्दण्डमाप्नोति पूर्वोवा यदि वोत्तरः।
पारुष्यदोषावृतयोः युगपत्संप्रवृत्तयोः॥
विशेषश्चेन्न लक्ष्येत विनयः स्यात् समस्तयोः।
श्वपाकषण्डपाषण्डव्यङ्गेषु बधिरेषु च* ॥
हस्तिपव्रात्यदारेषु† गुर्वाचार्य्यान्तिकेषु च‡।
मर्य्यादाऽतिक्रमे सद्यो घातएवानुशासनम्॥
यमेव व्यतिरेकेरन्नेते§ सन्तं जनं नृषु।

---

* श्वपाकपश्चचण्डालवेश्यावधकवृत्तिषु,—इति ग्रन्थान्तरधृतः पाठः।

† दासेषु,—इति ग्रन्थान्तरधृतः पाठः।

‡ गुर्व्वाचार्य्यान्तकेषु च,—इति का०। गुर्व्वाचार्य्यातिगेषु च,—इति ग्रन्थान्तरे।

§ ह्यतिवर्त्तेरन्,—इति ग्रन्थान्तरधृतः पाठः।

स एव विनयं कुर्य्यान्न तद्विनयभाङ् नृपः॥
मलाह्येते मनुष्याणां धनमेषां मलात्मकम्।
अतस्तान् घातयेद्राजा नार्थदण्डेन दण्डयेत्"—इति॥

यस्तु पश्चात् प्रवृत्तस्यापराधाभवो बृहस्पतिना दर्शितः,—

"आक्रुष्टस्तु समाक्रोशन् ताड़ितः प्रतिताड़यन्।
हत्वाऽपराधिनं* चैव नापराधी भवेन्नरः"—इति॥

योऽपि पश्चात् प्रवृत्तस्य दण्डः कात्यायनेन दर्शितः,—

"आभीषणेन दण्डेन प्रहरेद् यस्तु मानवः।
पूर्वं वा पीड़ितो वाऽथ स दण्ड्यः परिकीर्त्तितः"—इति॥

सोऽपि पूर्वप्रवृत्तदण्डादल्पदण्डार्थः। दण्डपारुष्यसंख्याकारण-माह याज्ञवल्क्यः,—

"असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतोभयात्"—इति॥

यदा कश्चिद्रहस्यनेनाहं ताड़ित इति राज्ञे निवेदयति। तदा चिह्नैः तद्गात्रगतव्रणादिभिः, कारणप्रयोजनपर्य्यालोचनरूपाभिर्युक्तिभिः, आगमेन जनप्रवादेन, च शब्दाद्दिव्येन च, कूटचिह्नकरण-सम्भावनाभयात् परीक्षा कार्य्येत्यर्थः। राजशासनद्रव्यविशेषेण दण्ड-विशेषमाह स एव,—

"न्यूने पङ्करजःस्पर्शी† दण्डोदशपणः स्मृतः।

---

* हत्वाऽऽततायिनं,—इति ग्रन्थान्तरधृतः पाठः।

† भस्मपङ्करजः स्पर्शे,—इति का०।

अमेध्य* पार्ष्णिदेशादि† स्पर्शने द्विगुणस्ततः॥
समेष्वेव परस्त्रीषु द्विगुणः षोत्तमेषु च।
हीनेष्वर्द्धदमोमोहमदादिभिरदण्डनम्"—इति॥

अमेध्यशब्देन श्लेष्मनखकर्णादिदूषिकाशुक्रोच्छिष्टादिकं गृह्यते। पुरीषादिस्पर्शे कात्यायनः,—

"छर्दिमूत्रपुरीषाद्यैः पादादौ च चतुर्गुणः।
षड्गुणः कायमध्ये तु मूर्ध्नि त्वष्टगुणः स्मृतः"—इति॥

आदिशब्देन वसायुक्शुक्राणां‡ ग्रहणम्। ताड़नार्थं हस्तोद्यमने ताड़ने च दण्डमाह स एव,—

"उद्गूरणे तु हस्तस्य कार्य्यो द्वादशकोदमः।
स एव द्विगुणः प्रोक्तः ताड़नेषु सजातिषु"—इति॥

याज्ञवल्क्योऽपि,—

"उद्गूरणे हस्तपादे दशविंशतिकः क्रमात्।
परस्परन्तु सर्वेषां शस्त्रे मध्यमसाहसम्"—इति॥

हस्ते पादे वा ताड़नार्थमुद्यते सति यथाक्रमं दशविंशतिपणकौ दमौ। परस्परमवधार्य्य शस्त्रे उद्यते सति सर्वेषां वर्णानां मध्यमसाहसोदण्ड इत्यर्थः। काष्ठादिभिस्ताड़ने स एव,—

"शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः।
द्वात्रिंशतं पणान् दाप्योद्विगुणं दर्शनेऽसृजः"—इति॥

---

* समे च,—इति शा०।

† दार्च्छिनिष्ठ्यूत,—इति का०।

‡ इत्थमेव पाठः सर्व्वत्र।

त्वगादिभेदे दण्डमाह मनुः,—

"त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः।

मांसच्छेदे शतं निष्कान्* प्रवास्यस्त्वस्थिभेदकः"—इति॥

पादाद्याकर्षणादौ याज्ञवल्क्यः,—

"पादकेशादिषु कराकर्षणे तु पणान् दश।

पिण्डाकर्षांशुकावेष्टपादाध्यासे शतं दमः॥

करपाददन्तभङ्गे छेदने कर्णनासयोः।

मध्योदण्डो व्रणोद्भेदे मृतकल्पहते तथा॥

चेष्टाभोजनवाक्रोधे नेत्रादिप्रतिभेदने।

ग्रीवादिव्रणभङ्गे च दण्डोमध्यमसाहसः॥

एकं घ्नतां बहूनाञ्च यथोक्ताद्द्विगुणोदमः"—इति॥

अवमत्य केशं गृहीत्वा योऽझटित्याकर्षति, असौ दशपणं दण्ड्यः स्यात्। यः पुनरंशुकेनावेष्ट्य गाढ़मापीड्याकृष्य पादेन घटयति, असौ शतपणान् दण्ड्यः। करपाददन्तानां प्रत्येकभङ्गे कर्णनासिकयोश्च छेदने मृतकल्पहते च मध्यमसाहसो दण्डः। गमनभोजनभाषणनिरोधे नेत्रप्रतिभेदने ग्रीवाहस्तव्रणभङ्गे मध्यमसाहसोदण्डः। मिलित्वैकस्याङ्गभङ्गं कुर्वतां बहूनां एकस्यापराधे यो दण्डउक्तः, तत्र तस्मात् द्विगुणोदण्डः प्रत्येकं वेदितव्य इत्यर्थः। कात्यायनोऽपि,—

"कर्णौष्ठघ्राणपादादिजिह्वानाशाकरस्य च।

* मांसभेदे शतं निष्कान्,—इति का०। मांसभेत्ता तु षण्निष्कान्,—इति ग्रन्थान्तरधृतः पाठः।

छेदने चोत्तमोदण्डो भेदने मध्यमो भृगुः ॥
मनुष्याणां पशूनाञ्च दुःखाय प्रहृते सति।
यथा यथा भवेद्दुःखं दण्डं कुर्य्यात्तथा तथा"—इति

प्रातिलोम्येन प्रहारे दण्डमाह याज्ञवल्क्यः,—

"विप्रपीड़ाकरं छेद्यमङ्गमब्राह्मणस्य तु।
उद्गूर्णे प्रथमोदण्डः संस्पर्शे तु तदर्धकः"—इति ॥

ब्राह्मणपीड़ाकरमब्राह्मणस्य क्षत्रियादेरङ्गं करचरणादिकं छेत्तव्यम्। ब्राह्मणग्रहणमुत्तमवर्णोपलक्षणार्थम्। अतएव मनुः,—

"येन केनचिदङ्गेन हिंस्याच्छ्रेयांसमन्त्यजः।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम्"—इति ॥

उद्गूर्णे वधार्थमुद्यते शस्त्रादिके प्रथमसाहसोवेदितव्यः। शूद्रस्य तत्रापि छेदनमेव हस्तादेः। तदाह मनुः,—

"पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति"—इति।

उद्गूरणार्थं शस्त्रादिसंस्पर्शे प्रथमसाहसादर्धदण्डो वेदितव्यः। भस्मादिस्पर्शने पुनः क्षत्रियवैश्ययोः प्रातिलोम्यापवादेषु द्विगुणोदमः।

"वर्णानामानुलोम्येन तस्मादर्धार्द्धहानितः"—

इति वाक्पारुष्योक्तन्यायेन दण्डः कल्पनीयः। कात्यायनः,—

"वाक्पारुष्ये यथैवोक्तः प्रतिलोमानुलोमतः।
तथैव दण्डपारुष्ये पात्योदण्डो यथाक्रमम्"—इति ॥

तत्रापि शूद्रविषये विशेषमाह मनुः,—

"अवनिष्ठीवतोदर्पात् द्वावोष्ठौ छेदयेन्नृपः।

अवमूत्रयतोमेढ्रं पुरीषकरणे गुदम्॥

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्।

पादयोर्दाढिकायाञ्च ग्रीवायां वृषणेषु च॥

सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।

कय्यां कृताङ्कोनिर्वास्यः स्फिचौ वाऽस्य निकृन्तयेत्"—इति।

अङ्गच्छेदनादौ विशेषमाह कात्यायनः,—

"देहेन्द्रियविनाशे तु यदा दण्डं प्रकल्पयेत्।

तदा तुष्टिकरं देयं समुत्थानञ्च पण्डितैः"—इति॥

तुष्टिकरं व्रणतुष्टिकरम्। समुत्थानं व्रणारोपणम्। तन्निमित्तकञ्च व्ययो व्रणगुरुत्वानुसारेण पण्डितैरौषधार्थं व्ययार्थं च कल्पितमानं व्रणारोपणं देयम्।

"समुत्थानं व्ययं चासौ दद्यादाव्रणरोपणम्"—इति

तेनैवोक्तत्वात्। बृहस्पतिरपि,—

"अङ्गावपीडने चैव छेदने भेदने तथा।

समुत्थानव्ययं दाप्यः कलहापहृतञ्च यत्"—इति॥

याज्ञवल्क्योऽपि,—

"कलहापहृतं देयं दण्डश्च द्विगुणस्तथा।

दुःखमुत्पादयेद्यस्तु स समुत्थानकं व्ययम्॥

दाप्योदण्डञ्च यो यस्मिन् कलहे समुदाहृतः"—इति।

ग्राम्यपशुपीड़ायां दण्डमाह विष्णुः। "ग्राम्यपशुघाते कार्षापणं दण्ड्यः। पशुस्वामिने तु तन्मूल्यं दद्यात्"—इति। मूल्यदानन्तु मृतपशुविषयम्। मरणाभावे तु समुत्थानव्ययं दद्यात्। तथाच

सएव। "सर्वे च पुरुषपीडाकराः समुत्थानव्ययं दाप्या याम्यपशु-पीड़ाकराश्च"—इति। प्राणिघातनिमित्तकोदण्डः क्वचिदशक्यप्रति-कारविषये नास्तीत्याह मनुः,—

"छिन्ने नष्टे युगे भग्ने तिर्यक् प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैवच॥
भेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैवच।
आक्रन्दे चाप्यपेहीति न दण्डं मनुरब्रवीत्"—इति॥

शक्यप्रतिकारोपेक्षकस्य दण्डमाह सएव,—

"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्"—इति॥

प्राजकः शकटादिनेता। वैगुण्यं नाम वैकल्यं वेतनलाघवार्थं स्वाम्यनुमतम्। यत्र समर्थप्राजकदोषेण प्राणिहिंसा, तत्र न स्वामिनोदण्डः, किन्तु प्राजकस्येत्याह सएव,—

"प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति"—इति।

आप्तः समर्थ इत्यर्थः। पशुभिद्रोहे दण्डमाह याज्ञवल्क्यः,—

"दुःखे च शोणितोत्पाते शाखाऽङ्गच्छेदने तथा।
दण्डः क्षुद्रपशूनां तु द्विपणप्रभृतिः क्रमात्॥
लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेवच।
महापशूनामेतेषु स्थानेषु द्विगुणोदमः"—इति।

क्षुद्रपशूनामजाविप्रभृतीनां दुःखोत्पादने शोणितोत्पादने। शाखाशब्देन शृङ्गादिकं लक्ष्यते। अङ्गानि करचरणादीनि। तेषां छेदे वा यथाक्रमं द्विपणप्रभृतिर्दण्डः। द्विपणचतुष्पणषट्पणा-

ष्टपण इत्यादिरूपः । तेषां लिङ्गच्छेदने मृत्युकरणे वा मध्यमसाहसो-दण्डः, मूल्यदानं च । महापशूनां गोगजवाजिप्रभृतीनामेतेषु स्थानेषु पूर्वोक्ताद्दण्डाद् द्विगुणदण्डो वेदितव्य इत्यर्थः । कार्षापण-शतदण्ड इत्यनुवृत्तौ विष्णुरपि । "पशूनां पुंस्त्वोपघातकारी तथा गजाश्वोष्ट्रगोघातेष्वेकएवार्थः । मांसविक्रयी च ग्राम्यपशुघाती च कार्षापणम्"—इति । कात्यायनोऽपि,—

"द्विपणो द्वादशपणो बधे तु मृगपक्षिणाम् ।
सर्पमार्जारनकुलश्वसूकरबधे नृणाम्"—इति ।

मनुरपि,—

"गोकुमारीदेवपशूनुक्षाणं वृषभं तथा ।
वाहयन् साहसं पूर्वं प्राप्नुयादुत्तमं बधे ॥
मनुष्यमारणे क्षिप्रं चोरवत्किल्विषं भवेत् ।
प्राणभृत्सु महत्पूर्वं गोगजोष्ट्रहयादिषु ॥
क्षुद्रकाणां पशूनाञ्च हिंसतो दशतोदमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्दभाजाविकानाञ्च दण्डः स्यात् पञ्चमाषकः ।
माषकस्तु भवेद्दण्डः श्वसूकरनिपातने"—इति ।

राज्ञो दण्डदानवत्स्वामिनः प्रतिरूपकं मूल्यं वा दद्यादित्याह कात्यायनः,—

"प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम् ।
तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः"—इति ।

स्थावरप्राणिपीडाकारिणां दण्डमाह मनुः,—

"वनस्पतीनां सर्वेषामुपभोगो यथा यथा।
तथा तथा दमः कार्य्यो हिंसायामिति धारणा"—इति।

फलपुष्पोपभोगतारतम्यानुरोधेनोत्तममध्यमादयो दण्डाः कल्पनीयाः। तथाच दण्ड्य इत्यनुवृत्तौ विष्णुः। "फलोपयोगद्रुमच्छेदी उत्तमसाहसम्। पुष्पोपयोगद्रुमच्छेदी मध्यमसाहसम्। बल्लीगुल्मलताच्छेदी कार्षापणशतम्। तृणच्छेद्येकम्। सर्व्वे च तत्स्वामिनां तदुत्पत्तिम्"—इति। फलपुष्पोपभोगद्रुमच्छेदकादयः छिन्नद्रुमस्वामिनां तदुत्पत्तिं पुनः प्रतिरोपितद्रुमफलादिभोगकालपर्यन्तं दाप्या इति शेषः। अत्र विशेषमाह याज्ञवल्क्यः,—

"प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे।
उपजीव्यद्रुमाणाञ्च विंशतेर्द्विगुणोदमः॥
चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये।
जातद्रुमाणां द्विगुणो दण्डो वृक्षेऽथ विश्रुते॥
गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम्।
पूर्वस्मृतादर्धदण्डः स्थानेषूक्तेषु कर्त्तने"—इति।

प्ररोहिशाखिनां वटादीनां शाखाच्छेदने स्कन्धच्छेदने च यथाक्रमं विंशतिपणाद्दण्डादारभ्य पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो-दण्डोद्विगुणः। विंशतिपणचत्वारिंशत्पणाशीतिपणा इत्येवं क्रमः। अप्ररोहिशाखिनामाम्रादीनामुपजीव्यद्रुमाणां पूर्वोक्तेषु स्थानेषु चैत्यादिस्थानेषूत्पन्नानां वृक्षाणां शाखादिच्छेदने, अश्वत्थपलाशादीनां शाखादिच्छेदनेऽपि पूर्वोक्ताद्दण्डाद्द्विगुणः दण्डः। गुल्मा मालत्यादयः। गुच्छाः कुरण्टकादयः। क्षुपाः करवीरादयः। लता-

द्राक्षाऽविमुक्तादयः। प्रताना: काण्डप्ररोहरहिता:। श्रोषध्यः फलपाकान्ता: शालिप्रभृतयः। वीरुधोगुडूचीप्रभृतयः। एतेषु स्थानेषु विकर्त्तने पूर्वोक्ताद्दण्डादर्धदण्डो वेदितव्यः। कुण्ड्यादिघाते* गृहे कण्टकादिप्रक्षेपणे च दण्डमाह याज्ञवल्क्यः,—

"अभिघाते तथा भेदे छेदे कुण्ड्यावपातने।
पणान् दाप्यः पञ्चदश विंशतिं तद्व्ययं तथा॥
दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्राणहरन्तथा।
षोड़शाद्यः पणं दाप्यो द्वितीयो मध्यसाहसम्"—इति।

मुद्गरादिना कुड्याभिघाते, विदारणे, द्वैधीकरणे, यथाक्रमं पञ्चपणो दशपणो विंशतिपणश्च दण्डः। अवपातने पुनस्त्रयो दण्डाः समुच्चिता:, कुड्यसम्पादनार्थं धनमपि देयम्। परगृहे कण्टकादिप्रक्षेपणे षोड़शपणो दण्डः। विषभुजङ्गादिप्रक्षेपणे मध्यमसाहसो-दण्ड इत्यर्थः।

इति दण्डपारुष्यम्।

अथ वाक्पारुष्यम्।

तस्य लक्षणं नारदेनोक्तम्,—

"देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम्।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते"—इति।

कलहप्रिया गौड़ा इति देशाक्रोशः। अतिलोलुपा ब्राह्मणा इति

---

* कुड्याभिघाते,—इति का०।

आत्याक्रोशः । क्रूरचित्ता वैश्वामित्रा इति कुलाक्रोशः । आक्रोश-उच्चैर्भाषणं, न्यङ्गमवद्यं, तदुभययुक्तं यदुद्वेगजननार्थं वाक्यं, तद्वाक्-पारुष्यमित्यर्थः । तस्य चैविध्यमाह सएव,—

"निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम् ।
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ॥
पतनीयै*रुपक्रोशैस्तीव्रमाहुर्मनीषिणः"—इति ।

कात्यायनोऽपि,—

"यस्त्वसत्संश्रितैरङ्गैः परमाक्षिपति क्वचित् ।
अमूलैर्वाऽथ मूलैर्वा निष्ठुरा वाक् स्मृता बुधैः ॥
न्यग्भावकरणं वाचा क्रोधात्तु कुरुते यदा ।
वृत्तदेशकुलानां वाऽप्यश्लीला सा बुधैः स्मृता ॥
महापातकयोक्त्री च रागद्वेषकरी च या ।
जातिभ्रंशकरी वाऽथ तीव्रा सा प्रथिता तु वाक्"—इति ॥

प्रथममध्यमोत्तमभेदेन चैविध्यमाह बृहस्पतिः,—

"देशग्रामकुलादीनां क्षेपः पापेन योजनम् ।
दृष्टं विना तु प्रथमं वाक्पारुष्यं तदुच्यते ॥
भगिनीमातृसम्बन्धमुपपातकशंसनम् ।
पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः ॥
अभक्ष्यापेयकथनं महापातकदूषणम् ।
पारुष्यमुत्तमं प्रोक्तं तीव्रं मर्माभिघट्टनम्"—इति ।

---

* यत्तदीयै,—इति पा० ।

निष्ठुराक्रोशे दण्डमाह याज्ञवल्क्यः,—

"सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम्।

क्षेपङ्करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश"—इति।

सत्येनासत्येनान्यथास्तोत्रेण[१] न्यूनाङ्गादीनां तर्जनीतर्जनं यः करोति, असावर्द्धाधिकद्वादशपणं दण्डनीयः। एतत्समवर्णगुणविषयम्। तथाच वृहस्पतिः,—

"समजातिगुणानान्तु वाक्पारुष्ये परस्परम्।

विनयोऽभिहितः शास्त्रे पणानर्द्धत्रयोदश"—इति।

यत्तु मनुवचनम्,—

"काणं वाऽप्यथवा खञ्जमन्यं वाऽपि तथाविधम्।

तथ्येनापि ब्रुवन् दाप्यो दण्डः कार्षापणावरम्"—इति।

तदपि दुर्वृत्तविषयम्। मात्राद्याक्षेपके प्रत्याह मनुः,—

"मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम्।

आचारयञ्छतं दाप्यः पन्थानं वाऽददद्गुरोः"—इति।

एतच्चापराधिषु मात्रादिषु जायायां वा निरपराधायां वेदितव्यम्। स्वस्राद्याक्षेपे दण्डमाह वृहस्पतिः,—

"क्षिपन् स्वस्रादिकं दद्यात् पञ्चाशत्पणिकं दमम्"—इति।

प्रातिलोम्यानुलोम्याभ्यामाक्रोशे दण्डमाह मनुः,—

"शतं ब्राह्मणमाक्रुश्य क्षत्त्रियो दण्डमर्हति।

---

(१) सत्येन यथा नेत्रशून्ये नेत्रशून्यस्त्वमसीति। असत्येन यथा, नेत्रवन्तं प्रति नेत्रशून्यस्त्वमसीति। अन्यथास्तोत्रेण यथा, अन्धं प्रति चक्षुष्मानतिशयेनासीति।

वैश्योऽप्यर्द्धंशतं द्वेयः शूद्रस्तु वधमर्हति ॥
पञ्चाशत् ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने* ।
वैश्ये स्यादर्द्धपञ्चाशत् शूद्रे द्वादशकोदमः ॥
क्षत्रस्ये द्विगुणं तत्र शास्त्रविद्भिरुदाहृतम् ।
वैश्यमाक्षारयञ्छूद्रो दाप्यः स्यात्प्रथमं दमम् ॥
क्षत्रियं मध्यमश्चैव विप्रमुत्तमसाहसम्"—इति ।

बाह्वादिच्छेदननिष्ठुराभिभाषणे याज्ञवल्क्यः,—

"बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः ।
शत्यस्तदर्धिकः पादनासाकर्णकरादिषु ॥
अशक्तस्तु वदन्नेवं दण्डनीयः पणान् दश ।
तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु"—इति ।

बाह्वादीनां विनाशे तव बाहू छिनद्मीत्येवं वाचा प्रतिपादिते प्रत्येकं शतपरिमितो दण्डः। पादनासादिषु तु वाचिके तदर्धिकः पञ्चाशत्पणाधिको दण्डः। अशक्तस्त्वेवं वदन् दश पणान् दण्डनीयः। शक्तः पुनः क्षीणशक्तिं एवं वदन् शतपणात्मकं दण्डं दत्वा तस्य क्षेमाय प्रतिभुवं दद्यादित्यर्थः। अश्लीलभाषणे दण्डमाह सएव,—

"अभिगन्ताऽस्मि भगिनीं मातरं वा तवेति च ।
शतं प्रदापयेद्राजा पञ्चविंशतिकं दमम्"—इति ।

तीव्राक्रोशे दण्डमाह सएव,—

"पतनीये कृते क्षेपे दण्डो मध्यमसाहसः ।
उपपातकयुक्ते तु दाप्यः प्रथमसाहसम्"—इति ।

---

* दशोनः क्षत्रियः स्मृतः,—इति पा० ।

मनुरपि,—

"पापोपपापवक्तारो महापातकशंसकाः।

आद्यमध्योत्तमान्दण्डान् दद्युस्तेते यथाक्रमम्[१]"—इति।

त्रैविद्याद्यधिक्षेपे याज्ञवल्क्यः,—

"त्रैविद्यनृपदेवानां दण्ड उत्तमसाहसः।

मध्यमो जातिपूगानां प्रथमोग्रामदेशयोः"—इति।

जातयः ब्राह्मणादयः। पूगाः सङ्घाः। शूद्रमधिकृत्याहतुर्मनुनारदौ,—

"एकजातिर्द्विजातिं तु वाचा दारुणया क्षिपन्।

जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥

मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः।

नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्वतः॥

निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः"—इति।

बृहस्पतिरपि,—

"धर्मोपदेशं धर्मेण विप्राणामस्य कुर्वतः।

तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः"—इति।

क्वचित् वाक्पारुष्यदण्डापवादमाह सएव,—

"सच्छूद्रस्यायमुद्दिष्टो विनयोऽनपराधिनः।

गुणहीनस्य पारुष्ये ब्राह्मणो नापराध्नुयात्"—इति॥

इति वाक्पारुष्यम्।

---

(१) पापमुपपापात् न्यूनं विवक्षितम्। पापवक्ता आद्यसाहसं दण्डं दद्यात्। उपपापवक्ता मध्यमसाहसं, महापापशंसक उत्तमसाहसमित्यर्थः।

अथ स्तेयम् ।

तल्लक्षणमाह मनुः,—

"स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् ।

निरन्वयं भवेत् स्तेयं हृत्वाऽपव्ययते यदि"—इति ।

अस्यार्थः । द्रव्यरक्षकराजाध्यक्षादिसमक्षं बलावष्टम्भेन यत् पर-द्रव्यापहारादिकं क्रियते, तत्साहसं; स्तेयं पुनरसमक्षं वञ्चयित्वा यत्परद्रव्यग्रहणं, तदिति । यत्तु राजाध्यक्षादिकमाहूय न मयेदम-पहृतमिति भयान्निह्नुते, तदपि स्तेयं भवति । अतएव नारदः,—

"उपायैर्विविधैरेषां छलयित्वाऽपकर्षणम् ।

सुप्तमत्तप्रमत्तेभ्यो द्रव्याणामपहारतः ॥

मृद्भाण्डासनखट्वाऽस्थितन्तुचर्मतृणादि यत् ।

शमीधान्यं कृतान्नञ्च क्षुद्रं द्रव्यमुदाहृतम् ॥

वासः कौशेयवर्जन्तु गोवर्जं पशवस्तथा ।

हिरण्यवर्जं लोहञ्च मध्यम्ब्रीहियवादिकम् ॥

हिरण्यरत्नकौशेयस्त्रीपुंसगजवाजिनः ।

देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमम्"—इति ।

तस्करज्ञानोपायमाह याज्ञवल्क्यः,—

"ग्राहकैर्गृह्यते चोरो लोप्त्रेणाथ पदेन वा ।

पूर्वकर्मापराधी च तथा चाशुद्धवासकः ॥

अन्येऽपि शङ्कया ग्राह्या जातिनामादिनिह्नवे ।

द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः ॥

परद्रव्यगृहाणाञ्च प्रच्छका गूढचारिणः ।

निराया व्ययवन्तश्च विनष्टद्रव्यविक्रया:"—इति ।

ग्राहके राजपुरुषैर्लोप्त्रेणापहृतभाजनादिना चौर्य्यचिह्नेन, नष्ट-द्रव्यदेशादारभ्य चोरपादानुसारेण वा चौरा ग्रहीतव्याः । पूर्वकर्मा-पराधी प्राक् प्रख्यातचौर्यः । अशुद्धवासकः अप्रज्ञातस्थानवासी । जातिनिह्नवो नाहं शूद्र इति । नामनिह्नवो नाहं डित्थ इति । आदिग्रहणात् स्वदेशग्रामकुलाद्युपलक्ष्यते । नष्टद्रव्यविक्रयाः भिन्न-भाजनजीर्णवस्त्राद्यनिर्ज्ञातस्वामिकविक्रयकारिणः । एवंविधलिङ्गैः पुरुषान् गृहीत्वा चोराभवन्ति न वा इति सम्यक् परीक्षेत, न तु तावता स्तेनं निश्चिनुयात् । तदाह नारदः,—

"अन्यहस्तात्परिभ्रष्टमकामादुत्थितं भुवि ।
चोरेणापि परिक्षिप्तं लोप्त्रं यत्नात्परीक्षयेत् ॥
असत्याः सत्यसङ्काशाः सत्याश्चासत्यसन्निभाः ।
दृश्यन्ते विविधाभावाः तस्माद्युक्तं परीक्षणम्"—इति ।

तस्करोऽपि द्विविधः । तदाह बृहस्पतिः,—

"प्रकाशाश्चाप्रकाशाश्च तस्करा द्विविधाः स्मृताः ।
प्रज्ञासामर्थ्यमायाभिः प्रभिन्नास्ते सहस्रधा ॥
नैगमा वैद्यकितवाः सभ्योत्कोचकवञ्चकाः ।
दैवोत्पातविदो भद्राः शिल्पज्ञाः प्रतिरूपकाः ॥
अक्रियाकारिणश्चैव मध्यस्थाः कूटसाक्षिणः ।
प्रकाशतस्कराश्चैते तथा कुहकजीविनः"—इति ।

प्रतिरूपकाः प्रतिरूपकारा इत्यर्थः । तथाच नारदः,—

"प्रकाशवञ्चकाः तत्र कूटमानतुलाऽऽश्रिताः ।

उत्कोचकाः सोपधिकाः कितवाः पण्ययोषितः ॥
प्रतिरूपकराश्चैव मङ्गलादेशवृत्तयः ।
इत्येवमादयो ज्ञेयाः प्रकाशास्तस्करा भुवि”—इति ।

अप्रकाशतस्कराणां स्वरूपमाह बृहस्पतिः,—
“सन्धिच्छिदः पान्थमुषो* द्विचतुष्पदहारिणः ।
उत्क्षेपकाः शस्यहरा ज्ञेयाः प्रच्छन्नतस्कराः”—इति ।

व्यासोऽपि,—
“साधनाङ्गान्विताराज्यौ विचरन्त्यविभाविताः ।
अविज्ञातनिवासाश्च ज्ञेयाः प्रच्छन्नतस्कराः ॥
उत्क्षेपकः सन्धिभेत्ता पान्थउद्ग्रन्थिकादयः ।
स्त्रीपुंसयोः पशुस्तेयी चोरा नवविधाः स्मृताः”—इति ।

उत्क्षेपको धनिनामनवधानमवधार्य तद्धनमुत्क्षिप्य ग्राहकः । सन्धिभेत्ता गृहयोः सन्धौ स्थित्वा तत्रत्यभित्तिभेत्ता । यः कान्तारादौ पथिकानां प्रत्यापहारकः परीधानादिग्रथितं धनं गृहीतुं तद्ग्रन्थिं मोचयति, स उद्ग्रन्थिकः । प्रकाशतस्कराणां नैगमादीनां दण्डमाह बृहस्पतिः,—
“संसर्गचिह्नरूपैश्च विज्ञाता राजपूरुषैः ।
प्रदाप्यापहृतं दण्ड्यादमैः शास्त्रप्रचोदितैः ॥
प्रच्छाद्य दोषं व्यामिश्रं पुनः संस्कृत्य विक्रयी ।
पण्यं तद्द्विगुणं दाप्यो वणिग्दण्ड्यश्च तत्समम् ॥

---

* प्रान्तमुषो,—इति ग्रन्थान्तरे पाठः ।

अज्ञातौषधिमन्त्रस्तु यश्च व्याधेरतत्त्ववित्।
रोगिणोऽर्थं समादत्ते स दण्ड्यश्चोरवद्भिषक्॥
कूटाक्षदेविनः क्षुद्रा राजभार्याहराश्च ये।
गणका वञ्चकाश्चैव दण्ड्यास्ते कितवाः स्मृताः॥
अन्यायवादिनः सभ्यास्तथैवोत्कोचजीविनः।
विश्वस्तवञ्चकाश्चैव निर्वास्याः सर्वएव ते॥
ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु यो नृणाम्।
भावयन्त्यर्थलोभेन विनेयास्ते प्रयत्नतः॥
दण्डाजिनादिभिर्युक्तमात्मानं दर्शयन्ति ये।
हिंसन्तः छद्मना नृणां बध्यास्ते राजपूरुषैः॥
अल्पमूल्यं तु संस्कृत्य नयन्ति बहुमूल्यताम्।
स्त्रीबालकान् वञ्चयन्ति दण्ड्यास्तेऽर्थानुसारतः॥
हेमरत्नप्रवालाद्यान् कृत्रिमान् कुर्वते तु ये।
क्रेतुर्मूल्यं प्रदाप्यास्ते राज्ञा तद्द्विगुणं दमम्॥
मध्यस्था वञ्चयत्येकं स्नेहलोभादिना यदा।
साक्षिणश्चान्यथा ब्रूयुः दाप्यास्ते द्विगुणं दमम्"—इति।

अप्रकाशतस्कराणां सन्धिच्छिदादीनां दण्डमाह सएव,—

"सन्धिच्छेदकृतो ज्ञात्वा शूलमारोहयेत् प्रभुः।
तथा पान्थमुषो वृक्षे गलबध्वाऽवलम्बयेत्॥
मनुष्यहारिणो राज्ञा दग्धव्यास्ते कटाग्निना।
गोहर्तुर्नासिकां छिन्द्यात् बध्वा वाऽम्भसि मज्जयेत्॥
उत्क्षेपकस्तु सन्दंशैर्भेत्तव्यो राजपूरुषैः।

धान्यहर्त्ता दशगुणं दाप्यः स्याद्द्विगुणं दमम्”—इति।

ग्रन्थिभेदकस्य दण्डमाह मनुः,—

“अङ्गुली ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे।

द्वितीये हस्तचरणौ तृतीये बधमर्हति”—इति।

अङ्गुली तर्जन्यङ्गुष्ठौ। अतएव नारदः,—

“प्रथमे ग्रन्थिभेदानामङ्गुल्यङ्गुष्ठयोर्बधः।

द्वितीये चैव यच्छेषं तृतीये बधमर्हति”—इति।

वन्दिग्रहादीनां दण्डमाह याज्ञवल्क्यः,—

“वन्दिग्रहान् तथा वाजिकुञ्जराणां च हारिणः।

प्रसह्य घातकांश्चैव शूलानारोपयेन्नरान्”—इति।

अयमङ्गुलिछेदनादिप्राणान्तिको दण्ड उत्तमसाहसप्राप्तियोग्य-द्रव्यविषयः।

“वधः सर्व्वस्वहरणं पुरान्निर्वासनाङ्कने।

तदङ्गच्छेद इत्युक्तः दण्ड उत्तमसाहसे”—इति

नारदस्मरणात्। क्षुद्रमध्यमोत्तमद्रव्येषु प्रथममध्यमोत्तमसाहस-रूपदण्डनियमो नारदेन दर्शितः,—

“साहसेषु यएवास्ते त्रिषु दण्डोमनीषिभिः।

सएव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमात्”—इति।

जात्यादिभेदेन तारतम्यमाह मनुः,—

“अष्टगुणं तु शूद्रस्य स्तेये भवति किल्विषम्।

षोड़शैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च॥

ब्राह्मणस्य चतुःषष्टिः पूर्णञ्चापि शतं भवेत्।

द्विगुणा वा चतुःषष्टिस्तद्दानगुणवेदिनः॥
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं बधः।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम्॥
सुवर्णरजतादीनामुत्तमानाञ्च वाससाम्।
रत्नानां चैव सर्वेषां शतादभ्यधिकं बधः॥
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते।
शेषेष्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्॥
पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः।
रत्नानाञ्चैव मुख्यानां हरणे बधमर्हति"—इति।

अस्मिन्नपहारे योदण्ड उक्तः, स शूद्रकर्तृकेऽष्टगुणः, वैश्यकर्तृके षोड़शगुणः, क्षत्रियकर्तृके द्वात्रिंशद्गुणः, ब्राह्मणकर्तृके चतुःषष्टिगुणः शतगुणो वा अष्टाविंशत्युत्तरशतगुणो वा। शेषेषु स्वल्पमूल्येषु मूल्यादेकादशगुणं दण्डं कल्पयेत्। क्षुद्रद्रव्याणां माषात् न्यूनमूल्यानां मूल्यात् पञ्चगुणो दण्डः। तथाच नारदः,—

"काष्ठभाण्डतृणादीनां मृन्मयानां तथैवच।
वेणुवैणवभाण्डानां तथा स्नाय्वस्थिचर्मणाम्॥
शाकानामार्द्रमूलानां हरणे फलमूलयोः।
गोरसेक्षुविकाराणां तथा लवणतैलयोः॥
पक्वान्नानां कृतान्नानां मत्स्यानामामिषस्य च।
सर्वेषामेव मूलानां मूल्यात्पञ्चगुणो दमः"—इति।

यत्पुनर्मनुनोक्तम्,—

"सूत्रकार्पासकिण्वानां गोमयस्य गुड़स्य च।

दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ॥
वेणुवैणवभाण्डानां लवणानां तथैव च।
मृण्मयानाञ्च हरणे मृदोभस्मन एव च ॥
मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च।
मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम् ॥
अन्येषां चैवमादीनां मद्यानामोदनस्य च।
पक्वान्नानाञ्च सर्वेषां तन्मूल्याद्द्विगुणो दमः"—इति।

तदल्पप्रयोजनविषयम्। स्वल्पप्रयोजनद्रव्यापहारादीनां न दण्ड इत्याह मनुः,—

"द्विजोऽध्वगः क्षीणवृत्तिः द्वाविक्षू द्वे च मूलके।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥
चणकव्रीहिगोधूमयवानां मुद्गमाषयोः।
अनिषिद्धैर्गृहीतव्या मुष्टिरेका पथि स्थितैः ॥
तथैव सप्तमे भक्ते भक्तानि षडनश्नता।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः"—इति।

महापराधेऽपि ब्राह्मणस्य न वधदण्ड इत्याह याज्ञवल्क्यः,—

"सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्।
महापराधिनमपि ब्राह्मणं नैव घातयेत्"—इति।

अपि तु ललाटे चिह्नं कृत्वा स्वदेशान्निर्वासयेत्। तथाच मनुः,—

"गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः।
स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान्"—इति।

एतच्चाङ्कनादि प्रायश्चित्तमकुर्वतां दण्डोत्तरकालं, न तु प्राय-

श्चित्तं चिकीर्षताम्। तथाच मनुः,—

"प्रायश्चित्तमकुर्वाणाः सर्वे वर्णा यथोदितम्।

अङ्क्या राज्ञा ललाटे तु दाप्यास्तूत्तमसाहसम्"—इति।

भक्तावकाशादिदानेन चोरोपकारिणं प्रत्याह याज्ञवल्क्यः,—

"भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्।

चोरस्य ददतो हर्तुं जानतोदमउत्तमम्"—इति।

कात्यायनोऽपि,—

"चोराणाम्भक्तदा ये स्युस्तथाग्न्युदकदायकाः।

भेत्ता तथैव भाण्डानां प्रतिग्रहणएवच।

समदण्डाः स्मृता ह्येते ये च प्रच्छादयन्ति तान्"—इति।

चोरोपेक्षिणं प्रत्याह नारदः,—

"शक्ताश्च ये उपेक्षन्ते तेऽपि तद्दोषभागिनः।

उत्क्रोशतां जनानान्तु ह्रियमाणे धने तथा॥

श्रुत्वा ये नाभिधावन्ति तेऽपि तद्दोषभागिनः"—इति।

चोरादर्शने द्रव्यप्राप्त्युपायमाह याज्ञवल्क्यः,—

"घातितेऽपहृते दोषो ग्रामभर्तुरनिर्गते।

विवीतभर्तुस्तु पथि चोरोद्धर्तुरवीतके॥

स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति।

पञ्चग्रामी वहिःक्रोशात् दशग्राम्यथवा पुनः"—इति।

अयमर्थः। यदा ग्राममध्येऽपि वधो द्रव्यहरणं वा जायते, तदा ग्रामपतेरेव चोरोपेक्षादोषस्तत्परिहारार्थं ग्रामपतिरेव चोरं गृहीत्वा राज्ञे समर्पयेत्। तदशक्तौ धनिने हृतं दद्यात्। यदि

स्वग्रामाच्चोरपदं निर्गतं न दृश्यते। दर्शने तु तत्पदं यत्र प्रविशति, तद्विषयाधिपतिरेव चोरं धनं चार्पयेत्। तथाच नारदः,—

"गोचरे यस्य मुष्येत तेन चोरः प्रयत्नतः।
ग्राह्यो दाप्योऽथवा द्रव्यं पदं यदि न निर्गतम्॥
निर्गतं पुनरेतस्मात् चेदन्यत्र याति तत्।
सामन्तान्मार्गपालांश्च दिक्पालांश्चैव दापयेत्"—इति।

विवीते त्वपहारे विवीतस्वामिनएव दोषः। यदा त्वध्वन्येव तत् हृतं भवति अविवीतके वा विवीतादन्यत्र क्षेत्रे, तदा चोरोद्धर्तुर्मार्गपालस्य दिक्पालस्य चापराधः। यदा पुनर्ग्रामाद्बहिःसीमान्तपर्य्यन्ते क्षेत्रे दोषोजायते, तदा तद्ग्रामवासिनएव दद्युर्यदि सीम्नो वहिश्चोरपदं न निर्गतम्। निर्गते पुनर्यत्र तत्प्रविशति, सएव ग्रामश्चोरार्पणादिकं कुर्यात्। यदा त्वनेकग्राममध्ये क्रोशमात्राद्बहिःप्रदेशे दोषादिकं जायते चोरपदञ्च जनसंमर्द्दाद्भग्नं, तदा पञ्चग्रामी दशग्रामी वा दद्यात्। विकल्पस्तु प्रत्यासत्त्याद्यपेक्षया व्यवस्थितः। यदा दापयितुमशक्तोराजा, तदा स्वयं दद्यात्। तथाच गौतमः। "चोरहृतमवजित्य यथास्थानं गमयेत् स्वकोशाद्वा दद्यात्"—इति। स्तेयसन्देहे निर्णयोपायमाह वृद्धमनुः,—

"यदि तस्मिन् दाप्यमाने भवेन्मोषे तु संशयः।
मुषितः शपथं दाप्यो बन्धुभिर्वाऽपि साधयेत्*"—इति।

चोरवधप्रकारविशेषमाह नारदः,—

* दापयेत्,—इति ग्रन्थान्तरे पाठः।

"यांश्च चोरान् गृह्णीयात्तान्निताद्याभिवध्य च।
अवकृष्य च सर्वांश्च हन्याच्चित्रवधेन तु"—इति।

इति स्तेयप्रकरणम्।

अथ साहसम्।

तत्स्वरूपं नारदेनोक्तम्,—

"सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः।
तत्साहसमिति प्रोक्तं सहोबलमिहोच्यते"—इति॥

ननु साहसं चौर्यवाग्दण्डपारुष्यस्त्रीसंग्रहणेभ्यो न व्यतिरिच्यते, तेषां तदवान्तरविशेषत्वात्। तथाच बृहस्पतिः,—

"मनुष्यमारणञ्चौर्यं परदाराभिमर्शनम्।
पारुष्यमुभयञ्चैव साहसं तु चतुर्विधम्"—इति।

तत्कथं पृथगस्य व्यवहारपदता। सत्यम्। तथापि बलदर्पावष्टम्भोपाधितस्तेभ्यो भिद्यते इति दण्डातिरेकार्थं पृथगभिधानम्। मनुष्यमारणरूपस्य साहसस्य तेभ्योऽतिरेकात्तदर्थं वा पृथगभिधानम्। तस्य च त्रैविध्यमाह नारदः,—

"तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा।
उत्तमञ्चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक्॥
फलमूलोदकादीनां क्षेत्रोपकरणस्य च।
भङ्गाक्षेपावमर्दाद्यैः प्रथमं साहसं स्मृतम्॥
वासोपश्वन्नपानानां गृहोपकरणस्य च।

एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥
व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् ।
प्राणापरोधि यच्चान्यदुक्तमुत्तमसाहसम्"—इति ।

त्रिविधेऽपि साहसे दण्डमाह स एव,—

"तत्र दण्डः क्रियापेक्षः प्रथमस्य शतावरः ।
मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः ॥
उत्तमे साहसे दण्डः सहस्रावर इष्यते ।
बधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने ॥
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे"—इति ।

परद्रव्यापहरणरूपे साहसे दण्डमाह याज्ञवल्क्यः,—

"तन्मूल्याद्द्विगुणं दण्डं निह्नवे तु चतुर्गुणम् ।
यः साहसं कारयति स दाप्यो द्विगुणं दमम् ॥
यश्चैवमुक्त्वाऽहं दाता कारयेत् स चतुर्गुणम्"—इति ।

साहसविशेषेषु दण्डमाह याज्ञवल्क्यः,—

"अर्घ्याक्रोशातिक्रमकृत् भ्रातृभार्याऽपहारकः ।
सन्दिष्टस्याप्रदाता च समुद्रगृहभेदकृत् ॥
सामन्ताकुलिकादीनां गणद्रव्यस्य हारकः* ।
पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः ॥
स्वच्छन्दविधवागामी निकृष्टेनाभिधायकः ।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन् ॥

---

* अपकारस्य कारकः,—इति याज्ञवल्क्यसंहितायां पाठः ।

शूद्रः प्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः।
अयुक्तं शपथं कुर्वन्नयोग्योयोग्यकर्म्मकृत्॥
वृषक्षुद्रपशूनाञ्च पुंस्त्वस्य प्रतिघातकृत्।
साधारणस्यापलापी दासीगर्भविनाशकृत्॥
पितृपुत्त्रस्वसृभ्रातृदम्पत्याचार्य्यशिष्यकाः।
एषामपतितान्योन्यत्यागी च शतदण्डभाक्॥
शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः।
उत्तमो वाऽधमो वाऽपि पुरुषस्त्रीप्रमापणे॥
विप्रदुष्टां स्त्रियञ्चैव पुरुषघ्नीमगर्भिणीम्।
सेतुभेदकरीञ्चाप्सु शिलां बध्वा प्रवेशयेत्॥
विषाग्निदम्पतिगुरुनिजापत्यप्रमापणीम्।
विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत्॥
क्षेत्रवेश्मवनग्रामनिवेशनविदाहकाः*।
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना"—इति।

अविज्ञातकर्तृकसाहसिके साहसिकज्ञानोपायमाह बृहस्पतिः—

"हतः संदृश्यते यत्र घातकस्तु न दृश्यते।
पूर्ववैरानुमानेन ज्ञातव्यः स महीभुजा॥
प्रतिवेश्यानुवेश्यौ च तस्य मित्रारिबान्धवाः।
प्रष्टव्या राजपुरुषैः सामादिभिरुपक्रमैः॥
विज्ञेयोऽसाधुसंसर्गाच्चिह्नैर्होढेन मानवैः।

---

* विवीतखलदाहकाः,—इति याज्ञवल्क्यसंहितायां पाठः।

एषोदिता घातकानां तस्कराणाञ्च भावना"—इति ।

याज्ञवल्क्योऽपि,—

"अविज्ञातहतस्यापि कलहं सुतबान्धवाः ।

प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक् ॥

स्त्रीद्रव्यवृत्तिकामो वा केन वाऽयं गतः सह ।

मृत्युदेशसमासन्नं पृच्छेद्वाऽपि जनं शनैः"—इति ।

उक्तज्ञानोपायासम्भवे तु कात्यायनः,—

"विना चिह्नैस्तु यत्कार्यं साहसः सम्प्रवर्त्तते ।

शपथैः स विशोध्यः स्यात्सर्वबाधेष्वयं विधिः"—इति ।

साहसिकवधे विशेषमाह व्यासः,—

"ज्ञात्वा तु घातकं सम्यक् ससहायं सबान्धवम् ।

हन्याच्चित्रवधोपायैरुद्वेजनकरैर्नृपः"—इति ।

बृहस्पतिरपि,—

"प्रकाशवधका ये तु तथाचोपांशु घातकाः ।

ज्ञात्वा सम्यग्धनं हृत्वा हन्तव्या विविधैर्वधैः"—इति ।

एतत्ब्राह्मणक्षत्रियादिविषयम् । तदाह बौधायनः । "क्षत्रियादीनां ब्राह्मणवधे वधः सर्वस्वहरणञ्च । तेषामेव तुल्यापकृष्टवधे यथा बलमनुरूपं दण्डं प्रकल्पयेत्"—इति । बहूनामेकघातार्थे प्रवृत्तानां दोषानुरूपदण्डाभिधानार्थमाह कात्यायनः,—

"एकश्चेद्बहवो हन्युः संरब्धाः पुरुषं नराः ।

मर्मघाती तु यस्तेषां स घातक इति स्मृतः"—इति ।

यो मर्मघातकः सएव बधानुरूपदण्डभाग्भवतीत्यर्थः ।

तथा,

"आश्रयः शस्त्रदाता च भक्तदाता विकर्मणाम्।
युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकः॥
उपेक्षाकारकश्चैव दोषवक्ताऽनुमोदकः।
अनिषेद्धा क्षमो यः स्यात् सर्वे तत्कार्यकारिणः॥
यथाशक्त्यनुरूपन्तु दण्डं तेषां प्रकल्पयेत्"—इति।

अनुरूपं दोषानुरूपम्। मर्महन्तुर्दोषभागित्वं द्वयोर्दर्शयति स एव,—

"आरम्भकृत्सहायश्च दोषभाजौ तदर्द्धतः"—इति।

एवं मार्गानुदेशकानां कालान्तरेऽपि दोषलाघवमूह्यम्। स्वल्पसदृशापराधेऽपि दण्डमाह याज्ञवल्क्यः,—

"वर्षानस्त्रीन् पणान् दण्ड्यो नेजकस्तु परांशुकम्।
विक्रयावक्रयाधानयाचितेषु पणान् दश"—इति।

एतावत्कालमुपभोगार्थं वस्त्रं दास्यामि त्वं मह्यमेतावद्धनं देहीति समयं कृत्वा वस्त्रप्रदानं नेजकस्य नियमातिक्रमे दण्डप्राप्त्यर्थम्। नियममाह मनुः,—

"शाल्मले फलके श्लक्ष्णे निर्ण्याद्वासांसि नेजकः।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत्"—इति।

प्रमादान्नाशने नारदः,—

"साध्याष्टभागोदीयेत सकृद्धौतस्य वाससः।
द्वितीयांशस्त्रितीयांशश्चतुर्थांशोऽर्द्धएव च॥
अर्द्धक्षयात्तूपरमः पादांशापचयः क्रमात्।
यावत्तु क्षीणसर्व्वाणि तावत्स्यान्नियतक्षयः"—इति।

अष्टपणक्रीतस्य तेन सक्तद्धौतस्य वस्त्रस्य नाशने एकपणेन न्यूनं मूल्यं देयम्। द्विधौतस्य पणद्वयेन, त्रिधौतस्य त्रिपणेन, चतुर्धौतस्य पणचतुष्टयम्। ततः परं प्रति निर्णेजनमवशिष्टं मूल्यं पादपादापचयेन यावज्जीर्णं देयम्। जीर्णस्य नाशने लिच्छातो मूल्यदानकल्पनमित्यर्थः। पितापुत्रविरोधे साच्यादीनां दण्डमाह सएव,—

"पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः।
अन्तरेण तयोर्यः स्यात्तस्याप्यष्टगुणो दमः"—इति।

पितापुत्रयोः कलहे यः साक्ष्यमङ्गीकरोति न पुनः कलहं वारयति, स पणत्रयं दण्ड्यः। यस्तु तयोः सपणे विवादे पणदाने प्रतिभूर्भवति कलहं वा वर्द्धयति, स तु त्रिपणादष्टगुणं चतुर्विंशतिपणं दण्डनीय इत्यर्थः। अन्येष्वपि तत्सदृशापराधेषु दण्डमाह सएव,—

"तुलाशासनमानानां कूटकृन्नाणकस्य च।
एभिस्तु व्यवहर्त्ता यः सदाप्योदममुत्तमम्॥
अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम्।
स नाणकपरीक्षी तु दाप्य उत्तमसाहसम्॥
भिषङ्मिथ्या चरन् दाप्यस्तिर्य्यक्षु प्रथमं दमम्।
मानुषे मध्यमं राजमानुषेषूत्तमं दमम्॥
अवध्यं यश्च बध्नाति बध्यं यश्च प्रमुञ्चति।
अप्राप्तव्यवहारश्च स दाप्योदममुत्तमम्॥
मानेन तुलया वाऽपि योऽंशमष्टमकं हरेत्।
दण्डं स दाप्योद्विशतं वृद्धौ हानौ च कल्पितम्॥
भेषजस्नेहलवणगन्धधान्यगुडादिषु।

पण्येषु प्रक्षिपन् हीनं पणान् दण्ड्यस्तु षोड़श ॥
मृच्चर्म्ममणिसूत्रायःकाष्ठवल्कलवाससाम्।
अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ॥
समुद्रपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम्।
आधानं विक्रयञ्चापि नयतो दण्डकल्पना ॥
हीने पणे तु पञ्चाशत् पणे तु शतमुच्यते।
द्विपणे द्विशतो दण्डो मूल्यवृद्धौ तु वृद्धिमान् ॥
सम्भूय कुर्वतामर्घं सबाधं कारुशिल्पिनाम्।
अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तमः ॥
सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम्।
विक्रीणताञ्च विहितो दण्ड उत्तमसाहसः ॥
राजनि स्थाप्यते* योऽर्घः प्रत्यहं तेन विक्रयः।
क्रयो वा निस्रवस्तस्माद् वणिजां लाभकृत् स्मृतः ॥
स्वदेशपण्ये तु शतं वणिग् गृह्णीत पञ्चकम्।
दशकं परदेश्ये तु यः सद्यः क्रयविक्रयी ॥
पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम्।
अर्घोऽनुग्रहकृत्कार्य्यः क्रेतुर्विक्रेतुरेव च"—इति।

तुला तोलनदण्डः। प्रस्थादि परिमाणम्। नाणकं मुद्राचिह्नितं द्रम्मनिष्कादि। एतेषां कूटकृद्देशप्रसिद्धपरिमाणादन्यथा; न्यूनत्वमाधिक्यं वा, द्रम्मादेरव्यावहारिकमुद्रितत्वं वा, ताम्रादिगर्भत्वं वा, करोति; यश्च चपुसीसादिरूपैस्तैर्व्यवहरति, तावुभौ प्रत्येक-

---

* स्थाप्यते,—इति पा०।

मुत्तमसाहसं दण्डनीयौ । यः पुनर्नाणकपरीक्षकः सम्यगेव कूटमिति ब्रूते, असम्यग् वा सम्यगिति, सोऽप्युत्तमसाहसं दण्डनीयः । यः पुनर्वैद्यः आयुर्वेदानभिज्ञएव जीवनार्थं चिकित्साज्ञोऽहमिति तिर्य्यग्मनुष्यराजपुरुषेषु चिकित्सां करोति, स यथाक्रमं प्रथममध्यमोत्तमसाहसं दण्डनीयः । योऽपि वणिग्व्रीहिकार्पासादेः पण्यस्याष्टमांशं कूटमानेन कूटतुलया वाऽपहरति, असौ पणानां द्विशतं दण्डनीयः । अपह्रियमाणद्रव्यस्य पुनर्वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्पनीये । भेषजमौषधद्रव्यं, स्नेहोघृतादि, गन्धद्रव्यमुशीरादि । एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोड़शपणं दण्डः । न विद्यते बहुमूल्या जातिर्यस्मिन् मृष्मर्मादिके, तदजाति । तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीयसादृश्यसम्पादने, विक्रेयस्यापादितसादृश्यस्य मृष्मर्मादेः पण्यस्याष्टगुणोदण्डः । समुद्गकस्य करण्डकादेः परिवर्त्तनं व्यत्यासः । योऽन्यदेव मुक्तानां पूर्णं करण्डकं दर्शयित्वा अन्यदेव स्फटिकानां पूर्णं हस्तलाघवात् समर्पयति, यस्य सारभाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति, तस्यैवं दण्डकल्पना । कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे न्यूने, न्यूनपणमूल्ये इति यावत् । तस्मिन् कृत्रिमे विक्रीते पञ्चाशत्पणोदण्डः । पणमूल्ये तु शतं, द्विपणमूल्ये तु द्विशतोदण्डः । एवं मूल्यवृद्धौ दण्डवृद्धिरूह्नेया । राजनिरूपितार्घस्य ह्रासं वृद्धिं वाऽपि जानन्तो वणिजः कारुशिल्पिनां—कारूणां रजकादीनां शिल्पिनां चित्रकारादीनां पीड़ाकरं अर्घान्तरं लाभलोभात् कुर्वन्तः पणसहस्रं दण्डनीयाः । ये पुनर्देशान्तरादागतं पण्यं हीनमूल्येन

प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणीते, तेषामुत्तमसाहसो दण्डः । राजनि सन्निहितेऽपि सति, यस्तेनार्घो निरूप्यते, तेनार्घेन क्रयो वा विक्रयो वा कार्य्यः । निस्रवः निर्गतस्रवः अवशेषः । तस्माद्राजनिरूपितादर्घात् योनिस्रवः, सएव वणिजां लाभकारी, न पुनः स्वच्छन्दपरिकल्पितादर्घात् । अर्घकरणे विशेषमाह मनुः,—

"पञ्चरात्रे सप्तरात्रे पक्षे मासे* तथा गते ।

कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः"—इति ।

स्वदेशपण्ये शतपणमूल्ये पञ्चकं लाभार्थं गृह्णीयात्, परदेशे तु दशपणं लाभं गृह्णीयात्; यस्य पण्यग्रहणदिवसएव विक्रयः । यः पुनः कालान्तरे विक्रीणीते, तस्य कालोत्कर्षवशाल्लाभोत्कर्षः कल्प्यः । देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादि-स्थानेषु प्रयुक्तमर्थं परिगणय्य पण्यमूल्येन सह मेलयित्वा, यथा शतपण्यमूल्ये पण्ये दशपणोलाभः सम्पद्यते, तथा क्रेतृविक्रेत्रोरनु-ग्रहकार्य्यर्घोराज्ञा स्थापनीयः ।

इति साहसप्रकरणम् ।

अथ स्त्रीसङ्ग्रहणम् ।

तस्य त्रैविध्यमाह बृहस्पतिः,—

"पापमूलं सङ्ग्रहणं त्रिप्रकारं निबोधत ।

बलोपाधिकृते द्वे तु तृतीयमनुरागजम् ॥

---

* अष्टरात्रे पञ्चरात्रे पक्षे पक्षे,—इति मुद्रितमनुसंहितायां पाठः ।

अनिच्छया त्वया कृतं मत्तोन्मत्तकृतं तथा।
प्रलये यत्तु रहसि बलात्कारकृतं तु तत्॥
छद्मना स्वगृहमानीय दत्त्वा वा मद्कारणम्।
संयोगः क्रियते यत्तु तदुपाधिकृतं विदुः॥
अन्योन्यमनुरागेण दूतसम्प्रेषणेन वा।
कृतं रूपार्थलोभेन ज्ञेयं तदनुरागजम्"—इति।

पुनरपि त्रैविध्यमाह स एव,—

"तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमोत्तमम्।
अपाङ्गप्रेक्षणं हास्यं दूतसम्प्रेषणं तथा॥
स्पर्शश्च भूषणं स्त्रीणां प्रथमं सङ्ग्रहः स्मृतः।
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम्॥
सम्भाषणं रहसि च मध्यमं सङ्ग्रहं विदुः।
एकशय्याऽऽसनं क्रीड़ा चुम्बनालिङ्गनं तथा॥
एतत्सङ्ग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः"—इति।

योषित्सङ्ग्रहणज्ञानोपायमाह याज्ञवल्क्यः,—

"पुमान् सङ्ग्रहणे ग्राह्यः केशाकेशि परस्त्रिया।
सद्यो वा कामजैश्चिह्नैः प्रतिपत्तिर्द्वयोस्तयोः॥
नीवीस्तनप्रावरणसक्थिकेशावमर्षणम्।
अदेशकालसम्भाषा सहैकस्थानमेवच"—इति।

स्त्रीपुंसयोर्मिथुनीभावः सङ्ग्रहणम्। तच्च प्रवृत्तः, परभार्य्यया सह केशाकेशिक्रीड़नेन; सद्य अभिनवैः कामजैः कररुहदशनादिकृतव्रणलिङ्गैः, द्वयोः सम्प्रतिपत्त्या वा, ग्राह्यः। योऽपि परदारपरिधान-

ग्रन्थिप्रदेश-कुचप्रावरण-जघन-शिरोरुहादिस्पर्शनं साभिलाष इव करोति; निर्जनदेशे जनाकीर्णेऽप्यन्धकाराकुले, अकाले संलापं करोति, परभार्य्यया सहैकत्र मञ्चकादौ तिष्ठति, सोऽपि ग्राह्यः। मनुरपि,—

"स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा।
परस्परस्यानुमते सर्वं सङ्ग्रहणं स्मृतम्॥
दर्पाद्वा यदि वा मोहात् श्लाघवाद्वा स्वयं वदेत्।
पूर्वं मयेयं भुक्तेति तच्च सङ्ग्रहणं स्मृतम्"—इति।

तत्र दण्डमाह याज्ञवल्क्यः,—

"सजातावुत्तमो दण्डः आनुलोम्येषु मध्यमः।
प्रातिलोम्ये वधः पुंसो नार्य्याः कर्णादिकर्त्तनम्"—इति।

चतुर्णामपि वर्णानां बलात्कारेण सजातीयगुप्तपरभार्य्यागमने साशीतिपणसहस्रं दण्डः। यदा त्वानुलोम्येन हीनवर्णगुप्तपरभार्य्यागमनं, तदा मध्यमसाहसोदण्डः। यदा पुनः सवर्णामगुप्तामानुलोम्येन गुप्तां वा व्रजति, तदा मनुना विशेष उक्तः,—

"सहस्रं ब्राह्मणोदण्ड्यो गुप्तां विप्रां बलाद्व्रजन्।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः॥
सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्।
शूद्रायां क्षत्रियविशोः सहस्रन्तु भवेद्दमः"—इति॥

एतद्गुरुसखिभार्य्यादिव्यतिरिक्तविषयम्। तत्र दण्डान्तरविधानात्। तदाह नारदः,—

"माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा।

पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा।
दुहिताऽऽचार्य्यभार्य्या च सगोत्रा शरणागता॥
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या।
आसामन्यतमां गच्छन् गुरुतल्पग उच्यते॥
शिश्नस्योत्कर्त्तनं* तत्र नान्योदण्डो विधीयते"—इति।

प्रतिलोम्येन उत्कृष्टस्त्रीगमने क्षत्रियादेर्वधः। एतद्गुप्ताविषयम्। अन्यत्र धनदण्डः। तथाच मनुः,—

"उभावपि हि तावेव ब्राह्मण्या गुप्तया सह।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना॥
ब्राह्मणीं यद्यगुप्तान्तु सेवेतान्यः पुमान् यदि।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्"—इति।

शूद्रस्यागुप्तोत्कृष्टस्त्रीगमने लिङ्गच्छेदनसर्वस्वहरणे, गुप्तगमने तु वधसर्वस्वापहारौ। तथाच सएव,—

"शूद्रोगुप्तमगुप्तं वा द्वैजातं वर्णमावसन्।
अगुप्तैकाङ्गसर्वस्वी गुप्ते सर्वेण हीयते"—इति।

अत्रैव विषये बृहस्पतिरपि,—

"सहसा कामयेद्यस्तु धनं तस्याखिलं हरेत्।
उत्कृत्य लिङ्गवृषणौ भ्रामयेद्गर्दभेन तु"—इति।

शूद्रस्येत्यनुवृत्तौ गौतमः। "आर्य्यस्त्रियाऽभिगमने लिङ्गोद्धारः सर्वस्वहरणम्"—इति। नार्य्याः पुनर्हीनवर्णगमने नासादिकर्त्तनम्।

* शिश्नस्योत्कर्त्तनात्,—इति ग्रन्थान्तरधृतः पाठः।

अयं वधाद्युपदेशो राज्ञः, तस्यैव पालनाधिकारात्. न द्विजातिमात्रस्य। "ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीत"—इति शस्त्रग्रहणस्य निषेधात्। यदा तु राज्ञोऽनिवेदनेन कालातिपातशङ्का, तदा द्विजातिमात्रस्यापि वधाधिकारोऽस्त्येव,

"शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते।
नाततायिवधे दोषो हन्तुर्भवति कश्चन॥
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति"—इति

शस्त्रग्रहणाभ्यनुज्ञानात्। क्षत्रियवैश्ययोरन्योन्यस्याभिगमने यथाक्रमं सहस्रपञ्चशतपणात्मकौ दण्डौ। तदाह मनुः,—

"वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः"—इति।

साधारणस्त्रीगमने दण्डमाह याज्ञवल्क्यः,—

"अवरुद्धासु दासीषु भुजिष्यासु तथैव च।
गम्यास्वपि पुमान् दाप्यः पञ्चाशत्पणकं दमम्"—इति।

उत्तमवर्णा वर्णस्त्रियो दास्यः। ता एव स्वामिना शुश्रूषादानिवृत्त्यर्थं गृह एव स्थातव्यमित्येवं पुरुषान्तरभोगतो निरुद्धा अवरुद्धाः। नियतपुरुषपरिग्रहा भुजिष्याः। यदा दास्योऽवरुद्धा भुजिष्या वा भवेयुः, तासु तासु। चशब्दात् वेश्यास्वैरिणीनामपि साधारणस्त्रीणां भुजिष्यानां ग्रहणम्। तासु च सर्वपुरुषसाधारणतया गम्यास्वपि गच्छन् पञ्चाशत्पणं दण्डनीयः। परगृहीतत्वेन तासां परदारतुल्यत्वात्। एतदेवाभिप्रेत्य नारदोऽपि,—

"स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या।

गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः ॥
आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत्।
गम्यास्वपि हि नोपेयाद्यतस्ताः सपरिग्रहाः"—इति।

निष्कासिनी स्वाम्यनवरुद्धा दासी। अनवरुद्धदास्याद्यभिगमने याज्ञवल्क्यः,—

"प्रसह्य दास्यभिगमे दण्डोदशपणः स्मृतः।
बहूनां यद्यकामाऽसौ चतुर्विंशतिकः पृथक्"—इति।

पुरुषसम्भोगजीविकासु दासीषु स्वैरिण्यादिषु च शुल्कदानमन्तरेण बलात्कारेणाभिगच्छतो दशपणोदण्डः। अनिच्छन्तीमेकां गच्छतां बहूनां प्रत्येकं चतुर्विंशतिपणात्मकोदण्डः। कन्याहरणे दण्डमाह याज्ञवल्क्यः,—

"अलङ्कृतां हरन् कन्यामुत्तमं त्वन्यथाऽधमम्।
दण्डं दद्यात्सवर्णासु प्रातिलोम्ये बधः स्मृतः।
सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः"—इति।

अलङ्कृतां विवाहाभिमुखीं कन्यां अपहरन् उत्तमसाहसं दण्डनीयः। तदनभिमुखीं सवर्णां अपहरन् प्रथमसाहसं दण्डनीयः। उत्तमवर्णजां कन्यामपहरतः क्षत्रियादेर्बधएव। आनुलोम्येन सकामापहारे तु दण्डो न भवति। अकामामपहरन् प्रथमसाहसं दण्डनीयः। कन्यादूषणे तु दण्डमाह सएव,—

"दूषणे तु करच्छेद उत्तमायां बधः स्मृतः।
शतं स्त्रीदूषणे दद्याद्धेतुमिथ्याऽभिशंसने ॥
पशून् गच्छन् शतं दाप्यो हीनस्त्रीं स्त्रीं च मध्यमम्"—इति।

यदा कन्यां बलात्कारेण नखक्षतादिना दूषयति, तदा तस्य करच्छेदः। यदा पुनस्तामेव अङ्गुलीप्रक्षेपेण योनिक्षतं कुर्वन् दूषयति, तदा विशेषमाह मनुः,—

"अभिषह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः।
तस्याशु कर्त्त्ये अङ्गुल्यौ दण्डञ्चार्हति षट्शतम्॥
सकामां दूषयंस्तुल्यो नाङ्गुलीच्छेदमर्हति।
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये॥
कन्यैव कन्यां या कुर्य्यात्तस्याः स्याद्द्विशतोदमः।
शुल्कं च द्विगुणं दद्यात् शिफाश्चैवाप्नुयाद्दश।
या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति॥
अङ्गुल्योरेव च छेदं खरेणोद्वहनं तथा"—इति।

यदा पुनरुत्कृष्टजातीयां कन्यां सानुरागामकामां* गच्छति, तदा तस्य क्षत्रियादेर्बधः। यदा सवर्णां सकामां अभिगच्छति, तदा गोमिथुनं शुल्कं तत्पित्रे दद्यात्। अनिच्छति पितरि दण्डरूपेण राज्ञे दद्यात्। सवर्णामकामां तु गच्छतो बधएव। तदाह मनुः,—

"उत्तमां सेवमानस्तु जघन्यो बधमर्हति।
शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि॥
योऽकामां दूषयेत्कन्यां स सद्यो बधमर्हति।
सकामां दूषयंस्तुल्यो न बधं प्राप्नुयान्नरः"—इति।

चण्डाल्यादिगमने दण्डमाह सएव†,—

* सानुरागामकामां वा,—इति पाठो भवितुं युक्तः।

† सर्व्वेष्वादर्शपुस्तकेष्वित्थमेव पाठः। परन्तु अन्त्याभिगमने,—इत्यादिवचनद्वयं याज्ञवल्क्यसंहितायां पठ्यते।

"अन्त्याऽभिगमने त्वङ्क्यः कुबन्धेन प्रवासयेत्।
शूद्रस्तथाऽन्त्यएव स्यादन्त्यस्यार्य्यागमे बधः॥
अयोनौ गच्छतो योषां पुरुषं वाऽपि मेहतः* ।
चतुर्विंशतिको दण्डः तथा प्रव्रजितासु च"—इति।

अन्त्यां चण्डालीम्। तां गच्छन्तं त्रैवर्णिकं प्रायश्चित्तानभिमुखं, "सहस्रं त्वन्त्यजस्त्रियम्"—इति मनुवचनानुसारेण सहस्रं दण्डयित्वा कुत्सितबन्धेन भगाकारेणाङ्कयित्वा पुरान्निर्वासयेत्। शूद्रः पुनः चण्डालीं गच्छन्नन्त्यएव। अन्त्य इति पाठे चण्डालएव भवति। चण्डालस्य तूत्कृष्टजातिस्त्रियाभिगमने बधएव। योषां मुखादावभिगच्छतः पुरुषं वा मुखे मेहतः प्रव्रजितां गच्छतः चतुर्विंशतिपणोदण्डः। वञ्चनया स्त्रीसङ्ग्रहे दण्डमाह बृहस्पतिः†,—

"विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्त्यते।
स्त्रीपुंसयोगसंज्ञन्तद्विवादपदमुच्यते"—इति।

स्त्रीरक्षणमाह मनुः,—

"अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम्।
विषये सज्जमानाश्च संस्थाप्या ह्यात्मनो वशे॥

---

* पुरुषं वाऽभिमेहतः,—इति पाठः समीचीनः प्रतिभाति।

† अत्र कियान् ग्रन्थांशः आदर्शपुस्तकेषु परिभ्रष्ट इत्यनुमीयते। यतः समनन्तरोद्धृतवचनं स्त्रीपुंसयोगाख्यव्यवहारपदस्य लक्षणपरमेव, न तु वञ्चनया संग्रहणे दण्डविधायकम्। भवितव्यन्त्वत्र, वञ्चनया स्त्रीसंग्रहे दण्डविधायकेन प्रमाणेन। तत्तु न दृश्यते। अतः कारणात् कियान् ग्रन्थांशः प्रलीनइत्यवगम्यते। समनन्तरोद्धृतं विवाहादिविधिः स्त्रीणामित्यादिवचनं नारदस्येति कृत्वा मिताक्षरादावुद्धृतमस्ति।

सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियोरक्ष्या विशेषतः।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः॥
इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम्।
यतन्ते रक्षितुं भार्य्यां भर्त्तारो दुर्बला अपि॥
स्वां प्रसूतिञ्च वित्तञ्च* कुलमात्मानमेव च।
स्वञ्च धर्मं प्रयत्नेनां जायां रक्षन् हि रक्षति॥
न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम्।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम्॥
अर्थस्य सङ्ग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्मेऽन्नपक्त्याञ्च पारिणाय्यस्य रक्षणे"—इति।

स्वैः पुरुषैः भर्तृभिः सर्वदा अस्वतन्त्राः कार्य्याः। विषये गीतादावासक्तास्ततो व्यावर्त्तनीयाः। अरक्षितास्तु दुश्चरितेन भर्तृपितृकुलयोः शोकं कुर्य्युः। तस्मात् कुलद्वयरक्षार्थं रक्ष्यास्ताः। यद्यपि प्रसह्य रक्षितुमशक्यास्तथाप्यर्थसङ्ग्रहादौ नियोजनेन पुरुषान्तरचिन्तनावसरस्याप्रदानेन रक्षेदित्यर्थः। बृहस्पतिरपि,—

"सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यो निवार्य्या स्त्री स्वबन्धुभिः।
श्वश्र्वादिभिः गुरुस्त्रीभिः पालनीया दिवानिशम्"—इति।

दोषरहितस्त्रीपरित्यागिनं प्रत्याह नारदः,—

"अनुकूलामदुष्टां वा दक्षां साध्वीं प्रजावतीम्।
त्यजन् भार्य्यामवस्थाप्यो राज्ञा दण्डेन भूयसा"—इति।

---

* प्रसूतिं चरित्रञ्च,—इत्यन्यत्र पाठः।
† प्रजाश्चैव,—इति पा०।

दृष्टेन स्थापयितुमशक्ये त्वाह याज्ञवल्क्यः,—

"आज्ञासम्पादीनीं दक्षां वीरसूं प्रियवादिनीम्।

त्यजन् दाप्यः तृतीयांशमद्रव्यो भरणं स्त्रियाः"—इति।

बुध्वा स्त्रियं त्यजेदित्याह नारदः,—

"अन्योन्यं त्यजतो धर्म्मः स्यादन्योन्यविशुद्धये।

स्त्रीपुंसयोः न चोढ़ाया व्यभिचारादृते स्त्रियाः"—इति।

विवाहसंस्काररहितयोरत्यन्तजातीयस्त्रीपुंसयोर्विरोधेनान्योन्य-न्त्यजतो दोषोनास्ति। विवाहसंस्कृतायास्तु व्यभिचारादेव त्यागो-न विरोधमात्रेण। एतच्च स्वस्थस्वच्छन्दव्यभिचारिणीविषयम्,

"स्वच्छन्दगा तु या नारी तस्यास्त्यागो विधीयते"—इति

यमस्मरणात्। शिष्यगाद्या अपि सन्त्याज्याः। तथाच वसिष्ठः,—

"चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा तथा।

पतिघ्नी तु विशेषेण जुङ्गितोपगता तथा"—इति।

हारीतोऽपि। "गर्भघ्नीं अधमवर्णशिष्यसुतगामिनीं पानव्यसना-सक्तां धनधान्यविक्रयकरीं विवर्जयेत्"—इति। विवर्जनं च व्यव-हारपरित्यागः। तथाच वसिष्ठः,—

"व्यवायतीर्थगमनधर्म्मेभ्यस्तु निवर्त्तते"—इति।

व्यवायः सम्भोगः। तीर्थगमनशब्देन स्मार्त्तकर्म्म लक्ष्यते, धर्म्म-शब्देन च श्रौतम्। चशब्देन सम्भाषणादिकम्। व्याधितादीनान्तु सम्भोगमात्रस्य त्याग इत्याह देवलः,—

"व्याधितां स्त्रीप्रजां बन्ध्यामुन्मत्तां विगतार्त्तवाम्।

अदुष्टां लभते त्यक्तुं तीर्थाश्च लेव कर्म्मणः"—इति।

तीर्थात्मसंयोगात्,—इत्यर्थः । तथाच नारदः,—

"बन्ध्यां स्त्रीजननीं निन्द्यां प्रतिकूलाञ्च सर्वदा ।
कामतो नाभिनन्देत कुर्वन्नेवं न दोषभाक् ॥
वादिनीं पूर्वाग्निनीञ्च भर्त्ता निर्वासयेत् गृहात् ।
स्त्रीं धनभ्रष्टसर्वस्वां गर्भविध्वंसिनीं तथा ॥
भर्तुश्च धनमिच्छन्तीं स्त्रियं निर्वासयेद्गृहात्"—इति ।

बौधायनोऽपि,—

"भर्त्तुः प्रतिनिषेधेन या भार्य्या स्कन्दयेदृतुम् ।
तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु नयेत् गृहात् ॥
अशुश्रूषाकरीं नारीं बन्धकीं परिहिंसकाम् ।
त्यजन्ति पुरुषाः प्राज्ञाः क्षिप्रमप्रियवादिनीम्"—इति ।

त्यागश्च अनिधनेन कार्य्यः । तथाच यमः,—

"स्वच्छन्दव्यभिचारिण्याः विवस्वांस्त्यागमब्रवीत् ।
न वधं न च वैरूप्यं वधं स्त्रीणां विवर्जयेत् ॥
न चैव स्त्रीवधं कुर्य्यात् न चैवाङ्गविकर्त्तनम्"—इति ।

स्त्रीणां वधं कुर्वन् तासां विवर्जनं कुर्य्याद्भर्त्ता, न कर्णनासादि-कर्त्तनमित्यर्थः । अयञ्च स्त्रीपुंधर्म्म आचाराध्याये प्रपञ्चित इति नात्र कथ्यते ।

इति स्त्रीसङ्ग्रहः ।

अथ दायभागाख्यं व्यवहारपदं कथ्यते।

तत्र नारदः,—

"विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।

दायभाग इति प्रोक्तं व्यवहारपदं बुधैः"—इति।

दायोनाम; यद्धनं स्वामिसम्बन्धादेवान्यस्य स्वम्भवति[१], तदुच्यते। स द्विविधः अप्रतिबन्धः सप्रतिबन्धश्चेति। पितृधनं पितामहधनं वा अप्रतिबन्धो दायः। पुत्रादिधनं तु पित्रादीनां सप्रतिबन्धो दायः[२]। तस्य विभागोदायविभाग इत्युच्यते। अतएव दायशब्देन पितृद्वाराऽऽगतं मातृद्वाराऽऽगतं च द्रव्यमेवोच्यते इति। संग्रहकारश्च,—

"पितृद्वाराऽऽगतं द्रव्यं मातृद्वाराऽऽगतञ्च यत्।

कथितं दायशब्देन तस्य भागोऽधुनोच्यते"—इति।

विभागकालमाह मनुः,—

"ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः सह।

भजेरन् पैतृकं रिक्थं अनीशास्ते हि जीवतोः"—इति।

ऊर्ध्वं पितुरिति पितृधनविभागकालः। मातुरूर्ध्वमिति मातृ-

---

(१) स्वामिनः धनस्वामिनः सम्बन्धः स्वामिसम्बन्धः। स च दायभाग-प्रकरणोक्तः पुत्रत्वादिरूपएव ग्राह्यः न तु क्रेतृत्वादिः। तेन स्वामिनः सकाशात् क्रीतं धनं न दायः।

(२) सर्वस्यामेवावस्थायां पित्रादिधनं पुत्रादिर्लभते इति तत्र प्रतिबन्धाभावात् तदप्रतिबन्धोदायइत्युच्यते। पुत्रादिधनन्तु पित्रादेः सप्रतिबन्धोदायः। तत्पुत्रादौ विद्यमाने तद्धनस्य पित्रादेर्लभ्यम-शक्यतया सप्रतिबन्धत्वात्।

धनविभागकालः। ततश्चैतदुक्तं भवति। पितुरूर्ध्वं मातरि जीवन्त्या-
मपि पितृधनविभागः कार्य्यः। तथा मातुरूर्ध्वं पितरि जीवितेऽपि
मातृधनविभागः कार्य्यएव। अन्यतरधनविभागे उभयोरूर्ध्वकाल-
प्रतीक्षणानुपयोगादिति। तदुक्तं संग्रहकारेण,—

"पितृद्रव्यविभागस्य जीवन्त्यामपि मातरि।
अस्वतन्त्रतयाऽस्वाम्यं यस्मान्मातुः पतिं विना॥
मातृद्रव्यविभागोऽपि तथा पितरि जीवति।
सत्स्वपत्येषु यस्माच्च स्त्रीधनस्य पतिः पतिः"—इति।

अयमर्थः। पतिमरणे पितृभार्य्यायाः पत्युपरमादस्वातन्त्र्येण
न स्वामित्वं, यस्माच्चापत्येषु विद्यमानेषु भार्य्याधनस्य भार्य्यामरणे-
ऽपि पतिर्न स्वामी, तस्मात्तयोरन्यतरस्मिन् जीवत्यप्यन्यतरधन-
विभागोयुक्तः—इति। एतेन जीवतोस्तत्तद्द्रव्यविभागेषु पुत्राणां
न स्वातन्त्र्यमित्यर्थादुक्तं भवति। तथा शङ्खः। "न जीवति पितरि
पुत्रा रिक्थं भजेरन्। यद्यपि स्यात् पश्चादधिगतं, ते अनर्हाएव
पुत्राः। अर्थधर्म्मयोः अस्वातन्त्र्यात्"—इति। अस्यार्थः। यद्यपि
जन्मानन्तरमेव पुत्राः पितृधननिमित्तं प्रतिपन्नाः, तथापि पितरि
जीवति तद्धनं न विभजेरन्। यतो धर्मार्थयोरस्वातन्त्र्याद्विभाग-
करणेऽनर्हाः। अर्थास्वातन्त्र्यं नाम, तदादानप्रदानयोरस्वातन्त्र्यम्—
इति। तथाच हारीतः। "जीवति पितरि पुत्राणां अर्थादान-
विसर्गाक्षेपेष्वस्वातन्त्र्यम्"—इति। अर्थादानमर्थोपभोगः। विसर्गो-
व्ययः। आक्षेपोभृत्यादेः शिक्षार्थमधिक्षेपादिः। धर्मास्वातन्त्र्यं, पृथ-
गिष्टापूर्त्तादावप्रवृत्तिः। यत्तु देवलेनोक्तम्,—

"पितर्य्युपरते तत्र विभजेरन् पितुर्धनम् ।
अस्वाम्यं हि भवेत्तेषां निर्दोषे पितरि स्थिते"—इति ।

तदप्यस्वातन्त्र्यप्रतिपादनपरं । पितृधने पुत्राणां जन्मना स्वाम्यस्य लोकसिद्धत्वात् । ननु शास्त्रैकसमधिगम्यस्य स्वत्वस्य कथं लोकसिद्धता । शास्त्रसिद्धत्वञ्च, "स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेषु । ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः"—इति गौतमवचनादवगम्यते । अप्रतिबन्धोदायो ऋक्थं, न सप्रतिबन्धोदायः । संविभागः सप्रतिबन्धोदायः । अनन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः परिग्रहः । निध्यादिप्राप्तिरधिगमः । एतेषु निमित्तेषु सत्सु स्वामी भवति । ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं, तदधिकमसाधारणम् । क्षत्रियस्य विजयदण्डादिलब्धं यत्तदसाधारणम् । वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं, तदसाधारणम् । शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं, तदसाधारणम् । एवमनुलोमप्रतिलोमजानां स्वस्वविहिताश्वसारथ्यादिना यल्लब्धं तदधिकमित्यर्थः । तत्रैव संग्रहकारोन्यायमाह,—

"वर्त्तते यस्य यद्धस्ते तस्य स्वामी सएव न"—इति ।

अन्यस्वस्यान्यहस्ते स्थितस्य दर्शनेन तस्यैव स्वामित्वापत्तेः । अतः शास्त्रैकसमधिगम्यं स्वत्वम् । किञ्च, यदि यस्यान्तिके यद्धनं दृष्टं तस्य सएव स्वामी, तर्ह्यस्य स्वमनेनापहृतमिति न ब्रूयात् । यस्यैवान्तिके दृष्टं तस्यैव स्वामित्वात् । स्वत्वस्य लौकिकत्वे,

"योऽदत्तादायिनोहस्ताल्लिप्सेत ब्राह्मणो धनम् ।
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः"—इति

याजनादिना अदत्तादायिनः सकाशाद्द्रव्यमर्जयतो दण्डविधानमनुपपन्नं स्यात्। तस्माच्छास्त्रैकसमधिगम्यं स्वत्वम्।

नैवम्। लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात्। व्रीह्यादिवत्। आहवनीयादीनां वैदिकादीनामपि लौकिकपाकादिसाधनत्वमस्तीत्यनैकान्तिको हेतुः—इति चेत्। न। न हि तेषामाहवनीयादिरूपेण पाकादिसाधनत्वं, किं तर्हि लौकिकाग्न्यादिरूपेणेत्यस्ति वैषम्यम्[१]। किञ्च, पामराणामपि स्वत्वव्यवहारदर्शनात् स्वत्वस्य लौकिकत्वमवगम्यते[२]।

यत्तु गौतमवचनम्। "स्वामी रिक्थक्रयसंविभागेषु"—इत्याद्यनुपपन्नमित्युक्तम्। तन्न। प्रतिग्रहाद्युपायस्य लौकिकत्वे स्थिते ब्राह्मणादीनां प्रतिग्रहाद्युपायनियमार्थत्वात् शास्त्रस्य[३]। यदप्युक्तं, अन्यस्य स्वमन्येनापहृतम्—इति न ब्रूयादिति। तदसत्। स्वत्वहेतु-

(१) संस्कारविशेषसंस्कृतोऽग्निराहवनीय उच्यते। अस्ति च तत्र रूपद्वयमाहवनीयत्वमग्नित्वञ्च। तत्रालौकिकहोमसाधनत्वमलौकिकेनाहवनीयत्वेन रूपेण। लौकिकपाकादिसाधनत्वन्तु लौकिकेनाग्नित्वेनैव रूपेणेति भावः।

(२) स्वत्वस्य शास्त्रैकसमधिगम्यत्वे तु शास्त्रानभिज्ञानां पामराणां स्वत्वव्यवहारएव न सम्भवति। न हि शास्त्रमविज्ञाय तदेकसमधिगम्योऽर्थः शक्यते ज्ञातुमिति भावः।

(३) प्रतिग्रहाद्युपायकं स्वत्वं लौकिकमेवेति स्थिते तेषां प्रतिग्रहाद्युपायानामनियमेन सर्व्वेषां सर्व्वत्र प्राप्तौ सत्यां ब्राह्मणस्याधिकं लब्धमित्यादिगौतमवचनेन ब्राह्मणस्यैव प्रतिग्रहः क्षत्रियस्यैव विजय इत्यादिरीत्या अदृष्टार्थतया उपाया नियम्यन्ते। तन्नियमातिक्रमात् पुरुषएव प्रत्यवैति स्वत्वन्तु जायते एवेति भावः।

भृतकत्वाद्युपन्यासात् स्वत्वसम्बन्धेनोपपत्तेः । यदपि चोक्तं, "योऽहर्त्ता-दायिनः"—इति अहर्त्तादायिनः सकाशात् याजनादिना द्रव्य-मर्जयितुर्दण्डविधानमनुपपन्नमिति । तदप्यसत् । प्रतिग्रहादिनिय-तोपायकस्यैव स्वत्वस्य लौकिकत्वात् नियमातिक्रमेण द्रव्यमर्जयतो-दण्डविधानमुपपद्यते । एवं, "तस्योत्सर्गेण शुध्यन्ति"—इति प्राय-श्चित्तविधानमपि । एवं च स्वत्वस्य लौकिकत्वे असत्प्रतिग्रहादिलब्धं धनं तत्पुत्रादीनां दायत्वेन स्वमिति विभाव्यम्[१]। न तेषां दोष-सम्बन्धश्च[२] ।

"सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च"—इति

मनुस्मरणात् ।

इदमत्र चिन्तनीयम् । विभागात् स्वं स्वस्य वा विभागः—इति । अत्रायं पूर्वपक्षः । विभागात् स्वं, जन्मनैव स्वत्वे उत्पन्नमात्रस्य पुत्रस्यापि स्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु पितुरधिकार-विधिर्न स्यात्[२] । किञ्च,

---

(१) स्वत्वस्य शास्त्रैकसमधिगम्यत्वे ह्यसत्प्रतिग्रहादिना लब्धेषु स्वत्वमेव न स्यात् तस्योत्सर्गविधानात् । स्वत्वस्य लौकिकत्वे त्वसत्प्रतिग्रहादि-लब्धेष्वपि स्वत्वं भवत्येव । तस्योत्सर्गेण शुध्यन्तीति प्रायश्चित्तन्तु अर्ज्जयितुरेव न तत्पुत्रादीनाम् । स खल्वर्ज्जयिता यथोक्तं प्राय-श्चित्तमकुर्व्वन् प्रत्यवायभागी भवति, तस्य तद्धनमधर्म्यञ्च भवति । तत्पुत्रादीनान्तु दायरूपमेव तद्धनमिति न तेषां प्रत्यवायः । तेषां तद्धनस्य धर्म्यत्वादित्याशयः ।

(२) साधारणधनस्यैकेन विनियोगासम्भवादिति भावः ।

"भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते"—इति

प्रीतिदानवचनमप्यनुपपन्नं स्यात्। यदपि,—

"मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः।
स्थावरस्य तु सर्वस्य न पिता न पितामहः॥
पितृप्रसादात् भुज्यन्ते वस्त्राण्याभरणानि च।
स्थावरं तु न भुज्येत प्रसादे सति पैतृके"—इति।

तत्पितामहोपात्तस्थावरविषयम्[१]। तस्मात्, स्वामिनाशादि-भागाद्वा स्वत्वं न जन्मनैव।

राद्धान्तस्तु। जन्मनैव स्वत्वं लोके प्रसिद्धम्। विभागशब्दस्य बहुस्वामिकधनविषये लोके प्रसिद्धो नान्यदीयधनविषयो न प्रक्षीण-विषयः[२]। किञ्च "उत्पत्त्यैवार्थं स्वामित्वाल्लभेतेत्याचार्य्याः"—इति गौतमवचनाज्जन्मनैव स्वत्वमवगम्यते।

यदुक्तम्, मणिमुक्ताप्रवालानाम्,—इत्यादिवचनं पितामहोपात्त-स्थावरविषयमिति। तदयुक्तम्। न पिता न पितामह इति वचनात् पितामहस्य हि स्वार्जितमपि धनं पुत्रपौत्रयोः सतोरदेयमिति च जन्मना स्वत्वङ्गमयतीति।

यदप्युक्तम्। अर्थसाध्येष्वाधानादिषु पितुरनधिकार इति। तदयुक्तम्। वचनादेवाधिकारावगमात्। यदपि चोक्तं, जन्मनैव

(१) जन्मनैव स्वत्वे स्थावरस्य प्रसादादानस्य प्रसक्तिरेव नास्तीति तन्न प्रति-षिध्येत। तस्माद्विभागादिना स्वत्वं न जन्मनेति भावः।

(२) न प्रक्षीणविषयो न निर्विषय इत्यर्थः।

स्वत्वे भर्त्रा प्रीतेन यद्दत्तमित्यादि विष्णुवचनं नोपपद्यते,—इति। तदप्ययुक्तम्। साधारणेऽपि द्रव्यस्य वचनादेव प्रीतिदाने पितुर-धिकारोपपत्तेः। स्थावरादौ तु स्वार्जितेऽपि पुत्रादिपारतन्त्र्यमेव।

"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्।
असम्भूय सुतान् सर्वान् दानं न च विक्रयः॥
ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः।
वृत्तिञ्च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः"—

इत्यादिवचनात्। आपदादौ तु स्वातन्त्र्यमस्त्येव।

"एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्।
आपत्काले कुटुम्बार्थे धर्मार्थेषु विशेषतः"—इति

स्मरणात्। तस्मात्, सुष्ठूक्तं जन्मनैव स्वत्वमिति। प्रकृतमनुसरामः। अपरमपि विभागकालमाह याज्ञवल्क्यः,—

"विभागञ्चेत्पिता कुर्य्यादिच्छया विभजेत्सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः"—इति।

यदा पिता विभागं कर्तुमिच्छति, तदा पुत्रानात्मनः सकाशा-दिच्छया विभजेत्। इच्छया विभागप्रकारः, ज्येष्ठं वा श्रेष्ठभागेनेति। श्रेष्ठभागः सोद्धारविभागः। उद्धारप्रकारः स्मृत्यन्तरे दर्शितः,—

"ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः"—इति।

अथवा। सर्वे ज्येष्ठादयः पुत्राः समांशभाजः[१]। अयश्च[२] विषमोभागः

(१) इदञ्च सर्व्वे वा स्युः समांशिन इत्यस्य व्याख्यानम्।
(२) अयश्चेति सोद्धारविभागरूपइत्यर्थः।

स्वार्जितद्रव्यविषयः। क्रमागते तु सर्वेषामपि समांशः स्यात्। पितुरिच्छया विषमविभागस्यायुक्तत्वात्। नारदोऽपि कालान्तरमाह,—

"अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समम्।
मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च॥
निवृत्ते वाऽपि रमणे पितर्युपरतस्पृहे"—इति।

शङ्खोऽपि। "अकामे पितरि रिक्थविभागो वृद्धे विपरीते चेतसि दीर्घरोगिणि च"—इति। अस्यार्थः। अकामे विभागमनिच्छति पितरि अतिवृद्धे विपरीतेऽप्रकृतिस्थे दीर्घरोगिणि अचिकित्स्यरोगग्रस्ते च पुत्राणामिच्छयैव विभागो भवतीत्यर्थः। दीर्घरोगग्रहणमतिकुपितादेरुपलक्षणम्। अतएव नारदः,—

"व्याधितः कुपितश्चैव विषयासक्तमानसः।
अयथाशास्त्रकारी च न विभागे पिता प्रभुः"—इति।

पित्रा समविभागकरणे विशेषमाह याज्ञवल्क्यः,—

"यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा"—इति।

यदि स्वेच्छया पिता पुत्रान् समभागिनः करोति, तदा अदत्तस्त्रीधनाः पत्न्योऽपि पुत्रसमांशभाजः कार्याः। दत्ते तु स्त्रीधने, "दत्ते त्वर्द्धं प्रकल्पयेत्"—इति पुत्रांशादर्द्धांशभाजो भवन्ति। पितुरूर्ध्वं धर्मवृद्ध्यर्थं विभागः कर्त्तव्य इत्याह प्रजापतिः,—

"एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया"—इति।

बृहस्पतिरपि,—

"एकपाकेन वसतां पितृदेवद्विजार्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे"(१)—इति।

पित्रोरूर्द्ध्वं विभागे प्रकारनियममाह याज्ञवल्क्यः,—

"विभजेयुः सुताः पित्रोरूर्द्ध्वमृक्थमृणं समम्"—इति।

ननु पित्रोरूर्द्ध्वं विभागेऽपि विषमविभागो मनुना दर्शितः। ऊर्द्ध्वं पितुश्च मातुश्चेत्युपक्रम्य,—

"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा॥
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।
ततोऽर्धं मध्यमस्य स्यात्तुरीयन्तु यवीयसः"॥

तथा, "उद्धारेऽनुद्धृते तेषामियं स्यादंशकल्पना।
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुजः॥
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः"—इति।

गौतमोऽपि। "विंशतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो-रथो गोवृषः। काणः खोडः कूटः वण्डो मध्यमस्यानेकश्चेत्। अवि-र्धान्यायसी गृहमनोयुक्तं चतुष्पदां चैकैकं यवीयसः। समं चेतरत् सर्वम्"—इति। अयमर्थः। सर्वस्मात् पितृधनाद्विंशतितमो भागो-ज्येष्ठस्य। मिथुनं गोमिथुनं प्रसिद्धम्। उभयतोदन्तोऽश्वाश्वतरगर्दभाः, तेषां यथासम्भवं अन्यतराभ्यां युक्तो रथः। खोडः खञ्जः। कूटः शृङ्ग-विकलः। वण्डो विलोपितवालधिः। अविशेषितत्वात् गवाश्वादीनां

(१) अनेन वचनेन स्वस्वासाधारणधनेन पृथक्पृथक् पित्राद्यर्चनात् विभागे धर्म्मवृद्धिरिति दर्शितम्।

यथासम्भवं ग्राम्यतरस्योद्धारः कर्मयोग्यमस्य। यवीयसस्तु, धान्यं गौद्यादि, अयो लोहम्। अगोयुक्तं शकटयुक्तम्। चतुष्पदां गवादीनामेकैकं पृथक् पृथगानुपूर्व्येण यवीयस उद्धारः। बृहस्पतिरपि,—

"जन्मविद्यागुणश्रेष्ठो द्यंशं दायादवाप्नुयात्"—इति।

कात्यायनोऽपि,—

"यथा यथा विभागोत्थधनं यागार्थतामियात्।
तथा तथा विधातव्यं विद्वद्भिर्भागगौरवम्"(१)—इति।

जीवद्विभागेऽपि विषमविभागो नारदेनोक्तः,—

"पितैव वा स्वयं पुत्रान् विभजेद्वयसि स्थितः।
ज्येष्ठं श्रेष्ठविभागेन यथा वाऽस्य मतिर्भवेत्॥
पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः।
तेषां सएव धर्म्यः स्यात् सर्वस्य हि* पिता प्रभुः॥
द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता"—इति।

बृहस्पतिरपि,—

"समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः।
तथैव ते पालनीया विनेयास्ते स्युरन्यथा"—इति।

तस्माज्जीवद्विभागेन च† विषमविभागोऽस्तीति कथं सुताः

---

* स सर्व्वस्य,—इति का०।

† इत्यमेव पाठः सर्व्वेषु पुस्तकेषु। परमयं पाठः न समीचीनः। जीवद्विभागेऽजीवद्विभागे च,—इति पाठस्तु समीचीनः प्रतिभाति।

---

(१) अनेन धनस्य यागार्थत्वं यथा भवति, तथा भागाधिक्यं कर्त्तव्यमिति ब्रुवता विद्यादिगुणवतां भागाधिक्यं ज्ञापितम्। तदीयधनस्योत्सर्गतो-यागार्थत्वस्य सम्भाव्यमानत्वादित्यभिप्रायः।

सममेव विभजेरन्निति नियम्यते। नैवम्। सत्यं शास्त्रतो विषम-विभागोऽस्ति, तथापि लोकविद्विष्टत्वादनुबन्ध्यादिवत् नानुष्ठीयते। उक्तञ्च संग्रहकारेण,—

"यथा नियोगधर्म्मोऽयं नानुबन्ध्यावधोऽपि वा।

तथोद्धारविभागोऽपि नैव सम्प्रति वर्त्तते"—इति।

आपस्तम्बोऽपि। "जीवन्नेव पुत्त्रेभ्यो दायं विभजेत् समम्"—इति स्वमतमुपन्यस्य "ज्येष्ठो दायाद इत्येके"—इत्येकीयमतेन कृत्स्नधनग्रहणं ज्येष्ठस्योपन्यस्य, देशविशेषे, "सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य रथः पितुः परिभाण्डञ्च, गृहोऽलङ्कारो भार्य्याया ज्ञातिधनं चेत्येके"—इत्येकीयमतेनैवोद्धारविभागं दर्शयित्वा "तच्छास्त्रप्रतिषिद्धम्"—इति निराकृतवान्। तच्च शास्त्रप्रतिषेधं स्वयमेव दर्शितवान्, "मनुः पुत्त्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते"—इति। तस्माद्विषम-विभागः शास्त्रसिद्धोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेयः,—इति सममेव विभजेरन्निति नियमो घटते।

स्वयं द्रव्यार्ज्जनसमर्थतया पितृद्रव्यमनिच्छतोऽपि यत्किञ्चिद्दत्त्वा दायविभागः कर्त्तव्यः तत्पुत्त्रादीनां दायग्रहणेच्छानिवृत्त्यर्थमित्याह याज्ञवल्क्यः,—

"शक्तस्यानीहमानस्य किञ्चिद्दत्त्वा पृथक् क्रिया"—इति।

पुत्त्राणां मातृधनविभागो दुहित्रभावे द्रष्टव्यः। तथाच सएव,—

"मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः"—इति।

मातृकृतर्णापाकरणावशिष्टं मातृधनं दुहितरो विभजेरन्। अतश्च, मातृकृतर्णसमं न्यूनं च मातृधनं दुहितॄणां सद्भावेऽपि पुत्त्राएव

विभजेरन्,—इत्यर्थादवगम्यते[१]। अत्र गौतमेन विशेषोदर्शितः। "स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च"—इति। ऊढाऽनूढ-दुहितृसमवाये मातृधनमनूढानामेव[२]। ऊढास्वपि सधननिर्धन-दुहितृसमवाये निर्धनानामेवेत्यर्थः[३]। पैतामहे पौत्राणां विभागे विशेषमाह याज्ञवल्क्यः,—

"अनेकपितृकाणान्तु पितृतो दायकल्पना"—इति।

यदा पितृतः अविभक्ता भ्रातरः पुत्रानुत्पाद्य मृताः, तत्रैकस्य द्वौ पुत्रौ, अन्यस्य त्रयः, अपरस्य चत्वारः। तत्र पौत्राणां पैतामहे द्रव्ये यद्यपि जन्मनैव स्वत्वं पुत्रैरविशिष्टं, तथापि पित्र्यंशं द्वावेकं त्रयो-ऽप्येकं चत्वारोऽप्येकं लभन्ते इत्यर्थः। एतदेवाभिप्रेत्य बृहस्पतिः,—

"तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः"—इति।

तत्पुत्राः प्रमीतपितृकाणामेकैकस्य पुत्राः, विषमसमाः न्यूना-धिकसङ्ख्याः, स्वं स्वं पैतृकं भागमेव लभन्ते इत्यर्थः। यदा ससुत-योरविभक्तयोर्मध्ये कश्चित् भ्राता मृतः तत्सुतस्तु पितामहादप्राप्तांशः पितामहोऽपि नासीत्, तदा त्वाह कात्यायनः,—

"अविभक्तेऽनुजे प्रेते तत्सुतं रिक्थभागिनम्।
कुर्वीत जीवनं येन लब्धं नैव पितामहात्॥
लभेतांशं स पित्र्यं तु पितृव्यात्तस्य वा सुतात्।

(१) तथाच विभजेरन् सुताः पित्रोरूर्द्धमृक्थमृणं समिति मातृधने पुत्राणामधिकारः एतद्विषयइति भावः।

(२) इदमप्रत्तानामित्यस्य व्याख्यानम्।

(३)तथाच अप्रत्तापदमनूढापरम्,अप्रतिष्ठितापदञ्च निर्धनापरमिति भावः।

यवीयांसस्तु सर्वेषां भ्रातृणां न्यायतो भवेत्॥
लभेत तत्सुतो वाऽपि निवृत्तिः परतो भवेत्"—इति।

लभेत तत्सुतो वा,—इत्यस्य अयमर्थः। तत्रापि विभाज्यधनस्वामिपौत्रस्य सुतोऽपि पितुरभावे तद्भागं लभेत, तत ऊर्ध्वं तत्सन्ततौ वृद्धप्रपितामहधनविभागकरणनिवृत्तिः,—इति। तथाच देवलः,—

"अविभक्तविभक्तानां कुल्यानां वसतां सह।
भूयो दायविभागः स्यादा चतुर्थादिति स्थितिः।
तावत् कुल्याः सपिण्डाः स्युः पिण्डभेदस्ततः परम्"—इति।

जीवत्पितृकस्य पुनः पित्रा सह कथं पितामहधनविभाग इत्याकाङ्क्षायामाह बृहस्पतिः,—

"द्रव्ये पितामहोपात्ते जङ्गमे स्थावरेऽपि वा।
सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हि"—इति।

याज्ञवल्क्योऽपि,—

"भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा।
तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः"—इति।

भूः शालिक्षेत्रादिका। निबन्धः; एकस्य पर्णभारस्य इयन्ति पर्णानि, तथैकस्य क्रमुकभारस्य इयन्ति क्रमुकफलानीत्याद्युक्तलक्षणः। द्रव्यं सुवर्णरजतादि। यत् पितामहेन प्रतिग्रहविजयादिलब्धम्, तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमिति विभागोऽस्ति। हि यस्मात् सदृशं समानं स्वाम्यं, तस्मात् न पितुरिच्छयैव विभागो नापि पितुर्भागद्वयम्। ततश्च, पितृतो भागकल्पनेत्येतत्स्वाम्ये समानेऽपि वाचनिकम्। अतः,—

"दायं श्रौ प्रतिपद्येत विभज्यात्मनः पिता"—

इत्येवमादिकं युगान्तरे विषमविभागप्रतिपादनपरतया व्यापितम्। स्वार्जितद्रव्यविषयं वा। पैतामहधनविषये तु न क्वापि विषमविभागः,—इति। तथा, अविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेऽप्यधिकारोऽस्तीति* गम्यते।

पैतामहोपात्तेऽपि† क्वचित् पितुरिच्छयैव स्वार्जितवद्विभागो भवतीत्याह मनुः,—

"पैतृकं तु पिताद्रव्यमनवाप्तं यदाप्नुयात्।

न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम्"—इति।

पितृपितामहार्जितं केनाप्यपहृतं यदि पितोद्धरति, तदा स्वार्जितमिव पुत्रैः सार्द्धमकामतः स्वयं न विभजेत्,—इति। एवं च सति, पितामहोपार्जिते न स्वेच्छयाविभाग इत्युक्तं भवति। बृहस्पतिरपि,—

"पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम्।

विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्"—इति।

कात्यायनोऽपि,—

"स्वशक्त्याऽपहृतं द्रव्यं स्वयमाप्तञ्च यद्भवेत्।

एतत्सर्वं पिता पुत्रैर्विभागं नैव दाप्यते"—इति।

यत्परैरपहृतं क्रमायातं स्वशक्त्यैवोद्धृतं, यच्चष्टं क्रमायातं, यच्च विद्याशौर्य्यादिना स्वयमेवार्जितं, तत्सर्वं पिता विभागं पुत्रैर्न दाप्यइत्यर्थः। विभागोत्तरकालोत्पन्नस्य भागकल्पनाप्रकारमाह याज्ञवल्क्यः,—

* निषेधेऽप्यविरोधोऽस्तीति,—इति पा०।

† इत्यमेव पाठः सर्व्वत्र। पितामहोपात्तेऽपि,—इति भवितुमुचितम्।

"विभक्तेषु सुतोजातः सवर्णायां विभागभाक्"—इति ।

अयमर्थः । विभक्तेषु पुत्रेषु सवर्णायां भार्य्यायां जातः पुत्रः पित्रोर्भागं भजते इति विभागभाक्—इति । मातृभागश्चासत्यां दुहितरि, ताश्च सुतेऽन्वयः,—इत्युक्तत्वात् । असवर्णायां जातस्तु स्वांशमेव पित्र्यं लभते, मातृकं तु सर्वमेव । अतएव मनुः,—

"ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्"—इति ।

पित्रोरिदं पित्र्यम्,

"अनीशाः पूर्वजाः पित्रोः भ्रातृभागे विभक्तजाः"—इति

स्मरणात् । मातापित्रोर्भागे विभागात्पूर्वमुत्पन्नो न स्वामी, पित्रा सह पूर्वं विभक्तत्वात् । विभक्तजश्च भ्रातुर्धने न स्वामीत्यर्थः । विभागोत्तरकालं पित्रा स्वयमर्जितमपि विभागोत्तरकालमुत्पन्नस्यैव । तथाच मनुः,—

"पुत्रैः सह विभक्तेन पित्रा यत् स्वयमर्जितम् ।
विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः" –इति ।

ये च विभक्ताः पुनः पित्रा सह संसृष्टास्तेषां विभागोत्तरकालमुत्पन्नेन सह विभागोऽस्तीत्याह मनुः,—

"संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह"—इति ।

अजीवद्विभागोत्तरकालं जातस्य पुत्रस्य भागकल्पनामाह याज्ञवल्क्यः,—

"दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्"—इति ।

पितरि मृते भ्रातृविभागसमयेऽस्पष्टगर्भायां मातरि भ्रातृविभागोत्तरकालमुत्पन्नस्य विभागः, दृश्याद्भ्रातृभिर्गृहीतात् आयव्य-

विशोधितात् उपचयापचयाभ्यां शोधिताद्धनात् किञ्चिदुद्धृत्य स्वांशसमोदातव्यः स्यादित्यर्थः।

एतच्च मृतभ्रातृभार्य्यायामपि विभागसमये अस्पष्टगर्भायां विभागादूर्ध्वमुत्पन्नस्यापि वेदितव्यम्। स्पष्टगर्भायां तु प्रसवं प्रतीक्ष्यैव विभागः कर्त्तव्यः। "अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभात्"—इति वशिष्ठस्मरणात्। विभक्तेभ्यः पितृभ्यामर्थदाने विभक्तजस्य पुत्रस्य निषेधाधिकारोनास्ति, दत्तं च तेन न* प्रत्याहर्त्तव्यमित्याह याज्ञवल्क्यः,—

"पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्"—इति।

अजीवद्विभागे मातुरंशकल्पनामाह याज्ञवल्क्यः,—

"पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरेत्"—इति।

एतच्च स्त्रीधनस्य अप्रदाने वेदितव्यम्। दत्ते त्वर्धमेव, "दत्ते त्वर्धांशहारिणी"—इति स्मरणात्। अतएव स्मृत्यन्तरम्,—

"अनन्यपधना पुत्रैर्विभागेऽंशं समं हरेत्"—इति।

अपधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैर्विभागे क्रियमाणे पुत्रांशसममंशं हरेदित्यर्थः। जननीग्रहणं सापत्न्यादेरुपलक्षणार्थम्। तथाच व्यासः,—

"असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः।

पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्त्तिताः"—इति।

यत्तु केश्चिदुक्तं, माताऽप्यंशं समं हरेदिति जीवनोपयुक्तमेव धनं माता स्वीकरोतीति। तन्न। अंशसमशब्दयोरानर्थक्यप्रसङ्गात्।

---

* दत्तं चैतन्न,—इति ख०।

ज्यैष्ठेन, मध्यधने जीवनोपयुक्तं प्रदाति कल्पधने पुरुषमांश-मिति। तदपि न। विधिवैषम्यप्रसङ्गात्[१]। भिन्नमातृकाणां सवर्णानां समसङ्ख्यानां विभागप्रकारमाह व्यासः,—

"समानजातिसङ्ख्या ये जातास्त्वेकेन सूनवः।
विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते[२]"—इति।

बृहस्पतिरपि,—

"यद्येकजाता बहवः समानाजातिसङ्ख्यया।
सधनैस्तैर्विभक्तव्यं मातृभागेन धर्मतः"—इति।

विषमसङ्ख्यानान्तु विभागं स एवाह—

"सवर्णभिन्नसङ्ख्या ये* विभागस्तेषु शस्यते"—इति।

भिन्नजातीनां पुत्राणां विभागमाह याज्ञवल्क्यः,—

"चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः"—इति।

वर्णशोब्राह्मणात्मजाः, ब्राह्मणादिवर्णस्त्रीषु[३] ब्राह्मणेनोत्पन्ना-ब्राह्मणमूर्धावसिक्ताम्बष्ठनिषादाः[४] यथाक्रमम् प्रत्येकं चतुस्त्रिद्व्येक-

---

* सवर्णाभिन्नसङ्ख्या ये,—इति पा०।

---

(१) वाक्यभेदप्रसङ्गादित्यर्थः।

(२) एकस्यां स्त्रियां यावन्तः पुत्रा जाताः अपरस्यामपि तावन्तएव चेज्जाताः तदा मातुरेवायं विभागइति कृत्वा तैर्विभक्तव्यमित्याशयः।

(३) तथाच वर्णशइत्यत्र वर्णशब्देन ब्राह्मणादिवर्णाः स्त्रिय उच्यन्ते। तस्माचाधिकरणकारके वीप्सायां शस् प्रत्ययः।

(४) ब्राह्मणेन ब्राह्मण्यामुत्पन्नो ब्राह्मणः, क्षत्रियायां मूर्द्धावसिक्तः, वैश्यायामम्बष्ठः, शूद्रायां निषादः। अनयैव रीत्या उत्तरग्रन्थोव्याख्येयः।

भागा भवेयुः। क्षत्रियादिवर्णस्त्रीषु क्षत्रियेणोत्पन्नाः क्षत्रियस्त्रादि-
र्श्योपाङ्शिद्वेकभागाः, वैश्येन वैश्यायामुत्पन्नौ वैश्यकरणौ द्वेकभा-
गिनौ। मनुरपि,—

"ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः।
तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः॥
सर्वं वा रिक्थजातन्तु दशधा प्रविभज्य तु।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित्॥
चतुरंशान् हरेद्विप्रः त्रीनंशान् क्षत्रियासुतः।
वैश्यापुत्रो हरेद्द्व्यंशं एकं शूद्रासुतो हरेत्"—इति।

एतत् प्रतिग्रहप्राप्तभूव्यतिरिक्तविषयम्। अतएव वृहस्पतिः,—

"न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै।
यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्"—इति।

प्रतिग्रहविशेषणसामर्थ्यात् क्रयादिलब्धा भूः क्षत्रियादिसुता-
नामपि भवत्येव। शूद्रापुत्रस्य विशेषप्रतिषेधाच्च[१]।

"शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति"—इति।

यत्तु मनुवचनम्,—

"ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्।
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्"—इति।

तत्रौरसिद्दत्तधनसद्भावविषयं इत्यविरुद्धम्। आनुलोम्येन जात-

(१) यदि हि क्रयादिलब्धा भूमिः क्षत्रियादिपुत्राणामपि न भवेत्, तदा शूद्रापुत्रस्य विशेषप्रतिषेधो नोपपद्यते। शूद्रापुत्रस्य विशेषनिषेध-सामर्थ्याच्च क्षत्रियादिपुत्राणां तत्राधिकारोऽस्तीति भावः।

शैकपुत्रस्य चत्वारचतुरंशप्रकारमाह देवलः,—

"आनुलोम्येन पुत्रस्तु पितुः सर्वस्वभाग्भवेत्"—इति।

एतच्च निषादव्यतिरिक्तविषयम्। अतएवोक्तं तेनैव,—

"निषाद एकपुत्रस्तु विप्रस्वस्य तृतीयभाक्।

द्वौ सपिण्डः सकुल्यो वा स्वधादाता तु संहरेत्"—इति।

यत्तु मनुवचनम्,—

"यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽपि वा भवेत्।

नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः"—इति।

तद्ब्राह्मणशूद्रापुत्रविषयम्। क्षत्रियेण वैश्येन वा शूद्रायामुत्पन्नः एकः पुत्रः अर्द्धमेव हरेत्, न निषादवत् तृतीयमंशम्। तथा च बृहद्विष्णुः। "द्विजातीनां शूद्रस्त्वेकः पुत्रोऽर्द्धहरोऽपुत्रस्य चक्थस्य या गतिः सा भागार्धस्य"—इति। प्रत्यासन्नसपिण्डस्यान्यदर्धं भवतीत्यर्थः। अजीवत्विभागे केषुचित् भ्रातृष्वसंस्कृतेषु भगिनीषु वा ऽसंस्कृतासु तत्संस्कारः पूर्वसंस्कृतैर्भ्रातृभिः कर्त्तव्य इत्याह व्यासः,—

"असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात्।

संस्कार्य्या भ्रातृभिः ज्येष्ठैः कन्यकाश्च यथाविधि"—इति।

भगिनीसंस्कारे तु विशेषमाह याज्ञवल्क्यः,—

"असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैः।

भगिन्यश्च निजादंशाद्दत्वा लंशं तुरीयकम्"—इति।

पितुरूर्ध्वं विभजद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः। भगिन्यश्चासंस्कृताः निजादंशाद्यज्जातीया कन्यका तज्जातीयपुत्रभागात् तुरीयं चतुर्थं भागं दत्वा संस्कर्तव्याः।

अनेन पितुरूर्ध्वं दुहितरोऽप्यंशभागिन्य इति गम्यते। अत एव मनुः,—

"तेभ्योऽंशेभ्यस्तु कन्याभ्यः स्वं दद्युर्भ्रातरः पृथक्।

स्वात् स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः"—इति।

ब्राह्मणादयो भ्रातरः ब्राह्मण्यादिभ्यो भगिनीभ्यो द्विजाति-विहितेभ्योऽंशेभ्यः(१) स्वात् स्वादंशादात्मीयाद्भागाच्चतुर्थभागं दद्युः।

एतदुक्तं भवति। यदि कस्यचिद्ब्राह्मण्येव पत्नी पुत्रश्चैकः कन्या चैका, तत्र पित्र्यं द्रव्यं द्वेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्यायै दत्त्वा शेषं पुत्रो गृह्णीयात्। अथ द्वौ पुत्रौ कन्या चैका, तदा पितृधनं त्रेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्यायै दत्त्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः। अथ एकः पुत्रः द्वे कन्ये, तदा पित्र्यं धनं त्रिधा विभज्य तत्रैकं भागं चतुर्धा विभज्य द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्त्वाऽवशिष्टं सर्वं पुत्रो गृह्णाति। एवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च समविषमासु योजनीयम्।

यदा तु ब्राह्मणीपुत्र एकः क्षत्रिया कन्या चैका, तत्र पित्र्यं द्रव्यं सप्तधा विभज्य क्षत्रियपुत्रभागान् त्रीन् चतुर्धा विभज्य तुरीयांशं क्षत्रियकन्यायै दत्त्वा शेषं ब्राह्मणीपुत्रो गृह्णाति। यदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रिया कन्यैका, तत्र पित्र्यं धनमेकादशधा विभज्य त्रीन् भागान् चतुर्धा विभज्य चतुर्थमंशं क्षत्रियकन्यायै दत्त्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य गृह्णीयाताम्।

---

(१) तेभ्योऽंशेभ्य इति तच्छब्देन ब्राह्मणादीनां पुत्राणां स्वस्वजाति-विहिता अंशाः परामृश्यन्ते। तदिदमुक्तं, द्विजातिविहितेभ्योऽंशेभ्य इति।

एवं जातिवैषम्ये भ्रातॄणां भगिनीनां च सङ्ख्यया वैषम्ये च सर्वत्रायं नियम इति मेधातिथेर्व्याख्यानम् । एतदेव विज्ञानेश्वरयोगिनोऽप्यभिप्रेतम् । भारुचिस्तु । चतुर्भागपदेन विवाहसंस्कारमात्रोपयोगि द्रव्यं विवक्षितम् । अतो दायभाक्त्वमसंस्कृतकन्यानां नास्तीति मन्यते । तदेव चन्द्रिकाकारस्याप्यभिप्रेतम् । तदाह । "अतएव न दायभागार्थमंशग्रहणम्, किन्तु विवाहसंस्कारार्थम् । अतएव देवलेनोक्तम्,—

"कन्याभ्यश्च पितृद्रव्यं* देयं वैवाहिकं वसु"—इति ।

अत्र यद्युक्तियुक्तं, तद्ग्राह्यम् । जीवद्विभागे तु यत्किञ्चित् पिता ददाति तदेव लभते कन्या, विशेषाश्रवणात् । पित्र्यधनाभावे नारदः,—

"अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्काराः सङ्कोचोऽत्र विवक्षितः[(१)]"—इति ।

भ्रातॄणां भगिनीनां च संस्काराः जातकर्माद्याः पूर्वसंस्कृतैः भ्रातृभिः पितृधनाभावेऽपि सावश्यकत्वेन कर्त्तव्याः । पैतृकद्रव्यविभागकाले स्वदत्तालङ्कारादिकमपि कन्यका प्राप्नोतीत्याह शङ्खः,—

"विभज्यमाने वै दाये कन्याऽलङ्कारमेव हि"—इति ।

किञ्चित् स्त्रीधनं च लभेतेति[(२)] । मुख्यगौणपुत्राणां स्वरूपं दायग्रहणक्रमञ्चाह याज्ञवल्क्यः,—

---

* इत्थमेव पाठः सर्व्वेष्वादर्शपुस्तकेषु । मम तु, पितृद्रव्यात्,—इति पाठः समीचीनः प्रतिभाति ।

---

(१) पितृद्रव्याभावे भ्रातृभगिनीनां संस्कारे व्ययह्रासः कर्त्तव्यइत्यभिप्रायः ।
(२) अयमप्यंशः शङ्खवचनस्यैव शेषइति प्रतिभाति ।

"औरसो धर्मपत्नीजः तत्समः पुत्रिकासुतः।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥
गृहे प्रच्छन्न उत्पन्नो गूढ़जस्तु सुतः स्मृतः।
कानीनः कन्यकाजातः मातामहसुतो मतः॥
अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयं कृतः।
दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढ़जः॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः।
पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः"—इति।

एषां पुत्राणां द्वादशानां पूर्वस्य पूर्वस्याभावे उत्तर उत्तरः पिण्डदः श्राद्धदः, अंशहरो धनहर इत्यर्थः। औरसपुत्रिकयोः समवाये औरसस्यैव धनग्रहणे प्राप्ते अपवादमाह मनुः,—

"पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।
समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः"—इति।

वशिष्ठोऽपि क्वचिदपवादमाह। "तस्मिंश्चेत् प्रतिगृहीते औरसः प्रतिपद्यते चतुर्थभागभागी स्याद्दत्तकः"—इति। कात्यायनोऽपि,—

"उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः।
सवर्णा असवर्णा वा ग्रासाच्छादनभाजनाः"—इति।

सवर्णाः क्षेत्रजदत्तकादयः। ते औरसे सत्यपि चतुर्थांशहराः। असवर्णाः कानीनगूढ़ोत्पन्नसहोढ़पौनर्भवाः[१] औरसे सति न

(१) कानीनादीनां प्रच्छन्नोत्पन्नत्वेन न सवर्णत्वमित्याशयः।

चतुर्थांशहराः, अपि तु ग्रासाच्छादनमेव लभन्ते इत्यर्थः। यत्तु विष्णुनोक्तम्,—

"अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढ़जाः।

पौनर्भवश्च ते नैव पिण्डरिक्थांशभागिनः"—इति।

तदौरसे सति चतुर्थांशनिषेधनपरमेव(१)। यच्च मनुनोक्तम्,—

"एकएवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।

शेषाणामानृशंस्यार्थं प्रदद्यात्तत्प्रजीवनम्*"—इति॥

तदौरसप्रशंसापरमेव न चतुर्थांशभागनिषेधपरम्। अन्यथा चतुर्थांशभागप्रतिपादकवशिष्ठकात्यायनवचनविरोधानर्थक्यप्रसङ्गात्। यदपि तेनैवोक्तम्,—

"षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्।

औरसोविभजन् दायं पित्र्यं पञ्चममेवच"—इति।

तत्रेयं व्यवस्था। अत्यन्तगुणवत्त्वे चतुर्थांशभागित्वं, प्रतिकूलत्व-निर्गुणत्वयोः षष्ठांशभागित्वं, प्रतिकूलत्वमात्रे निर्गुणत्वमात्रे च पञ्च-मांशभागित्वमिति(२)। यदपि हारीतेनोक्तम्। "विभजिष्यमाण एकविंशं† कानीनाय दद्यात्, विंशं‡ पौनर्भवाय, एकोनविंशं§

* प्रदद्यात्तु प्रजीवनम्,—इति का०।
† एकविंशत्,—इति शा०।
‡ विंशत्,—इति शा०।
§ एकोनविंशत्,—इति शा०।

(१) न तु ग्रासाच्छादननिषेधपरमिति भावः।
(२) तथाच प्रतिकूलत्वनिर्गुणत्वे मिलिते षष्ठांशप्रयोजिके, प्रत्येकन्तु पञ्चमांशप्रयोजिके इति भावः।

द्व्यामुष्यायणाय, अष्टादशांशं च क्षेत्रजाय, सप्तदशांशं पुत्राय*, इतरदौरसाय पुत्राय दद्यात्"—इति । एतदसवर्णनिर्गुणपुत्रविषयम् । यत्तु मनुना,—

"औरसः क्षेत्रजश्चैव दत्तः कृत्रिमएवच ।
गूढोत्पन्नोऽपविद्धश्च दायदाबान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षड़दायादबान्धवाः"—

इति षट्कद्वयमभिधाय पूर्वषट्कस्य दायादबान्धवत्वं उत्तरषट्कस्यादायादबान्धवत्वमुक्तं, तत् पुनः समानगोत्रत्वेन सपिण्डत्वेन वा उदकप्रदानादिकार्यकरत्वं षट्कद्वयस्यापि सममेवेति व्याख्येयम् । पितृधनग्रहणं तु पूर्वस्याभावे सर्वेषामस्त्येव ।

"न भ्रातरो न पितरः पुत्रा ऋक्थहराः पितुः"—इति औरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां† सर्वेषां ऋक्थहारित्वस्य मनुनैव प्रतिपादितत्वात्(१) । द्व्यामुष्यायणस्तु जनयितुरपि ऋक्थं भजते । तथाच याज्ञवल्क्यः,—

---

* इत्थमेव पाठः सर्व्वत्र । परन्त्वसमीचीनोऽयं पाठः । कस्यापि पुत्रविशेषस्य ह्यत्र निर्देश उचितो न पुत्रमात्रस्य ।

† पुत्रप्रतिनिधीनामपि,—इति पाठो भवितुमुचितः ।

---

(१) वचने पुत्रा इति बहुवचनोपादानात् प्रतिनिधौ श्रुतशब्दप्रयोगस्य सिद्धान्तसिद्धतया च पुत्रप्रतिनिधिष्वपि पुत्रशब्दप्रयोगोपपत्तेः सर्व्वेषामेव पुत्राणां ऋक्थहरत्वं प्रतिपादितमिति भावः ।

"अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः"—इति ।

यदा गुर्वादिना नियुक्तो देवरादिः स्वयमप्यपुत्रः सन्नपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तो यं जनयति, स द्विपितृको द्व्यामुष्यायणो-द्वयोरपि रिक्थहारी पिण्डदश्च। यदा स्वयं पुत्रवान् परपुत्रार्थमेव परक्षेत्रे पुत्रमुत्पादयति, तदुत्पन्नः क्षेत्रिणएव पुत्रो भवति न बीजिनः। यथोक्तं मनुना,—

"क्रियाऽभ्युपगमादेव बीजार्थं यत्प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिकएवच ॥
फलं त्वनभिसन्धाय क्षेत्रिणं बीजिनं तथा ।
प्रत्येकं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी"—इति ।

अस्यार्थः। अत्रोत्पन्नमपत्यमुभयोरपि भवतु,—इति संविदं कृत्वा यत् क्षेत्रं स्वामिना बीजावापार्थं बीजिने दीयते, तस्मिन् क्षेत्रे उत्पन्नस्यापत्यस्य बीजिक्षेत्रिणौ स्वामिनौ। यदा तु तत्रोत्पन्नमपत्यमावयोरस्त्विति संविदमकृत्वा परक्षेत्रे बीजिना यदपत्यमुत्पाद्यते, तदपत्यं क्षेत्रिणएव न बीजिनः। यतो बीजाद्योनिर्बलीयसी। गवाश्वादिषु दृष्टत्वादित्यर्थः। गुर्वादिनियोगोऽपि वाग्दत्ताविषयएव। अन्यस्य नियोगस्य मनुना निषिद्धत्वात् ।

"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
बीजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चन ॥

पुत्रे नियोगादुत्पन्ने यथावद्विधवैव सा ।
नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ॥
अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सनातनम् ।
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्त्यते क्वचित् ॥
न विवाहविधौ युक्तं विधवावेदनं पुनः ।
अयं द्विजैर्हि विद्वद्भिः पशुधर्म्मो विगर्हितः ॥
मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ।
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ॥
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ।
तदा प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम् ॥
नियोजयत्यपत्यार्थे तं विगर्हन्ति साधवः"—इति ।

नन्वत्र विकल्पोऽस्तु, विधिप्रतिषेधयोरुभयोर्दर्शनात् । अतो-विनियोगस्य वाग्दत्तादिविषयत्वमनुपपन्नमिति चेत् । न । मनुनैव नियोगस्य तद्विषयत्वप्रतिपादनात् ।

"यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यभिगम्यैतां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ"—इति ।

दत्तकादीनां न बीजिसम्बन्धभाक्त्वम् । तथाच मनुः,—

"गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा"—इति ।

दत्त्रिमग्रहणं चोपलक्षणार्थम्* । दत्तव्यतिरिक्तानां गौणपुत्राणां सख्यभाक्त्वप्रतिपादकानि वाक्यानि युगान्तरविषयाणि, कलौ युगे तेषां पुत्रत्वेन परिग्रहस्य स्मृत्यन्तरे निषिद्धत्वात् ।

"दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः ।

देवरेण सुतोत्पत्तिः वानप्रस्थाश्रमग्रहः ॥

कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः"—इति ।

शूद्रधनविभागे विशेषमाह याज्ञवल्क्यः,—

"जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ।

मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्धभागिनम् ॥

अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते"—इति ।

कामतः पितुरिच्छया भागं लभते। मृते पितरि यदि परिणीतापुत्राभ्रातरः सन्ति, तदा ते दासीपुत्रं स्वभागादर्धभागिनं कुर्य्युः । अथ परिणीतापुत्रा दुहितरो वा तत्पुत्रा वा न सन्ति, तदा तद्धनं दासीपुत्रो लभते । तत्सद्भावे अर्द्धमेव । द्विजातीनां दास्यामुत्पन्नस्तु पितुरिच्छयाप्यंशं न लभते नाप्यर्द्धम् । जातोऽपि दास्यां शूद्रेणेति विशेषणात् । किन्त्वनुकूलश्चेज्जीवनमात्रं लभते इत्यभिप्रायः । अपुत्रदायग्रहणक्रममाह याज्ञवल्क्यः,—

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥

---

* इत्यमेव पाठः सर्व्वत्र । मम तु, दत्त्रिमग्रहणं चोपलक्षणार्थम्,—इति पाठः प्रतिभाति । तथाच दत्त्रिमादयः पुत्रा जनयितुर्गोत्रऋक्थे न भजेरन्,—इति पर्य्यवसितोवचनार्थं इति भावः ।

एषामभावे पूर्वस्य धनभागुत्तरोत्तरः।

स्वर्य्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः”—इति।

औरसाद्यो द्वादशविधपुत्रा यस्य न सन्त्यसावपुत्रः। तस्य मृतस्य धनं पत्न्यादीनां पूर्वस्य पूर्वस्याभावे उत्तरोत्तरो गृह्णाति। अयं दायग्रहणक्रमः सर्वेषु मूर्द्धावसिक्तादिष्वनुलोमजेषु वर्णेषु च ब्राह्मणादिषु वेदितव्य इत्यर्थः। पत्नी विवाहादिसंस्कृता नारी। सा प्रथमं पत्युर्धनं गृह्णाति। तदाह बृहस्पतिः,—

“कुलेषु विद्यमानेषु पितृभ्रातृसनाभिषु।

असुतस्य प्रमीतस्य पत्नी तद्धनहारिणी”—इति।

अत्र विशेषमाह वृद्धमनुः,—

“अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता।

पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च”—इति।

तदयं अपुत्रदायग्रहणक्रमः। द्वादशविधपुत्रशून्यस्य मृतस्य धनं पत्नी गृह्णाति। तदभावे दुहिता। तदभावे दौहित्रः। तदभावे माता। तदभावे पिता। तदभावे भ्राता। तदभावे तत्पुत्रः। तदभावे पितामही। तदभावे तद्धनं पितामहो गृह्णाति तत्पुत्रास्तत्पुत्राश्च। पितामहसन्तानाभावे प्रपितामहः तत्पुत्रास्तत्पुत्राश्चेति सप्तमपर्य्यन्तं गोत्रजा धनं गृह्णन्ति। सपिण्डानामभावे समानोदका धनं गृह्णन्ति। समानोदकाश्च सपिण्डानामुपरि सप्त पुरुषाः, जन्मनामज्ञानपर्य्यन्ता वा। तदुक्तं बृहन्मनुना,—

“सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।

समानोदकभावस्तु निवर्त्तेताचतुर्दशात्।

असमानमस्तुतेरेवे तत्परं गोत्रमुच्यते"—इति ।

गोत्रजानामभावे बान्धवा धनं गृह्णन्ति । बान्धवाश्च त्रिविधा-बौधायनेन दर्शिताः,—

"आत्मपितृष्वसुः पुत्राः आत्ममातृष्वसुः सुताः ।

आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥

पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ।

पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥

मातुः पितृष्वसुः पुत्राः मातुर्मातृष्वसुः सुताः ।

मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः"—इति ।

बन्धुष्वपि यस्यासन्नतरः सएव पूर्वं गृह्णाति । अतएव बृहस्पतिः,—

"बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा ।

यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत्"—इति ।

बन्धूनामभावे आचार्य्यः । आचार्य्याभावे शिष्यः । तदाह मनुः,—

"यो यो ह्यनन्तरः पिण्डात्* तस्य तस्य धनं भवेत् ।

अत ऊर्ध्वं सकुल्यः स्यादाचार्य्यः शिष्य एवच"—इति ।

आपस्तम्बोऽपि । "सपिण्डाभावे आचार्य्यः आचार्य्याभावे अन्तेवासी"—इति । शिष्याभावे सब्रह्मचारी, तस्याभावे यः कश्चित् श्रोत्रियो गृह्णाति । तदाह गौतमः । "श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्"—इति । तदभावे ब्राह्मणः । तदाह मनुः,—

"सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ।

---

* यो ह्यासन्नतरः पिण्डः,—इति पा० ।

त्रैविद्याः शुचयोदान्तास्तथा धर्म्मो न हीयते"—इति।

ब्राह्मणधनं न कदाचिदपि राजगामि। क्षत्रियादिधनं तु सब्रह्मचारिपर्य्यन्तानामभावे राजगामि। तदुक्तं मनुना,—

"अहार्य्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः।
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः"—इति।

नारदेनापि,—

"ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा"—इति।

संग्रहकारेणापि,—

"पितर्य्यविद्यमानेऽपि धनं तत्पितृसन्ततेः।
तस्यामविद्यमानायां तत्पितामहसन्ततेः॥
असत्यामपि तस्यान्तु प्रपितामहसन्ततेः।
एवमेवोपपत्तीनां* सपिण्डा ऋक्थभागिनः॥
तदभावे सपिण्डाः† स्युराचार्य्यः शिष्य एववा।
सब्रह्मचारी सद्विप्रः पूर्वाभावे परः परः॥
शूद्रस्यैकोदकाभावे राजा धनमवाप्नुयात्।
आचार्य्यस्याप्यभावे तु तथा क्षत्रियवैश्ययोः"—इति।

नन्वनपत्यस्य धनं प्रथममेव पत्नी गृह्णातीत्येतदनुपपन्नम्। पत्नीसद्भावेऽपि भ्रातॄणां धनग्रहणस्य पत्नीनां वा भरणमात्रस्य नारदेनोक्तत्वात्,—

---

* एवमेवोपपातीनां,—इति का०। पाठद्वयमप्यसमीचीनं प्रतिभाति।
† अत्र, सकुल्याः,—इति पाठो भवितुमुचितः।

"भ्रातृणामप्रजाः प्रेयात् कश्चिच्चेत् प्रव्रजेत वा*।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्।
रक्षन्ति शय्यां भर्त्तुश्चेदाच्छिन्द्युरितरासु तत्"—इति।

तत्र,

"संसृष्टानां तु योभागस्तेषामेव स इष्यते"—

इति प्रक्रम्य भ्रातृणामप्रजाः प्रेयादित्यादिवचनस्य पठितत्वेन संसृष्टभ्रातृभार्य्याणामनपत्यानां भरणमात्रं संसृष्टभ्रातृणां च धनग्रहणम्† ।

"संसृष्टानान्तु यो भागस्तेषामेव स इष्यते।
अनपत्यांशभागो हि निर्बीजेष्वितरानियात्"—

इत्यनेन पौनरुक्त्यप्रसङ्गात्। अथ वा। अविभक्तविषयत्वमस्तु, याज्ञवल्क्यवचनं तु विभक्तस्यासंसृष्टिनो भर्तृधनं‡ पत्न्येव प्रथमं गृह्णातीत्येवंपरमित्यविरोधः। यत्तु मनुनोक्तम्,—

"पिता हरेदपुत्रस्य रिक्थं भ्रातर एववा"—इति।

यदपि कात्यायनेनोक्तम्,—

"विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्।
भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात्"—इति।

§मनुवचनं तावत् न क्रमप्रतिपादनपरम्, एव वेति विकल्प-

---

* प्रव्रजेन्नरः,—इति पा०।

† अत्र क्रियापदमपि ग्रन्थः प्रक्षीन इति प्रतिभाति।

‡ इत्थमेव पाठः सर्व्वत्र। भर्त्तुर्धनमिति तु समीचीनः पाठः प्रतिभाति।

§ यत्र, तत्र,—इति भवितुमुचितम्।

श्रवणात्। कात्यायनवचनं तु पत्न्यां व्यभिचारिण्यां पित्रादेरपत्य-धनप्राप्तिप्रतिपादनपरम्।

"भर्त्तुर्धनहरी पत्नी या स्यादव्यभिचारिणी।
अपचारक्रियायुक्ता निर्लज्जा वाऽर्थनाशिका।
व्यभिचाररता या च स्त्री धनं सा न चार्हति"—इति

तेनैवोक्तत्वात्। धनं जीवनायोपक्लृप्तं चेत्तांश्च नार्हतीत्यर्थः। धारेश्वरस्तु, अनपत्यधनं पत्नी गृह्णातीत्येवमादिवचनसञ्जातस्य प्रकारान्तरेण विषयव्यवस्थामाह। नियोगार्थिनी पत्नी अनपत्यस्य विभक्तस्य यद्धनं गृह्णाति*। तथाच मनुः,—

"धनं यो विभृयाद्भ्रातुः मृतस्य स्त्रियमेव वा।
सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम्॥
कनीयान् ज्येष्ठभार्य्यायां पुत्रमुत्पादयेद्यदि।
समस्तत्र विभागः स्यादिति धर्म्मो व्यवस्थितः"—इति।

विभक्तधने भ्रातरि मृते अपत्यद्वारेणैव पत्न्याधनसम्बन्धः, नान्यथा। अविभक्तधनेऽपि तथैवेत्यभिप्रायः। गौतमोऽपि। "पिण्ड-गोत्रर्षिसम्बन्धा रिक्थं भजेरन् स्त्री वा अनपत्यस्य बीजं वा लिप्सेत"—इति। संग्रहकारोऽपि,—

"भ्रातृषु प्रविभक्तेषु संसृष्टेष्वथसत्सु वा।
गुर्वादिभिर्नियोगस्था पत्नी धनमवाप्नुयात्"—इति।

तदनुपपन्नं, पत्नी दुहितर इत्यत्र नियोगाश्रवणात्। अमुतोऽपि

---

* इत्थमेव पाठः सर्व्वत्र। तद्गृह्णाति इति तु भवितुमुचितम्।

नियोगो गौतमादिवचनबलात्कल्प्यते इति युक्तमिति चेत् । न । गौतमादिवचनानामर्थान्तरपरत्वात् । तथा हि । तत्र यद्गौतमवचनं, "सपिण्डसम्बन्धा सगोत्रसम्बन्धा ऋक्थं भजेरन् । स्त्री वा अनपत्यस्य बीजं लिप्सेत"—इति । तस्य नायमर्थः, यदि बीजं लिप्सेत तदा पत्नी अनपत्यधनं गृह्णातीति । अपि तर्ह्यनपत्यस्य धनं पिण्डगोत्रर्षि-सम्बन्धा गृह्णीयुः । जाया न । सा स्त्री बीजं वा लिप्सेत संयता वा भवेदिति । वाशब्दस्य पक्षान्तरवचनत्वेन यदर्थे प्रयोगाभावात् । यदपि धनं यो बिभृयादित्यादि मनुवचनं, तदपि क्षेत्रजस्यैव धनसम्बन्धं वक्ति न पत्न्या इति । शङ्खवचनमपि संयताया एव धनसम्बन्धं वक्ति, न तु देवरादिनियुक्तायाः । अन्यथा,

"अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।

पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च"—इति ।

तथा,

"अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।

भुञ्जीतामरणात् क्षान्ता दायादा ऊर्ध्वमाप्नुयुः"—

इति मनुकात्यायनवचनविरोधप्रसङ्गात् । तस्मादनपत्यस्य विभक्त-स्यासंसृष्टिनो मृतस्य धनं पत्नी गृह्णाति इत्येव व्यवस्था न्यायसी ।

यत्तु स्त्रीणां धनसम्बन्धाभावप्रतिपादकवचनम्,—

"यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये ।

तद्दृक्थभाजस्ते* सर्वे ग्रासाच्छादनभाजनाः ॥

---

* इत्यमेव पाठः सर्व्वत्र । मम तु, अनृक्थभाजस्ते,—इति पाठः प्रतिभाति ।

यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत्।
स्थानेषु स्वेषु जुष्टेषु न स्त्रीमूर्खविधर्मिषु"—इति।

तद्यज्ञार्थमेव सम्पादितधनविषयम्। यदपि कात्यायनेनोक्तम्,—

"अदायिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकम्।
अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत्"—इति।

अर्पणमशनाच्छादनोपयुक्तं* धनिनः आद्याद्युपयुक्तञ्च मुक्त्वा अदायिकधनं राजगामि भवति। श्रोत्रियद्रव्यं तु योषिद्भृत्यौर्ध्वदेहिकमपास्य श्रोत्रियस्यैव न राज्ञ इत्यर्थः। यदपि नारदेनोक्तम्,—

"अन्यत्र ब्राह्मणात्किन्तु राजा धर्मपरायणः।
तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः"—इति।

तदुभयमप्यवरुद्धस्त्रीविषयं, पत्नीशब्दश्रवणात्[(१)]। यदपि हारीतेनोक्तम्,—

"विधवा यौवनस्था चेत् पत्नी भवति कर्कशा।
आयुषो रक्षणार्थं तु दातव्यं जीवनं तदा"—इति।

तदपि शङ्कितव्यभिचारस्त्रीविषयम्। यदपि प्रजापतिवचनम्,—

"आढ्कं भर्तृहीनायाः दद्यादामरणान्तिकम्[†]"—इति।

---

* अयथाममशनाच्छादनोपयुक्तं,—इति का०। पाठद्वयमप्यसमीचीनं प्रतिभाति।

† दद्यादा रमणात् स्त्रियाः,—इति का०।

---

(१) पत्नी दुहितरः इत्यादि धनाधिकारबोधकवचनेष्विति शेषः।

यदपि स्मृत्यन्तरे,—

"अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम्"—इति।

तदेतद्वचनद्वयं हारीतवचनेन समानार्थम्। या च श्रुतिः। "तस्मात् स्त्रियोनिरिन्द्रिया अदायादाः"—इति। सा पात्नीवतग्रहे[१] तत्पत्न्या अंशोनास्तीत्येवम्परा। इन्द्रियशब्दस्य "इन्द्रियं वै सोमपीथः"—इति सोमे प्रयोगदर्शनात्। यत्तु पत्न्याः स्थावरग्रहणनिषेधकं बृहस्पतिवचनम्,—

"यद्विभक्ते धनं किञ्चिदाध्यादिविधिसंस्थितम्।
तज्जाया स्थावरं मुक्त्वा लभेत गतभर्तृका"—इति।

तदितरदायादानुमतिमन्तरेण स्थावरविक्रयनिषेधपरम्। अन्यथा,—

"जङ्गमं स्थावरं हेम कुप्यं धान्यरसाम्बरम्।
आदाय दापयेत् श्राद्धं माससंवत्सरादिकम्॥
पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान्।
पूजयेत् कव्यपूर्ताभ्यां वृद्धानाथातिथींस्तथा"—इति

अनेन विरोधप्रसङ्गात्। संसृष्टिविभागप्रकारमाह मनुः,—

"विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि।
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते"—इति।

समविभागविधानादेव विषमविभागनिराकरणसिद्धेः ज्यैष्ठ्यं तत्र न विद्यते इति पुनर्विषमविभागनिराकरणं विषमधनेन

---

(१) अस्ति पात्नीवतोग्रहः। तेन पात्रविशेषेण यजमानेन सोमः पीयते। तत्र सोमे पत्न्या अंशो नास्तीत्यर्थः।

संसृष्टानां धनानुसारेण विषमविभागप्राप्त्यर्थम्। संसर्गः कैरित्य-पेक्षिते बृहस्पतिः,—

"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः।
पितृव्येणाथवा प्रीत्या तत्संसृष्टः स उच्यते"—इति।

यः पूर्वं पित्रादिना विभक्तः पुत्रादिः पुनः प्रीत्या तेन सह समापन्नः, स संसृष्ट उच्यते। येन केनापि सहवासमापन्न इत्यर्थः। क्वचित्संसृष्टिनां विषमविभागमाह बृहस्पतिः,—

"संसृष्टानान्तु यः कश्चित् विद्याशौर्य्यादिनाऽधिकम्।
प्राप्नोति तस्य दातव्यो ह्यंशः शेषाः समांशिनः"—इति।

विद्यादिना प्राप्ते अधिके धने अंशद्वयं दातव्यं न सर्वस्मिन्निति। एतत्संसृष्टद्रव्यानुपरोधेनार्जितेऽपि विभाज्यत्वप्राप्त्यर्थम्[१]। अपुत्रस्य संसृष्टिनः स्वक्ष्यपाहिणं दर्शयति याज्ञवल्क्यः,—

"संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च"—इति।

अयमर्थः। संसृष्टिनो मृतस्यांशं विभागकाले अविज्ञातगर्भायां भार्य्यायां पश्चादुत्पन्नस्य पुत्रस्य इतरः संसृष्टी दद्यात्, पुत्राभावे संसृष्ट्येवापहरेत्; न पत्न्यादि। पत्नीनामप्रत्तदुहितॄणां च भरण-मात्रम्। तदाह नारदः,—

---

(१) साधारणधनोपघातेनार्ज्जयितुर्भागद्वयस्य सामान्यतएव प्राप्तत्वात् संसृष्टविषये विशेषवचनारम्भस्यार्थवत्त्वाय तदनुपघातार्ज्जितेऽपि संसृष्टधने अर्ज्जकस्य द्वावंशौ इतरेषामेकैकोऽंश इति कल्प्यते इति भावः।

"भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्।
रक्षन्ति शय्यां भर्त्तुश्चेदाच्छिन्द्युरितरासु तत्॥
यदा दुहितरस्तस्याः* पित्र्योऽंशो भरणे मतः।
था संस्काराद्धरेद्भागं(१) परतो बिभृयात् पतिः"—इति।

सोदरस्य तु सोदर इति, सोदरस्य संसृष्टिनः तस्यांशं सोदरः संसृष्टी पश्चादुत्पन्नस्य पुत्रस्य दद्यात्। तदभावे स्वयमेवापहरेत्, न भिन्नोदरः। संसृष्टीति पूर्वोक्तस्यापवादः†। संसृष्टिनो भिन्नोदरस्य सोदरस्यासंसृष्टिनः सद्भावे उभयोरपि विभज्य धनग्रहणमित्याह सएव,—

"अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्।
असंसृष्ट्यपि वाऽऽदद्यात्सोदरो नान्यमातृजः"—इति।

सापत्न्यभ्राता संसृष्टी अन्योदर्य्यधनं हरेत् न त्वसंसृष्टी। असंसृष्ट्यपि सोदरः सोदरस्य धनमाददीत। न पुनरन्योदर्य्यः संसृष्ट्येव। अतएव मनुः,—

"येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः।
म्रियेतान्यतरो वाऽपि तस्य भागो न लुप्यते॥
सोदर्य्या विभजेयुस्तं समेत्य सहिताः समम्।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः"—इति।

---

* यदा तु दुहिता तस्याः,—इति का०।

† नास्त्ययमंशः का० पुस्तके।

---

(१) भागोऽत्र भरणरूपः।

अयमर्थः । येषां संसृष्टिनां भिन्नोदराणां भ्रातॄणां मध्ये यः कोऽपि ज्येष्ठः कनिष्ठो मध्यमो वा विभागकाले देशान्तरगमनादिना स्वांशात् भ्रश्येत, तस्य भागो न लुप्यते—पृथगुद्धरणीयः । न संसृष्टिनएव गृह्णीयुः । किन्तु तमुद्धृतं भागमसंसृष्टिनः सोदराः संसृष्टिनश्च भिन्नोदराः सनाभयो भगिन्यश्च देशान्तरगता अपि समागम्य सम्भूय न्यूनाधिकभावमन्तरेण विभजेयुः । अन्ये मन्यन्ते ।

"असंसृष्ट्यपि वा दद्यात् संसृष्टो नान्यमातृजः"—

इत्यस्यायमर्थः । यत्र संसृष्टा भिन्नोदराः असंसृष्टाश्च सोदराः, तत्रासंसृष्टा अपि सोदरा एव धनं गृह्णीयुः न तु भिन्नोदराः संसृष्टा अपीति । यत्तु, येषां ज्येष्ठइत्यादिमनुवचनं संसृष्टानां भिन्नोदराणामसंसृष्टानामेकोदराणां च सर्व्वेषां धनग्रहणप्रतिपादकम् । तत् जङ्गमस्थावरात्मकोभयद्रव्यसद्भावविषयम् । अतएव प्रजापतिः,—

"अन्तर्धनन्तु यद्द्रव्यं संसृष्टानां च तद्भवेत् ।
भूमिं गृहं त्वसंसृष्टाः प्रगृह्णीयुर्यथांऽशतः"—इति ।

अयमर्थः । संसृष्टानां भिन्नोदरभ्रातॄणामन्तर्धनं गूढधनं द्रव्यं वा जङ्गमात्मकं यथांऽशतो भवेत् । सोदराणामसंसृष्टानां गृहक्षेत्रादिकं स्थावररूपं यथांऽशतो भवेत्,—इति[१] । याज्ञवल्क्यवचनन्तु जङ्गमस्थावरयोरन्यतरसद्भावविषयमिति । तत्र यद्युक्तं तद्ग्राह्यम् ।

यदा तु संसृष्टभिन्नोदराभावः, तदा पिता पितृव्योवा यः संसृष्टः

---

(१) तथाच भूमिगृहयोः पृथगुपादानात् द्रव्यपदं जङ्गमपरम् । तेन स्थावरमसंसृष्ट्यपि सोदरएव गृह्णीयात् । जङ्गमन्तु संसृष्टिनोभिन्नोदराः असंसृष्टिनः सोदरा विभज्य गृह्णीयुः ।

सएव गृह्णीयात् । तथाच गौतमः । "संसृष्टिनि प्रेते संसृष्टो-ऽस्यभाक्"—इति । यदा पिता पितृव्यो वा संसृष्टो न विद्यते, तदा त्वसंसृष्टभिन्नोदरो भ्राता गृह्णीयात् । तदभावे त्वसंसृष्टपिता, तदभावे माता, तदभावे पत्नी । तदाह शङ्खः । "स्वर्यातस्य ह्यपु-चस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां तदभावे ज्येष्ठा पत्नी"—इति । ज्येष्ठा संयता, न तु पूर्व्वोढ़ा । संसृष्टभ्रातृपुत्राणां पत्न्याश्च समवाये धनग्रहणप्रकारमाह नारदः,—

"मृते पत्यौ तु भार्य्यास्तु स्वभ्रातृपितृमातृकाः ।

सर्व्वे सपिण्डाः स्वधनं विभजेयुर्यथाऽंशतः"—इति ।

पत्नीभ्रातृपितृमातृभावविशिष्टा अभ्रातृपितृकाभार्य्याः सर्वे सपिण्डा भ्रातृपुत्रादयः । तत्र भ्रातृपुत्राणां स्वपित्रंशतः भार्य्याणां भर्त्रंशतः संसृष्टधनस्य विभाग इत्यर्थः । पत्नीनामभावे संसृष्टापुत्रांशं तद्भगिनी गृह्णाति । तथाच बृहस्पतिः,—

"या तस्य भगिनी सा तु ततोऽंशं लब्धुमर्हति ।

अनपत्यस्य धर्म्मोऽयमभार्य्यापितृकस्य च"—इति ।

चशब्दो भ्रातृमातृभावसमुच्चयार्थः । केचित्तु, "या तस्य दुहिता"—इति पठित्वा पत्नीनामभावे दुहिता गृह्णीतेत्याहुः । दुहितृभगिन्योरभावे,

"अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्"—

इत्युक्तप्रत्यासत्तिक्रमेण सर्वे सपिण्डादयो धनं गृह्णीयुः । प्रति-पक्षे दोषाणामभावात् । अतएव बृहस्पतिः,—

"मृतोऽनपत्योऽभार्य्यश्चेद्भ्रातृपितृमातृकः ।

सर्वे सपिण्डास्तद्दायं विभजेयुर्यथाऽंशतः”—इति।

वानप्रस्थयतिनैष्ठिकब्रह्मचारिणां धनं को वा गृह्णातीत्यपेक्षिते आह याज्ञवल्क्यः,—

“वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः।

क्रमेणाचार्य्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः”—इति।

अत्र प्रातिलोम्यक्रमेण नैष्ठिकब्रह्मचारिणां धनं आचार्य्यो-गृह्णाति, न पित्रादिः। उपकुर्वाणकस्य धनं पित्राद्यएव गृह्णन्ति। यतेस्तु धनमध्यात्मशास्त्रश्रवणधारणतदनुष्ठानक्षमः सच्छिष्यो गृ-ह्णाति। दुर्वृत्तस्य भागानर्हत्वात्। वानप्रस्थधनं धर्मभ्रात्रेकतीर्थी गृह्णाति। धर्मभ्राता समानाचार्य्यकः। एकतीर्थी एकाश्रमी। धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी।

अथवा। वानप्रस्थयतिब्रह्मचारिणां धनमाचार्य्यसच्छिष्यधर्म-भ्रात्रेकतीर्थिनः क्रमेणैव गृह्णन्ति। पूर्वपूर्वाभावे उत्तरोत्तरोगृह्णाती-त्यर्थः। यत्तु वसिष्ठेनोक्तम्। “अनंशास्त्वाश्रमान्तरगताः”—इति। तदन्याश्रमिणामन्याश्रमिधनग्रहणनिषेधपरम्। न तु समानाश्रमिणां परस्परऋक्थग्रहणनिषेधपरम्।

नन्वेतेषां धनसम्बन्धएव नास्ति कुतस्तद्विभागः। प्रतिग्रहादे-र्धनार्जनोपायस्य निषिद्धत्वात्। “अनर्थनिचयो भिक्षुः”—इति गौतम-स्मरणाच्च। तत्र,

“अह्नोमासस्य षण्णां वा तथा संवत्सरस्य च।

अर्थस्य निचयं कुर्य्यात् कृतमाश्वयुजे* त्यजेत्”—

* क्रमादश्वयुजे,—इति ग्रा०।

इति वानप्रस्थस्य धनसंयोगोऽस्ति।

"कौपीनाच्छादनार्थं तु वासोऽपि बिभृयाद् यतिः।

योगसम्भारभेदांश्च गृह्णीयात् पादुके तथा"--

इति वचनाद्यतेरपि वस्त्रपुस्तकादिकं विद्यतएव। नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रपरिग्रहोऽस्त्येवेति तद्विभागो घटतएव। दायानर्हानाह मनुः,—

"अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा।

उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः"—इति।

निरिन्द्रियाः व्याधिना विकलेन्द्रियाः। नारदोऽपि,—

"पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः।

औरसा अपि नैतेऽंशं लभेरन् क्षेत्रजाः कुतः"—इति।

वशिष्ठोऽपि। "अनंशास्त्वाश्रमान्तरगताः"—इति। याज्ञवल्क्यः,—

"क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जड़ः।

अन्धोऽचिकित्स्यरोगाद्याः* भर्तव्याः स्युर्निरंशकाः"—इति।

तज्जः पतितोत्पन्नः। आदिशब्देन मूकादयो गृह्यन्ते। एते निरंशकाः धनभाजो न भवन्ति। केवलमशनाच्छादनेन भर्त्तव्याः पोषणीयाः। अभरणे तु प्रत्यवायमाह मनुः,—

"सर्वेषामपि तन्न्यायं† दातुं शक्त्या मनीषिणः।

ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्"—इति।

---

* अन्धोऽचिकित्स्यरोगार्त्तो,—इति का०।

† इत्थमेव पाठः आदर्शपुस्तकेषु, तन्न्याय्यं,—इति तु पाठः समीचीनः प्रतिभाति।

अत्यन्तं यावज्जीवमित्यर्थः। पतितस्य भर्त्तव्यत्वादि नास्तीत्याह देवलः,—

"तेषां पतितवर्ज्येभ्यो भक्तं वस्त्रं प्रदीयते"—इति।

पतितग्रहणेन तज्जातोऽप्युपलक्ष्यते। आश्रमान्तरगता अपि ते भर्त्तव्याः। अतएव वशिष्ठः। "अनंशास्त्वाश्रमान्तरगताः। क्लीबोन्मत्तपतितस्मरणं क्लीबोन्मत्तानाम्[१]"—इति। अंशानर्हाणां पुत्रा-स्त्वंशभाजः। तदाह देवलः,—

"तत्पुत्राः पितृदायांशं लभेरन् दोषवर्जिताः"—इति।

निरंशकानां पुत्रा औरसाः क्षेत्रजाश्च क्लैब्यादिदोषवर्जिता-भागहारिणो न दत्तकादयः। अतएव याज्ञवल्क्यः परिसंचष्टे,—

"औरसाः क्षेत्रजास्तेषां निर्दोषा भागहारिणः"—इति।

निरंशकानां दुहितरो यावत् विवाहं भर्त्तव्याः संस्कर्त्तव्याः, पत्न्यश्च साधुवृत्तयो यावज्जीवं भर्त्तव्याः। तथाच सएव,—

"सुतास्तेषां च भर्त्तव्या यावद्वै भर्तृसात्कृताः।

अपुत्रा योषितस्तेषां भर्त्तव्याः साधुवृत्तयः॥

निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैवच"—इति।

अन्यानपि भागानर्हान् दर्शयति याज्ञवल्क्यः,—

"अक्रमोढ़ासुतश्चैव सगोत्राद्यश्च जायते।

---

(१) क्लीबोन्मत्तानामाश्रमान्तरगतानामपि क्लीबोन्मत्तस्मरणमेव। अर्थात् क्लीबोन्मत्तानां स्मृत्या यदुच्यते भरणादिकं, आश्रमान्तरगतानामपि तेषां तदेव भवतीति भावः।

प्रव्रज्याऽवसितश्चैव न रक्थनेषु चार्हति”—इति।

मनुरपि,—

“अनियुक्तासुतश्चैव पुत्रिण्याऽऽप्तश्च देवरात्।

उभौ तौ नार्हतो भागं जारजातककामजौ”—इति।

स्त्रीधनविभागमाह याज्ञवल्क्यः,—

“पितृदत्तं भ्रातृमातृदत्तमध्यग्न्युपागतम्।

आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम्॥

बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च।

अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः”—इति।

अध्यग्न्युपागतं विवाहकालेऽग्निसन्निधौ मातुलादिभिर्दत्तम्।

तथाच कात्यायनः,—

“विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ।

तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितम्”—इति।

आधिवेदनिकमधिवेदननिमित्तमधिविन्नस्त्रियै दत्तम्[१]। आद्य-शब्देन अध्यावाहनिकचक्षुक्रयादिग्राह्यम्। तथाच मनुः,—

“अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि।

भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्”—इति।

षड्विधमिति न्यूनसङ्ख्याव्यवच्छेदार्थम्। नाधिकसङ्ख्याव्यवच्छेदाय।

अध्यावाहनिकप्रीतिदत्तयोः स्वरूपं कात्यायनेनोक्तम्,—

“यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्।

---

(१) एकस्यां स्त्रियां विद्यमानायां यद्यन्यां स्त्रियमुद्वहति, तदा पूर्वोढ़ा स्त्री अधिविन्नेत्युच्यते।

अध्यावाहनिकं नाम स्त्रीधनं तदुदाहृतम् ॥
प्रीत्या दत्तञ्च यत्किञ्चिदन्येन श्वशुरेण वा ।
आधिवेदनिकञ्चैव प्रीतिदत्तं तदुच्यते"—इति ।

बन्धुदत्तं कन्यामातृपितृबन्धुभिर्दत्तम् । शुल्कं, यद् गृहीत्वा कन्या दीयते । अन्वाधेयकं परिणयनादनु पश्चाद्दत्तम् । तदुक्तं कात्यायनेन,—

"गृहोपस्करवाह्यानां दोह्याभरणकर्म्मिणाम् ।
मूल्यं लब्धन्तु यत्किञ्चित् शुल्कं तत् परिकीर्त्तितम् ॥
विवाहात्परतो यत्तु लब्धं भर्त्तुः कुलात् स्त्रिया ।
अन्वाधेयं तु तद्द्रव्यं लब्धं पितृकुलात् तथा"—इति ।

पित्रादिभिः स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः,—

"पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै ।
यथाशक्त्या द्विसाहस्रं दातव्यं स्थावरादृते"—इति ।

यथाशक्ति स्थावरव्यतिरिक्तं धनं द्विसहस्रकार्षापणपर्य्यन्तं दातव्यमित्यर्थः । अयञ्च नियमः प्रत्यब्ददाने[१] वेदितव्यः । अनेकाब्दे तूपजीव्यार्थं सकृदेव दाने नायमवधिनियमः । नापि स्थावरपर्य्युदासः । तथाच बृहस्पतिः,—

"दद्याद्धनञ्च पर्य्याप्तं क्षेत्रांशं वा यदिच्छति"—इति ।

अतएव सौदायिके स्थावरेऽपि यथेष्टविनियोगार्हत्वमुक्तन्तेनैव,—

"ऊढ़या कन्यया वाऽपि भर्त्तुः पितृगृहेऽपि वा ।
भ्रातुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम् ॥

---

(१) प्रत्यब्ददानएव स्थावरपर्य्युदासः न तूपजीवनार्थं दाने इति भावः ।

सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते।
यस्मात्तदानृशंस्यार्थं तदेतदुपजीवनम्* ॥
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि"--इति।

पतिदत्तस्थावरेऽपि विशेषमाह नारदः,--

"भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि च।
सा यथाकाममश्नीयात् दद्यात् वा स्थावरादृते"--इति।

पित्रादिभिरुपाध्यादिना दत्तं स्त्रीधनं न भवतीत्याह कात्यायनः,--

"तच्च सोपाधि यद्दत्तं यच्च योगवशेन वा।
पित्रा भ्रात्राऽथवा पत्या न तत् स्त्रीधनमिष्यते"--इति।

उत्सवादौ धारणार्थं दत्तमलङ्कारादिकं सोपाधिदत्तम्। योगवशेन वचनादिनेत्यर्थः। शिल्पादिप्राप्तमपि स्त्रीधनं न भवतीत्याह सएव,--

"प्राप्तं शिल्पैस्तु यद्दत्तं† प्रीत्या चैव यदन्यतः।
भर्त्तुः स्वाम्यं तदा‡ तत्र शेषं तु स्त्रीधनं स्मृतम्"--इति।

अन्यतः स्वादित इति यावत्[१]। तदेतत् स्त्रीधनं दुहितृदौहित्रपुत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयो गृह्णन्ति। अत्रैवं क्रमः। मातरि वृत्तायां प्रथमं दुहिता गृह्णाति। अतएवोक्तं तेनैव,--

---

* तेदत्तं तत् प्रजीवनम्,—इति ग्रन्थान्तरधृतः पाठः।
† यद्वित्तं,—इति ग्रन्थान्तरधृतः पाठः।
‡ भवेत्,—इति ग्रन्थान्तरधृतः पाठः।

---

(१) स्वं ज्ञातिः।

"मातुर्दुहितरः शेषमृणात्ताभ्यः ऋतेऽन्वयः"--इति।

गौतमोऽपि। "स्त्रीधनं दुहितॄणां अप्रत्तानां अप्रतिष्ठितानां च"--इति। दुहितॄणामभावे दौहित्र्यो गृह्णन्ति। तद्दुहितॄणां प्रसूता चेदिति याज्ञवल्क्यस्मरणात्। भिन्नमातृकाणां दौहित्राणां विषमाणां समवाये मातृतो भागकल्पना। तथाच गौतमः। "पितृमातृस्वसृवर्गे भागविशेषः"--इति। दुहितृदौहित्रीणां समवाये मनुः,--

"यस्तासां स्युर्दुहितरस्तासामपि यथाऽर्हतः।
मातामह्या धनात् किञ्चित् प्रदेयं प्रीतिपूर्वकम्"--इति।

दौहित्रीणामप्यभावे दौहित्रा धनहारिणः। तथाच नारदः,--

"मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः"--इति।

दुहितृदुहितॄणामभावे तदन्वयो दौहित्रौ गृह्णातीत्यर्थः। दौहित्राणामभावे,

"विभजेरन् सुताः पित्रोरूर्ध्वं ऋक्थमृणं समम्"--

इत्यादियाज्ञवल्क्यवचनतः मातृऋणापाकरणतोऽवशिष्टं मातृधनं पुत्रा गृह्णन्ति। यत्तु मनुनोक्तम्,--

"जनन्यां संस्थितायान्तु समं सर्वे सहोदराः।
भजेरन् मातृकं ऋक्थं भगिन्यश्च सनाभयः"--इति।

एतत् पुत्राणां दुहितॄणां च सम्भूय मातृऋक्थग्राहिलपरं न भवति; किन्तु तेषां धनसम्बन्धे प्राप्ते समविभागप्राप्त्यर्थं, समशब्द-श्रवणात्। यदपि शङ्खलिखिताभ्यामुक्तम्। "समं सर्वे सहोदरा-मातृकं ऋक्थमर्हन्ति कुमार्य्यश्च"--इति। तदपि मनुवचनेन समा-

नार्थम्। अथ वा, एतद्वचनद्वयं भर्त्तुः कुललब्धस्त्रीधनविषयम्। अस्मिन्नेव विषये बृहस्पतिः,—

"स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी।
अप्रत्ता चेत्समूढ़ा तु लभते सा न मातृकम्"—इति।

अपत्यानां पुत्त्रपत्यानाम्*। यत्तु पारस्करेणोक्तम्,—

"अप्रत्तायास्तु दुहितुः स्त्रीधनं परिकीर्त्तितम्।
पुत्त्रस्तु नैव लभते प्रत्तायां तु समांशभाक्"—इति।

तदप्रतिष्ठितो यच्छद्दुहितृविषयम्†। अतएव मनुः,—

"मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव सः"—इति।

यौतुकं पितृकुललब्धम्। अनपत्यहीनजातिस्त्रीधनं उत्तमजातिसपत्नीदुहिता गृह्णाति, तदभावे तदपत्यम्। तदुक्तं मनुना,—

"स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथञ्चन।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्"—इति।

ब्राह्मणी जात्यधमजात्युपलक्षणार्थम्‡। पुत्त्राणामभावे पौत्त्रा गृह्णन्ति पौत्त्राणामपि पितामहऋणापाकरणम्। पुत्त्रपौत्त्राणां देयमिति अधि-

---

* मान्यानाम्,—इति का०।

† इत्यमेव पाठः सर्व्वेष्वादर्शपुस्तकेषु। मम तु, अप्रतिष्ठितादत्तदुहितृविषयम्,—इति पाठः प्रतिभाति।

‡ ब्राह्मणी जात्युत्तमजात्युपलक्षणार्थम्,—इति का०। पाठद्वयमप्यसमीचीनं प्रतिभाति। ब्राह्मणीपदमुत्तमजात्युपलक्षणार्थम्,—इति तु पाठः समीचीनो भवति।

कारश्रवणात्। अस्तु ऋणापाकरणेऽधिकारः। ऋक्थभाक्त्वं कुतइति चेत्। तन्न। "ऋक्थभाजः ऋणं प्रतिकुर्य्युः"—इति गौतमवचनेन ऋक्थभाजामेव ऋणापाकरणाधिकारश्रवणात्। पौत्राणामप्यभावे भर्त्रादयोऽपि ऋक्थभाजः। अत्रैव विवाहभेदेन विशेषमाह मनुः,—

"ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्त्तुरेव तदिष्यते॥
यत्त्वस्यै स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते"—इति।

ब्राह्मदैवार्षगान्धर्वप्राजापत्यविवाहेषु संस्कृतायाः भार्य्याया यद्धनं तद्दुहित्रादिपौत्रान्ततद्धनहारिसन्ततेरभावे सति भर्तृगामि, न पुनर्भ्रात्रादीनामित्यर्थः। आसुरराक्षसपैशाचविवाहसंस्कृतायाः भार्य्याया-धनं मातापित्रोर्भवतीत्यर्थः। यत्तु कात्यायनेनोक्तम्,—

"बन्धुदत्तन्तु बन्धूनामभावे भर्तृगामि तत्"—इति।

तदासुरादिविवाहसंस्कृतस्त्रीविषयम्। अतएवोक्तं तेनैव,—

"आसुरादिषु यल्लब्धं स्त्रीधनं पैतृकं स्त्रियाः।
अभावे तदपत्यानां मातापित्रोः तदिष्यते"—इति।

भर्त्रादिभिर्दत्तमपि शुल्काख्यं स्त्रीधनं सोदरएव गृह्णाति। तथाच गौतमः। "भगिनीशुल्कं सोदर्य्याणामूर्ध्वं मातुः"—इति। सोदर्य्याणामभावे मातुर्भवतीत्यर्थः। यत्पुनस्तेनैवोक्तम्। "स्वञ्च शुल्कं वोढाऽर्हति"—इति। तच्छुल्कग्रहणानन्तरं संस्कारात् प्राक् मृतायां द्रष्टव्यम्। अतएव याज्ञवल्क्यः,—

"मृतायां दत्तमादद्यात् परिशोध्योभयव्ययम्"—इति।

यत्तु कन्यायै मातामहादिभिर्दत्तं भूषणादि, तदपि सोदरा एव गृह्णीयुः। तथाच बौधायनः,—

"रिक्थं मृताया गृह्णीयुः कन्यायाः सोदराः समम्।
तदभावे भवेन्मातुस्तदभावे पितुर्भवेत्"—इति।

अनपत्यपुत्रिकाधनमपि सोदरो गृह्णाति। तथाच पैठीनसिः,—

"प्रेतायां पुत्रिकायान्तु न भर्त्ता दायमर्हति।
अपुत्रायां कुमार्य्याञ्च भ्राता तद्ग्राह्यमित्यपि"—इति।

पुत्रिकायां पितुः पश्चादौरससद्भावे सएव गृह्णीयात् न भर्त्ता। यत्तु मनुवचनम्,—

"अपुत्रायां मृतायां तु पुत्रिकायां कथञ्चन।
धनं तु पुत्रिकाभर्त्ता हरेत्तैवाविचारयन्"—इति।

तत्पश्चादुत्पन्नभ्रात्रभावे वेदितव्यम्। यत्तु क्वचिदनपत्यं स्त्रीधनं स्वस्रीयादीनां भवतीत्युक्तं बृहस्पतिना,—

"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा।
श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः॥
यदाऽऽसामौरसो न स्यात् सुतो दौहित्र एवच।
तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः"—इति।

अस्यायमर्थः। ब्राह्मादिविवाहेषु भर्त्तुरभावे, आसुरादिषु मातापित्रोरभावे, मातृष्वस्रादीनां धनं यथाक्रमं मातृष्वस्रीयाद्या गृह्णीयुः। क्वचिज्जीवन्त्याः सप्रजाया अपि पत्न्याधनं भर्त्ता गृह्णीयादित्याह याज्ञवल्क्यः,—

"दुर्भिक्षे धर्म्मकार्य्ये च व्याधौ संप्रतिरोधके।

गृहीतं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति"—इति।

संप्रतिरोधके वन्दिग्रहादौ स्वकीयद्रव्याभावे स्त्रीधनं गृहीत्वा पुनस्तस्यै न दद्यात्। प्रकारान्तरेण गृहीतं पुनर्दद्यादेव। तथाच कात्यायनः,—

"न भर्त्ता नैव च सुतो न पिता भ्रातरो न च।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः॥
यदि चैकतरोऽप्येषां स्त्रीधनं भक्षयेद्बलात्।
सवृद्धिकं प्रदाप्यः स्याद्दण्डश्चैव समाप्नुयात्॥
तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम्।
मूलमेव स दाप्यः स्याद् यद्यसौ धनवान् भवेत्"—इति।

देवलोऽपि,—

"वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्।
भोक्त्री तत् स्वयमेवेदं पतिर्नार्हत्यनापदि॥
वृथा मोक्षे च भोगे च स्त्रियै दद्यात् सवृद्धिकम्"—इति।

विभाज्यद्रव्यमाह कात्यायनः,—

"पैतामहञ्च पित्र्यञ्च यच्चान्यत्स्वयमर्जितम्।
दायादानां विभागे तु सर्वमेव विभज्यते"—इति।

पितृद्रव्योपजीवनेन स्वयमर्जितं यत्तद्विभजेत् तदनुपजीवनेनार्जितस्याविभाज्यत्वात्। एतत्त्रितयमपि ऋणावशिष्टं विभजेत्। तथाच सएव,—

"ऋणं प्रीतिप्रदानञ्च दत्त्वा शेषं विभाजयेत्"—इति।

ऋणप्रदानार्थं धनाभावे पितृऋणमपि विभजेत्। अवश्यं ऋणं

सममिति वचनात्। एवं समिति वचनादिनिष्टत्यर्थं गोध्य-मित्याह* सएव,—

"समेवंविधं गोध्यं विभागे बन्धुभिः सदा।
गृहोपस्करवाह्याश्च दोह्याभरणकर्मिणः॥
दृश्यमाना विभज्यन्ते कोशं गूढ़ेऽब्रवीत् भृगुः"—इति।

अत्र कोशग्रहणमितरद्विव्यप्रतिषेधार्थम्। तथाच सएव,—

"शंकाविश्वाससन्धाने विभागे रिक्थिनां सदा।
क्रियासमूहकर्तृत्वे कोशमेवं प्रदापयेत्"—इति।

अविभाज्यद्रव्यमाह याज्ञवल्क्यः,—

"पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम्।
मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्॥
क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः।
दायादेभ्यो न तद्दद्यात् विद्यया लब्धमेवच"—इति।

पितृद्रव्याविरोधेन यत् स्वयं कृष्यादिना उपार्ज्जितं, यच्च विद्या-दिना लब्धं, विवाहाच्च यल्लब्धं, तद्भ्रात्रादीनां न भवेत्। यत्पि-त्रादिक्रमायातं चोरादिभिरपहृतमन्यैरनुद्धृतं द्रव्यं पुत्राणां मध्ये यः कश्चिदितराभ्यनुज्ञयोद्धरति, तत्तस्यैव भवति। क्षेत्रं तु तुरी-यांशमेवोद्धर्त्ता गृह्णाति शेषं तु सर्वेषां सममेव। तथा शङ्खः,—

"पूर्वनष्टान्तु यो भूमिं यः कश्चिदुद्धरेत् क्रमात्।
यथाभागं लभन्तेऽन्ये दत्वाऽंशन्तु तुरीयकम्"—इति।

---

* इत्थमेव पाठः सर्व्वत्र। परमयमसमीचीनः पाठः।

तथा विद्ययाऽध्ययनादिना* लब्धमपि स्वस्यैव भवति। पितृद्रव्याविरोधेनेति सर्वत्र शेषः। अतएव मनुः,—

"अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्।
दायादेभ्यो न तद्दद्यात् विद्यया लब्धमेवच"—इति।

श्रमेण कृष्यादिना। पितृग्रहणमविभक्तोपलक्षणार्थम्। व्यासोऽपि,—

"विद्याप्राप्तं शौर्य्यधनं यच्च सौदायिकं भवेत्।
विभागकाले तत्तस्य नान्वेष्टव्यं च रिक्थिभिः"—इति।

अविभाज्यविद्याधनस्य लक्षणमाह कात्यायनः,—

"परभक्तोपयोगेन प्राप्ता विद्याऽन्यतस्तु या।
तया प्राप्तं धनं यत्तु विद्याप्राप्तं तदुच्यते॥
उपन्यस्ते तु यल्लब्धं विद्यया †पणपूर्वकम्।
विद्याधनं तु तद्विद्यात् विभागे न नियोज्यते॥
शिष्यादार्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात्।
स्वज्ञानशंसनाद्वाऽपि लब्धं प्राधान्यतस्च यत्॥
परं निरस्य यल्लब्धं विद्यातो द्यूतपूर्वकम्।
विद्याधनं तु तद्विद्यात् न विभाज्यं बृहस्पतिः॥
सन्निविष्टे हि धर्म्मोऽयं स्वस्याद्यच्चाधिकम्भवेत्‡।
विद्याबलकृतस्यैव यान्यत्तच्छिष्यतस्तथा§॥

---

* विद्यया अध्यापनादिना,—इति का०।

† रणा,—इति का०।

‡ शिल्पेष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत्,—इति ग्रन्थान्तरीयः पाठः।

§ यानतः शिष्यतस्तथा,—इति का०।

एतद्विद्याधनं प्राहुः सामान्यं यदतोऽन्यथा"—इति।

अतो विद्याधनादन्यथाभूतमविभक्तपित्रादिद्रव्योपयोगप्राप्तं तद-विभक्तानां सामान्यं साधारणमिति यावत्। क्वचिद्विद्याप्राप्तमपि धनं विभाज्यमित्याह नारदः,—

"कुटुम्बं बिभृयात् भ्रातुर्यो विद्यामधिगच्छतः।

भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्*"—इति।

कात्यायनेनापि,—

"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा।

शौर्य्यप्राप्तं तु यद्वित्तं विभाज्यं तत् बृहस्पतिः"—इति।

अविभक्तस्य कुले पितृव्यादेः पितृतोऽपि वा प्राप्तविद्यानां यद्धनं† शौर्य्यादिना प्राप्तं विद्ययैव प्राप्तं, तद्विद्याधनं विभाज्यमिति। पितृद्रव्यार्जितेनार्जिते धने भागद्वयमेकस्याह वसिष्ठः। "येन चैषां यदुपार्जितं स्याद्द्व्यंशमेव लभेत"—इति। यत्तु,—

"सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः"—इति।

तद्विद्येतरद्रव्याद्युपार्जितधनविषयम्। अविभाज्यविद्याधने अने-केच्छया अंशमाह गौतमः। "स्वयमर्जितं चैव वैद्येभ्यो वैद्यः कामं दद्यात्"—इति। इच्छाभावे त्वाह नारदः,—

"वैद्यो वैद्याय नाकामो दद्यादंशं स्वतो धनात्।

पितृद्रव्यं समाश्रित्य न चेत्तद्धनमाहृतम्"—इति।

---

* भागं विद्याद्धनात्तस्मात्तवृत्तोऽपि लभेत् समम्,—इति मु०।

† प्राप्तं विद्यार्थिनां यद्धनं,—इति का०।

अवैद्याय सकामोऽपि न दद्यात्। तदाह कात्यायनः,—

"नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित्।

समविद्याधिकानान्तु देयं वैद्येन तद्धनम्"—इति।

विद्याप्राप्तधनवत् शौर्य्यादिप्राप्तमपि धनमविभाज्यमित्याह सएव,—

"शौर्य्यप्राप्तं विद्यया च स्त्रीधनं चैव यत् स्मृतम्।

एतत्सर्वं विभागे तु विभाज्यं नैव रिक्थिभिः॥

ध्वजाहृतमवेद् यत्तु विभाज्यं नैव तत् स्मृतम्"—इति।

ध्वजाहृतस्य लक्षणं तेनैवोक्तम्,—

"संग्रामादाहृतं यत्तु विद्राव्य द्विषतां बलम्।

स्वाम्यर्थे जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते"—इति।

बृहस्पतिरपि,—

"पितामहपितृभ्यां च* दत्तं मात्रा च यद्भवेत्।

तस्य तन्नापहर्त्तव्यं शौर्य्यभार्य्याधनं तथा"—इति।

शौर्य्यप्राप्तधनस्वरूपं च कात्यायनेन दर्शितम्,—

"आत्मनः संशयं यत्र प्रसभं कर्म्म कुर्वते।

तस्मिन् कर्म्मणि तुष्टेन प्रसादः स्वामिना कृतः॥

तत्र लब्धं तु यत्किञ्चित् धनं शौर्य्येण तद्भवेत्"—इति।

पित्रादिद्रव्योपजीवनेन विद्याप्राप्तधनवत् शौर्य्यप्राप्तधनेऽप्यर्जकस्य भागद्वयमाह व्यासः,—

"साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधम्।

---

* पितामहपितृव्याणां,—इति पा०।

शौर्य्यादिनाऽऽप्नोति धनं भ्रातरस्तत्र भागिनः ॥
तस्य भागद्वयं देयं शेषास्तु समभागिनः”—इति ।

अन्यदप्यविभाज्यमाह मनुः,—

“वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः ।
योगक्षेमप्रचारञ्च न विभाज्यं प्रचक्षते”—इति ।

वस्त्रं धृतं वस्त्रम् । पितृधृतं वस्त्रं पितुरूर्द्ध्वं विभागे श्राद्धभोक्त्रे दातव्यम् । तथाच वृहस्पतिः,—

“वस्त्रालङ्कारशय्यादि पितुर्य्यद्वाहनादिकम् ।
गन्धमाल्यैः समभ्यर्च्च श्राद्धभोक्त्रे तदर्पयेत्”—इति ।

अन्यानि तु वस्त्राणि विभाज्यान्येव । पत्रं वाहनं, पत्रं अश्वशिविकादिवाहनम् । तदपि यद्येनारूढं तत्तस्यैव । अनारूढं तु सर्वैर्विभाज्यम् । अलङ्कारोऽपि यो येन धृतः, स तस्यैव । अधृतः साधारणोविभाज्य एव,

“पत्यौ जीवति यत् स्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादाः भजमानाः पतन्ति ते”—इति

तेनैव धृत इति विशेषेणोपादानात् । कृतान्नं तण्डुलमोदनादि । तदपि यथासम्भवं भोक्तव्यम् न विभाज्यम् । उदकं तदाधारः कूपादिः । सोऽपि विषमः पर्य्यायेणोपभोक्तव्यो न मूल्यद्वारेण विभाज्यः । स्त्रियश्च दास्योविषमाः पर्य्यायेण कर्म्म कारयितव्याः । तथाच वृहस्पतिः,—

“एकां स्त्रीं कारयेत् कर्म्म यथाऽंशेन गृहे गृहे ।
बह्व्यः समांशतो देया दासानामप्ययं विधिः”—इति ।

पित्राऽवरुद्धास्तु समा अपि न विभाज्याः। तथाच गौतमः। "स्त्रीषु संयुतास्वविभागः"—इति। योग इति श्रौतस्मार्त्ताग्निसाध्यमिष्टं कर्म्म लक्ष्यते। क्षेमः इति लब्धपरिरक्षणहेतुभूतं वहिर्वेदिदान-तड़ागारामनिर्माणादि पूर्त्तं कर्म्म लक्ष्यते। तदुभयं पितृद्रव्यविरोधार्जितमप्यविभाज्यम्। तदुक्तं लौगाक्षिणा,—

"क्षेमं पूर्त्तं यागमिष्टमित्याहुस्तत्त्वदर्शिनः।

अविभाज्ये च ते प्रोक्ते शयनासनमेवच"—इति।

अथवा। योगक्षेमशब्देन छत्रचामरशस्त्रवाहनादिप्रभृतय उच्यन्ते। प्रचारोगृहारामादिषु प्रवेशनिर्गममार्गः। सोऽप्यविभाज्यः। यत्तु उशनसा क्षेत्रस्याप्यविभाज्यत्वमुक्तम्,—

"अविभाज्यं सगोत्राणामासहस्रकुलादपि।

वाप्यं* क्षेत्रञ्च पत्रञ्च कृतान्नमुदकं स्त्रियः"—इति।

तत्प्रतिग्रहलब्धक्षेत्रं क्षत्रियासुतेन सार्द्धं ब्राह्मणीसुतेन अविभाज्यमित्येवं परम्।

"न प्रतिग्रहभूर्देया क्षत्रियादिसुताय च"—

इति स्मरणात्। अन्ये मन्यन्ते। वस्त्रादयोऽपि विभाज्या एव। तथाच बृहस्पतिः,—

"वस्त्रादयोऽविभज्यायैरुक्तं तैर्न विचारितम्।

धनं भवेत्समृद्धानां वस्त्रालङ्कारसंश्रितम्॥

मध्यस्थितमनाजीव्यं दातुं तैः कस्य शक्यते।

युक्त्या विभजनीयं तदन्यथाऽनर्थकं भवेत्॥

---

* याज्यं,—इति ग्रन्थान्तरधृतः पाठः।

विक्रीय वस्त्राभरणमृणमुद्राय लेखितम्।
कृतान्नं वा कृतान्नेन परिवर्त्य विभज्यते॥
उद्धृत्य कूपवाप्यम्भस्त्वनुसारेण गृह्यते।
एकां स्त्रीं कारयेत् कर्म्म यथांऽशेन गृहे गृहे॥
बह्व्यः समांशतो देया दासानामप्ययं विधिः।
योगक्षेमवतो लाभः समत्वेन विभज्यते॥
प्रचारश्च यथांऽशेन कर्त्तव्यो ऋक्थिभिः सह"—इति।

तेन वस्त्रादीनामविभज्यत्वप्रतिपादकं मनुवचनमुशनोवचनं चानादरणीयम्। तदनुपपन्नम्। विरोधे हि वचनानां विषयव्यवस्थाऽऽश्रयणं युक्तं, न चान्यथाकरणम्। बृहस्पतिवचनानान्तु अधृतवस्त्रादिविषयत्वम्, मन्वादिवचनस्य तु धृतवस्त्रादिविषयत्वम् पूर्वमेवोक्तमिति विषयव्यवस्था घटते इति।

विभागकाले केनचिदपह्नुतं पश्चादुद्भावितं चेत्, तत्सर्वं समं विभजेयुः। तथाच याज्ञवल्क्यः,—

"अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते।
तत्पुनस्ते समैरंशैः विभजेरन्निति स्थितिः"—इति।

समशब्दो विषमविभागनिरासार्थः। विभजेरन्निति बहुवचनेन येन दृष्टं तेनैव न ग्राह्यमिति दर्शयति। मनुरपि,—

"ऋणे धने च सर्वस्मिन् प्रविभक्ते यथाविधि।
पश्चाद्दृश्येत यत्किञ्चित् तत्सर्वं समतां नयेत्"—इति।

अपहृतद्रव्यवच्छास्त्रोक्तानतिक्रमेण विषमभागतया* विभक्तमपि

* विषमभागतया,—इति नास्ति का॰ पुस्तके।

समतां नयेत्*। तथाच कात्यायनः,—

"अन्योन्यापहृतं द्रव्यं दुर्व्विभक्तञ्च यद्भवेत्।

पश्चात्प्राप्तं विभज्येत समभागेन तद्भृगुः"—इति।

एवं च सति वञ्चितद्रव्यस्य पश्चाद् दृष्टस्यैव विभागविधानात् पूर्वं विभक्तस्य पुनर्व्विभागो नास्तीत्यवगम्यते। यत्तु मनुनोक्तम्,—

"विभागे तु कृते किञ्चित् सामान्यं यत्र दृश्यते।

नासौ विभागो विज्ञेयः कर्त्तव्यः पुनरेव हि"—इति।

तद्विभक्तद्रव्यार्जनव्ययकरणादर्व्वाग्वेदितव्यम्। †अन्योन्यापहृतमित्यादिवचनानां निर्व्विषयतापत्तेः। अत्रान्योन्यवञ्चने दोषोऽप्यस्ति। तथाच श्रुतिः। "यो वै भागिनं भागान्नुदते चयते वैनं स यदि वैनं न चयतेऽथ पुत्रमथ पौत्रं चयते"—इति। अयमर्थः। यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति भागं तस्मै न प्रयच्छतीति यावत्। अथ भागान्नुन्नः एनमपहारकं चयते नाशयति पापिनं करोतीति यावत्। यदि तं न नाशयति, तदा तस्य पुत्रं पौत्रं वा नाशयतीति। यत्तु मनुनोक्तम्,—

"यो ज्येष्ठो विनिकुर्व्वीत लोभात् भ्रातॄन् यवीयसः।

सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः"—इति।

तत्वतन्त्रस्यापि ज्येष्ठस्य समुदायद्रव्यापहारे दोषोऽस्ति किमु-

---

* इत्थमेव पाठः सर्व्वत्र। परमयमसमीचीनः पाठः। अत्र कियानपि पाठो भ्रष्टोऽन्यथा जातो वेत्यनुमीयते।

† अत्र, अन्यथा,—इति भवितुमुचितम्।

तारतम्यानां यवीयसामित्येवंप्रतिपादनपरम्। न तु ज्येष्ठस्यैव दोषप्रतिपादनपरम्। अन्यथा स्मृत्या श्रुतेः सङ्कोचापत्तेः। विभक्तानां कर्त्तव्यमाह नारदः,—

"ये त्वेकजाता बहवः पृथग्धर्म्माः पृथक्क्रियाः।
पृथक्कर्मगुणोपेता न चेत् कार्य्येषु सम्मताः॥
स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा।
कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य च"—इति।

एकस्माज्जाता विभक्ता भ्रातरः परस्परानुमतिमन्तरेण धनसाध्येष्टापूर्त्तादिधर्म्मकारिणो भवेयुः। तथा, धनसाध्यकृष्यादिकर्म्मकारिणो भवेयुः। तथा, विभिन्नोलूखलमुसलादिकर्म्मोपसर्जनद्रव्योपेताः स्युः। तथाच कार्य्येषु भ्रातरो यदि न सम्मताः, तदाताननादृत्य कार्य्यं कुर्य्युः। तथा, विभक्ता भ्रातरः स्वभागान् यदि दद्युर्विक्रीणीयुर्वा, न दद्युर्वा, तत्सर्वं यथेष्टं कुर्युः। यस्मात्ते विभक्ताः स्वधनस्येशाः स्वतन्त्राः स्वामिन इत्यर्थः। यत्तु बृहस्पतिवचनम्,—

"विभक्ता वाऽविभक्ता वा दायादाः स्थावरे समाः।
एको ह्यनीशः सर्वत्र दानाधमनविक्रये"—इति।

तदेवं व्याख्येयम्। अविभक्तेषु द्रव्येषु साधारणत्वादेकस्यानीश्वरत्वात् सर्वैरनुज्ञाऽवश्यं कार्य्या। विभक्ते तूत्तरकालं विभक्तसंशयव्युदासनसौकर्य्याय सर्वाभ्यनुज्ञा। न पुनरेकस्यानीश्वरत्वेन। अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति। यत्तु स्मृत्यन्तरम्,—

"स्वग्रामज्ञातिसामन्तदायादानुमतेन च।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी"—इति।

तस्यायमभिप्रायः। तत्र ग्रामानुमतिः,

"प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः"।

इति स्मरणात् व्यवहारप्रकाशनार्थमेवापेक्ष्यते न पुनर्ग्रामानुमतिमन्तरेण व्यवहारो न सिद्ध्यतीति। सामन्तानुमतिरपि सीमाविप्रतिपत्तिनिरासार्थम्। एवं तदनुमतिरपि* विभक्तसंशयव्युदासेन व्यवहारसौकर्यार्थमेव। हिरण्योदकदानमपि विक्रये कर्त्तव्ये सहिरण्योदकं दत्त्वा दानरूपेण स्थावरविक्रयं कुर्य्यादित्येवमर्थम्†।

"स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया‡"—इति

स्थावरविक्रयस्य निषिद्धत्वात्।

"भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।

तावुभौ पुण्यकर्म्माणौ नियतं स्वर्गगामिनौ"—इति

दानप्रतिग्रहयोः प्रशस्तत्वाच्च। विभागापलापे निर्णयकारणमाह याज्ञवल्क्यः,—

"विभागनिह्नवे§ ज्ञातिबन्धुसाक्षिविलेखनैः‖।

विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः"—इति।

---

* इत्थमेव सर्व्वत्र पाठः। दायादानुमतिरपि,—इति पाठो मम प्रतिभाति।

† हिरण्योदकं दत्त्वा दानरूपेण स्थावरविक्रयं कुर्य्यादित्येवमर्थः,—इति का०।

‡ स्थावरे विक्रयं कुर्य्यान्न दानमननुज्ञया,—इति श्रा०।

§ निर्णये,—इति श्रा०।

‖ राजविलेखितैः,—इति का०।

ज्ञातयः पितृबन्धवः बन्धवस्तु मातुलादयः* । लेख्यं विभागपत्रम् । एभिः विभागनिर्णयो ज्ञातव्यः । यौतकैः पृथक्कृत्तैः गृहक्षेत्रैश्च† । अन्यदपि विभागलिङ्गमाह नारदः,—

"विभागधर्मसन्देहे दायादानां विनिर्णयः ।
ज्ञातिभिर्भागलेख्येन पृथक्कार्य्यप्रवर्त्तनात् ॥
भ्रातॄणामविभक्तानामेको धर्मः प्रवर्त्तते ।
विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक् ॥
साक्षित्वं प्रातिभाव्यञ्च दानग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युः नाविभक्ताः परस्परम् ॥
दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः ।
विभक्तानां पृथक् ज्ञेया दान‡धर्मायव्ययागमाः ॥
येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वरिक्थिषु ।
विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान्" ॥

बृहस्पतिरपि,—

"पृथगायव्ययधनाः कुसीदञ्च परस्परम् ।
वणिक्पथञ्च ये कुर्य्युर्विभक्तास्ते न संशयः"—इति ।

कुसीदवाणिज्यादिभिर्लिङ्गैर्विभागनिर्णयः साक्ष्याद्यभावे वेदितव्यः । तथा च सएव,—

---

* ज्ञातयः पितृबान्धवामातृबान्धवाश्च,—इति ज्ञा॰ स॰ ।

† पृथक्पञ्चमहायज्ञैः श्राद्धादिभिश्च गृहक्षेत्रैश्च,—इति ज्ञा॰ ।

‡ पाक,—इति ग्रन्थान्तरीयः पाठः समीचीनः ।

"साधकं स्थावरस्यान्यं* प्राग्विभागस्य वक्रियनाम्।

अनुमानेन विज्ञेयं न लभ्रुयंच साक्षिणः†"—इति।

साक्ष्यादिसाधकचिह्नान्यपि स एवाह,—

"कुलानुबन्धव्याघातशोढं साक्ष्यसाधनम्।

स्वस्य भोगः स्थावरस्य विभागस्य पृथग्धनम्"—इति।

कुलानुबन्धः पूर्व्वपुरुषैरनुबन्धः। व्याघातः परस्परबोधवला-दपहृतद्रव्यमुच्यते। दर्शनं स्वाम्यात्मनोभोगः‡। परस्परं पृथग्-ग्रहणादेर्विभागचिह्नत्वमविभक्तेषु निषिद्धत्वेनावगन्तव्यम्। तथा च याज्ञवल्क्यः,—

"भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।

प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्"—इति।

साक्षिलेख्यभुक्तिभिर्निर्णयस्याशक्यत्वे,

"युक्तिष्वप्यसमर्थासु शपथैरेनमर्थयेत्"—इति

प्राप्तं दिव्यं निषेधति वृद्धयाज्ञवल्क्यः,—

"विभागधर्मसन्देहे बन्धुसाक्ष्यभिलेखितैः।

विभागभावना कार्या न भवेद्दैविकी क्रिया"—इति।

कथं तत्र निर्णय इत्याकाङ्क्षायामाह मनुः,—

---

* स्थावरं न्यासः,—इति ग्रन्थान्तरीयः पाठः।

† इत्थमेव पाठः सर्व्वत्र। परन्त्वसमीचीनः। न स्यातां पत्रसाक्षिणौ इति ग्रन्थान्तरीयपाठस्तु समीचीनः।

‡ इत्थमेव पाठः सर्व्वत्र। मम तु, व्याघातः परस्पररोधः बलादपहृतं द्रव्यं चोढ़मुच्यते स्वस्यात्मनोभोगः,—इति पाठः प्रतिभाति।

"विभागे यत्र सन्देहो दायादानां परस्परम् ।
पुनर्विभागः कर्त्तव्यः पृथक् स्थानस्थितैरपि"—इति ।

यत्र सन्देहो युक्तिभिरपि नोपैति, तत्र पुनर्विभागः कर्त्तव्य इत्यर्थः । यत्तु तेनैवोक्तम्,—

"सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृद्दानं ददातीति त्रीण्येतानि सकृत् सकृत्"—इति ।

तद्युक्त्यादिभिर्निर्णीतं शक्तौ सत्यां वेदितव्यम् । स्वयं कृतसाम्यन्दिग्धस्य पुनः प्रवर्त्तको राज्ञा दण्डनीय इत्याह वृहस्पतिः,—

"स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत् ।
स राज्ञाऽंशे स्वके स्थाप्यः शासनीयोऽनुबन्धतः"—इति ।

अनुबन्धो निर्बन्धनम् ॥

॥०॥ इति दायविभागः ॥०॥

अथ द्यूतसमाह्वयाख्ये विवादपदे निरूप्येते ।

तयोः स्वरूपमाह मनुः,—

"अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः"—इति ।

अप्राणिभिः अक्षबन्धशलाकादिभिः । प्राणिभिः कुक्कुटादिभिः ।
तथा च नारदः,—

"अक्षबन्धशलाकाद्यैर्देवनं जिह्मकारितम्* ।
पणक्रीड़ा वयोभिश्च पदं द्यूतसमाह्वयम्"—इति ।

---

* जयकारणं,—इति पा० ।

अचा पाशकाः। वस्त्रचर्ममयपट्टिका। शलाका दन्तादिमय्यो दीर्घचतुरस्राः। आद्यशब्देन कपर्दिकादयो गृह्यन्ते। तैः पणपूर्व्वकं यद्देवनं क्रीड़नं क्रियते तद्द्यूतं, वयोभिः पक्षिभिः कुक्कुटादिभिः चकलाश* उन्मत्तमेषादिभिश्च प्राणिभिर्या पणपूर्व्विका क्रीड़ा क्रियते सा समाह्वय इत्यर्थः। बृहस्पतिरपि,—

"परिगृहीताश्चान्योन्यं पक्षिमेषवृषादयः।

प्रहरन्तो† हृतपणास्तं वदन्ति समाह्वयम्"—इति।

द्यूतस्थानं सभिकेनाधिष्ठितं कार्य्यमित्याह सएव,—

"सभिकाधिष्ठिता कार्य्या तस्करज्ञानहेतवे"—इति।

अत्र पक्षान्तरमाह नारदः,—

"अथवा कितवो राज्ञे दत्वा भागं यथोदितम्।

प्रकाशदेवनं कुर्य्युरत्र‡ दोषो न विद्यते"—इति।

द्यूतसभाऽधिकारिणो वृत्तिमाह याज्ञवल्क्यः,—

"ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्।

गृह्णीयात् द्यूतकितवादितराद्दशकं शतम्"—इति।

परस्परप्रीत्या कितवपरिकल्पितपणो ग्लहः। तत्र तदाश्रया एकशतपरिमिता तदधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिः, तस्मात् कितवात् पञ्चकं शतं सभिकः आत्मवृत्त्यर्थं गृह्णी-

---

* चकालावान्,—इति का०। मम तु, हृकलास,—इति पाठः प्रतिभाति।

† प्रहरन्ति,—इति शा०।

‡ रेवं,—इति का०।

यात् । पञ्चपणाश्रयो* यस्मिन् शते तत् शतं पञ्चकम् । जितशतस्य[१] विंशतितमं भागं गृह्णीयादिति यावत् । कितवनिवासार्थं शाला सभा, तत्राधिष्ठितः सभिकः । सभापतिस्तु कल्पिताचादिनिखिलक्रीडोपकरणः तदुपचितद्रव्योपजीवी । इतरस्मात्पूर्णशतवृद्धेः कितवाद्दशकं जितस्यास्य दशमं भागं गृह्णीयादित्यर्थः । एवं स्थापितस्य सभिकस्य कृत्यमाह सएव,—

"स सम्यक् पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितमुद्ग्राहयेत् जेत्रे दद्यात् सत्यं वचः क्षमी"—इति ।

यः कृतवृत्तिर्द्यूताधिकारी राज्ञा धूर्त्तकितवेभ्यो रक्षितः स राज्ञे यथाप्रतिपन्नमंशं दद्यात् । जितं द्रव्यं पराजितसकाशादासेधादिना उद्धृत्य जेत्रे दद्यात् । तथा क्षमी भूत्वा द्यूतकारिणां विश्वासार्थं सत्यं वचो दद्यात् । बृहस्पतिरपि,—

"सभिको ग्राहकस्तत्र दद्याज्जेत्रे नृपाय च"—इति ।

पराजितकितवानां बन्धनादिना पणग्राहकोभवेत् । पणग्रहणादर्वागेव स्वकीयं पणं जेत्रे यथाभागं दद्यादित्यर्थः । तथा च कात्यायनः,—

"जेतुर्दद्यात्स्वकं द्रव्यं जितं ग्राह्यं चिपञ्चकम् ।
सभ्यो वा सभिकेनैव कितवात्तु न संशयः"—इति ।

यदा सभिको जेत्रे जितं द्रव्यं दापयितुं न शक्तः, तदा राजा दापयेदित्याह याज्ञवल्क्यः,—

---

* इत्यमेव सर्व्वत्र पाठः ।

---

(१) स्मृतेर्लंश्रुतिरित्यनुशासनात् शतपदेनात्र स्तह उक्त इति मन्तव्यम् ।

"प्राप्ते नृपतितो भागे प्रसिद्धे द्यूतमण्डले।

जितं ससभिके स्थाने दापयेदन्यथा न तु"—इति।

अन्यथा प्रच्छन्ने सभिकरहिते अतीतराजभागे[१] द्यूते जितं पणं जेत्रे न दापयेदित्यर्थः। अत्र जयपराजयविप्रतिपत्तौ निर्णय-कारणमाह सएव,—

"द्रष्टारो व्यवहाराणां साक्षिणश्च तएव हि।

द्यूतास्यव्यवहाराणां द्रष्टारस्तु तएव हि"—इति।

कितव एव राज्ञा नियोक्तव्यः, न तु श्रुताध्ययनसम्पन्न इत्यु-क्तलक्षणः। साक्षिणश्च तएव द्यूतकारा एव। विष्णुरपि,—

"कितवेष्वेव तिष्ठेरन् कितवाः संशयं प्रति*।

सएव तत्र द्रष्टारस्तएवैषान्तु साक्षिणः"—इति।

साक्षिणां परस्परविरोधे राजा विचारयेदित्याह वृहस्पतिः,—

"उभयोरपि सन्दिग्धौ कितवाः स्युः परीक्षकाः।

यदा विदेषिणस्ते तु तदा राजा विचारयेत्"—इति।

कूटद्यूतकारिणो दण्डमाह याज्ञवल्क्यः,—

"राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपाधिदेविनः"—इति।

कूटैरक्षादिभिरुपाधिभिर्मणिमन्त्रादीनामिति वचनेर्ना ये दि-व्यन्ति तान् श्वपदेनाङ्कयित्वा स्वराज्यान्निर्वासयेदित्यर्थः। निर्वासने विशेषमाह नारदः,—

---

* कितवा एव तिष्ठेरन् कितवानां भ्रमं प्रति,—इति पा०।

† इत्यमेव पाठः सर्व्वत्र।

---

(१) अतीतो राजभागो यस्मात्, तस्मिन्नित्यर्थः।

"कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् ।
कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः"—इति ।

दण्डने विशेषमाह विष्णुः । "द्यूते कूटाक्षदेविनां करच्छेदः, उपाधिदेविनां सन्दंशच्छेदः* "—इति ।

अनियुक्तद्यूतकारिणो दण्डमाह नारदः,—

"अनिर्दिष्टस्तु यो राज्ञा द्यूतं कुर्वीत मानवः ।
स शतं प्राप्नुयात्कामं विनयञ्चैव सोऽर्हति"—इति ।

द्यूते विहितं कर्मजातं समाह्वये अतिदिशति याज्ञवल्क्यः,—

"एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये"—इति ।

सभिकवृत्तिकल्पनादिलक्षणो धर्मः समाह्वयेऽपि विज्ञेय इत्यर्थः । प्राणिद्यूते प्राणिनां जयपराजयौ तत्स्वामिनोरित्याह बृहस्पतिः,—

"द्वन्द्वयुद्धेन यः कश्चिदवसादमवाप्नुयात् ।
तत्स्वामिना पणो देयो यस्तत्र परिकल्पितः"—इति ।

पणपरिकल्पनमपि कृताकृतमित्याह नारदः,—

"परिहासकृतं यच्च यच्चाप्यविदितं नृपे† ।
तत्रापि नाप्नुयात् काम्यमथवाऽनुमतं तयोः"—इति ।

काम्यः कामः पणः । यत्तु मनुनोक्तम्,—

"द्यूतं समाह्वयञ्चैव यः कुर्यात्कारयेत वा ।
तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥

---

* द्यूते कूटाक्षदेवीनां करच्छेदः प्रशस्यते ।
उपाधिदेविनां दण्डः करच्छेद इति स्मृतः,—इति शा० ।

† कर्त्तव्यं विदितं त्वया,—इति शा० ।

प्रकाशमेतत् तास्कर्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
द्यूतं समाह्वयञ्चैव राजा राष्ट्रे निवारयेत्।
राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्* ॥
कितवान् कुशीलवान् क्रौञ्चान् पाषण्डानपि मानवान्।
विकर्मस्थान् शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात्"—इत्यादि,

तत्सर्वं कूटाद्यदेवनविषयतया राज्ञामध्यक्षसभिकरहितविषयतया वा योज्यम्। अतएव बृहस्पतिः,—

"द्यूतं निषिद्धं मनुना सत्यशौचसुखापहम्† ।
अभ्यनुज्ञातमन्यैस्तु राजभागसमन्वितम्॥
सभिकाधिष्ठितं कार्यं तस्करज्ञानहेतुना"—इति।

इति द्यूतसमाह्वयाख्ये विवादपदे निरूपिते।

प्रसक्तोद्देशक्रमानुरोधेन ऋणादानादिसमाह्वयान्तान्यष्टादशव्यवहारपदानि निरूपितानि।

अथ बृहस्पतिना निरूपितं प्रकीर्णकाख्यं विवादपदमभिधीयते।

तस्य लक्षणभेदौ नारदेन निरूपितौ,—

"प्रकीर्णकेषु विज्ञेया व्यवहारा नृपाश्रयाः॥
राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा।

---

* पृथिवीपतौ,—इति शा०।

† धनाप्यहं,—इति का०।

पुनः प्रमाणवशोदः प्रकृतीनां तथैव च ॥
पाषण्डनैगमश्रेणीनगधर्मविपर्य्ययाः ।
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ॥
प्रतिग्रहविलोपश्च लोप आश्रमिणामपि ।
वर्णसङ्करदोषश्च तद्वृत्तिनियमस्तथा ॥
न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात् प्रकीर्णकम्" इति ।

प्रकीर्णके विवादे ये विवादा राजाज्ञोल्लङ्घन-तदाज्ञाकरण-तत्कर्मकरणादिविषयास्ते नृपसमवायिनएव । तच्च स्मृत्याचारव्यपेते मार्गे वर्त्तमानानां प्रतिकूलतामाज्ञाय व्यवहारनिर्णयं नृपएव कुर्य्यात्* । एवं वदता यो नृपाश्रयो व्यवहारस्तत्प्रकीर्णमित्युक्तं भवति । तत्र राजाज्ञाप्रतिघाते† विशेषदण्डमाह याज्ञवल्क्यः,—

"न्यूनं वाऽभ्यधिकं वाऽपि लिखेद्यो राजशासनम् ।
पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः" इति ।

राजदत्तभूमेर्निबन्धनस्य वा परिमाणन्यूनत्वमाधिक्यं वा प्रकाशयद्राजशासनं यो विलिखति, यश्च पारदारिकचौरौ वा गृहीतौ राज्ञेऽनिवेद्य मुञ्चति, तावुभावुत्तमसाहसं दण्डनीयौ । व्यासोऽपि,—

"न्यायस्थाने गृहीत्वाऽर्थं अधर्मेण विनिर्णयम् ।
करोत्युत्तरकार्य्याणि राजद्रव्यविनाशकः ॥
उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवासयेत्" इति ।

तत्कर्मकरणे दण्डमाह याज्ञवल्क्यः,—

---

* विषयास्तान्नृपसमो नृपो वा कुर्य्यात्,—इति पा० ।

† प्रमापणे,—इति पा० ।

"राजयानासनारोहे दण्डो मध्यमसाहसः" इति।

कात्यायनोऽपि,—

"राजक्रीडासु ये सक्ता राजवृत्त्युपजीविनः।
अप्रियस्याख्य यो वक्ता वधं तेषां प्रकल्पयेत्" इति।

राज्ञः कोशापहरणादौ दण्डमाह मनुः,—

"राज्ञः कोशापहर्तृंश्च प्रतिकूलेषु च स्थितान्।
घातयेद्विविधैर्दण्डैररेस्सर्वस्वमेव च" इति।

सर्वस्वापहारेऽपि यद्यस्य जीवनोपकरणं तत्तस्य नापहर्तव्यमित्याह नारदः,—

"आयुधान्यायुधीयानां बीजानि कृषिजीविनाम्।
वेश्यास्त्रीणामलङ्कारान् वाद्यावाद्यानि तद्विदाम्॥
यच्च यस्योपकरणं येन जीवन्ति कारुकाः।
सर्वस्वहरणेऽप्येतन्न राजा हर्तुमर्हति" इति।

ब्राह्मणस्य वधस्थाने मौण्ड्यमाह मनुः,—

"ब्राह्मणस्य वधे मौण्ड्यं पुरान्निर्वासनाङ्कने।
ललाटे चाभिशस्ताङ्कं प्रयाणं गर्दभेन तु" इति।

कोपात्परस्परभेदनादौ दण्डमाह याज्ञवल्क्यः,—

"छिन्नेऽभेदिनो राज* छिद्रादेश्चक्रतस्तथा।
विप्रचिह्नेन शूद्रस्य जीवतोऽष्टशतो दमः" इति।

यत्तु स्मृत्यन्तरेऽभिहितम्,—

"द्विजातिलिङ्गिनः शूद्रान् चित्रदण्डेन घातयेत्" इति।

* राजा,—इति पु॰।

तद्धस्त्वर्थं ब्राह्मणलिङ्गधारणे वेदितव्यम्। ब्राह्मणपीड़ाकारिणो-दण्डमाह मनुः,—

"ब्राह्मणान् बाध्यमानन्तु कामादवरवर्णजम् ।

हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्नृपः" इति ।

शूद्राणां प्रव्रज्यादौ दण्डमाह कात्यायनः,—

"प्रव्रज्यावासिनं शूद्रं जपहोमपरं तथा ।

बधेन शमयेत् पापं दण्ड्यो वा द्विगुणं दमम्" इति ।

एवं शास्त्रोक्तमार्ग(१)माह यमः,—

"एवं धर्मप्रवृत्तस्य राज्ञोदण्डधरस्य च।

यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथाऽव्ययः" इति।

मनुरपि,—

"एवं सर्वानिमान्राजा व्यवहारान् समापयन् ।

व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमाङ्गतिम्" इति ।

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृति-व्याख्यायां व्यवहारमाधवः समाप्तः ॥

समाप्तं चेदं व्यवहारकाण्डम् ॥

समाप्ता चेयं पराशरस्मृतिव्याख्या ॥

शुभमस्तु । श्रीरस्तु ॥

---

(१) शास्त्रोक्तोमार्गो यस्य राज्ञस्तं प्रतीत्यर्थः ।

पराशरमाधवस्य शुद्धिपत्रम्।

(आचारकाण्डस्य)

पृष्ठे।	पङ्क्तौ।	अशुद्धम्।	शुद्धम्।
२	१	प्रजा	प्रज्ञा
२	१३	पर्व्वैं	पूर्व्वैं
४	२	सचितं	सूचितं
५	२५	स्मृतिष	स्मृतिषु
६	१०	प्रत्येक	प्रत्येव
६	११	व्युत्पतृष्ठ	व्युत्पितृष्ठ
६	२४	दस्य	यस्य
७	३	धाव्या संज्ञकौ ...	धाव्यासंज्ञकौ
८	१६	वत्वे	वत्वे
१२	१०	न्याय कुसुमा ...	न्यायकुसुमा
१३	३	क्रमि	कृमि
१४	१५	निर्णयाख्या ...	निर्णयाख्य
१९	१७	त्येष्ठ	ज्येष्ठे
१९	१८	अनिर्व्विंष्ठे कनीयान् निर्व्विंघ्नम्	अनिर्विंष्ठे कनीयान् निर्विंघ्नन्
१९	२१	महावह	मखावह
१९	२१	मखिष	मखिष

पृष्ठे।	पङ्क्तौ।	अशुद्धम्।		शुद्धम्।
२०	२१	मुक्ष ...	...	मुख्य
२१	६	नेक ...	..	नैक
२१	१०	छप्र ...	...	छप्ध
२१	११	आत्वा ...	...	ध्यात्वा
२१	१३	मथ ...	...	यथ
२४	१३	भुव् ...	...	मुव्
२४	१८	मथीषिणः	...	मनीषिणः
२६	५	प्रतं ...	...	व्रतं
२८	८	थत् ...	...	यत्
२८	१२	म्मैन्य ...	...	म्मन्य
२९	४	समुच्चया...	...	समुच्चेया
३१	२६	स्रष्टव्यः ...	...	द्रष्टव्यः
३३	२	आस ...	...	आर
३४	२४	हेतो, ...	...	हेतोः
३६	११	त्पुरे ...	...	त्पुरि
३७	२४	चित्तम्य ...	...	चित्तस्य
३८	९	सार ...	...	मार
३८	२४	पारस्पर्य्यं...	...	पारम्पर्य्यं
३९	९	सञ्ज्ँनी ...	...	सञ्ज्ंनी
३९	१७	मप्मिता...	...	मस्मिता
३९	१९	(१, सू)...	...	(२ पा० ३ सू०)
३९	२२	ममं ...	...	मसं
४०	१४	शूष्म ...	...	शून्य
४५	१६	देवागाच ...	...	देवागाच
४५	१९	प्र- ...	...	स-

पृष्ठे।	पङ्क्तौ।	अशुद्धम्।	शुद्धम्।
४६	९,१०	(अ०, १ पा०, २ सू०)	(६ अ०, ८ पा०, २२ सू०)
४८	२२	प्र. १, का १, ...	प्र०, १ का०, १
५८	१३	धम्म	धर्म्मं
६२	८	सव	सर्वे
६६	५	याज	याच
९०	१०	भूलत्वेन	मूलत्वेन
९२	१	'अश्नुतः' ...	'अश्नुते'
९४	७	प्यस्वेव	प्यस्येव
९६	११	रहस्य	देहस्य
१०२	८	चतुर्भुखाय ...	चतुर्मुखाय
११४	६	निष्कलम् ...	निष्फलम्
११६	१४	योऽम	योऽय
११७	३	ये नैताः... ...	येनैताः
११९	१४,१५	जाति-स्त्री, संस्थितः	स्त्रीर्जाति, संस्थिते
१२५	९	षड्क्ता	षड्भक्ता
१३५	५	विघातिनां ...	विधायिनां
१४१	९	पाठमात्रेण ...	पाठमात्रे न
१४३	७	मन्वादिके ...	मन्वादिकं
१४५	१	ते च	ते च
१५४	६	राजसनेयि ...	वाजसनेयि
१९०	१५	अविद्धान् ...	अविद्वान्
२०३	१६	वशिष्ठ	वशिष्ठ
२०५	२४	पच्चमा	पञ्चमा
२८५	६	अष्टौत्तर ...	अष्टोत्तर
२८६	८	वायुभूतश्च ...	वायुभूतः ख

पृष्ठ।	पङ्क्ती।	अशुद्धम्।		शुद्धम्।
२८८	४	तीर्थं ..	...	तीर्थं
२९०	१९	क्षप् ...	...	क्षिप्
२९२	१०	कृतादारो	...	कृतदारो
३००	१	गुणोपेतो	...	गुणोपेता
३०८	१९	तेनैवौक्तम्	...	तेनैवोक्तम्
३०९	७	यज्ञार्थं...	...	यज्ञार्थं
३१२	१५	मेर ...	...	मेद
३२०	१५	चिरम्राक्षाय	...	चिरम्वाक्षाय
३३३	१८	प्रात्ययो...	...	प्रत्ययो (एवं ३३४ पृष्ठे)
३७२	८	उग्रगाः...	...	उग्रगा (एवमन्यत्र)
३७३	२५	म्रुद्रे ...	...	शूद्रे
३८२	१५	राज्ञो ...	...	राज्ञौ
३८९	२०	क्षिति ...	...	क्षितिं
३९०	२	द्वराम...	...	द्वारामे
३९०	४	दुष्ठ ...	...	दुष्ट
३९०	७	मांसाद्यनोच्छिष्ट ...		मांसाद्यनोच्छिष्ट
३९०	२१	स्वधर्म्माच्चकिताग...		स्वधर्म्माच्चकितान्
४१८	१४	शूश्रुषा ...	...	शुश्रूषा
४१८	१७	शुश्रुषैव ...	...	शुश्रूषैव
४१९	१२	परम् ...	...	परम
४२१	७	वैर्थ्यं ...	...	वैयर्थ्यं
४२१	६	अन्येन ...	...	अन्नेन
४२२	१३	आयो ...	...	अयो
४३७	३	चातुर्मास्या	...	चातुर्मास्य
४६४	२	पतिघ्नी "*	...	पतिघ्नी "

पृष्ठे।	पङ्क्तौ।	अशुद्धम्।		शुद्धम्।
४६४	३	इत्यर्थः ...	...	इत्यर्थः *
४६८	१६	निवृत्तेरभात्	...	निवृत्तेरभावात्
४७१	२	ग्रर्हितम्	...	गर्हितम्
४९३	१	समां ...	...	मासां
४९४	१६	सूद्रायाा	...	सूद्रा
५००	७	न ख्यातां	...	नाख्यातां
५००	१५	जगितेः..	...	जगितोः (एवं परत्र)
५०६	११	सदाऽभ्यर्च्यं	...	सदाऽभ्यर्च्या
५१४	५	चत्रियाच	...	चत्रियायाच
५२३	५	ध्यानं...	...	ध्यानं
५२८	४	ततये ...	...	तर्पये
५३०	१०	कुट्टनवहनं	...	कुट्टनमवहननं
५३३	८	लोम्य ...	...	लोम्यं
५४०	६	कोशा...	...	केशा
५४३	२०	कुठोचरः	...	कुटोचरः
५४५	३	ग्रनागारं	...	सनागारं
५४८	४	तत्व ...	...	तत्त्व
५५१	२	सखास ...	...	सखामा
५५१	२०	दखुन ...	...	दखेन
५५४	१४	विदिदिषु	...	विविदिषु
५५५	१३	नान्यदा	...	नान्यथा
५५८	२१	अनौद्वत्य	...	अनौद्धत्य
५६०	१२	ग्ररीर ...	...	ग्ररीरे
५६४	२२	भिक्षाटनसमुद्योगात् प्राक् केनापि		भिक्षाटनसमुद्योगात् प्राक् केनाप्य-

पृष्ठे।	पङ्क्तौ।	अशुद्धम्।	शुद्धम्।
५७२	१०	प्रकृतः	प्रकृतः
५७३	१३	रचन्त	चरन्त
५८६	१८	यथष्ठो	यथेष्ठा
५८७	१४	उत्पादका ...	उत्पादको
६२१	११	ग्रहः	ग्रहे
६२४	१८	दशरात्रसन्निपाते यदाद्यं	दशरात्राः सन्निपतेयुराद्यं
६२४	१९	न पूर्व्वाशौच ...	पूर्व्वाशौच
६४०	२	सिरस	शिरस
६४१	१२	आघ्राति ...	अघ्राति
६४३	१०	दर्शा	दर्श (एवं परत्र)
६४४	१५	करिष्यति ...	गमिष्यति
६४४	२१	द्वार	द्वारि
६४६	४	तिथियुग्मेषु ...	तिथ्ययुग्मेषु
६५२	२१	देवखातस्थ ...	देवखातस्व
६५३	१५	ब्रह्माण्डपुराणोऽपि	ब्रह्माण्डपुराणेऽपि
६६०	६	धनमार्यम्ले ...	धनमार्यम्ने
६७१	१०	चण्डिका ...	चन्द्रिका
६७६	३	विषयत्वागमात् ...	विषयत्वावगमात्
६७९	९	श्रोतिया	श्रोत्रिया
६९२	३	निर्विष्ठ	निविष्ठ (एवं परत्र)
६९९	६	सम्रद्धाऽपि ...	समृद्धोऽपि
६९९	१३	द्वा	द्वौ
७०३	१४	धृङ्गा	धृङ्गा
७१२	१६	या	यः
७१७	१६	मासं	मांसं

पृष्ठे।	पङ्क्तौ।	अशुद्धम्।		शुद्धम्।
७२२	१	वैजा ...	...	वैज (एवं परत्र)
७४२	५	द्विधाभवत्	...	विधारयेत्
७४४	९	उपनीयं	...	उपनीय
७४४	१४	सर्व्वंपात्रेषु	...	सर्व्वं पात्रेषु
७४४	२१	स्वसत्तादि	...	स्वस्वत्वं वि
७४५	२	स्वसत्तां ...	...	स्वस्वत्वं
७४५	२१	पाणिनि	...	वार्त्तिक
७४६	१७	रक्षोघ्नः ...	...	रक्षोघ्नः
७५०	७	उच्छिष्ट ...	...	उच्छिष्टं
७५०	२२	षण्मासाम्भ	...	षण्मासान् भ
७५९	१६	उच्छिष्टा	...	उत्सृष्टा
७७३	१	पराह्न ...	...	पराह्ने
७७३	१८	वाऽप्याग्निमान्	...	वाऽप्यग्निमान्
७७४	२०	द्वादशाह	...	एकादशाह
७८०	९	गोबाक्षि	...	लौगाक्षि (एवं परत्र)
७८२	९	कर्कन्धु ...	...	कर्कन्धू
७९०	१५	मातामहानामिति		मातामहानिति
७९०	२१	पूरणीयम्	...	संबन्धनीयम्
७९०	२२	मातामहये	...	मातामहयो

अनयोः पर्यावर्तनं कार्यम्।

पराशरमाधवस्याकारादिक्रमेण विषयसूची ।

(आचारकाण्डस्य)

अ ।

आ ।

ई ।

उ ।

ऊ ।

ऋ ।

ग ।

त।

द ।

प।

भ।

म।

य।

श।

ष।

स ।

ह ।

पराशरमाधवोल्लिखितप्रवक्तृणामकारादि-क्रमेण प्रमापनपत्रम् ।

(आचारकाण्डस्य)

अ ।

अथर्व्वा ६१ । ९ ॥

छ ।

छन्दोग वा सामग ७१ । २ ॥ ६१ । ४ ॥ ११७ । ५ ॥ १६३ । ४ ॥ ५०२ । ११ ॥ ५२५ । २, २० ॥

ज ।

जाबाल ५२५ । १५ ॥ ५५५ । १ ॥

त ।

तैत्तिरीय ६१ । २ ॥

य ।

यजुर्वेदी ५२५ । २ ॥

व ।

वाजसनेय ६१ । १० ॥

पराशरमाधवोल्लिखितस्मर्त्तॄणामकारादि-क्रमेण प्रमापनपत्रम्।

(आचारकाण्डस्य)

अ।

अङ्गिराः १७८। १२॥ १८५। २॥ २०८। १२, १७॥ २०९। ९॥
२१८। ६॥ २३३। ८॥ २५७। १२॥ २६१। १२॥ २९७। ७॥
३३८। ११॥ ४५३। ४॥ ५३४। ७॥ ५८४। ६॥ ५९३। १५॥
६०४। २०॥ ६१२। १८॥ ६१७। १२। ६२२। ९॥ ६३१। १६॥
६६८। १७॥ ७१६। १२॥ ७२२। १०॥ ७६८। १४॥

अत्रि २३२। ११॥ २३८। १६॥ २६८। ९॥ २७६। ४॥ २७९। ८॥
२४१। ११॥ ३७४। २॥ ३७५। ४॥ ३७९। १२॥ ३८५। १४॥
५४७। १३॥ ५५२। ६॥ ५५८। १७॥ ५६६। ४॥ ५६९। २॥
६२०। ८॥ ६७३। ६॥ ६८३। १६॥ ७००। ९॥ ७०३। ५॥
७२१। १८॥ ७४४। १९॥ ७४६। ३॥ ७५१। १६॥ ७७२। २॥

आ।

आपस्तम्ब १२७। १०॥ १४७। ९॥ २११। ७॥ २१२। १२॥ २१९।
११॥ २२८। ८॥ २२९। ८॥ २८४। ८॥ २८८। ४, १०॥ २९७।
३, ८॥ २९९। १॥ ३०१। ११, १५, १७॥ ३०६। ७, १०॥ ३१४।
१५॥ ३३९। १४॥ ३४०। ११॥ ३४२। १॥ ३७०। ३॥ ४३१।
६॥ ४३८। १६॥ ४४६। १३॥ ४४७। ४॥ ४५७। ५॥ ४६५।
३॥ ४७७। ६॥ ५२७। २२॥ ५८१। २१॥ ५८८। ६॥ ५९१।

उ ।

ऋ ।

क ।

१५ ॥ ३७७ । ६ ॥ ५१६ । ८ ॥ ५८० । ८ ॥ ७७१ । ४ ॥ ७७३ ।
१० ॥ ७७५ । ३ ॥

गौतम १४७ । ५ ॥ १५३ । १० ॥ १७३ । ८ ॥ २२० । १० ॥ २२७ । १६ ॥
२२६ । १४ ॥ २५७ । १५ ॥ २८२ । १६ ॥ २८४ । १७ ॥ २८५ । ११ ॥
२८६ । ६ ॥ २६६ । १३ ॥ ३०० । ७, ८ ॥ ३५६ । १ ॥ ३७१ । ३ ॥
३७६ । १० ॥ ३७८ । ११ ॥ ४३१ । ६ ॥ ४३६ । २० ॥ ४४४ । ८ ॥
४४५ । १ ॥ ४४८ । ६, १० ॥ ४५४ । १२, २० ॥ ४६६ । २० ॥
४६८ । ६ ॥ ४७५ । ४ ॥ ४९६ । १३ ॥ ४६० । १५ ॥ ५२४ । १६ ॥
५५८ । १६ ॥ ५८४ । १७ ॥ ५८६ । १२ ॥ ५६० । ७ ॥ ५६१ । १६ ॥
५६८ । १५ ॥ ६०३ । ४ ॥ ६१२ । ७ ॥ ६१६ । ६ ॥ ६२४ । ८ ॥
६३२ । ७ ॥ ६४० । २० ॥ ६४२ । ११ ॥ ६४५ । १० ॥ ६६६ । ६ ॥
६८६ । १२ ॥ ६६८ । १६ ॥ ७०२ । ६ ॥ ७१२ । ११ ॥

छ ।

छागलेय ५२६ । १३ ॥ ६७७ । २२ ॥ ७२८ । १२ ॥

ज ।

जातूकर्ण्य ५८१ । ३, १२ ॥ ६७३ । ७ ॥ ७३६ । ८ ॥ ७५६ । १५ ॥ ७६५ ।
१३ ॥ ७६७ । १० ॥ ७७० । ८ ॥

जाबाल ५८१ । ५ ॥

जाबालि २४१ । ७ ॥ २४४ । १० ॥ ४५६ । १५ ॥ ६६५ । ३ ॥ ७६५ । ७,
१६ ॥

जैमिनि ४३६ । २१ ॥ ५६६ । १६ ॥

द।

ध ।

न ।

प ।

ब ।

भ ।

भृगु २२८ । १० ॥ २४४ । १३ ॥ २४५ । १३ ॥ ३८३ । १० ॥ ४५० । १२, १७ ॥ ७९४ । १२ ॥

म ।

मदालसा १५४ । ४ ॥ ७५१ । १ ॥

मनु १२ । ३ ॥ ५२ । ३ ॥ ८० । ७ ॥ १०६ । १० ॥ ११९ । १६ ॥ १३४ । ४ ॥ १३५ । १५ ॥ १३६ । १९ ॥ १३७ । ८ ॥ १४० । २, ५ ॥ १४४ । ८ ॥ १४८ । १० ॥ १४९ । ४ ॥ १५७ । १५ ॥ १५८ । ४ ॥ १६५ । ५ ॥ १७४ । ९ ॥ १७६ । १० ॥ १७७ । ८ ॥ १७९ । १६ ॥ १८२ । १५ ॥ १८३ । ३, १५ ॥ १८५ । ८, १७ ॥ १९० । ८, १३ ॥ २०३ । २, १६ ॥ २०६ । ९ ॥ २१० । ८, १८ ॥ २११ । ८, ११ ॥ २१४ । ६ ॥ २१५ । ११ ॥ २१७ । ९ ॥ २२१ । १३ ॥ २२३ । ७, १८ ॥ २२६ । १२ ॥ २२८ । २ ॥ २५७ । ९ ॥ २६५ । १५ ॥ २७० । १३ ॥ २८० । ५ ॥ २८१ । १७ ॥ २८६ । ६ ॥ २८८ । ११ ॥ २९५ । १३ ॥ २९६ । ११, १४ ॥ २९७ । ११, १९ ॥ २९८ । १३ ॥ २९९ । २ ॥ ३०० । १०, १६ ॥ ३०१ । १, ६ ॥ ३०२ । १४ ॥ ३०३ । ३, २० ॥ ३०४ । १८ ॥ ३०५ । २, ५, २० ॥ ३०६ । २, ४ ॥ ३०७ । ४, १४ ॥ ३०८ । १०, १४, १९ ॥ ३०९ । ३, १७ ॥ ३१० । ८ ॥ ३१२ । २ ॥ ३१४ । ५ ॥ ३३६ । १५ ॥ ३४६ । ४ ॥ ३४७ । ९ ॥ ७४९ । १९ ॥ ३५० । ६ ॥ ३५१ । ६, ९ ॥ ३५३ । २, १७ ॥ ३५४ । ९, २० ॥ ३५६ । १, १३ ॥ ३५८ । २ ॥ ३६४ । १ ॥ ३७० । १९ ॥ ३७७ । ६ ॥ ३८१ । १५ ॥ ३९१ । १, १०, १७ ॥ ३९६ । १ ॥ ३९७ । ३, १४ ॥ ३९८ । ७ ॥ ३९९ । २ ॥ ४०० । १७ ॥ ४०१ । १० ॥ ४०४ । १० ॥ ४०५ । १६ ॥ ४०६ । १२ ॥ ४०७ । ५ ॥ ४०८ । ७ ॥ ४०९ । १२, १७ ॥ ४१० । ११ ॥ ४१२ । २० ॥ ४१३ ।

१० ॥ ४१४ । १४ ॥ ४१६ । ११ ॥ ४१७ । ५ ॥ ४१८ । ३, १५ ॥
४२० । ६, २० ॥ ४२१ । ४ ॥ ४२२ । ८, १६ ॥ ४२६ । ११ ॥
४२९ । ६ ॥ ४३१ । ३, १०, १७, १९ ॥ ४३६ । ६ ॥ ४३७ । १९ ॥
४४० । १९ ॥ ४४१ । ११ ॥ ४४२ । ९ ॥ ४४६ । २, १७ ॥ ४४७ ।
६, १४, १७ ॥ ४४८ । ३, ७, ११ ॥ ४५१ । ७, १०, १५ ॥ ४५३ ।
८, १२ ॥ ४५४ । ६, २१ ॥ ४५५ । १४ ॥ ४५६ । ११ ॥ ४५७ । ६,
१५, २१ ॥ ४५८ । ६ ॥ ४५९ । ११ ॥ ४६० । १४ ॥ ४६२ । १०,
१८ ॥ ४६७ । ५ ॥ ४६८ । १७ ॥ ४७० । ५ ॥ ३७४ । २, १२ ॥
४७५ । ५ ॥ ४७७ । ६ ॥ ४७८ । ६, १६ ॥ ४८१ । ४ ॥ ४८४ । २ ॥
४८५ । १५ ॥ ४८७ । १ ॥ ४८८ । १२ ॥ ४९० । ६ ॥ ४९१ । १० ॥
४९२ । ३, १० ॥ ४९३ । ५, १९ ॥ ४९४ । ७ ॥ ४९५ । ३ ॥ ४९६ ।
१२ ॥ ४९७ । ३ ॥ ४९८ । १४ ॥ ४९९ । ६ ॥ ५०१ । २० ॥ ५०४ ।
१९ ॥ ५०६ । २ ॥ ५०८ । २, ९ ॥ ५०९ । ७, ११ ॥ ५११ । १६ ॥
५१२ । ३, १५ ॥ ५१३ । १४ ॥ ५१८ । २० ॥ ५२१ । ५, १६, २२ ॥
५२३ । ७ ॥ ५२४ । ८ ॥ ५२७ । ३, १२ ॥ ५२८ । ५, १२ ॥ ५२९ ।
८ ॥ ५३१ । १३ ॥ ५३२ । १४ ॥ ५३४ । १८ ॥ ५३६ । ११, १७ ॥
५३८ । १९ ॥ ५४७ । ११ ॥ ५५३ । ४ ॥ ५५७ । १४ ॥ ५६२ । १७ ॥
५६६ । ११ ॥ ५६७ । ८ ॥ ५६९ । ७ ॥ ५७५ । १३ ॥ ५७६ । १२,
१५ ॥ ५७९ । ६ ॥ ५८० । २० ॥ ५८२ । २२ ॥ ५८६ । १ ॥ ५८७ ।
१७ ॥ ५९० । २ ॥ ५९१ । ४ ॥ ५९५ । ४ ॥ ५९८ । १३ ॥ ६०० । २ ॥
६०५ । १८, २० ॥ ६०६ । १८ ॥ ६०८ । १२ ॥ ६१० । ४, ६, २२ ॥
६१३ । ५ ॥ ६१६ । १५ ॥ ६२१ । २० ॥ ६२५ । २१ ॥ ६३१ । २० ॥
६३३ । १२ ॥ ६३४ । ६, १८ ॥ ६५२ । ४ ॥ ६६१ । ५ ॥ ६६६ ।
२१ ॥ ६७८ । ३ ॥ ६७९ । १२ ॥ ६८३ । ४ ॥ ६८४ । २, १४ ॥ ६८५ ।
१२ ॥ ६८७ । ४ ॥ ६९० । ११ ॥ ६९७ । ३ ॥ ६९८ । ११ ॥ ६९९ ।
४ ॥ ७०१ । २ ॥ ७०२ । २ ॥ ७०५ । १८ ॥ ७११ । ११ ॥ ७१२ । ६ ॥

य।

ल ।

व ।

२८० । ११ ॥ २८२ । २, ६ ॥ २८५ । १७ ॥ २८८ । १५ ॥ २६३ । ४ ॥
३०३ । १५ ॥ ३०४ । १२ ॥ ३०७ । ८ ॥ ३१६ । १ ॥ ३२४ । १२ ॥
३३७ । १७ ॥ ३३६ । २० ॥ ३४४ । १४ ॥ ३५१ । २ ॥ ३६१ । २२ ॥
३६२ । १४ ॥ ३६५ । ५ ॥ ३६६ । ३, ११ ॥ ३७८ । १४ ॥ ३८२ । ५ ॥
४४० । ५ ॥ ४५२ । १६ ॥ ४५५ । २० ॥ ४७० । २ ॥ ५०४ । १६ ॥
५०५ । १५ ॥ ५१६ । १५ ॥ ५५० । १० ॥ ५५२ । २० ॥ ५५६ । १५ ॥
५८३ । १५ ॥ ५८६ । १० ॥ ५६३ । ७ ॥ ६२७ । २० ॥ ६५३ । ७ ॥
६७३ । २२ ॥ ७०६ । १७ ॥ ७४५ । १८ ॥ ७५० । १२ ॥ ७५२ । ३ ॥
७६० । १० ॥ ७६४ । १४ ॥ ७६६ । ६ ॥ ७६० । १२ ॥

आ ।

अङ्क २२१ । ६ ॥ २२६ । १५ ॥ २३६ । १२ ॥ २३७ । १३ ॥ २४८ । १०, १६ ॥ २५५ । ३ ॥ २६४ । २ ॥ २६५ । १८ ॥ २७५ । ६ ॥ २८० । ८ ॥ २८३ । ११ ॥ ३०१ । १३ ॥ ३६४ । १७ ॥ ३७४ । ११ ॥ ४३८ । १६ ॥ ४४० । १५ ॥ ४४१ । ४ ॥ ४४३ । ३, १६ ॥ ४४६ । २० ॥ ४६७ । १८ ॥ ५१३ । १ ॥ ५६६ । १ ॥ ५६७ । ६ ॥ ५६८ । २१ ॥ ६०० । ७ ॥ ६०६ । १३ ॥ ६०६ । १ ॥ ६११ । ११ ॥ ६२३ । ६ ॥ ६२५ । ७ ॥ ६४५ । २ ॥ ६४८ । ५ ॥ ६५२ । १३ ॥ ६५३ । १० ॥ ६६६ । १५ ॥ ६८१ । २१ ॥ ६६६ । १८ ॥ ७०४ । ६ ॥ ७१० । ३ ॥ ७१३ । १६ ॥ ७१४ । १६ ॥ ७२२ । १८ ॥ ७३१ । २ ॥ ७४८ । १८ ॥ ७४६ । १३ ॥ ७६६ । १३ ॥ ७७७ । १० ॥ ७८६ । २ ॥

अङ्कुलिखित १८१ । ६ ॥ २२१ । ३ ॥ ३१६ । १२ ॥ ४४२ । ६ ॥ ४५६ । १ ॥ ४६६ । १७ ॥ ४६७ । १८ ॥ ५२७ । १५ ॥ ५८३ । ३ ॥ ६२४ । १४ ॥ ७४७ । १० ॥

अम्भु ७२५ । ४ ॥ ७२६ । ३ ॥

स ।

४८२ । २, १६ ॥ ४८७ । १३ ॥ ५८२ । १३ ॥ ६१८ । २१ ॥ ६४५ ।
१८ ॥

सांख्यायन २०६ । १३ ॥

ह ।

हारीत १३४ । १ ॥ १४४ । १ ॥ १४५ । २ ॥ १५१ । ३ ॥ १५३ । ७ ॥
२१२ । ६ ॥ २२४ । १० ॥ २२० । १७ ॥ २३५ । ६ ॥ २३७ । ३,
१० ॥ २७२ । २ ॥ २७४ । ३ ॥ २८४ । १२ ॥ २६४ । १० ॥ ३०३ ।
६, १३ ॥ ३१० । २१ ॥ ३१७ । ११ ॥ ३२२ । १८ ॥ ३२५ । ७ ॥
३४१ । ७ ॥ ३६३ । ८ ॥ ३८७ । १ ॥ ४२७ । १४ ॥ ४२८ । १० ॥
४३३ । ११ ॥ ४३६ । १५ ॥ ४३८ । २२ ॥ ४३६ । १६ ॥ ४५२ ।
१२ ॥ ४५४ । १८ ॥ ४५६ । १ ॥ ४६१ । ७, १३ ॥ ३७८ । ६ ॥ ४८५ ।
४ ॥ ५०४ । १४ ॥ ५४३ । ६ ॥ ५४७ । २ ॥ ५५२ । २, १२ ॥ ५७६ ।
७ ॥ ५६६ । १५ ॥ ६११ । ८ ॥ ६१७ । ३ ॥ ६२३ । ६ ॥ ६३१ ।
६ ॥ ६३४ । २१ ॥ ६३८ । १६ ॥ ६७५ । ६ ॥ ६८२ । ७ ॥ ६६६ ।
१३ ॥ ७११ । १० ॥ ७६६ । १३ ॥ ७७२ । ७ ॥

पराशरमाधवोल्लिखितानां दार्शनिकाना-मकारादिक्रमेण प्रज्ञापनपत्रम् ।

(आचारकाण्डस्य)

पराशरमाधवोल्लिखितनिबन्धकर्तृणामकारादिक्रमेण प्रज्ञापनपत्रम्।

(आचारकाण्डस्य)

द।

देवस्वामी ६७१ । ११ ॥ ६७३ । १९ ॥ ६८७ । ८ ॥ ७६९ । ५ ॥

स।

संग्रहकार २८५ । ७ ॥ ४४९ । ४ ॥ ४८२ । १० ॥ ५८५ । ६ ॥ ६०६ । १० ॥ ६८९ । ७ ॥ ७३० । ११ ॥

7

पराशरमाधवोल्लिखितानां प्रवचनानामका-रादिक्रमेण प्रज्ञापनपत्रम् ।

(आचारकाण्डस्य)

अ ।

उ ।

क ।

छ ।

ज ।

त ।

प ।

ब ।

म ।

मैत्रावरुणश्रुतिः ५४८ । ४ ॥
मैत्रेयशाखा ८७ । ३ ॥ ११६ । ८ ॥

य ।

यजुर्वेद २५३ । ४ ॥

व ।

वाजसनेयक ४७१ । १४ ॥ ५०३ । ४ ॥ ५३६ । १५ ॥ ५५४ । १५ ॥
६२६ । १२ ॥ ६२७ । ८ ॥
वाजसनेयब्राह्मण १६३ । २ ॥ १९२ । ८ ॥ १८७ । ८ ॥ ५५४ । १५ ॥
वाजसनेयिब्राह्मण १०० । ८ ॥
वाजसनेयिशाखा १० । ८ ॥ १५४ । ६ ॥
वंशब्राह्मण १० । ८ ॥

श्व ।

श्वेताश्वतरशाखा ६८ । ४ ॥ १८६ । ३ ॥
श्वेताश्वतरोपनिषत् ५८ । १, ६ ॥

पराशरमाधवोल्लिखितानामनिर्दिष्टप्रवचनानां श्रुतीनां प्रज्ञापनपत्रम् ।

(आचारकाण्डस्य)

म ।

मन्त्र वा मन्त्रवर्ण १६६ । ६, १२ ॥ ४७१ । ६ ॥ ५०१ । १६ ॥ ५३५ । ६ ॥

श्र ।

श्रुति ६ । १ ॥ १० । ५, १० ॥ ११ । ४ ॥ ३४ । ५ ॥ ३५ । ८ ॥ ४२ । १३ ॥ ४३ । ४, ६ ॥ ४४ । ५ ॥ ४५ । ३ ॥ ४७ । १२ ॥ ४८ । ६ ॥ ५२ । १३, १७ ॥ ५६ । १३ ॥ ६१ । १३ ॥ ६२ । ५ ॥ ६८ । ८ ॥ ८२ । ६ ॥ ८८ । १३ ॥ ६२ । ६, ११ ॥ ६३ । ६, १२ ॥ ६५ । ३, ७, १५ ॥ ६६ । ७, १२ ॥ ६७ । ३ ॥ १०५ । ६ ॥ १०८ । ७ ॥ १०६ । ७ ॥ ११६ । ५ ॥ १३० । १०, ११ ॥ १३७ । ४ ॥ १३८ । १ ॥ १४१ । २ ॥ १५१ । १० ॥ १५२ । ६ ॥ १५४ । १४, १६ ॥ १६२ । ६, १२ ॥ १६४ । ७, ८ ॥ १८२ । १२ ॥ १६१ । १ ॥ १६२ । ११ ॥ १६५ । ६ ॥ १६७ । १४ ॥ १६८ । ४ ॥ १६६ । ४, ७, १० ॥ २०१ । ६ ॥ २०५ । ७, ११ ॥ २७४ । १० ॥ २७६ । १६ ॥ २८७ । ८ ॥ ३११ । १७ ॥ ३१२ । ५ ॥ ३१३ । ४ ॥ ३१४ । १२, १८, १६ ॥ ३३६ । ४ ॥ ३३७ । १३ ॥ ३४२ । १३ ॥ ३४३ । १६ ॥ ३४७ । १ ॥ ३४८ । ७ ॥ ३५३ । १६ ॥ ४६६ । १८ ॥ ४७२ । २ ॥ ४७३ । १० ॥ ४६८ । १२ ॥ ५०० । १२ ॥ ५०१ । १३ ॥ ५०२ । ३ ॥ ५२२ । ८ ॥ ५२५ । ६, ७ ॥ ५२८ । १० ॥ ५३३ । ५ ॥ ५३५ । ५, २२ ॥ ५३८ । २२ ॥ ५४८ । १, १० ॥ ५५१ । ११, १२ ॥ ५५५ । २ ॥ ५५८ । ६ ॥ ५७० । १६ ॥ ५७५ । ५ ॥ ५६२ । १६ ॥ ६६० । १ ॥ ७१५ । २१ ॥ ७७३ । १ ॥

पराशरमाधवोल्लिखितानां स्मृतीनामकारादिक्रमेण प्रमापनपत्रम्।

(आचारकाण्डस्य)

आ।

क।

ग।

च।

प ।

व ।

ष ।

स ।

पराशरमाधवोल्लिखितानामनिर्दिष्टस्मर्तृकानां स्मृतीनां प्रज्ञापनपत्रम्।

(आचारकाण्डस्य)

स ।

स्मृति वा स्मृत्यन्तर ४६ । ६ ॥ ५१ । ११ ॥ ५२ । १५ ॥ ५५ । ११ ॥ ६६ । १२ ॥ १४१ । २ ॥ १८१ । १७ ॥ २०६ । ८ ॥ २१० । १८ । २३१ । ३ ॥ २६८ । १८ ॥ २७२ । १४ ॥ २८४ । २ ॥ २६३ । १३ ॥ ३१८ । १० ॥ ३२६ । ६ ॥ ३२७ । ११ ॥ ३३५ । १३ ॥ ३५० । ३ ॥ ३५३ । १६ ॥ ४०६ । २० ॥ ४४४ । १५ ॥ ४६८ । ८ ॥ ४८७ । ६ ॥ ४६६ । ८ ॥ ५०८ । १७ ॥ ५१७ । १२ ॥ ५२० । ५, ८ ॥ ५२६ । ८ ॥ ५३७ । १८ ॥ ५३८ । ७ ॥ ५४७ । ८ ॥ ५५१ । २, ६ ॥ ५५५ । १४ ॥ ५५६ । ३ ॥ ५६७ । २ ॥ ५७४ । ७ ॥ ५७८ । २२ ॥ ५६२ । १७ ॥ ५६५ । १४ ॥ ५६६ । १३ ॥ ५६७ । ११ ॥ ६०७ । १ ॥ ६१६ । ७ ॥ ६२० । २१ ॥ ६२१ । ४ ॥ ६४६ । १८ ॥ ६५६ । १७ ॥ ६६६ । ६ ॥ ६७१ । ५ ॥ ६७६ । ११ ॥ ६६० । ६ ॥ ६६२ । ५, ८ ॥ ७०७ । १६ ॥ ७०८ । ८ ॥ ७१० । ६ ॥ ७१३ । ११ ॥ ७१५ । १५ ॥ ७२० । १२ ॥ ७२१ । ११ ॥ ७२४ । ४, १२ ॥ ७२८ । ३ ॥ ७३८ । १५ ॥ ७४७ । ८ ॥ ७५२ । १७ ॥ ७६२ । ६ ॥ ७६३ । १० ॥ ७६४ । ११ ॥ ७६५ । ६ ॥ ७६८ । ३ ॥ ७८१ । ६ ॥ ७६० । ३ ॥ ७६२ । १२ ॥ ७६४ । ८ ॥

पराशरमाधवोल्लिखितानां पुराणानामकारादिक्रमेण प्रमाणपत्रम् ।

(आचारकाण्डस्य)

अ ।

आदित्यपुराणे ७६ । ५ ॥ १४७ । १२ ॥ १६४ । ११ ॥ २१६ । ३, ६ ॥ ३२३ । १० ॥ ३७२ । ११ ॥ ३७३ । १० ॥ ४४० । ८, ११ ॥ ४९६ । ९ ॥ ७०४ । १४ ॥

आदिपुराणे २६१ । १ ॥ ४९१ । १३ ॥ ६०३ । ७ ॥ ६१५ । ७॥ ६१९ । ८ ॥ ६५२ । १७ ॥ ६५५ । ७॥ ६६५ । १४ ॥ ६६७ । २० ॥ ६७० ॥ ६ ॥ ७०१ । १२ ॥ ७०७ । ६ ॥ ७२७ । ७ ॥

क ।

कालिकापुराणे ५५६ । ७ ॥

कूर्म्मपुराणे ५२ । ६ ॥ ६३ । ९ ॥ ८४ । १२ ॥ ८५ । १० ॥ ८७ । ५ ॥ ११८ । २ ॥ १३६ । १ ॥ १७१ । ५ ॥ १४२ । १० ॥ १४६ । १४ ॥ १४९ । १, ११ ॥ १५२ । १ ॥ २०१ । १७ ॥ २०२ । १५ ॥ २०७ । १ ॥ २२३ । १० ॥ २२५ । १५ ॥ २३९ । ६ ॥ २५० । २ ॥ २५८ । १० ॥ २७० । ५ ॥ २७४ । ११ ॥ २७९ । २ ॥ २८३ । १६ ॥ २८६ । १४ ॥ २८७ । ५ ॥ २९४ । १२ ॥ ३०६ । १७ ॥ ३०८ । ४ ॥ ३०९ । ९ ॥ ३११ । १३ ॥ ३१९ । ७ ॥ ३२७ । ७ ॥ ३३२ । १२, १८ ॥ ३३५ । १४ ॥ ३३८ । ६ ॥ ३४१ । ४ ॥ ३४२ । १० ॥ ३४४ । ३ ॥ ३४५ । ५ ॥ ३४७ । ६ ॥ ३६० । ५ ॥ ३६५ । २, ११ ॥ ३६६ । ७ ॥

३६८ । ११ ॥ ३७२ । १४ ॥ ३७७ । १५ ॥ ३७६ । १ ॥ ३८६ । ६ ॥ ४२६ । २० ॥ ४३० । ५ ॥ ४३४ । १४ ॥ ४५७ । २ ॥ ४६१ । १६, १७ ॥ ५०१ । ११ ॥ ५१६ । ३ ॥ ५२२ । ३ ॥ ५३० । १३ ॥ ५३२ । ५ ॥ ५३८ । १० ॥ ५३६ । २ ॥ ५६८ । १७ ॥ ५७६ । १५ ॥ ५७६ । ६ ॥ ५८२ । ३ ॥ ५८६ । १६ ॥ ५८७ । २२ ॥ ५८८ । १० ॥ ६१३ । २१ ॥ ६३२ । १६ ॥ ६३५ । ७ ॥ ६३६ । १२ ॥ ६६० । १४ ॥ ६६६ । १४ ॥

ग ।

गरुड़पुराण १८६ । ५ ॥

न ।

नन्दिकेश्वर ३३५ । ८ ॥

नृसिंहपुराण २४२ । १० ॥ २८० । १७ ॥ ३२६ । १६ ॥ ३३७ । ६ ॥ ३५८ । १२ ॥ ३५६ । ६ ॥ ५३४ । ४ ॥ ५३६ । ८ ॥ ५६८ । २ ॥

प ।

पद्मपुराण २२३ । १६ ॥ ५४७ । १६ ॥ ७५५ । १६ ॥

प्रभासखण्ड ६७६ । १६ ॥

पुराणसार ६६ । ७ ॥ ७४ । ६ ॥ ११४ । ७ ॥ २३२ । ६ ॥ ३०५ । १६ ॥ ३२४ । १८ ॥ ३२७ । १५ ॥ ३५३ । १३ ॥ ५१४ । १५ ॥

ब ।

ब्रह्मपुराण १२० । २ ॥ १२३ । ५ ॥ १६६ । १ ॥ २६५ । ६ ॥ ३६० । १२ ॥ ३६६ । १७ ॥ ३७१ । ६ ॥ ५०८ । ५ ॥ ५६२ । १ ॥ ५६३ । १८ ॥ ६०२ । २ ॥ ६०७ । २० ॥ ६०६ । ७ ॥ ६१७ । ६, १६ ॥ ६३४ । ३ ॥ ६३७ । १०, १८ ॥ ६४६ । ८ ॥ ७११ । १६ ॥ ७३६ । ६ ॥

ब्रह्माण्डपुराण १८९ । ९ ॥ २१५ । ५ ॥ २२९ । ११ ॥ २४२ । २ ॥ २४६ । १२ ॥ ३९६ । २२ ॥ ६५३ । १५ ॥ ६६६ । ८ ॥ ६७९ । १८ ॥ ६८० । ३ ॥ ६९६ । ९ ॥ ६९७ । ११ ॥ ६९९ । ३ ॥ ७०९ । १४ ॥ ७२२ । ४ ॥ ७२९ । ६ ॥ ७४२ । ४ ॥ ७४७ । १९ ॥ ७५३ । २, १० ॥ ७७६ । २० ॥

भ ।

भविष्यपुराण वा भविष्यत्पुराण २९८ । २ ॥ ३६८ । ६ ॥ ४४१ । ५ ॥ ४५३ । २ ॥ ४६० । ३ ॥ ६४३ । ७ ॥ ६८४ । १७ ॥ ७११ । ३ ॥ ७१३ । ८ ॥ ७६४ । ७ ॥ ७६९ । ८ ॥ ७७३ । ७, २१ ॥ ७८४ । १० ॥

भविष्योत्तरपुराण १७३ । १४ ॥ १७६ । १३ ॥ १७८ । १ ॥ ५९७ । १२ ॥

म ।

मत्स्यपुराण वा मत्स्य १०२ । ९ ॥ १४६ । १ ॥ १५८ । ९ ॥ १८२ । २ ॥ २४३ । ६ ॥ २६१ । ६ ॥ २९४ । १९ ॥ ३२३ । १५ ॥ ३४४ । ९ ॥ ३८३ । २ ॥ ४६५ । ८ ॥ ५५९ । १३ ॥ ५६० । १ ॥ ५८९ । २१ ॥ ६५७ । १६ ॥ ६५८ । ७ ॥ ६९८ । २ ॥ ७०० । ५ ॥ ७०५ । १४ ॥ ७२२ । १५ ॥ ७२४ । २० ॥ ७२६ । ६, १३ ॥ ७३२ । ९ ॥ ७४३ । १४ ॥ ७५५ । ५, १४ ॥ ७५६ । २ ॥ ७५९ । २ ॥ ७६० । १९ ॥ ७६३ । १९ ॥

मार्कण्डेयपुराण १५९ । ११ ॥ २२४ । १५ ॥ २४३ । १५ ॥ ३४७ । १२ ॥ ३६४ । ९ ॥ ३९६ । १७ ॥ ४६९ । १० ॥ ७०७ । १९ ॥ ७२२ । ७ ॥ ७८७ । ६ ॥

ल ।

लिङ्गपुराण ७५ । १० ॥ ८५ । ६ ॥ ३११ । ८ ॥ ५०४ ॥ २२ ॥ ५५९ । ७ ॥

व ।

श ।

स ।

पराशरमाधवोल्लिखितामनिर्दिष्टपुराणनाम्नां पुराणसन्दर्भानां प्रमापनपत्रम् ।

(आचारकाण्डस्य)

उ ।

उमामहेश्वरसंवाद ७३ । १८ ॥ ४८४ । २१ ॥

प ।

पितृगाथा ३२५ । १९ ॥ ७४४ । २ ॥

पुराण वा पुराणान्तर १२३ । १२ ॥ २२२ । ९ ॥ २३५ । १४ ॥ २६३ । १७ ॥ २८० । २१ ॥ ३०४ । १० ॥ ३१९ । १३ ॥ ३२५ । १ ॥ ३५९ । १५ ॥ ३६२ । ३ ॥ ३६३ । ११ ॥ ३७५ । १ ॥ ३८७ । १३ ॥ ४४२ । १४ ॥ ४७८ । ६ ॥ ४८२ । ७ ॥ ५०३ । २२ ॥ ५४३ । १८ ॥ ६०५ । ३ ॥ ६५६ । २१ ॥ ६६७ । ११ ॥ ६७३ । २० ॥ ६८५ । ४, १५ ॥ ६९७ । १८ ॥ ७०८ । १७ ॥ ७२० । १८ ॥ ७२८ । १८ ॥ ७२९ । १२, १७ ॥ ७३० । ५ ॥ ७३५ । ११ ॥ ७३८ । ३ ॥ ७६१ । २० ॥

व ।

वायवीयसंहिता ५३ । २ ॥

स ।

सूतसंहिता ८६ । ४ ॥

पराशरमाधवोल्लिखितानां इतिहासग्रन्थानां प्रमापनपत्रम् ।

(आचारकाण्डस्य)

अ ।

अनुशासनपर्व्व १२ । ८ ॥ ७३ । १८ ॥ १३३ । ७ ॥ १५६ । १ ॥ २१६ । १६ ॥ ३६७ । १७ ॥ ४०८ । २४ ॥ ४१६ । १७ ॥ ४१९ । ३ ॥ ४२० । ५ ॥ ४८४ । १६ ॥ ४९६ । ५ ॥

अश्वमेधपर्व्व ९९ । २ ॥ १०६ । १७ ॥ १२० । ४ ॥ १५० । १६ ॥ १५२ । १० ॥ ३१३ । १७ ॥ ३२७ । १८ ॥ ३५० । १५ ॥ ३५५ । ३, १३ ॥ ३५६ । ४ ॥ ३६३ । २ ॥ ३६५ । ८ ॥ ३६७ । १६ ॥ ३७० । ६ ॥ ३७४ । ८ ॥ ३७५ । ११ ॥ ३७६ । २ ॥ ४१८ । ४ ॥ ४२८ । १२ ॥ ४९५ । २४ ॥ ५५६ । १९ ॥

आ ।

आरण्यपर्व्व ११८ । ११ ॥ १२१ । १३ ॥ १२२ । १८ ॥ १३४ । ९ ॥

ग ।

गीता ५४ । १५ ॥ ५६ । ३ ॥ ७७ । १२ ॥

म ।

र ।

श ।

पराशरमाधवोल्लिखितानां श्रुतिस्मृतिपुराणेतिहासातिरिक्तग्रन्थानां प्रज्ञापनपत्रम्।

(आचारकाण्डस्य)

ज।

ज्योतिःशास्त्र १८० । १३ ॥ २६२ । ११ ॥

न।

निगम ६७५ । ६ ॥ ७०६ । १५ ॥ ७२९ । १० ॥ ७४७ । १२ ॥ ७४८ । ७ ॥

प।

प्रपञ्चसार ३५ । ३ ॥

ब।

ब्रह्मनिरुक्तं ७२६ । १० ॥

व।

विष्णुधर्म्मोत्तर १६५ । १३ ॥ १७१ । १० ॥ १७२ । ९ ॥ १७५ । ११ ॥ १७८ । १५ ॥ १७९ । १२ ॥ १८७ । १३, १८ ॥ २०२ । १२ ॥ ३६३ । ५ ॥ ३८३ । १६ ॥ ४४० । २ ॥ ६५१ । १४ ॥ ६६० । १९ ॥ ७०६ । ९ ॥ ७२३ । ७ ॥ ७६० । ४ ॥ ७८२ । १० ॥

श।

शिवधर्म्म १७७ । २ ॥

शैवागम १२९ । ६ ॥

पराशरमाधवोल्लिखितानां दार्शनिकग्रन्थानां प्रज्ञापनपत्रम् ।

(आचारकाण्डस्य)

उ ।

ज ।

य

व ।

पराशरमाधवोल्लिखितानां निबन्धग्रन्थानां प्रमापनपत्रम् ।

(आचारकाण्डस्य)

अ ।

अपरार्क ६०२ । १० ।

च ।

चन्द्रिका ६७२ । १० ।

स ।

स्मृतिसंग्रह ७८६ । ५ ॥ ७९६ । २ ॥

पराशरमाधवस्य शुद्धिपत्रम् ।

(व्यवहारकाण्डस्य)

पृष्ठे ।	पङ्क्तौ ।	अशुद्धम् ।		शुद्धम् ।
१	६	आम्वायो	...	आम्नायो
१२	६	प्रायास	...	प्रयास
१८	१३	सम्बर्त्तः	...	संवर्त्तः (एवं परत्र)
१८	१६	येयमुक्ता	...	येयमुक्ता
३३	४	निरीध्यते	...	निरीक्ष्यते
३५	१३	कैवर्त्तश्च	...	कैवर्त्तश्चैव
४८	२	प्रकारः	...	प्रकारः ।
५४	११	ग्रम्भवं	...	सम्भवं
५४	१३	प्रत्यर्यौ	...	प्रत्यर्थौ
५९	६	ग्रंकेत	...	संकेत
६०	६	तत्पित्रा गृतीय	...	त्वत्पित्रा गृहीत
१०६	१४	कालेन	...	काले न
१११	३	घटो	...	घटो
१२१	२१	प्राङमूखः	...	प्राङ्मुखः
१२४	८	पूर्व्वाक्ने	...	पूर्व्वाह्ने
१२७	६	मस्म	...	भस्म
१६९	१९	विवक्षितं	...	अविवक्षितं
१७०	५	स्त्रीशुक्लेषु	...	स्त्रीशुल्केषु
१७०	६	शुक्लं	...	शुल्कं
१७३	७	मृत्मयानां	...	मृण्मयानां (एवमन्यत्र)
१७४	२०	नामयो	...	नाम यो
१७६	१८	भोगाधिशेषे	...	भोगाविशेषे
१७९	१८	सम-	...	स भ-

शुद्धिपत्रम् ।

पृष्ठे ।	पङ्क्तौ ।	अशुद्धम् ।		शुद्धम् ।
१९०	१८	रूपार्यैः	...	रूपार्यैः
१९८	९	स्त्रियै	...	स्त्रियै
२०८	७	दाप्ययै	...	दापयै
२११	१६	न्यास	...	न्यास
२१३	१२	क्षौद्य	...	क्षौद्यं
२१३	१५	त्रातृभिः	...	भ्रातृभिः
२१५	१९	भ्रातिभिः	...	भ्रातृभिः (एवं परत्र)
२२६	२	सुतेपितुः	...	सुते पितुः
२४६	५	प्रद्यत	...	प्रद्यते
२४८	१८	समक्रिया	...	समयक्रिया
२६६	१७	वृत्ति	...	वृति
२६८	८	दद्याद्दत	...	दद्याद्दन्तु
२८३	१६	भस्मार्भिः	...	भस्मादिभिः
२९६	८	सक्थि	...	सक्थि
३०९	१९	पुरुषैः	...	पुरुषैः
३१६	८	प्रक्तं	...	प्रोक्तं
३१७	२२	र्मातुलानी	...	र्मातुलानी
३२८	१८	सत्वत्वम्	...	सत्वम्
३३४	१४	दमुक्तौ	...	दद्युक्तौ
३३४	१८	दत्तो	...	दतो
३५५	१४	सपिण्डाः	...	ऽसपिण्डाः
३५६	१०	सदृस्थानान्तु	...	संदृस्थानान्तु
३६१	१९	र्भागा	...	र्भाग
३७१	८	यत्तासां	...	यात्तासां
३७६	९	याज्ञलक्यः	...	याज्ञवल्क्यः
३९२	१९	तन्	...	तान्

PREFACE.

अवतरणिका ।

पराशरस्मृतेर्माधवाचार्य्यकृता व्याख्या समीचीनो ग्रन्थः । सेयं न परं पराशरस्मृतिव्याख्यानं किन्तु पराशरस्मृतिव्याख्याव्याजेनोपादेयः स्मृतिनिबन्धोऽयं विरचितो माधवाचार्य्येण । सोऽयं ग्रन्थो दाक्षिणात्ये प्रचरद्रूपः । सोऽयं महामहोपाध्यायरघुनन्दनभट्टाचार्य्यप्रभृतिभिः स्मृतिनिबन्धकर्त्तृभिः प्रमाणतयोपन्यस्तः । तस्यैतस्य ग्रन्थराजस्यार्य्यावर्त्ते विशेषतस्तु गौड़मण्डले विरलप्रचारं लुप्तप्रायतामालक्ष्य शास्त्रग्रन्थरत्नपरीक्षितैर्विद्यावारिधिभिरस्यातिकसमितिशोभाकरैः सभासारैस्तन्मुद्रणं स्थिरीकृत्य तच्छोधनादौ नियुक्तोऽयं जनः । मया तु यतमानेन यथामति एतस्य शोधनमकारि । अद्यत्वेऽध्ययनाध्यापनयोरत्यवहृतत्वेन विरलप्रचारतया चास्यैकमपि पुस्तकं परिशुद्धं न लब्धम् । तथापि महता आयासेनास्य शुद्धता कथञ्चित् सम्पादिता । ग्रन्थार्थवैशद्याय टिप्पणमपि तेषु तेषु स्थानेषु विरच्य दत्तम् । तथापि अत्र याऽशुद्धिर्विपश्चितां प्रतिभास्यति सा तैरेव कृपया शोधनीया ।

यानि पुस्तकान्यवलम्ब्यैतस्य शोधनमकरवं तेषामिदानीमुल्लेखः क्रियते । एकं तावदस्यातिकसमाजादागतं मूलमात्रम् । द्वितीयमपि तत एवानीतमाचारप्रायश्चित्तकाण्डद्वयात्मकं व्याख्यासहितम् । तृतीयमपि तस्मादेव समाजात् संगृहीतं आचारकाण्डरूपं व्याख्यासहितमेव । चतुर्थं संस्कृतविद्यामन्दिरात् समासादितमाचारप्रायश्चित्तरूपकाण्डद्वयोपेतं सव्याख्यम् । पञ्चमं शान्तिपुरनिवासिपण्डितरामनाथ-तर्करत्नात् प्राप्तं तादृशमेव । षष्ठं मद्रदेशादानीतं तैलङ्गाक्षरमुद्रितं तथाविधमेव । तदेवमाचार-प्रायश्चित्तकाण्डयोः षट् पुस्तकान्युपलब्धानि । व्यवहारकाण्डस्य चैकं पुस्तकं पण्डितरामनाथ-तर्करत्नात् प्राप्तम् । द्वितीयं संस्कृतविद्यामन्दिरादधिगतम् । तृतीयं काशिकराजकीयसंस्कृतपाठशालातः समानीतम् । तदेवं व्यवहारकाण्डस्य त्रीणि पुस्तकानि संगृहीतानि ।

पराशरस्मृतौ तावत् षड्भिः श्लोकैरूनानि षट् शतानि श्लोकानां विद्यन्ते। ते च श्लोका द्वादशभिरध्यायैर्विभक्ताः। तत्राद्यमध्यायत्रयमाचार-काण्डम्। परार्चीनमध्यायाष्टकं प्रायश्चित्तकाण्डम्। अन्तिमस्त्वध्यायः परि-शिष्टरूपः। आचारो हि धर्म्मानुष्ठानम्। तच्चाद्येनाध्यायत्रयेणोपदिष्टम्। शास्त्रीयं धर्म्ममनाचरतः निषिद्धञ्चानुतिष्ठतो यदनिष्टमापद्यते, तन्निराकर-णार्थं प्रायश्चित्तम्। तच्चाचारोपदेशात् परतः समुपदिष्टम्। यथा कल्प-सूत्रादौ श्रौतधर्म्मानुष्ठानं तदतिक्रमप्रायश्चित्तञ्चोक्तम्, तथेहापि स्मार्त्त-धर्म्मानुष्ठानमतिक्रमप्रायश्चित्तञ्चोक्तं न तु व्यवहारोऽपि पराशरेणोक्तः। परन्तु राजधर्म्मप्रस्तावे, प्रजाधर्म्मेण पालयेदित्यनेन व्यवहारः सूचितः। यद्यपि स्मार्त्तधर्म्मान्तरवत् व्यवहारोऽपि वेदमूल इति सोऽपि धर्म्म एव, एवञ्च स्मार्त्तधर्म्ममुपदिदिक्षोः पराशरस्य व्यवहारोऽप्युपदेष्टुमुचितः, तथापि तस्यैतल्लोकप्रधानत्वादुपदेशो न कृतः। द्विविधो हि धर्म्मः कश्चित् परलोक-प्रधानः कश्चिदैतल्लोकप्रधानः। तत्र परलोकप्रधानं धर्म्ममुपदिदिक्षुराचार्य्यः शौचादिकमेवोपदिष्टवान्, तस्य परलोकप्रधानत्वात्। व्यवहारन्तु नोप-दिदेश तस्यैतल्लोकप्रधानत्वादिति स्थिष्यते। व्याख्याता तु माधवाचार्य्येण आचारकाण्डप्रायश्चित्तकाण्डयोर्व्याख्यानानन्तरं परिशिष्टरूपतया व्यवहार-काण्डमप्युपनिबद्धम्। तदेवं मूलस्याचारप्रायश्चित्तरूपकाण्डद्वयात्मकत्वेऽपि माधवाचार्य्यकृता तद्व्याख्या तु काण्डत्रयवती, आचारकाण्डं प्रायश्चित्तकाण्डं व्यवहारकाण्डञ्चेति।

तत्र प्रथमेऽध्याये चतुर्णां वर्णानां साधारणः (शिष्टाचारः आह्निकञ्च) असाधारणः (षट्कर्म्म क्षितिरक्षादिरूपः) च धर्म्मो निरूपितः। द्वितीये कृष्यादिरूपो जीवनोपाय उपदिष्टः। उद्देशतश्चाश्रमधर्म्मसूचनं कृतम्। तृतीयेऽध्याये अशौचविस्तर उद्देशतः श्राद्धसंग्रहश्चोक्तः। चतुर्थेऽध्याये प्रकी-र्णपापप्रायश्चित्तं पुत्रभेदादि परिवेदनञ्चोपदिष्टम्। पञ्चमेऽध्याये प्रकीर्णपाप-प्रायश्चित्तशेषः आहिताग्निसंस्कारश्चाभिहितः। षष्ठेऽध्याये मलावहसङ्करी-करणोपपातकप्रायश्चित्तान्युक्तानि। शुद्धिश्चान्नरसयोः। सप्तमेऽध्याये रसा-

शातिरिक्तद्रव्यशुद्धिरुपदिष्टा। अष्टमेऽध्याये सामान्यतोगोवधप्रायश्चित्त-मुक्तम्। नवमेऽध्याये रोधादिनिमित्तकगोवधप्रायश्चित्तमनुशिष्टम्। दशमे-ऽध्याये अगम्यागमनप्रायश्चित्तमादिष्टम्। एकादशेऽध्याये अभोज्यभोज-नादिप्रायश्चित्तमादर्शितम्। द्वादशस्त्वध्यायः काण्डद्वयपरिशिष्टरूपः।

पराशरस्मृतौ खल्वस्यां बाहुल्येन कलिधर्म्माणामेवोपदेशः। मुनिभिः समन्वितः किल भगवान् वेदव्यासः कलौ मनुष्याणां शक्तिह्रासेन यथा-वद्धर्म्ममनुष्ठातुमसमर्थानालक्ष्य कृपया वदरिकाश्रमस्थं पितरं पराशरं पृष्ट-वान्। स चैवं पृष्टो धर्म्ममुपदिदेश। अतएवात्र आचारस्य सङ्कोचः प्रायश्चित्तस्य बाहुल्यञ्चोपलभ्यते। लोकानामल्पसामर्थ्यात् आचारसङ्कोचः, पापबाहुल्यात् प्रायश्चित्तविस्तरः। अत्रापि सङ्कोचोऽस्त्येव। यथा गोवधे त्रैमासिकव्रतादिकं मन्वादिभिरुपदिष्टं, ब्रह्महत्यायां च द्वादशवार्षिक-व्रतादिकम्। पराशरेण तु तत्र तत्र यथाक्रमं प्राजापत्यं सेतुदर्शनञ्चोक्तम्। तस्मात् पराशरमते तत्र तत्र तत्तदेव मुख्यं प्रायश्चित्तम्। व्रतान्तरञ्चैतद्वै-कल्पिकम्। यस्य हि शास्त्रे प्रसंशा श्रूयते, तदेव महत्, आयासबाहुल्यं तु न महत्त्वप्रयोजकम्। तथात्वे कृषकाणामायासबाहुल्यात् कर्षणमेव महत् स्यात् गोमूत्राद्यपेक्षया सिंहव्याघ्रादिमूत्राणामुत्कर्षो भवेत्। स्मृत्य-न्तरानुसारेण तु विषयव्यवस्था न समीचीना। सर्व्वासां स्मृतीनामर्वाग्दृशा-ज्ञातुमशक्यत्वात्। स्वपरिज्ञातस्मृत्यनुसारेण व्यवस्थायामभ्युपगम्यमानायान्तु पूर्व्वं तथा व्यवस्थायां कृतायां कालान्तरे स्मृत्यन्तरदर्शने व्यवस्थाया अव्यव-स्थत्वापत्तेः। तस्मात् व्रतान्तरविधानं न व्रतान्तरस्य निवारकम्। इत्थञ्च यत्रैकस्मिन् विषये भिन्नभिन्नासु स्मृतिषु विभिन्नानि व्रतान्युपलभ्यन्ते, तत्र सर्व्वेषां विकल्प एवेति समीचीनः पन्थाः। आयासबाहुल्यात्त्ववान्तरफल-बाहुल्यं महतोव्रतस्याल्पेनांशेन पापक्षयोऽवशिष्टेन चांशेन स्वर्गादिसुखाप्तिर्वा कल्पनीयम्। पापक्षयादिकं प्रकृतफलन्तु विहितेभ्यः सर्व्वेभ्य एवाविशेषेण जायते। एवमल्पव्रतेनापि महतः पापस्य कियानंशः क्षीयते। अस्मिन्नर्थे व्याख्यातृभिर्माधवाचार्य्यैः सर्व्वथा समुपादेयो विचारः प्रवर्त्तित इत्युपारम्यते।

माधवाचार्य्येणेदमपि विचारितम्। तद्यथा। ब्रह्महत्याद्युत्पन्नं पापं द्वादशवार्षिकादिना व्रतेन नश्यतु। कर्म्मजन्यपापस्य कर्म्मणा नाशोपपत्तेः। अभक्ष्यभक्षणजनितन्तु पापं कथं नश्यति? यावता भक्षितस्याभक्ष्यस्य मांस-शोणितादिरूपेण परिणतस्य शरीरेऽवस्थानात्। अपवित्रपदार्थपरिणाम-रूपस्य शरीरस्य कथं प्रायश्चित्तानुष्ठानेन पवित्रता शक्यते वक्तुमित्येवमाशङ्क्य सिद्धान्तितम्। अतएवाभक्ष्यभक्षणप्रायश्चित्ते शङ्खपुष्पीप्रभृतीनां क्वाथस्य पानं विहितम्। तथाच तत्तत्क्वाथपानेनाभक्ष्यद्रव्यपरिणामभूतमांसशोणि-तादेः संशोधनमुपपद्यते। पवित्रतत्तद्द्रव्यक्वाथादीनां मांसशोणितादिरूपेण परिणतानां प्रदुष्टमांसशोणितादिशोधकत्वोपपत्तेरित्यादिकं विचारितम्। एतेनाभक्ष्यभक्षणप्रायश्चित्तं आदिष्टव्रतादिकमेव करणीयं न तत्रानुकल्प-धेनुदानादिकं कर्त्तुमुचितमिति माधवाचार्य्याणामभिप्रायः प्रतीयते।

सा खल्वियं पराशरस्मृतिः कलौ युगे प्रणीतेति तत एवोपलभ्यते। सा चेयं प्रायः सर्व्वासामेव स्मृतीनां परभाविनी। पराशरं पृच्छता वेदव्या-सेन खल्वेवमुक्तम्।

> श्रुता मे मानवाधर्म्मा वाशिष्ठाः काश्यपास्तथा।
> गार्गेया गौतमीयाश्च तथाचौशनसाः श्रुताः।
> अत्रेर्व्विष्णोश्च संवर्त्ताद्दक्षादङ्गिरसस्तथा।
> शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च।
> आपस्तम्बकृता धर्म्माः शङ्खस्य लिखितस्य च।
> कात्यायनकृताश्चैव तथा प्राचेतसान्मुनेः।

तदनेनैतासां स्मृतीनां परतो भगवतो व्यासस्य प्रश्नः, तदुत्तररूपतया च पराशरस्यास्याः स्मृतेरभिधानमिति स्पष्टमवगम्यते। सेयं स्मृतिः पूर्व्व-स्मृतीनां सारसंग्रहभूतेति प्रतीयते। अस्यां हि स्मृतौ क्वचित् स्मृत्यन्तर-वाक्यमविकलमेवोक्तम्। यथा नष्टे मृते प्रव्रजिते इत्यादि नारदस्मृतिवाक्यं तथैवाभिहितम्। क्वचित्त्वंशतो विकलय्य स्मृत्यन्तरवाक्यमिहोपन्यस्तम्। यथा शुद्ध्येद्विप्रो दशाहेन इत्यादि दक्षवाक्यं जातौ विप्रो दशाहेन इत्यंशतो-विकलय्य पठितम्।

व्याख्याकर्त्तुर्माधवाचार्य्यस्य लिपेश्चातुर्य्यं सारल्यञ्च सुप्रसिद्धमिति तत्र न किञ्चिद्वक्तव्यम्। स किल प्रसिद्धस्य बुक्कमहीपतेरमात्य आसीदित्यपि सुप्रसिद्धमेव। किं बहुना सायणाचार्य्य-माधवाचार्य्यावेव तस्य प्रसिद्धेर्मूल-मिति शक्यते वक्तुम्। स खल्वयं माधवाचार्य्यो भारतीतीर्थस्य शिष्य इति अस्मिन्नेव ग्रन्थे कालमाधवादौ चोपलभ्यते। अस्य माधवाचार्य्यस्य जननी श्रीमती, पिता मायणः, सायणभोगनाथौ सहोदरौ। सोऽयं भरद्वाजगोत्रो-त्पन्नः यजुर्वेदी बौधायनशाखीय इत्येतदस्य ग्रन्थस्योपक्रमणिकायां तदुक्त्या-ऽवगम्यते। एवं हि तत्रोक्तम्।

श्रीमती जननी यस्य सुकीर्त्तिर्मायणः पिता।
सायणोभोगनाथश्च मनोबुद्धी सहोदरौ।
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी।
भारद्वाजं कुलं यस्य सर्व्वज्ञः स हि माधव इति।

तदनेन माधवसायणौ सहोदरौ भ्रातराविति स्पष्टमवगम्यते। ये तु माधवसायणयोरभेदं मन्यन्ते, ते कथमिमां माधवाचार्य्यस्योक्तिं न पर्य्या-लोचयन्तीति न खल्वधिगच्छामि। अस्तु तावत्। स खल्वयं माधवाचार्य्यः सायणाचार्य्यस्याग्रजः न त्वनुजः। तथाच सायणाचार्य्यकृतयज्ञतन्त्रसुधा-निधिग्रन्थे।

तस्याभूदन्वयगुरुस्तत्त्वसिद्धान्तदर्शकः।
सर्व्वज्ञः सायणाचार्य्यो मायणार्य्यतनूद्भवः।
उपेन्द्रस्येव यस्यासीदिन्द्रः सुमनसां प्रियः।
महाक्रतूनामाहर्त्ता माधवार्य्यसहोदरः।

तदत्रोपेन्द्रस्येन्द्र इव सहोदरो माधव आसीदित्युक्त्या माधवस्य साय-णाग्रजत्वं प्रतीयते। माधवार्य्येत्यार्य्यपदप्रयोगाच्च तथाऽवगम्यते। अतएव माधवाचार्य्यो बुक्कस्य बुक्कणस्य वाऽमात्य आसीत् सायणाचार्य्यस्तु बुक्कस्य तत्पुत्रस्य हरिहरस्य चामात्य आसीदिति सुतरां सङ्गच्छते। हरिहरस्य बुक्कात्मजत्वं तु यज्ञतन्त्रसुधानिधौ स्पष्टमुपलभ्यते। एवं हि तत्रोक्तम्।

वंशे चान्द्रमसे तदन्वयनिधिः श्रीसङ्गमोऽभून्नृप-
स्तस्मात् प्रादुरभूदभीष्टसुरभिः श्रीबुक्कपृथ्वीपतिः ।
हरिहरनिभभूमा कामदोऽभूज्जगत्यां
हरिहरनरपालस्तस्य भूयस्तनूजः ।

स खल्वयं सायणाचार्य्यो वेदभाष्याणि विरचितवान् । न तु माधवाचार्य्यो वेदभाष्याणां निर्माता । अतएव वेदभाष्ये माधवाचार्य्यनिर्मित-जैमिनीयन्यायमालाग्रन्थस्थः श्लोकः प्रमाणतयोल्लिखितः । तदुद्धरणवेलायां न्यायविस्तरकार आह, —इत्यन्योक्तिरूपेण समुल्लेखः सुतरां सङ्गच्छते । यच्च क्वचित्,—

कृपालुर्माधवाचार्य्यो वेदार्थं वक्तुमुद्यतः ।

इत्युक्तम् । तदपि ज्येष्ठे भ्रातरि सम्मानप्रदर्शनार्थमेव । अतएव स्वंश्रा-श्रयभूतसङ्गममहाराजकृतितया वेदभाष्यस्य तत्रैव क्वचिदुल्लेखो दृश्यते ।

सङ्गमेन प्रकाश्यते ।

इत्यत्र । स्वकृतेरन्यकृतितयोल्लेखः खल्वन्यस्मिन् सम्मानातिशयमवगमयति । तत्रैव वेदभाष्ये तत्तत्प्रकरणपरिसमाप्तौ, "इति सायणाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे" —इत्यादिकं पुष्पिकायां यल्लिखितं तदप्येवं सङ्गच्छते । अपि च धातुवृत्तिर्नाम ग्रन्थः सायणाचार्य्येण निर्मितः । सेयं धातुवृत्तिर्माधवीयेति नाम्ना तेनैव प्रख्यापिता । तथाच धातुवृत्तेरुपक्रम-णिकागतः श्लोकः ।

तेन मायणपुत्रेण सायणेन मनीषिणा ।
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते ॥

वेदभाष्यं सायणाचार्य्यकृतमित्येतच्च तत्कृतयज्ञतन्त्रसुधानिधिग्रन्थात् स्पष्ट-मवगम्यते । तथाच तत्र सायणाचार्य्यं प्रति सभासदामुक्तिः ।

अधीताः सकला वेदास्ते च दृष्टार्थगौरवाः ।
त्वत्प्रणीतेन तद्भाष्यप्रदीपेन प्रथीयसा ॥

सोऽयं माधवाचार्य्यः पुराणसार-पराशरस्मृतिव्याख्या-कालमाधवापरनाम-

। ३

धेय-कालनिर्णयग्रन्थान् विरच्य परतो जैमिनीयन्यायमालां तद्विस्तरं च रचितवान् ।

व्याख्याय माधवाचार्य्यो धर्म्मान् पाराशरानथ ।
तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः ॥

इत्यनेन कालमाधवगतेन श्लोकेन पराशरस्मृतिव्याख्यानानन्तरं कालमाधव-ग्रन्थः प्रणीत इत्यवगम्यते ।

श्रुतिस्मृतिसदाचारपालको माधवो बुधः ।
स्मार्त्तं व्याख्याय सर्व्वार्थं द्विजार्थं श्रौत उद्यतः ॥

इति जैमिनीयन्यायमालाविस्तरगतेन श्लोकेन सर्व्वेषां स्मार्त्तधर्म्माणां व्याख्यानानन्तरं जैमिनीयन्यायमालाविस्तरोरचित इति चावगम्यते । व्याख्यातश्चायं श्लोकः स्वयमेव । तद्यथा । सर्व्ववर्णाश्रमानुग्रहाय पुराणसार-पराशरस्मृतिव्याख्यानादिना स्मार्त्तोधर्म्मः पूर्व्वं व्याख्यातः, इदानीं द्विजानां विशेषानुग्रहाय श्रौतधर्म्मव्याख्यानाय प्रवृत्तः इति ।

अत्रेदमाशङ्क्यते कैश्चित् । सायणमाधवयोर्भिन्नत्व, सर्व्वदर्शनसंग्रहे —

श्रीमत् सायणमाधवः प्रभुरुपन्यास्थत् सतां प्रीतये ।

इत्युपन्यासः कथं सङ्गमनीयः । अत्र य एव सायणः स एव माधव इति सायणमाधवयोरेकत्वमवगम्यते । अत्रैतदालोचनीयम् । पूर्व्वोक्तप्रबन्धेन सायणमाधवौ सहोदरौ माधवस्य स्वर्गगमनात् परतोऽपि सायणो जीवित-आसीत् तदानीमेव तेन यज्ञतन्त्रसुधानिधिर्विरचित इति स्पष्टमवगम्यते । तस्मात् सायणमाधवौ भिन्नावित्यत्र नास्ति सन्देहः । सायणमाधवयो-रभेदनिर्देशस्तु सायणशब्दस्य वंशनामतामप्यवगमति । तथाच माधवा-चार्य्यस्य सोदरो नाम्ना सायण आसीत् सायणमाधवौ द्वावेव तु सायण-वंशोत्पन्नाविति लिख्यते । सायणशब्दस्य वंशनामता तु सर्व्वदर्शनसंग्रह-एव स्पष्टमवगम्यते । एवं हि तत्रोक्तम् ।

श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्य्येण सर्व्वदर्शनसंग्रहः ॥

अत्र सायणदुग्धाब्धिकौस्तुभेनेति विशेषणोपादानात् सायणवंशोत्पन्नत्वं माधवस्यावगम्यते। तथा सायणरचितधातुवृत्तौ,—

अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः।

+ + + +

तस्य मन्त्रिशिखारत्नमस्ति माधवसायणः।

यः ख्यातिं रत्नगर्भेति यथार्थयति पार्थिवीम्॥

× × × ×

तेन मायणपुत्रेण सायणेन मनीषिणा।

आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते॥

अत्र हि तस्येत्यादि श्लोके मायणस्य सायणतयोल्लेखो वंशनामतां तस्याव-गमयति। तेनेत्युत्तरश्लोके च सायणनामधेयत्वं तस्येति धीमद्भिरनुचिन्त-नीयम्। धातुवृत्तेः पुष्पिकायामपि, मायणसुतेन माधवसहोदरेण सायणा-चार्य्येण विरचितायां,— इत्यादि लिखितम्।

इदन्त्विह विचारणीयम्। माधवाचार्य्येण सर्व्वत्रैव ग्रन्थादौ विद्या-तीर्थस्य प्रणामः कृतः। सर्व्वदर्शनसंग्रहस्यादौ तु,—

पारं गतं सकलदर्शनसागराणा-

मात्मोचितार्थचरितार्थितसर्व्वलोकम्।

श्रीशार्ङ्गपाणितनयं निखिलागमज्ञं

सर्व्वज्ञविष्णुगुरुमन्वहमाश्रयेऽहम्।

इत्युक्तम्। विद्यातीर्थस्योल्लेखस्तु न कृतः। किमत्र कारणमिति न निर्णी-यते। परन्तु शार्ङ्गपाणितनयस्तस्य दर्शनशास्त्रे गुरुरासीदित्येवमपि सम्भ-वेत्। इत्यन्तु किं विस्तरेण?

तदेवं माधवाचार्य्यसायणाचार्य्ययोर्ग्रन्थदर्शनात् यावान् माधवा-चार्य्यस्य परिचयोऽवगम्यते, तावानेवात्रोपनिबद्धो न तु कल्पनया कलुषतां नीत इति शिवम्।

कलिकाता राजधान्याम्, शाकाः १८२०। भाद्रे मासि।

सेरपुरनगरवास्तव्यः, श्री चन्द्रकान्त देवशर्म्मा।

पराशरमाधवस्याकारादिक्रमेण विषयसूची ।

व्यवहारकाण्डस्य ।

अ ।

आ ।

इ।

उ ।

ऋ ।

क ।

ख ।

ग ।

च ।

छ ।

ज ।

त ।

द ।

ध ।

न ।

प ।

फ ।

ब ।

भ ।

म ।

य ।

र ।

ल ।

श ।

स ।

विषयः।	पृष्ठे।	पङ्क्तौ।

ह।

पराशरमाधवोल्लिखितस्मृतीनामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(व्यवहारकाण्डस्य)

अ ।

अत्रि १९६ । ६ ॥ २६० । ३ ॥ २८२ । १० ॥

पराशरमाधवोल्लिखितानिर्दिष्टकर्तृनामस्मृतीनां प्रमाणवचनम् ।

(व्यवहारकाण्डस्य)

स ।

स्मृति वा स्मृत्यन्तर वा स्मरण २२ । ७ ॥ ४७ । १२ ॥ ६१ । १, ६ ।
१०४ । १० ॥ १०६ । १५ ॥ ११२ । ६ ॥ ११५ । ८ ॥ १३२ ।
१२ ॥ १३३ । १३ ॥ १३५ । ९, १२, १६ ॥ १३८ । २ ॥ १४१ ।
३ ॥ १५६ । ६ ॥ १९२ । १२ ॥ २०१ । ७ ॥ २१३ । १९ ॥
२३७ । ९ ॥ २५२ । १३ ॥ २६५ । १३ ॥ २६७ । १३, १७ ॥
२७५ । ५ ॥ २८० । ६ ॥ ३३२ । ११, १७ ॥ ३४० । ९ ॥ ३४१ ।
१३ ॥ ३५२ । ३ ॥ ३६० । १ ॥ ३८१ । १६ ॥ ३८४ । २० ॥
३८५ । ३ ॥ ३९५ । २० ॥

पराशरमाधवोल्लिखितगीतावाक्यानां

प्रमापनपत्रम् ।

(व्यवहारकाण्डस्य)

ग ।

गीता ५ । १ ॥

पराशरमाधवोल्लिखितपुराणनाम्नामकारादिक्रमेण

प्रज्ञापनपत्रम् ।

(व्यवहारकाण्डस्य)

भ ।

भविष्यपुराण २९ । १० ॥

म ।

मत्स्यपुराण २१८ । २ ॥

पराशरमाधवोल्लिखितानिर्दिष्टनामपुराणवचनाना-मकारादिक्रमेण प्रज्ञापनपत्रम् ।

(व्यवहारकाण्डस्य)

प ।

पुराण १९४ । १२ ॥

पराशरमाधवोल्लिखितेतिहासनाम्नामकारादि-
क्रमेण प्रमापनपत्रम् ।

(व्यवहारकाण्डस्य)

म ।

महाभारत २८ । ४ ॥

पराशरमाधवोल्लिखितस्मर्त्तृनाम्नामकारादिक्रमेण प्रमाणपत्रम्।

(व्यवहारकाण्डस्य)

आ।

आपस्तम्ब ३२६ । ६ ॥ ३५४ । १६ ॥

उ।

उशना ४२ । ८ ॥ २६८ । १७ ॥ २६९ । १३ ॥ ३८१ । १० ॥ ३८२ । ८ ॥

क।

कात्यायन ७ । १४ ॥ ८ । २० ॥ १२ । ४ ॥ १५ । १६ ॥ १७ । ९ ॥ १८ । ९ ॥ २० । ५ ॥ २२ । १० ॥ २४ । ९, १२ ॥ २५ । १० ॥ २६ । २, १२ ॥ २७ । ४, १३ ॥ ३१ । ८, ११, १४, १९ ॥ ३५ । २ ॥ ३७ । १४ ॥ ३८ । ४ ॥ ४० । ४ ॥ ४१ । १, १४ ॥ ४२ । ११ ॥ ४३ । ३, १० ॥ ४४ । ११ ॥ ४५ । १, ८ ॥ ४६ । १ ॥ ४७ । ९ ॥ ४८ । ३ ॥ ५० । १३ ॥ ५१ । ४, १३ ॥ ५२ । ३ ॥ ५४ । १२ ॥ ५५ । ७ ॥ ५ । २ ॥ ५७ । १०, १५ ॥ ६० । १३, १६ ॥ ६४ । ८ ॥ ६६ । २ ॥ ६८ । ९, २० ॥ ७३ । ८ ॥ ७४ । ४, १२, १५ ॥ ७५ । ३ ॥ ७९ । १३, १९ । ८१ । ३ ॥ ८२ । १३ ॥ ८३ । ७ ॥ ९० । ५ ॥ ९२ । ११ ॥ ९३ । ८ ॥ ९४ । १०, १५ ॥ ९६ । ३, ६,

९ ॥ ९७ । १३ ॥ ९८ । १ ॥ ९९ । ८ ॥ १०० । १७ ॥ १०१ । ३ ॥
१०३ । ३, १२ ॥ १०४ । १४ ॥ १०७ । २, १३ ॥ १०८ । ५ ॥
१०९ । ६ ॥ ११२ । १३ ॥ ११३ । ४, १६ ॥ ११४ । १४ ॥ ११८ ।
२, १२ ॥ ११९ । २, १४ ॥ १२१ । ८ ॥ १३६ । २० ॥ १४१ ।
४ ॥ १४६ । १७ ॥ १४७ । ३ ॥ १५१ । १३ ॥ १५२ । १ ॥ १५४ ।
११, १७ ॥ १५७ । ४ ॥ १५८ । ८, १२ ॥ १५९ । ३ ॥ १६१ ।
२ ॥ १६२ । २२ ॥ १६४ । ४ ॥ १६८ । १७, २० ॥ १६९ । २, ८,
११ ॥ १७० । ३ ॥ १७२ । ३ ॥ ५७६ । २१ ॥ १७७ । ६, ९ ॥
१७९ । ७, १० ॥ १८१ । ८ ॥ १८५ । २१ ॥ १८६ । १८ ॥ १८८ ।
७, १७ ॥ १८९ । ११, १७ ॥ १९१ । १३ ॥ १९२ । २२ ॥ १९३ ।
४ ॥ १९४ । १६ ॥ १९६ । ७, ११, १४, २० ॥ १९७ । ५, १७ ॥
१९८ । ७ ॥ १९९ । ४, १८ ॥ २०० । ११ ॥ २०२ । २२ ॥ २०६ ।
२, १७ ॥ २०७ । १ ॥ २०८ । २० ॥ २१० । ४, ८, १३, २१ ॥
२११ । ७, १८ ॥ २१३ । १३ ॥ २१४ । १, १५ ॥ २१५ । ५, १०,
१५, १८ ॥ २१६ । १७ ॥ २२० । १४ ॥ २२३ । १६, १९ ॥
२२४ । ४ ॥ २२५ । १५ ॥ २२६ । ७, १० ॥ २२८ । २१ ॥ २२९ ।
७, १४ ॥ २३३ । १ ॥ २३५ । ७ ॥ २३७ । ३ ॥ २४१ । ८ ॥ २४३ ॥
२, ८, ९, १७, २० ॥ २४५ । ५ ॥ २५० । १४ ॥ २५१ । ३ ॥
२५४ । १०, १४ ॥ २५६ । ९ ॥ २५८ । २ ॥ २६० । ४ ॥ २६६ ।
५ ॥ २७१ । १७, १८ ॥ २७२ । २, ९ ॥ २७५ । २ ॥ २७६ । ३,
७, १७, १९ ॥ २७७ । २ ॥ २७९ । ९ ॥ २८० । ८, ११ ॥ २८१ ।
१६ ॥ २८३ । ६ ॥ २८५ । ७ ॥ २८६ । ५, ९ ॥ २८७ । १९ ॥
२८८ । १८ ॥ २८९ । ६, १३ ॥ २९१ । ६, १९ ॥ २९४ । ७ ॥
३०५ । ७ ॥ ३१० । ७, १९ ॥ ३११ । १, ७ ॥ ३३५ । ५ ॥ ३३७ ।
१५ ॥ ३३९ । १५ ॥ ३४७ । १७ ॥ ३४८ । ९ ॥ ३५६ । १६ ॥
३५७ । १ ॥ ३५८ । १६ ॥ ३५९ । ३ ॥ ३६८ । ११, १९ ॥ ३६९ ।

ग ।

द ।

न ।

५५ । १३ ॥ ५६ । ७ ॥ ६४ । ११, १८ ॥ ६६ । ४, १६ ॥ ६९ । ५ ॥ ७० । १, ७ ॥ ७२ । ७, १०, १६ ॥ ७६ । १९ ॥ ८१ । ८ ॥ ८३ । १२ ॥ ८४ । ११ ॥ ९२ । १२ ॥ ९३ । १५ ॥ ९४ । ३ ॥ ९५ । ४, २२ ॥ ९७ । ७ ॥ ९८ । १० ॥ १०१ । १० ॥ १०२ । ५, ११, १५, १९ ॥ १०५ । ५, ८ ॥ १०६ । १२ ॥ १०७ । ५, १६ ॥ ११२ । ८ ॥ ११३ । १ ॥ ११७ । ५, १६ ॥ ११८ । ३ ॥ १२० । १० ॥ १२१ । ६, १३ । १२४ । ६ ॥ १२५ । १५ ॥ १२६ । ६ ॥ १२७ । २, २१ ॥ १२९ । ५, ११ ॥ १३० । १४ ॥ १३१ । ४ ॥ १३२ । १७ ॥ १३३ । १४ ॥ १३४ । ५, १८ ॥ १३५ । ११ ॥ १३६ । ११ ॥ १३७ । १४ ॥ १३८ । १२ ॥ १३९ । ३ ॥ १४० । १४ ॥ १४१ । १५ ॥ १४२ । १, ४, ७, १६ ॥ १४३ । २० ॥ १४४ । ८, १९ ॥ १४५ । १८ ॥ १४६ । ५ ॥ १५१ । १६ ॥ १५२ । ६ ॥ १५४ । २ ॥ १५५ । ७, १० ॥ १५९ । १७ ॥ १६० । १५ ॥ १६१ । ९ ॥ १६२ । ३, ११ ॥ १६३ । १४, १८ ॥ १६५ । ३ ॥ १६६ । ९ ॥ १६८ । १४ ॥ १६९ । १४ ॥ १७१ । १३ ॥ १७३ । १५ ॥ १७५ । १५ ॥ १७६ । २ ॥ १७८ । ९ ॥ १८६ । ५, ९, १२ ॥ १८९ । ८ ॥ १९० । ७ ॥ १९२ । १३ ॥ १९४ । ८, १९ ॥ १९५ । ६, १४ ॥ १९७ । १, १४ ॥ १९८ । २२ ॥ १९९ । १० ॥ २०० । ५, १५ ॥ २०१ । २२ ॥ २०२ । १९ ॥ २०३ । ३, १२, १८ ॥ २०४ ! ५, २० ॥ २०६ । ५ ॥ २०७ । १२, १५ ॥ २०९ । १४ ॥ २११ । १२ ॥ २१२ । १ ॥ २१३ । १० ॥ २१७ । ३ ॥ २१८ । ५ ॥ २१९ । १४ ॥ २२२ । २१ ॥ २२४ । ९, १७ ॥ २२५ । ९, १२ ॥ २२७ । १३ ॥ २३० । २, ७, ११, १५ ॥ २३२ । ५, २० ॥ २३३ । १३, १६ ॥ २३५ । १० ॥ २३६ । २, १२ ॥ २३७ । ६, १४ ॥ २३८ । ५, ११, १४ ॥ २३९ । ११ ॥ २४० । १५ ॥ २४१ । २, ५, १२, १८ । २४२ । २, १४, २० ॥ २४३ । १३ ॥ २४४ । १४, १८, २१ ॥

प ।

ब ।

१०३ । १६ ॥ १०४ । ५ ॥ १०५ । २० ॥ १०६ । ६ ॥ १०८ ।
१६ ॥ ११० । ५, ८, १२, १६ ॥ १११ । २, १० ॥ ११४ । ५ ॥
११६ । १७ ॥ ११७ । ११ ॥ १४६ । ८ ॥ १४९ । २ ॥ १५० ।
१० ॥ १५१ १९ ॥ १५४ । ८ ॥ १५६ । १३, १८ ॥ १५७ । १२ ॥
१६० । ५ ॥ १६४ । ११ ॥ १६५ । ११ ॥ १६६ । ३, १५, १९ ॥
१७२ । १९ ॥ १७३ । ९ ॥ १७४ । ५ ॥ १७५ । ५ ॥ १७६ । १२ ॥
१८० । १२, १७, २२ ॥ १८२ । १७ ॥ १८४ । ३ ॥ १८५ । ५,
११, १८ ॥ १८७ । १४ ॥ १९० । १९ ॥ १९१ । १ ॥ १९२ । १९ ॥
१९५ । १० ॥ १९६ । १७ ॥ १९७ । ८, ११ ॥ १९८ । २, १९ ।
१९९ । १५ ॥ २०४ । ८, १७ ॥ २०५ । ३, १३, १६, १९ ।
२०६ । २० ॥ २०७ । २० ॥ २०८ । ५, ११ ॥ २०९ । ३, २१ ॥
२११ । १५ ॥ २१४ । ५, १२ ॥ २१६ । ७ ॥ २१८ । ८, १५,
१९ ॥ २१९ । २ ॥ २२० । १, ६, १०, १९ ॥ २२१ । ३ ॥ २२३ ।
३, ६, ९, १३ ॥ २२४ । १४ ॥ २२६ । २०, २१ ॥ २२७ । ५,
११ ॥ २३१ । ३, ६ ॥ २३२ । ९, १३ ॥ २३६ । १८ ॥ २४० ।
१८, २१ ॥ २४२ । ५, १७ ॥ २४७ । ७, १५, १८ ॥ २४८ । १०,
२० ॥ २५० । ११, १७, २२ ॥ २५१ । ६, ९, १७ ॥ २५५ । १३ ॥
२६१ । १९ ॥ २६३ । १३ ॥ २६९ । २ ॥ २७० । १६, २१ ॥
२७१ । ४ ॥ २७३ । ८, १८ ॥ २७४ । ८ ॥ २७७ । ६, १७ ।
२७८ । ४, ७, ११, १८ ॥ २७९ १ ॥ २८२ । ८, ११ ॥ २८५ ॥
४ ॥ २८९ । १३ ॥ २९४ । १४ ॥ २९५ । ६, १६ ॥ २९७ । १४,
१७ ॥ २९९ । १४ ॥ ३०० । ४, १६ ॥ ३०१ । १७ ॥ ३०७ । ९ ॥
३०९ । १५ ॥ ३१० । १३ ॥ ३१५ । १७ ॥ ३१६ । ७ ॥ ३१८ ।
१६ ॥ ३२२ । ११ ॥ ३२३ । १५ ॥ ३३३ । २२ ॥ ३३५ । ३, १४ ॥
३३७ । १० ॥ ३३८ । १० ॥ ३३९ । १२ ॥ ३४२ । ६, ९ ॥ ३४३ ।
१० ॥ ४५३ । ७ ॥ ३५४ । १० ॥ ३६० । ७ ॥ ३६१ । २, ७ ।

३६४ । १३, २१ ॥ ३६६ । १६, १८ ॥ ३७२ । २ ॥ ३७४ । ११ ॥
३७९ । १२ ॥ ३८० । ७, १६, २० ॥ ३८१ । १७ ॥ ३८२ । १० ॥
३८४ । १४ ॥ ३८६ । १४, १८ ॥ ३८७ । ३ ॥ ३८८ । ८ ॥ ३८९ ।
४, ८ ॥ ३९० । १२ ॥ ३९१ । १२ ॥ ३९२ । ११ ॥ ३९३ । ८, १५ ॥

५७* । ८, ११, १४ ॥ ५८* । १६ ॥ ५९* । २ ॥ ६०* । १४,
२० ॥ ६२* । ३ ॥

बौधायन ३१० । १६ ॥ ३२५ । ७ ॥ ३५४ । ३ ॥ ३७४ । २ ॥

भ ।

भरद्वाज १७४ । १३ ॥ १९३ । ७ ॥

भृगु १९ । ४ ॥ १९९ । ७ ॥

म ।

मनु ५ । ८ ॥ १५ । २ ॥ १८ । २ ॥ २१ । ८ ॥ २२ । १५ ॥ २५ । १३ ॥
२६ । १६ ॥ ३० । ११ ॥ ३१ । ४ ॥ १६ । १ ॥ ४१ । ११ ॥ ४३ ।
१७ ॥ ४६ । १० ॥ ६६ । ७ ॥ ७० । ४ ॥ ७५ । १७ ॥ ७८ । ८ ॥
७९ । २२ ॥ ८० । ८ ॥ ८१ । १४ ॥ ८३ । ४ ॥ १०९ । ३, १९ ॥
११५ । १३ ॥ १५२ । १३, १६ ॥ १५३ । १० ॥ १५५ । १७ ॥
१५६ । १० ॥ १५७ । १२ ॥ १५८ । २२ ॥ १५९ । ६, ९ ॥ १६१ ।
५, १९ ॥ १६२ । १४ ॥ १६४ । १७ ॥ १६७ । ८ ॥ १७१ । ३ ॥
१७२ । ८ ॥ १७८ । १२, २२ ॥ १७९ । ३ ॥ १८० । ११ ॥ १८५ ।
१५ ॥ १९१ । १० ॥ १९२ । १६ ॥ १९३ । १४, २२ ॥ १९८ ।
१३ ॥ २०१ । १६ ॥ २०४ । १४ ॥ २०५ । ९ ॥ २०६ । १०, १४ ॥

२०८ | २, ८, १५ || २०९ | ५, ११ || २१३ | २, ६ || २१५ | २ || २१६ | ५ || २२१ | ६, ९, १४, १७ || २२२ | १३, १७ || २२५ | ६ || २२९ | १७ || २३३ | ५, ९ || २३४ | २१ || २४० | ११ || २४४ | ३, ६, १० || २५३ | ४ || २५७ | १३ || २६२ | १२, १७ || २६३ | १४ || २६४ | २, ६ || २६५ | १, ६, १० || २६६ | १२, १८ || २६८ | १० || २७० | १२ || २७१ | ८ || २७२ | १६ || २७३ | १३ || २७४ | ४ || २७५ | १७, २२ || २७९ | ४ || २८७ | १ || २८८ | ८, १२, २१ || २९० | ३, ८, १३ || २९१ | ९, २२ || २९५ | ९, १२, १८ || २९७ | १, ७ || २९८ | २ || ३०२ | २, १९ || ३०३ | २१ || ३०४ | ९, १९ || ३०५ | १ || ३११ | १५ || ३१५ | ५ || ३१७ | ४, १५ || ३१८ | ७, १३ || ३१९ | ९ || ३२१ | ३, १५, २० || ३२२ | ६, १४ || ३२६ | १२ || ३३० | ११ || ३३४ | ५ || ३३९ | ७ || ३४० | ५, १२, १६ || ३४३ | ३, १६ || ३४४ | ६ || ३४५ | १ || २४७ | १३ || ३४८ | ५, १० || ३४९ | ३, १४ || ३५० | ७, १८ || ३५१ | १३, १९ || ३५४ | १३, १९ || ३५५ | ३ || ३५६ | १४, १९ || ३५७ | ९ || ३५८ | ८, १६ || ३६० | १५ || ३६२ | १४ || ३६३ | ९ || ३६६ | ६, १७ || ३६८ | २, १५ || ३७१ | ७, १६ || ३७२ | ८, ११ || ३७३ | ४ || ३७४ | ९ || ३७७ | २ || ३८० | ३ || ३८२ | ८, १८ || ३८३ | ५, १५ || ३८७ | १७ || ३८८ | ४, १४ || ३९२ | १७ || ३९५ | ५, १४ || ३९६ | २, ११ ||

६४* | ७, ११, १४ ||

मरीचि ४० | ९ || ९३ | १२ || १०९ | १६ || २१६ | १ || २१७ | ६ ||

य

ल

व ।

शङ्खलिखित ८४ । १९ ॥ १११ । १४ ॥ २६७ । २२ ॥ २८० । ६ ॥ ३७१ । २१ ॥

स ।

संवर्त्त १८ । १३ ॥ ३४ । ४ ॥ १०५ । १३ ॥ १०७ । १९ ॥ १६९ । २१ ॥

ह ।

हारीत ८ । १७ ॥ ३५ । ८ ॥ ३९ । १५ ॥ ५४ । ६ ॥ ६२ । २ ॥ ६३ । १५ ॥ ९५ । १२ ॥ १०० । ८ ॥ १०२ । ८ ॥ १०५ । १६ ॥ ११९ । १८ ॥ १५८ । १८ ॥ १६२ । ६ ॥ १६३ । ११ ॥ १७५ । २ ॥ ३२४ । १४ ॥ ३२७ । १९ ॥ ३४८ । १५ ॥ ३५९ । १२ ॥ ३६० । ३ ॥

पराशरमाधवोल्लिखितग्रन्थकर्तृनाम्नामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(व्यवहारकाण्डस्य)

च ।

ध ।

भ ।

म ।

व ।

स ।

पराशरमाधवस्य शुद्धिपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

पृष्ठे ।	पङ्क्तौ ।	अशुद्धम् ।			शुद्धम् ।
१	४	सङ्गि	...	...	सङ्ग
९	७	माज्येन	...	...	माप्येन (एवं परत्र)
११	९	कुत	...	...	ज्ञत
१५	८	मोतम	...	...	गौतम (एवं परत्र)
१५	१६	षष्ठी	...	...	षष्ठी (एवमन्यत्र)
२३	१३	जायना	...	...	याजना
२६	३	शान्त	...	...	सान्त (एवं परत्र)
२६	१२	समे	...	...	सम
३६	१४	द्वारेतौ	...	...	द्वावेतौ
४७	८	मत्या	...	...	मत्याः
५३	१०	जन्मयाम्	...	...	जन्मयार्थम्
५५	१५	वाऽऽज	...	...	वाज
५६	६	रध्र	...	...	रंध्र
५६	१४	ब्राह्मण्या शूद्राजात	...		ब्राह्मण्यां शूद्राज्जात
६५	५	यत्त्वाङ्गि	...	...	यत्त्वङ्गि
६८	१५	अवंत्यां	...	...	ह्यवन्त्यां
६९	१८	दूयं	...	...	द्वयं
७१	५	अकाल	...	...	अपाल
७२	९	शुद्रं	...	...	शूद्रं

पृष्ठे ।	पङ्क्तौ ।	अशुद्धम् ।		शुद्धम् ।
७७	२१	प्रवादिक	...	प्रामादिक
८४	१२	केष्ठ ...	...	कोष्ठ
८६	२	पत्थ ...	...	सत्थ
८६	१७	त्रयम ...	...	त्रयम्
१०२	३	वाक्य ...	...	वाक्य
१२४	२१	शु : ...	...	शुद्धिः
१२६	७	वत्तते ...	...	वर्त्तते
१३२	२	सम्वर्त्त ...	...	संवर्त्त (एवमन्यत्र)
१४१	२	शोधयित्वा	...	शोषयित्वा
१४५	१८	शुचिः ...	...	शुचि
१५३	६	मंणीषिभिः	...	मंनीषिभिः
१६२	२०	सद्भुत ...	...	सद्भूत
१६६	१०	गौदूघरा ...	...	गौह्वरा
१७५	१४	वृक्षर्षं ...	...	वृकर्षं
१७८	७	ते स ...	...	ते
१८६	१६	इम ...	...	इय
१८७	१०	उरि ...	...	उपरि
२००	६	पाद ...	...	पाप
२११	५	च्छेदे ...	...	च्छेदे
२१३	६	ब्रद्धा ...	...	बुद्धा
२१६	१५	सङ्गनार्थं ...	...	मङ्गनार्थं
२२३	४	समता ...	...	समन्ता
२४२	६	ग्राह्मयां ...	...	ब्रह्मायां
२७३	६	विवाहाङ्गीकारेण	...	विवाहानङ्गीकारेण
२७७	१६	ब्रतुसं ...	...	सं

पृष्ठे ।	पङ्क्तौ ।	अशुद्धम् ।	शुद्धम् ।
२९९	१९	डपोष्य ...	... उपोष्य
३०४	१७	वाङ्गु ...	... वाङ्गुं
३०८	५	पूर्वया ...	... पूर्व्वया
३१२	१०	विप्रेद् ...	... पिवेद्
३३१	४	ह्यमिभुंत्वा ...	... ह्यमिभूंत्वा
३३१	१२	गयं ...	... गायं
३३५	२	ब्रह्मोदने ...	... ब्रह्मौदने (एवं परत्र)
३४५	३	सुहृता पूर्व्वया	... सुहृतापूर्व्वया
३५२	५	भरति ...	... भवति
३८३	१२	सिद्ध्यर्थं ...	... सिद्ध्यर्थं
३९४	७	कमतः ...	... कामतः
३९८	२	अर ...	... अतर
४००	७	भक्षं ...	... भैक्षं
४०६	१२	म्रत्यं ...	... म्रत्युं
४०९	२	लोक ...	... लोके
४०९	२१	माविष्ठ ...	... मारिष्ठ
४२४	१	कतोति ...	... करोति
४२७	१४	शुकाम्नस्य ...	... शुष्काम्नस्य
४३८	१३	सकृभ्यासा ...	... सकृदभ्यासा
४४०	१८	कल्प ...	... कल्पं
४४५	१०	नसना ...	... नासना
४४६	२०	फलप्रम् ...	... फलप्रदम्
४४७	१६	जपमू ...	... जपमु
४५२	१३	शुद्ध्यवत्य ...	... शुद्धवत्य
४५२	१८	त्रीण्याज्या ...	... त्रीण्याज्य

पृष्ठा ।	पङ्क्ती ।	अशुद्धम् ।		शुद्धम् ।
४५७	१५	प्रयणो ...	...	प्रयाणो
४६८	११	मूमि ...	...	भूमि
४७०	२०	आहतो ...	...	आहुतो
४७३	४	गोमूत्रषु ...	...	गोमूत्रेषु
४७४	८	गृतीतस्य ...	...	गृहीतस्य
४७४	१२	प्रत्याम्नावा	...	प्रत्याम्नाया
४७५	१०	वद्धचि ...	...	वद्धाग्नि
४८०	८	घर्म्मं ...	...	कर्म्मं
४८०	१७	कत्वात् ...	...	क्षतत्वात्
४८३	१७	पद्यं ...	...	पथ्यं
४८४	५	विंधैः ...	...	वंधैः
४८६	१३	देषैः ...	...	दोषैः
४८७	७	विषयाचकः	...	विषयात्मकः
४८८	१६	राजेसे ...	...	राजसे
४९२	१४	गुष ...	...	गुषं
४९८	८	तामिश्रं ...	...	तामिस्रं
५०८	१	उरःस्तला	...	उरस्तम्भा
५०९	२	रागो ...	...	रोगो
५१०	७	क्रमि ...	...	क्रिमि (एवं परत्र)
५१०	१२	मध्यपथ्य ...	...	मध्यपस्य
५१२	१	चीरवास	...	चीरवासा
५१६	२२	क्षुधर्त्ता ...	...	क्षुधार्त्ता
५२४	६	प्रकार्यां ...	...	प्रकीर्यां
५२५	४	स्नुत्ययः ...	...	स्नुतयः

वबयोः पर्य्यावर्त्तनं स्वयमेव करणीयम् ।

——:o:——

पराशरमाधवस्याकारादिक्रमेण विषयसूची ।

(प्रायश्चित्तकाण्डस्य) ।

अ ।

विषयः ।				पृष्ठे ।	पङ्क्तौ ।

ज ।

त ।

विषयः।	पृष्ठे।	पङ्क्तौ।

प।

भ।

विषयः ।	पृष्ठे ।	पङ्क्तौ ।

म ।

य ।

व।

श।

स ।

ह ।

पराशरमाधवोल्लिखितप्रवक्तृणामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

आ ।

ब ।

स ।

पराशरमाधवोल्लिखितस्मर्त्तॄणामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

अ ।

अत्रि २१ । १४ ॥ ३१ । ३ ॥ १२५ । ३, १३, १९ ॥ १३० । ५ ॥ १३१ । २० ॥ १४५ । २० ॥ ४५८ । ५ ॥

आ ।

आपस्तम्ब ११ । १ ॥ ३० । १७ ॥ ८२ । ८ ॥ ८४ । ३, ७, १० ॥ ८५ । १९ ॥ ९४ । ७ ॥ ९७ । ४ ॥ ९८ । २ ॥ ११८ । १ ॥ १२५ । १० ॥ १२६ । १७ ॥ २०२ । १३ ॥ २०३ । १६ ॥ २०४ । १२ ॥ २०५ । २ ॥ २०६ । २ ॥ २०८ । ८ ॥ २१० । २ ॥ २११ । ३ ॥ २१८ । ४ ॥ २२८ । ७ ॥ २३३ । १५ ॥ २७० । १८ ॥ २७१ । २० ॥ ३०४ । ४ । ३१४ । ९, १६ ॥ ४०० । ५ ॥ ४१६ । १३ ॥ ४३४ । ५ ॥ ४४५ । १५ ॥ ४६० । २२ ॥ ४६१ । ३, ८, १४, १८ ॥

उ ।

उपमन्यु २६२ । २० ॥

उशना ३० । १८ ॥ ४४ । ९ ॥ ४७ । ४ ॥ ५२ । ७ ॥ ६७ । १८ ॥ ७५ । ३ ॥ १३० । १० ॥ १३५ । ६ ॥ १४० । ५ ॥ १४४ । ९, १९ ॥ २५४ । १ ॥ २७० । ३ ॥ २७१ । १५ ॥ २७९ । १२ ॥ २९९ । २ ॥ ३१२ । १८ ॥ ३२० । १७ ॥ ३३४ । ११ ॥ ३६१ । ४ ॥ ४४४ । ११ ॥

ऋ ।

क ।

ग ।

च ।

छ ।

ज ।

द ।

ध ।

न ।

प ।

ब ।

भ ।

म ।

य ।

ल ।

व ।

श ।

स ।

सुमन्तु ४४ । ६ ॥ ७१ । १ ॥ ८२ । १०॥ १४५ । ३ ॥ १६० । १२॥ २४६ ॥ ६ ॥ २६५ । ५ ॥ २६६ । १ ॥ २७२ । १५॥ २७३ । ११ ॥ ३०४ । ११॥ ३०७ । १२॥ ३१८ । ४, ६ ॥ ३५६ । २ ॥ ४०२ । १२, १७ ॥ ४०३ । ३ ॥ ४०७ । ५ ॥ ४१२ । २० ॥ ४१६ । १४ ॥ ४४३ । ६ ॥

संवर्त्त ६२ । ६ ॥ ६३ । ४ ॥ ६७ । १५ ॥ ७० । ४, १३ ॥ ७३ । ७ ॥ ६२ । १५॥ ११७ । १६ ॥ १३२ । २ ॥ १४८ । ३ ॥ १८६ । १४ ॥ २०२ । ८ ॥ २२६ । १६ ॥ २२८ । ४ ॥ २५१ । ५ ॥ २५८ । ७ ॥ २६० । ५ ॥ २६४ । १३ ॥ २६५ । १० ॥ २६८ । १४ ॥ २७०। १० ॥ २७१ । १७ ॥ २७५ । ४ ॥ २८० । ७ ॥ २८१ । ५॥ २६६ । ३ ॥ २६७ । १६ ॥ ३१२ । २ ॥ ३८८ । ३ ॥ ४०० । ३, ६ ॥ ४१४ । २॥ ४३८ । २ ॥ ४४८ । ६ ॥

ह ।

हारीत ४० । १५ ॥ ४१ । ११॥ ४५ । ११ ॥ ५२ । ११ ॥ ५४ । ८ ॥ ५५ । ३ ॥ ५७ । ११ ॥ ५६ । ६ ॥ ७४ । १६॥ ७७ । १८ ॥ ८० । ११ ॥ ८१ । १६, २० ॥ ८८ । १ ॥ ६१ । १४ ॥ ६२ । १८ ॥ ६३ । १८ ॥ ११० । ११ ॥ ११७ । १३ ॥ ११८ । ६ ॥ १४५ । ४ ॥ १७६ । २० ॥ १८१ । ३, १८ ॥ १८३ । १६ ॥ १६४ । ३ ॥ १६६ । १४ ॥ २१७ । १० ॥ २५७ । ८ ॥ २६२ । १२ ॥ २६७ । २ ॥ ३०० । ६ ॥ ३११ । १ ॥ ३३२ । ८ ॥ ३४८ । ६ ॥ ३४६ । १३ ॥ ३६१ । १ ॥ ३६५ । ३ ॥ ४०८ । २० ॥ ४२६ । ४ ॥ ४३० । २० ॥ ४३३ । ४ ॥ ४३४ । १६ ॥ ४३५ । ६ ॥ ४३६ । १४ ॥ ४४० । १२ ॥ ४४६ । २, १२ ॥ ४५० । १३ ॥ ४६० । १ ॥ ४६७ । १६ ॥ ४७२ । ३ ॥ ४८५ । १८ ॥ ५०७ । ११ ॥ ५११ । ६ ॥

पराशरमाधवोल्लिखितपौराणिकानामकारादि-क्रमेण प्रमापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

प ।

पौराणिक ४२५ । १३ ॥

पराशरमाधवोल्लिखितदार्शनिकानामकारादि-क्रमेण प्रज्ञापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

पराशरमाधवोल्लिखितस्मृतिनिबन्धकर्तृणामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

अ ।

अपरार्क १८ । २ ॥

पराशरमाधवोल्लिखितवैयाकरणानामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

व ।

वररुचि ३५२ । १० ॥

पराशरमाधवोल्लिखितप्रवचनानामकारादिक्रमेण प्रज्ञापनपत्रम्।

(प्रायश्चित्तकाण्डस्य)

पराशरमाधवोल्लिखितानामनुक्तप्रवचनानां श्रुतीनामकारादिक्रमेण प्रमापनपत्रम्।

(प्रायश्चित्तकाण्डस्य)

अ।

श्रुति १० । ७ ॥ ३२ । १९ ॥ ४६ । २, ५ ॥ ९८ । १६ ॥ १०३ । ४, १२, १६ ॥ १०६ । १३ ॥ १५८ । ११ ॥ २८२ । ७ ॥ ३५२ । २ ॥ ३५७ । १४ ॥ ४१९ । ७ ॥

पराशरमाधवोल्लिखितस्मृतिग्रन्थानामकारादि-क्रमेण प्रमापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

ऋ ।

ऋग्विधान ५२९ । २ ।

च ।

चतुर्विंशतिमत २९ । १४ ॥ ३५ । २ ॥ ४४ । २ ॥ ७३ । ४ ॥ ८३ । १७ ॥ ८६ । १५ ॥ ११५ । ११ ॥ ११६ । ४ ॥ १५९ । ११ ॥ १६० । ७ ॥ १६४ । ८ ॥ १७१ । ११ ॥ १७५ । १५ ॥ १७८ । १८ ॥ १९७ । १० ॥ २५७ । १७ ॥ २५८ । ४ ॥ २५९ । १३ ॥ २६६ । २ ॥ २७० । ५, ७ ॥ २७१ । ७, १२ ॥ २७२ । २ ॥ २७४ । १० ॥ २७५ । ९ ॥ २८४ । ७ ॥ २८५ । ३ ॥ २९७ । ५ ॥ ३०७ । १ ॥ ३१७ । १८ ॥ ३२० । ४ ॥ ३२४ । १२ ॥ ३२६ । १७ ॥ ३३२ । १०, १५ ॥ ३३८ । १९ ॥ ३७९ । ११ ॥ ३९३ । १४ ॥ ४०८ । ५ ॥ ४१५ । २२ ॥ ४३१ । ३, १७ ॥ ४३९ । ६ ॥ ४५२ । १, २२ ॥ ४५५ । ९ ॥ ४६१ । ५ ॥ ४६४ । ९ ॥ ४७४ । १२ ॥ ४७५ । ६, १२, २१ ॥ ४७६ । १० ॥ ४७७ । १३ ॥

भ ।

भरद्वाजगृह्य ४२६ । १० ।

व ।

ष ।

पराशरमाधवोल्लिखितानामनिर्दिष्टकर्तृकानां स्मृतीनां प्रमापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

स्मृति वा स्मृत्यन्तर ३ । १६ ॥ ४ । १५ ॥ ८ । ११ ॥ ९ । १५ ॥ १० । ११ ॥ ११ । २० ॥ १९ । १७ ॥ २४ । ५ ॥ ३४ । ६ ॥ ३६ । ८ ॥ ५२ । २ ॥ ८६ । १२ ॥ १०६ । १३ ॥ ११४ । ३ ॥ १२७ । ७ ॥ १३१ । ६ ॥ १३२ । १६ ॥ १३६ । २ ॥ १४४ । ५ ॥ १४८ । २० ॥ १५५ । ५ ॥ १५६ । ७ ॥ १६० । २, ३ ॥ १७२ । १७ ॥ २०९ । ७ ॥ २३१ । ५ ॥ २५१ । ११ ॥ २५३ । ५ ॥ २६९ । २१ ॥ २७८ । १० ॥ २८१ । १४ ॥ २९९ । ८ ॥ ३११ । १ ॥ ३१२ । ५ ॥ ३१६ । ६ ॥ ३२५ । १५ ॥ ३३९ । ३ ॥ ३६० । १९ ॥ ४०९ । ८ ॥ ४१० । १० ॥ ४१६ । ९ ॥ ४२० । १८ ॥ ४२४ । १८ ॥ ४२७ । २१ ॥ ४३५ । १२ ॥ ४४५ । १ ॥ ४७४ । १८, २१ ॥ ४७६ । १८ ॥ ४७७ । १, ६ ॥ ४८१ । १, ५ ॥

पराशरमाधवोल्लिखितानां पुराणानामकारादि-क्रमेण प्रमाणपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

अ ।

अग्निपुराण ४६० । २१ ॥

आ ।

आदिपुराण ४४ । १७ ॥ १३६ । १६ ॥

क ।

कूर्म्मपुराण ८८ । १० ॥ ३१६ । १३ ॥ ३६५ । ६ ॥ ३६६ । ६, १० ॥ ३७० ॥ १०, १८ ॥ ३७२ । १० ॥ ४५४ । ११ ॥ ४५५ । १२ ॥

ग ।

गरुड़पुराण ४६४ । ६ ॥ ४६८ । १६ ॥

न ।

प ।

ब ।

भ ।

म ।

ल ।

व ।

स ।

पराशरमाधवोल्लिखितानामनिर्दिष्टपुराणनाम्नां पुराणवाक्यानां प्रमापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

प ।

पुराण १२ । १ ॥ ५९५ । २ ॥

पराशरमाधवोल्लिखितानां स्मृतिपुराणातिरिक्तानां धर्म्मग्रन्थानामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

पराशरमाधवोल्लिखितानां दर्शनग्रन्थानामकारादिक्रमेण प्रमापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

ज ।

जैमिनिसूत्र ३५२ । ६ ॥

व ।

वैयासिकन्यायसूत्र वा वैयासिकसूत्र वा व्याससूत्र १५६ । ३ ॥ ३२५ । १४ ॥ ३५२ । ८ ॥

पराशरमाधवोल्लिखितानां स्मृतिनिबन्धानामकारादिक्रमेण प्रज्ञापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

स ।

स्मृत्यर्थसार ४१७ । ४ ॥

पराशरमाधवोल्लिखितानां व्याकरणग्रन्थानामकारादिक्रमेण प्रमापनपत्रम् ।

(प्रायश्चित्तकाण्डस्य)

व ।

वार्त्तिक ३५२ । १० ।

Nyayabindutīkā, (Text) ... ... Rs. 0 10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-3 @ /6/ each 3 6
Padumawati Fasc. 1 and 2 @ 2/ 4 0
Pariçiṣta Parvan, (Text) Fasc. 1-5 @ /6/ each 1 14
Prithivirāj Rāsa, (Text) Part I, Fasc. 1, Part II, Fasc. 1-5 @ /6/ each ... 2 4
Ditto (English) Part II, Fasc. 1 ... ... 0 12
Prākṛta Lakṣaṇam, (Text) Fasc. 1 ... ... 1 8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-5 @ /6/ each 7 2
Parāçara, Institutes of (English) 0 12
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc. 12 6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each 1 8
Ditto (English) Fasc. 1-3 @ /12/ each 2 4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ 0 12
*Taittereya Saṁhitā, (Text) Fasc. 9-42 @ /6/ each 12 12
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each 7 2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-6 @ /6/ each 12 6
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1 & 2 @ /6/ 0 12
Tul'si Sat'sai, (Text) Fasc. 1-5 @ /6/ each 1 14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/ 4 8
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each 5 4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each 4 8
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each 0 12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each 2 10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1-6 @ /6/ 2 4
Vṛhat Svayambhū Purāṇa, Fasc. 1 to V 1 14

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1-4 @ 1/ each 4 0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1 to 3, @ 1/ each 11 0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each 10 0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ... 4 14
Al-Muqaddasi (English) Vol. I, Fasc. 1 ... ... 0 12
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each 22 0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III Fasc. 1-5, @ 1/12/ each 29 12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each 37 0
Ditto English Fasc, I-III @ 1/ each 3 0
Arabic Bibliography, by Dr. A. Sprenger 0 6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each 7 2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each 3 0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each 21 0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each 14 0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each 3 0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each 3 6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each 1 8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ... 0 12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each 4 8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each 1 2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each 38 4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol III, 1-10 Index to Vol. I Fasc. X & XI & Index to Vol. III, Fasc. XI & XII Index to Vol. II, Fasc. X, XI & XII @ /6/ each 13 2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each ... Rs. 1 14
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each 5 10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 @ /12/ each 9 0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each 7 2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each 2 4
Nukhbatu-l-Fikr, (Text) Fasc. 1 ... ... 0 6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1 and 2 @ /12/ each 1 8
Riyāẓu-s-Salāṭīn, (Text) Fasc. 1–5 @ /6/ each 1 14
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each 4 0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each 1 14
Ditto (English) Fasc. 1–14 @ /12/ each 10 8
Ditto Index 1 0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each... 2 10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each... 2 4
Ten Ancient Arabic Poems, Fasc. 1 & 2 @ 1/8/ each 3 0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each 1 14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each .. 6 6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 ... ... 0 12

ASIATIC SOÇIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each 50 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784–1883 ... 3 0
General Cunningham's Archæological Survey Report for 1863–64 (Extra No., *J. A. S. B.*, 1864) 2 0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J. A. S. B.*, 1868) 2 0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J. A. S. B.*, 1875) 4 0
Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J. A. S. B.*, 1882) 4 0
5. Anīs-ul-Musharrahīn 3 0
6. Catalogue of Fossil Vertebrata 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion 3 8
8. Iṣṭilāhāt-uṣ-Ṣūfīyah, edited by Dr. A. Sprenger, 8vo. 1 0
9. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each... 32 0
10. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ... 2 0
11. Khizānatu-l-'ilm 4 0
12. Mahābhārata, Vols. III and IV, @ 20/ each 40 0
13. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each 18 0
14. Sharaya-ool-Islām 4 0
15. Tibetan Dictionary, by Csoma de Körös 10 0
16. Ditto Grammar „ „ 8 0
17. Kaçmīraçabdāmṛta, Parts I & II 3 0

Notices of Sanskrit Manuscripts, Fasc. 1–26 @ 1/ each 26 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

6-9-98.

Books are supplied by V-P. P.